बौद्धभारतीग्रन्थमाला—७

Bauddha Bharati Series-7

अभिधर्मकोशम्

सम्पादकः

स्वामी द्वारिकादासशास्त्री

Bauddha Bharati Series–7

ABHIDHARMAKOŚA

&

BHĀṢYA

OF

ACHARYA VASUBANDHU

WITH

SPHUTĀRTHĀ COMMENTARY

OF

ĀCĀRYA YAŚOMITRA

PART III

(V and VI Kośasthāna)

Critically edited by

SWAMI DWĀRIKADAS SHASTRI

Ācārya (Vyākaraṇa, Pāli & Bauddha Darśana)

BAUDDHA BHARATI
P. B. 49, VARANASI
1972

बौद्धभारतीग्रन्थमालाप्रकाशनम्-७

आचार्ययशोमित्रकृत-

स्फुटार्थाव्याख्योपेतम्

आचार्यवसुबन्धुविरचितम्

स्वोपज्ञभाष्यसहितम्

अभिधर्मकोशम्

तृतीयो भागः

(पञ्चम-षष्ठकोशस्थाने)

सम्पादक

स्वामी द्वारिकादासशास्त्री

व्याकरणपालि-साहित्य-बौद्धदर्शनाचार्य

१९७२ खिस्टाब्दः] वाराणसी [२५१५ बुद्धाब्दः

प्रकाशिका
© बौद्धभारती
पो० बा० ४९
वाराणसी

Published by
© Bauddha Bharati
P. Box 49
VARANASI (India)

प्रथमं संस्करणम्
मूल्यम् २०.०००
(विंशतिरूप्यकाणि)

First Edition
Price 20.00
(Rupees Twenty)

मुद्रक
तारा प्रिंटिंग वर्क्स
वाराणसी

Printed at
The Tara Printing Works
VARANASI-1.

प्रास्ताविकम्

सुभगां सौगतीं वाचं भजते यः समाहितः ।
साधुरेव स मन्तव्यः सम्यग्दृष्टिर्व्यवस्थितः ।।

मान्या विद्वत्तल्लजाः !

इदं खलु विमृशतामस्माकं मानसं भृशमुल्लासमासादयति यद् वयं बौद्धभारतीस्थापनातस्तुरीयेऽस्मिन् वर्षे इदं महत्त्वशालि, अभिधर्मशास्त्रस्य मुकुटालङ्कारभूतम् आचार्यवसुबन्धुविरचितं सभाष्यम् अभिधर्मकोशाख्यं ग्रन्थरत्नं यशोमित्रकृतस्फुटार्थाव्याख्यासहितं पञ्चमषष्ठकोशस्थानात्मकं श्रीमतां करारविन्देषु समुपाहरामः ।

सर्वैरपि दार्शनिकैर्विदितचरमेवेदं यत् प्रतीत्यसमुत्पादसिद्धान्तो बौद्धदर्शनस्य मूलम् । सिद्धान्तस्यास्य सुखाववोधाय भगवता भिक्षूणां कृतेऽभिधर्मशास्त्रं बहुधा बह्वीभिर्वाचोयुक्तिभिरुपदिष्टम् ।

परन्तु गच्छता कालेनेमा भगवतोऽभिधर्मदेशनाः सारवत्योऽपि अल्पाक्षरत्वात्, असन्दिग्धा अपि विश्वतोमुखत्वात् मध्यमधियां मन्दधियां वा जिज्ञासूनां कृते दुरवगाह्या जाताः । ताँस्तादृशान् जिज्ञासूनवलोक्य करुणैकहृदय आचार्यो वसुबन्धुस्तदभिधर्मशास्त्रं काभिश्चिदपूर्वाभिः कारिकाभिः स्वोपज्ञभाष्यसहितेन अभिधर्मकोशनाम्ना ग्रन्थरत्नेनैवं व्याख्यातवान्, यथा ते तादृशा अपि कियतैवायासेन दुरधिगममेच्छास्त्रमधिगच्छेयुः ।

ततोऽप्यवरस्मिन् काले भाष्यस्यास्य गूढाशयतया तत्रत्यानामभ्युपगमवादानां सिद्धान्तानां च दुरवबोधतया मन्दमतीनामभीष्टसिद्धावन्तरायमवलोक्य आचार्ययशोमित्त्रेणात्र स्फुटार्थाभिधा व्याख्या रचिता । अस्यां व्याख्यायां वसुबन्धुविरचिताः सर्वा अपि कारिकाः प्रत्यक्षरं प्रतिपदं च वादिप्रतिवादिमतवैचित्र्यप्रदर्शनपुरस्सरं भाष्यसहिता व्याख्याताः । एवं च जातः सरलः पन्थाः सर्वेषामभिधर्मशास्त्रजिज्ञासूनां कृते ।

अथ च ततः प्रभृत्येवेदं सव्याख्यमभिधर्मकोशं सौगतसिद्धान्ताववोधाय सर्वैरपि दार्शनिकैरद्यावधि प्रमाणत्वेन स्वीकृतम् ।

अस्येदं महत्त्वमवधार्यैवास्माभिः धर्मकीर्त्तिग्रन्थावलिप्रकाशनेन सहैवास्यापि ग्रन्थरत्नस्य प्रकाशनं समारब्धम् ।

अत्रास्माभिः पाटलिपुत्रीय काशीप्रसाद जायसवाल शोध-संस्थानतः प्रकाशमापन्नं भाष्यम् 'का०' संकेतेन, तथा कलिकाता-नगरतः प्रकाशितं श्रीलाहासम्पादितं चतुर्थकोशस्थानपर्यन्तं स्फुटार्था-व्याख्यापुस्तकम् 'स्फु०' मुद्रितपाठसंकेतेन आदर्शत्वेन स्वीकृतम् । ततश्च जापानदेशीयटोकियोनगरतः अभिधर्मकोशव्याख्याप्रकाशनसमित्या प्रकाशितं श्रीवोगिहारामहोदयसम्पादितं स्फुटार्थव्याख्यापुस्तकं च 'जा०' संकेतेन आदर्शत्वेन स्वीकृतम् ।

मूले भाष्ये च स्फुटार्थानुसार्यैव पाठः स्वीकृतः । पाठान्तरं च टिप्पण्यां स्थापितम् ।

तत्रास्य प्रथमो भागः प्रथम-द्वितीयकोशस्थानात्मकः परारि तत्रभवतां समक्षमुपस्थापितः । परुच्च द्वितीयो भागस्तृतीय-चतुर्थकोशस्थानात्मको मुद्रणमापन्नः । ऐषमोऽयं तृतीयो भागः पञ्चम-षष्ठकोशस्थानात्मकोऽपि सुगतानुभावेन प्राकाश्यमानीतः ।

अवशिष्टोऽशोऽप्यनुपदमेव प्रकाशमेष्यन् विदुषां मनस्तोषमाव-क्ष्यतीत्याशास्ते ।

प्रकाशकः

ग्रन्थ-ग्रन्थकृतां सूची

मूले भाष्ये च व्याख्यायाम् आचार्यामर्या स्मृता इह ।
ग्रन्था वा ग्रन्थकर्तारस्तेषां सूची प्रतायते ॥

अभिधर्मकोशम्

भाष्यस्फुटार्थासहितम्

❀ ॐ नमो बुद्धाय ❀

पञ्चमं कोशस्थानम्

(अनुशयनिर्देशः)

"कर्मजं लोकवैचित्र्यम्" (अभि. ४.१) इत्युक्तम्। तानि[1] च[1] कर्माण्यनुशयवशादुपचयं गच्छन्ति, अन्तरेण चानुशयान् भवाभिनिर्वर्त्तने न समर्थानि भवन्ति। अतो वेदितव्याः—

स्फुटार्थाव्याख्यायां

पञ्चमं कोशस्थानम्

'कर्मजं लोकवैचित्र्यम्' इत्युक्तमिति। चतुर्थस्यादावुक्तम्। अतोऽनेन सम्बन्धेनानुशयोपन्यास इति सम्बन्धं दर्शयति। *तानि च कर्माणि* यथोक्तलक्षणप्रभेदानि *अनुशयवशादुपचयं गच्छन्ति*। विपाकनैयम्येनात्र उक्तिष्ठन्ते। विपाकदानाय नियतीभवन्तीत्यर्थः। *अन्तरेण चानुशयान्* विनानुशयैर्भवस्य जन्मनोऽ*भिनिर्वर्तने* उत्पादने *न समर्थानि भवन्ति* कुशलान्यकुशलानि वा कर्माणि। न ह्यर्हतः पौनर्भविकानि कर्माण्यनित्यानि न सन्ति, अनुशयाभावात्तु पुनर्भवाभिनिर्वर्तने न समर्थानि भवन्ति। अत एवैषामनित्यत्वं सिद्ध्यति।

ह्यर्थे चायं चः पठितव्यः; यस्मादन्तरेणानुशयान् भवाभिनिर्वर्तने न समर्थानि भवन्ति, तस्मादनुशयवशादुपचयं गच्छन्तीत्यभिप्रायः।

अपरे पुनरेतद् व्याख्याद्वयमेवं व्याचक्षते—तानि च कर्माण्यनुशयवशादुपचयं गच्छन्ति। यान्यकृतानि कर्माणि, तान्यनुशयवशात् पुनर्भवाभिनिर्वर्तन उपचीयन्त इत्यर्थः। न ह्यर्हतां कर्माणि पुनर्भवाभिनिर्वर्तन उपचीयन्ते, अन्तरेण चानुशयान् भवाभिनिर्वर्तने न समर्थानि भवन्तीति। यानि च कृतानि, तान्यप्यन्तरेणानुशयान् भवाभिनिर्वर्तने न शक्तानि भवन्ति। न ह्यर्हतां पृथग्जनावस्थायां कृतानि कुशलाकुशलानि पौनर्भविकान्यनित्यानि कर्माणि न सन्ति, अनुशयवैकल्यात्तु तानि भवाभिनिर्वर्तने न समर्थानि—इत्येवं पृथगर्थाभिधानात् समुच्चयेऽयं चकार इति।

१-१. तानि—का०।

मूलं भवस्यानुशयाः,

क्लेशो हि प्रवर्तमानो दश कृत्यानि करोति—मूलं[1] दृढीकरोति, सन्ततिमवस्थापयति, क्षेत्रमापादयति, निःष्यन्दं निर्वर्तयति, कर्मभवमभिनिर्हरति, स्वसम्भारं परिगृह्णाति, आलम्बने संमोहयति, विज्ञानस्रोतो नमयति, कुशलपक्षाद्व्युत्क्राम्यति[2], बन्धनार्थं च स्फरति धात्वनतिक्रमणयोगेनेति[3]।

कति चेमेऽनुशयाः ? समासेन षट्।

कतमे ?

मूलं भवस्यानुशया इति। पुनर्भवस्य कर्मभवस्य वा मूलम् अनुशया इत्यभिप्रायः। *मूलं दृढीकरोतीति*। प्राप्तिहि मूलम्। तामनुच्छेदार्थेन दृढीकरोतीत्यर्थः। *सन्ततिमवस्थापयतीति*। परम्परया क्लेशप्रबन्धं स्थापयतीत्यर्थः। *क्षेत्रमापादयतीति*। आश्रयमारमोत्पत्त्यनुकूलं करोतीत्यर्थं। *निष्यन्दं निर्वर्तयतीति*। स्वनिष्यन्दमुपक्लेशं जनयति। तद्यथा—राग आह्रीक्यौद्धत्यमत्सरान् जनयति, द्वेषः क्रोधेर्ष्ये इत्यादि। *कर्मभवमभिनिर्हरतीति*। कर्म एव भवः = कर्मभवः, तं पुनर्भवाभिनिर्वृत्तये जनयतीत्यर्थः। इदमस्य 'मूलं भवस्यानुशयाः' इत्यर्थसन्दर्शनार्थम्। *स्वसम्भारं परिगृह्णातीति*। स्वसम्भारः = क्लेशस्यायोनिशो मनस्कारः, तं परिगृह्णाति। तस्यानागतस्य हेतुभावेनावतिष्ठत इत्यर्थः। *आलम्बने सम्मोहयतीति*। यथाभूताग्रहणात्, बुद्ध्युपघाताद् वा सम्मोहयतीति। *विज्ञानस्रोतो नमयतीति*। विज्ञानसन्ततिमालम्बने पुनर्भवे वा नमयति।

यदि 'मूलं भवस्य' इति पुनर्भवग्रहणम्, इदमस्योदाहरणम्। *कुशलपक्षाद् व्युत्क्राम्यतीति*। कुशलपक्षान् परिहापयति। *बन्धनार्थं च स्फरति*। बन्धनकार्यं व्याप्नोति, तनोतीत्यर्थः। कथम् ? इत्याह—*धात्वनतिक्रमणयोगेन*। धात्वनतिक्रमणप्रकारेणेत्यर्थः। तदिदमुक्तं भवति—यः क्लेशो यद्धातुकः स तं धातुं नातिक्राम्यतीति।

षोडशेत्यन्यः। एषु षट् प्रक्षिप्य। आश्रयदौष्ठुल्यं जनयति, अकर्मण्यतापादनात्। गुणान् द्वेष्टि, तद्विरोधित्वात्। अपवादास्पदीकरोति, विद्वद्विगर्हितकायकर्मोत्थापनात्। सत्पथादुद्वर्तयति, विपरीतदैशिकसंसेवाभिमुखीकरणात्। विविधानर्थबीजं रोपयति, सर्वसंसारव्यसनानां तत्प्रभवत्वात्। आधिपत्यफलेन च लोकस्यानिष्टमुपसंहरति, तद्वेगेन बाह्यभावविकारापत्तेः।

---

१. मूलं च–का०। २. व्युत्क्रामति–का०। ३. ०नतिक्रमयो०–का०।

षड्रागः प्रतिघस्तथा ।

मनोऽविद्या च दृष्टिश्च विचिकित्सा च,

तथाग्रहणं रागवशेनान्येषामप्यालम्बनानुशायितज्ञापनार्थम्[1] । एतच्च पश्चात् प्रवेदयिष्यामः ।

ते पुनः ॥ १ ॥

षड्रागभेदा सप्तोक्ताः,

त एते षडनुशयाः सूत्रे रागस्य द्विधा भेदं कृत्वा **सप्तोक्ताः**—कामरागानुशयः, प्रतिघानुशयः, भवरागानुशयः, मानानुशयः, दृष्ट्यनुशयः, विचिकित्सानुशय इति ।

कथमिदं ज्ञातव्यम्—कामराग एवानुशयः कामरागानुशयः, अहोस्वित् कामरागस्यानुशयः कामरागानुशयः ? किं चातः ? कामराग एवानुशयश्चेत् सूत्रविरोधः—"इहैकत्यो न कामरागपर्यवस्थितेन चेतसा बहुलं विहरति । उत्पन्नस्य कामरागपर्यवस्थानस्योत्तरनिःसरणं[2] यथाभूतं प्रजानाति । तस्य तत्कामरागपर्यवस्थानं स्थामशः सम्यक्त्वसुसमवहतं[3] सानुशयं प्रहीयते" इति ।

रागवशेनान्येषामपीति । यत्र रागः तत्रालम्बनेऽन्ये प्रतिमहादयोऽप्यनुशेरते । "प्रेमाद् द्वेषो जायते, मानादयोऽपि" ( ) इति *सूत्रम्* । अत एव च रागानुशयनाभावाद् अनास्रवविसभागधात्वोः क्लेशा नानुशेरत इति । *एतच्च पश्चात् प्रवेदयिष्याम* इति । "यद्धि वस्तु आत्मदृष्टितृष्णाभ्यां स्वीकृतम्, तत्रान्येऽप्यनुशया अनुशयितुमुत्सहन्ते, आर्द्रे इव पटे रजांसि संस्थातुम्" ( ) इत्येतत् ज्ञापयिष्यामः ॥ १ ॥

आहोस्वित् कामराग एवानुशय इति । *वैभाषिकनयेन* पर्यवस्थानमेवानुशयः । *वात्सीपुत्रनयेन* प्राप्तिरनुशयः । *सौत्रान्तिकनयेन* बीजम् । *उत्तरनिःसरणमिति* । पश्चान्निःसरणमित्यर्थः । *स्थामशः सुसमवहतम्* । बलशः सुष्ठु सम्यग् अवहतमित्यर्थः । *सानुशयं प्रहीयत* इति । इदमत्रोदाहरणम् । इदमत्र विरुद्ध्यते । सहयोगसमासे हि अन्यत्वं दृष्टम्, तद्यथा—सपुत्रो देवदत्त इति ।

---

१. ०षामालम्बना०–का० । २. ०स्योत्तरि–का० ।
३. ०क्त्वसम०–का० ।

कामरागस्यानुशयश्चेद् विप्रयुक्तानुशयप्रसङ्गादभिधर्मविरोधः—"कामरागानुशयस्त्रिभिरिन्द्रियैः सम्प्रयुक्तः" इति ?

कामराग एवानुशय इति वैभाषिकाः । एवं यावद्विचिकित्सैवानुशय इति ।

ननु चोक्तम्—एवं सूत्रविरोध इति ? नास्ति विरोधः । सानुशयं सानुबन्धमित्यर्थात्[1] । औपचारिको वा सूत्रेऽशयनुशब्दः प्राप्तौ । तद्यथा—दुःखोऽग्निरिति । लाक्षणिकस्त्वभिधर्मे क्लेश एवानुशयशब्दः । तस्मात् सम्प्रयुक्ता एवानुशयाः ।

कथमिदं गम्यते ? अनुशयानां

"चित्तक्लेशकरत्वादावरणत्वाच्छुभैर्विरुद्धत्वात्" ।

यस्मादनुशयैः क्लिष्टं चित्तं भवत्यपूर्वं कुशलं नोत्पद्यते, उत्पन्नाच्च परिहीयते, तस्माच्च विप्रयुक्ताः । अथ विप्रयुक्तैरप्येवं स्यात्, कुशलं न कदाचिदप्युपलभ्येत[2], तेषां नित्यं सन्निहितत्वात् । उपलभ्यते च, अतः

"कुशलस्य चोपलम्भादविप्रयुक्ता इहानुशयाः[3]" ॥ ( ) इति ।

तथा च सति *सूत्रविरोधः । अभिधर्मविरोध* इति । *कामरागानुशयास्त्रिभिरिन्द्रियैः* सम्प्रयुक्ताः, कतमैस्त्रिभिः ? सुख-सौमनस्य-उपेक्षेन्द्रियैः सम्प्रयुक्ता इति । न हि विप्रयुक्तस्य प्राप्तिलक्षणस्य एभिरिन्द्रियैः सम्प्रयोगो युज्यत इति शास्त्रविरोधः ।

*सानुशयं सानुबन्धमित्यर्था*दिति । कामरागस्यानुबन्धोऽनुशयशब्देनोक्तः । अनुबन्धः पुनः क्लेशान्तरस्योत्पादानुकूल्येनावस्थानम् । अनुवृत्तिर्वा अनुशयः । सानुशयं प्रहीयते, न पुनरनुवर्तते संक्लेश इत्यर्थः । *औपचारिको वा सूत्रेऽनुशयशब्दः* । उपचारे भव औपचारिकः । कुत्रौपचारिकः ? इत्याह—*प्राप्तौ* । मुख्यवृत्त्या पर्यवस्थानेऽनुशयशब्दो वर्तते, उपचारेण तु प्राप्तौ; तस्यानुशयहेतुभावात् । *तद्यथा दुःखवेदनाहेतुत्वाद् अग्निर्दुःख इत्युच्यते*, तद्वत् । *लाक्षणिकस्त्वभिधर्मेऽनुशयशब्दः* । लक्षणे भवः, लक्षणेन वा दीप्यति लाक्षणिक इत्याह—*क्लेश एवेति* । आलम्बनसम्प्रयोगतश्चानुशेरत इत्यनुशया इति । तस्मात् *सम्प्रयुक्ता* एवानुशयाः । अत्र चार्थे श्लोकमुदाहरन्ति—

चित्तक्लेशकरत्वादावरणत्वाच्छुभैर्विरुद्धत्वात् ।

कुशलस्य चोपलम्भादविप्रयुक्ता इहानुशयाः ॥ इति ॥

---

१. ०मित्यर्थः—का० । २. कदाचिदुपल०—का० ।

३. अथ इहा०—का० ।

तदिदमज्ञापकम्; यस्माद्यो हि[1] विप्रयुक्तमनुशयमिच्छति स एतत् सर्वमनुशयकृतं नेच्छति, क्लेशकृतमेवेच्छति। एवं तु साधु यथा सौत्रान्तिकानाम्। कथं च सौत्रान्तिकानाम्? कामरागस्यानुशयः कामरागानुशय इति। न चानुशयः सम्प्रयुक्तो न विप्रयुक्तः, तस्याद्रव्यान्तरत्वात्। प्रसुप्तो हि क्लेशोऽनुशय उच्यते, प्रबुद्धः पर्यवस्थानम्। का च तस्य प्रसुप्तिः? असम्मुखीभूतस्य बीजभावानुबन्धः। कः प्रबोधः? सम्मुखीभावः।

कोऽयं बीजभावो नाम? आत्मभावस्य क्लेशजा क्लेशोत्पादनशक्तिः।

चित्तक्लेशकरत्वादिति। अस्य विवरणम्—यस्मादनुशयैः क्लिष्टं चित्तं भवति, न विप्रयुक्तैः क्लिष्टं चित्तं भवति। *आवरणत्वादिति*। अस्य पदस्य विवरणम्—अपूर्वं कुशलं नोत्पद्यत इति। सानुशये चित्ते कुशलमपूर्वं नोत्पद्यत इति। अनुशयाः शुभैविरुद्धाः। यस्मादुत्पन्नात् कुशलात् परिहीयते, तस्मात् कुशलैर्विरुद्धा अनुशयाः। तस्मान्न *विप्रयुक्ता* इति। यस्माच्चैतस्यविद्यमानैस्तैर्यथोक्तक्लिष्टादि न सम्भवति, सम्प्रयुक्तैः पुनः सर्वमेतद् युज्यत इति।

अथ विप्रयुक्तैरप्येवं स्यादिति। विप्रयुक्तैः क्लिष्टं चित्तं भवति। अपूर्वं कुशलं नोत्पद्यते, उत्पन्नाच्च परिहीयत इति। *यद्येवम्, कुशलं कदाचिदप्युपलभ्येत, तेषां* विप्रयुक्तानां *नित्यसन्निहितत्वात्*। यस्मात् क्लिष्टावस्थायां कुशलावस्थायामन्यस्यां वा ते विप्रयुक्ता वर्तेन्त इति *उपलभ्येत च कुशलम्*, अथ 'कुशलस्य चोपलम्भादविप्रयुक्ता इहानुशयाः' इति स्थितमेतद्।

आचार्य आह—*तदिदमज्ञापकम्*। यदिदं वैभाषिकैरुक्तम्—'चित्तक्लेशकरत्वाद्' इत्यादि। *यो हि विप्रयुक्तमनुशयमिच्छतीति* वात्सीपुत्रीयः। *सर्वमेत*दिति। चित्तक्लेशादि। *क्लेशकृतमेवेच्छतीति*। पर्यवस्थानकृतमेवेत्यर्थः। पर्यवस्थानं च न नित्यसन्निहितं भवतीति कुशलोपलम्भसिद्धिः। *कामरागस्यानुशया* इति पक्षपरिग्रहे सानुशयं परिहीयत इति नास्ति सूत्रविरोधः; किन्तु विप्रयुक्तोऽनुशय इति प्राप्नोति। अत आह - *न चानुशयः सम्प्रयुक्तो न विप्रयुक्त* इति। कथम्? इत्याह—*तस्याद्रव्यान्तरत्वादिति*। शक्तिरूपस्य बीजस्य रागादिभ्योऽनर्थान्तरत्वात्।

आत्मभावस्य आश्रयस्य। *क्लेशजा* पूर्वोत्पन्नक्लेशजनिता। *क्लेशोत्पादनशक्तिः*।

---

१. का० पुस्तके नास्ति।

यथानुभवज्ञानजा स्मृत्युत्पादनशक्तिः, यथा चाङ्कुरादीनां शालिफलजा शालिफलोत्पादनशक्तिरिति । यस्तु क्लेशानां बीजार्थमर्थान्तरं विप्रयुक्तमनुशयं कल्पयति तेन स्मृतिबीजमप्यर्थान्तरं कल्पयितव्यं जायते ।

यत्तर्हि सूत्रे क्लेश एवानुशय उक्तः षट्षट्के—"सोऽस्य पुद्गलस्य[1] भवति सुखायां वेदनायां रागानुशयः" इति । भवतीति वचनान्नासौ तदैवानुशयः । कदा तर्हि भवति ? यदा प्रसुप्तो भवति । हेतौ वा तदुपचार एष द्रष्टव्यः ॥

तिष्ठतु प्रसङ्गः । शास्त्रं प्रवर्त्तताम् ।

य एष सूत्रे रागस्य भेदः कृतः—'कामरागो भवरागः' इति, कोऽयं भवरागः ?

भवरागो द्विधातुजः ।

यथानुभवज्ञानजा स्मृत्युत्पादनशक्तिः द्रव्यान्तरभूता, तद्वत् । स्मृत्युत्पादनहेतुर्द्रव्यान्तरभूतः कश्चिद् विप्रयुक्त इत्याशङ्क्य दृष्टान्तान्तरमुपन्यस्यति—*यथा चाङ्कुरादीनामिति* । विस्तरः—यथा चाङ्कुरादीनां पूर्वोत्पन्ना शालिफलजा शालिफलान्तरोत्पादनाय शक्तिर्न द्रव्यान्तरभूता, तद्वत् ।

यस्त्विति । *वात्सीपुत्रीयः* । यदि 'क्लेशस्यानुशयः' इतीष्यते । यत्तर्हि सूत्र एव क्लेशोऽनुशय उक्त षट्षट्के[2] सूत्रे—"अस्य पुद्गलस्य भवति सुखायां वेदनायां रागानुशयः" (   ) इति ? राग एव अनुशयः । सुखवेदनावस्थायां हि रागः समुदाचरन्नेवमुक्तः, न तु तस्य बीजमित्यभिप्रायः । *भवतीति वचनान्नासौ तदैवानुशय* इति । अनुशय एव रागस्यायमुक्तः, न रागः; भवतीति वचनात् । तस्यामवस्थायामुत्पद्यमानस्य रागस्यानुशयो भवतीति । बीजमुत्पद्यते, न तूत्पन्नमिति । बीजप्रकृतावस्था त्र कथ्यते इत्यभिप्रायः । *कदा तर्हि भवतीति* । कदानुशयोऽस्तीत्यर्थः । *यदा प्रसुप्तो भवति* । यदोपरतो भवतीत्यर्थः । *हेतौ वा तदुपचार* इति । हेतौ = रागे अनुशयोपचारः । रागो हि रागानुशयस्य हेतुः । तथा हि रागजा रागोत्पादनशक्ती रागानुशय इत्युक्तमिति । तदिदमुक्तं भवति—क्वचिदनुशयशब्देन बीजमुच्यते, क्वचित् पर्यवस्थानमिति ।

---

१. का० पुस्तके नास्ति । २. सट्षट्के—जा० ।

रूपारूप्यधातुजो रागो भवरागः कृतः । किं कारणमेवं कृतः ?

अन्तर्मुखत्वात्तन्मोक्षसंज्ञाव्यावृत्तये कृतः ॥ २ ॥

समापत्तिरागो हि तेषां प्रायेण । स चान्तर्मुखप्रवृत्तः, तस्माद् भवरागः उक्तस्तयोः किल धात्वोर्मोक्षसंज्ञाविच्छन्दनार्थमेकेषामिति[1] । आत्मभाव एव तु भवः । ते च सत्त्वाः समापत्तिं साश्रयामास्वादयन्त आत्मभावमेवास्वादयन्ति; कामवीतरागत्वात् । अतः स रागो भवराग इत्युक्तः ॥ २ ॥

पुनरेते षडनुशया अभिधर्मे दश क्रियन्ते । कथं कृत्वा ?

दृष्टयः पञ्च सत्कायमिथ्यान्तग्राहदृष्टयः ।

दृष्टिशीलव्रतपरामर्शाविति पुनर्दश ॥ ३ ॥

षण्णामनुशयानां दृष्टिं पञ्चधा कृत्वा दश भवन्ति । पञ्च दृष्टिस्वभावाः—सत्कायदृष्टिः, अन्तग्राहदृष्टिः, मिथ्यादृष्टिः, दृष्टिपरामर्शः, शीलव्रतपरामर्शश्च । यथा दृष्टिस्वभावाः—रागः, प्रतिघः, मानः, अविद्या, विचिकित्सा ॥ ३ ॥

एते पुनरेते दशानुशया अभिधर्मेऽष्टानवतिः क्रियन्ते—कामावचराः षट्त्रिंशद्, रूपावचरा एकत्रिंशत्, आरूप्यावचरा एकत्रिंशत् । कथं कृत्वा ? समासतो ह्येतेऽनुशयास्त्रैधातुका दर्शनप्रहातव्या भावनाप्रहातव्याश्च । तत्र तावत् कामावचरा दर्शनप्रहातव्या द्वात्रिंशत् । कतमे ते ? इत्याह—

दशैते सप्तसप्ताष्टौ त्रिद्विदृष्टिविवर्जिताः ।

यथाक्रमं प्रहीयन्ते कामे दुःखादिदर्शनैः ॥ ४ ॥

समापत्तिरागो हि तेषां प्रायेणेति । आस्वादनासम्प्रयुक्ते ध्याने प्रायेण तेषां रागः । विमानादिष्वपि तेषां रागोऽस्तीत्यतः प्रायेणेतिग्रहणम् । *स चान्तरमुखप्रवृत्तः*, समाहितरूपत्वाद् । तथा च सति *मोक्षसंज्ञोपतिष्ठते । तद्विच्छन्दनार्थं* भगवान् देशयामास—'कामरागो भवरागः' इत्येवमादि । भवे *रागेषः*, नैष मोक्षे । मोक्षे कुशलो धर्मच्छन्द इति । *आत्मभाव एव तु भव* इत्याचार्यमतम् । *समापत्तिं साश्रयामिति* । समापत्तिम् = सात्मभावम् । *आस्वादयन्त* आत्मभावमेवास्वादयन्ति; न कामगुणान् । *कामवीतरागत्वात्* । अतः स रागो भवराग इत्युक्तो न कामराग इति दर्शयति ॥ २ ॥

अभिधर्म इति । न सूत्र इत्यभिप्रायः ॥ ३ ॥

---

१. ०संज्ञाव्यावर्तनार्थ०—का० ।

य एते दशानुशया उक्ता एते कामधातौ दशापि दुःखदर्शनहेयाः सन्ति। एभ्य एव सप्त समुदयदर्शनहेयाः[1]। सप्त निरोधदर्शनहेयाः, सत्कायदृष्टिमन्तग्राहदृष्टिं शीलव्रतपरामर्शं च वर्जयित्वा। अष्टौ मार्गदर्शनहेयाः[2], सत्कायदृष्टिमन्तग्राहदृष्टिं च वर्जयित्वा। इत्येते कामावचरा द्वात्रिंशदनुशया दर्शनप्रहातव्याः; सत्यानां दर्शनमात्रेण प्रहाणात्॥ ४॥

चत्वारो भावनाहेयाः

तद्यथा—रागः, प्रतिघः, मानः, अविद्या च। दृष्टसत्यस्य पश्चात् मार्गाभ्यासेन प्रहाणात्। तदेवं सत्कायदृष्टिरेकप्रकारा भवति दुःखदर्शनहेया। एवमन्तग्राहदृष्टिः। मिथ्यादृष्टिश्चतुष्प्रकारा भवति चतुःसत्यदर्शनहेया। एवं दृष्टिपरामर्शो विचिकित्सा च। शीलव्रतपरामर्शो द्विप्रकारः दुःखमार्गदर्शनहेयः। रागप्रतिघमानाविद्याः पञ्चप्रकाराश्चतुःसत्यदर्शनहेयाः, भावनाहेयाश्च।

सप्त समुदयदर्शनहेया इति। *सत्कायदृष्टिः* फलभूतान् पञ्चोपादानस्कन्धान् आलम्बत इति दुःखदर्शनहेयैव। एव*मन्तग्राहदृष्टिः* तेषामेव स्कन्धानां शाश्वतोच्छेदान्तग्रहणात्। *शीलव्रतपरामर्शो*ऽपि तानेव स्कन्धान् शुद्धितो मुक्तितो नैर्याणिकतश्चालम्बत इति न समुदयदर्शनहेयः।

एवं *निरोधदर्शनहेया* अपि योज्याः।

अष्टौ मार्गदर्शनहेया इति। शीलव्रतपरामर्शमधिकं प्रक्षिप्य। मार्गेण शुद्ध्यति, तमपास्यान्येन शीलव्रतेन शुद्धिं प्रत्येतीति विप्रतिपन्नत्वात्, मार्गदर्शनप्रहातव्यो भवति। यो हि क्लेशो यस्य सत्यस्यापवादाय प्रवृत्तः, स तस्मिन् दृष्टे प्रहीयते; सर्पभ्रान्तिरिव रज्जुदर्शनात्। *सत्यानां दर्शनमात्रेण प्रहाणादिति*। नाभ्यासेन प्रहाणादित्यभिप्रायः। *दृष्टसत्यस्य पश्चान्मार्गाभ्यासेन प्रहाणात्*। किमेते भावनाहेया इत्यधिकारः। तदेवमभ्यासो भावना, पुनः पुनरुत्पादनमित्यर्थः। *सत्कायदृष्टिरेकप्रकारेति*। आत्मात्मीयाकारेण दुःखे विप्रतिपन्नत्वाद् *दुःखदर्शनहेयैव*। *एवमन्तग्राहदृष्टिरिति*। असावप्यात्माभिमतस्य वस्तुनः शाश्वतोच्छेदान्तारोपाद् दुःख एव विप्रतिपन्नेति दुःखदर्शनहेयैव। *मिथ्यादृष्टिश्चतुष्प्रकारेति*। दुःखादिसत्यलक्षणापवादप्रवृत्तत्वात् सत्यचतुष्टयेऽपि विप्रतिपन्नेति। *चतुःसत्यदर्शनहेया*। एवं *दृष्टिपरामर्शो*ऽपि

---

१. ०दर्शनप्रहेयाः—का०। २. दुःखसमुदयनिरोधदर्शनहेया—का०।

कीदृशा एते दुःखदर्शनहेयाः ? कीदृशा यावद् भावनाहेयाः ? ये यद्दर्शनहेयालम्बनास्ते तद्दर्शनहेयाः । अवशिष्टा भावनाहेयाः ।

चतुष्प्रकार एव । स हि हीनेऽग्रदर्शनम् । तत्र समुदय-निरोध-मार्गप्रहेयालम्बनाः समुदय-निरोध-मार्गदर्शनहेयाः । शेषो दुःखदर्शनहेयः । *एवं विचिकित्सा* सर्वत्र संशयाकारेति सर्वत्र विप्रतिपन्नत्वाच्चतुःसत्यदर्शनहेया । *शीलव्रतपरामर्शो द्विप्रकार* इति । ईश्वरादिष्वहेतुषु हेतुग्रहो नित्यात्मविपर्यासात् प्रवर्तत इति दुःखदर्शनहेयाः । अमार्गे मार्गदर्शनं मार्गदर्शनहेयः ।

कीदृशा एता इति । रागादयश्चत्वारः क्लेशाः । पर्यनुयुज्यन्ते हि रागप्रतिघ-मानाविद्या इत्यनन्तराधिकृताः । ते चेमे दर्शनहेयाः । इमे भावनाहेया इति दुःपरिच्छेदाः । न तु सत्कायदृष्ट्यादयश्चिन्त्यन्ते । ये हि दुःखसत्यविप्रतिपन्नाः, ते दुःखदर्शनहेया इति । एवं यावद् ये मार्गसत्यविप्रतिपन्ना ते मार्गदर्शनहेया इति सुपरिच्छेदमेतत् । तत्र *य* इति रागादयः । यस्य सत्यस्य दर्शनम् = यद्दर्शनम् । यद्दर्शनेन हेयाः त आलम्बनमेषाम् त इमे *यद्दर्शनहेयालम्बनाः* । *ते तद्दर्शनहेयाः* । ते रागादयः । तस्य सत्यस्य दर्शनं तद्दर्शनम्, तद्दर्शनेन हेयास्त*तद्दर्शनहेयाः* । एतदुक्तं भवति—ये रागादयो दुःखदर्शनहेयम्, यावन्मार्गदर्शनहेयं क्लेशमालम्बन्ते, ते तद्दर्शनहेया इति ।

यदालम्बना यद्दर्शनहेयालम्बनाश्चेति वक्तव्यम्; चतुरार्यसत्यालम्बनोऽप्यविद्यानुशयो भवतीति ? न वक्तव्यम्; एकशेषविधानसिद्धेः । यच्च सत्यम्, यद्दर्शनहेयाश्च क्लेशा आलम्बनमेषाम्, त इमे दर्शनहेयालम्बनाः, ते तद्दर्शनहेया इति ।

ननु च समुदयदर्शनप्रहातव्यः सर्वत्रगोऽविद्यानुशयो दुःखनिरोधादिसत्यदर्शनहेयाद्यालम्बनोऽपि भवति, पञ्चनिकायालम्बनत्वात्, ततश्चास्य दुःखनिरोधादिसत्यदर्शनहेयत्वप्रसङ्गः स्यादिति ? न दोषः; यद्यपि हि स पञ्चनिकायालम्बनः, समुदयरूपाकारतस्तु तान् निकायानालम्बते; तेन तथालम्बनतः समुदयदर्शनप्रहातव्य एव स इति । एवं दुःखदर्शनप्रहातव्योऽपि संयोज्यः । एवं च सति येऽपि व्याचक्षते—'ये यद्दर्शनहेयालम्बना इति सर्वे एव दर्शनहेया अधिक्रियन्ते, न केवला रागादय इति; तेषामपि व्याख्याने इमावेव चोद्यपरिहारौ वक्तव्यौ ।

रूपारूप्यधात्वोर्दुःखाभावात् प्रतिघाभावः । दुःखायां हि वेदनायां प्रतिघोऽनुशेते । सा चोपरि नास्तीति । द्वेषश्च रूक्षो वातव्याधिवत् । ते च सत्त्वाः शमथस्निग्धसन्ततय इति । विपाकाभावाच्च । अनिष्टो ह्यस्य विपाकः । तौ धातू बिगतानिष्टविपाकौ । आघातवस्त्वभावाच्च । न हि तत्र बाधाः कुश-क्षार-

ता एव द्वादश दृष्टयो भवन्ति, चतस्रो विचिकित्साः, पञ्च रागाः, पञ्च प्रतिघाः, पञ्च मानाः, पञ्चाविद्या इत्येते कामावचराः षट्त्रिंशदनुशया भवन्ति ।

त एवाप्रतिघाः पुनः ।

रूपधातौ,

पञ्चप्रकारं प्रतिघमपहाय त एव रूपावचरा एकत्रिंशदनुशया भवन्ति । यथा रूपधातौ

तथारूप्ये

एकत्रिंशदनुशया भवन्ति ।

इत्यष्टानवतिर्मताः ।। ५ ।।

त एवमेते षडनुशया आकारप्रकारधातुभेदैरष्टानवतिर्मता आभिधार्मिकाणाम् ॥ ५ ॥

य इमे दर्शनप्रहातव्यानुशया उक्ताः किमेते नियतं दर्शनेनैव प्रहीयन्ते ? नेत्याह । किं तर्हि ?

भवाग्रजाः क्षान्तिवध्या दृग्घेया एव,

कण्टकादयोऽनाध्यात्मिकाः तापापस्मारादयः सन्ति । मैत्र्यादिकुशलमूलसम्भूतत्वात् , परिग्रहाभावाच्च ।

आकार-प्रकारधातुभेदैरिति । आकारभेदो दशानामनुशयानाम् —'आत्मात्मीयध्रुवोच्छेदनास्तिहीनाग्रहेतु य:" (अभि० को० ५.७) इत्येवमादिकः । प्रकारभेदो दुःखदर्शनप्रहातव्यो निकायो यावद् भावनाप्रहातव्य इति । तत्र *रागानुशयः* प्रकार-धातुभेदाभ्यां पञ्चदशविध इति । तस्य परस्परमाकारभेदो नास्ति । सर्वो हि रागः सक्त्याकारः, तस्मान्नाकारभेदेन व्यवस्थाप्यते । *प्रतिघानुशयः* प्रकारभेदात् पञ्चविधः । न परस्परमाकारभेदोऽस्ति; सर्वस्य प्रतिघाकारत्वात् । धातुभेदोऽपि नास्ति; रूपारूप्यधात्वोस्तदभावात् । *मानानुशयः* प्रकार-धातुभेदाभ्यां पञ्चदशविधः । नाकारभेदोऽस्ति सर्वस्योन्नत्याकारत्वात् । तथा *अविद्या* पञ्चदशविधा, ताभ्यामेव । नाकारभेदोऽस्ति; सर्वस्या असम्प्रख्यानाकारत्वात् । *विचिकित्सा* द्वादशविधा, ताभ्यामेव । नाकारभेदः; सर्वस्याः संशयाकारत्वात् । *दृष्ट्यनुशय* आकार-प्रकार-धातुभेदैः षट्त्रिंशद्विधः । एवमेते षडनुशया इति विस्तरः ॥ ५ ॥

ये भवाग्रभूमिजा अन्वयज्ञानक्षान्तिहेया अनुशयास्ते दर्शनहेया एव, न भावनाहेयाः।

शेषजाः।

दृग्भावनाभ्याम्,

'क्षान्तिवध्याः' इति वर्त्तते। शेषासु भूमिषु यथायोगं धर्मान्वयज्ञान-क्षान्तिहेया अनुशया आर्याणां दर्शनहेयाः, पृथग्जनानां भावनाहेयाः।

अक्षान्तिवध्या भावनयैव तु ॥ ६ ॥

सर्वासु भूमिषु येऽनुशया ज्ञानवध्यास्ते उभयेषां नित्यं भावनाहेयाः। नैव हि बाह्यकानां दर्शनप्रहातव्याः प्रहीयन्त इत्यपरे। तथाहि—**महाकर्मविभागसूत्रे**

"*भवाग्रजा क्षान्तिवध्याः*" इति। क्षान्तिवध्याग्रहणं भावनाहेयनिवृत्त्यर्थम्। *भवाग्रजा*ग्रहणं तदन्यभूमिकविशेषणार्थम्। न हि लौकिकोऽस्ति भवाग्रप्रतिपक्ष-भूतो भावनामार्ग इति।

*शेषासु भूमिष्व*ति। कामधातौ यावत् आकिञ्चन्यायतनभूमौ। *यथायोग*-मिति। कामधातौ *धर्मज्ञानक्षान्तिहेयः*। तत ऊर्ध्वमवशिष्टासु भूमिष्व*न्वयज्ञान-क्षान्तिहेयः*। त एते *आर्याणां दर्शनहेया*स्त एव च *पृथग्जनानां भावनाहेयाः*। द्विविधो हि भावनामार्गः—लौकिकः, लोकोत्तरश्च। तथा हि *शास्त्र* उक्तम्—"भगवतः श्रावको दर्शनेन जहाति, पृथग्जनो भावनया जहाति" (   ) इति।

"*अक्षान्तिवध्या भावनयैव तु*" इति। *अक्षान्तिवध्या*ग्रहणं भावनाहेयोपसं-ग्रहार्थम्। *सर्वासु भूमिषु*। कामधातौ यावद् भवाग्रे। ये राग-प्रतिघमानाविद्या-नुशया यथायोगं भवन्ति अक्षान्तिवध्याः, ज्ञानवध्याः, ते *उभयेषाम्* आर्याणां पृथग्जनानां च *नित्यं भावनाहेया एव* लौकिकेन लोकोत्तरेण वा भावना-मार्गेण। भवाग्रे तु लोकोत्तरेणैव; ऊर्ध्वभूमिकस्य लौकिकस्य मार्गस्याभावात्।

नैव हि बाह्यकानां दर्शनप्रहातव्याः प्रहीयन्त इति। भावनाप्रहातव्या एव तेषां विष्कभ्यन्ते। दर्शनहेयास्तु सर्वास्वपि भूमिषु लोकोत्तरमार्गवध्या एव। तथा हि *महाकर्मविभङ्गसूत्रे* वीतरागाणां कामधात्वालम्बनानां दृष्टीनां समुदाचार उक्तः—"इहानन्द एकत्यः प्राणातिपातात् प्रतिविरतो भवति, यावन् मिथ्या-दृष्टेः। इहाचारतः प्रतिविरतः, कायस्य भेदात् परं मरणाद् अपाय-दुर्गति-विनिपात-नरकेषूपपद्यते। तमेवं यः पश्यति श्रमणो वा ब्राह्मणो वा बाह्यतीर्थिक ऋद्धिमान् दिव्यचक्षुः परिचित्तवित्, तस्यैवं भवति—नास्ति कायसुचरितम्, नास्ति कायसुचरितस्य विपाकः; नास्ति वाङ्मनःसुचरितस्य विपाकः"

पूर्वान्तकल्पकानां च शाश्वतवादिनामेकत्यशाश्वतिकानाम् अहेतुसमुत्पत्तिकानां च

(   ) इति विस्तरः। इयं मिथ्यादृष्टिः कामधात्वालम्बना; तस्य कर्मणः कामावचरत्वात्, तत्रैव च नरकसम्भवादिति। *पूर्वान्तकल्पकानां च शाश्वतवादिनाम्।* *ब्रह्मजालसूत्रे* (दी० नि० १.१) वीतरागाणां कामधात्वालम्बनानां दृष्टीनां समुदाचार उक्तः। पूर्वजन्मदर्शनानुसारेण य एवमुत्पन्नदृष्टिकाः, ते पूर्वान्तकल्पकाः। शाश्वतवादिनो बहवस्तत्रोक्ताः। तेषामुदाहरणमेकं दर्शयिष्यामः--"इहैकत्यः श्रमणो वा ब्राह्मणो वा अरण्यगतो वा वृक्षमूलगतो वा शून्यागारगतो वा आतप्तान्वयात्, प्रहाणान्वयात्, भावनान्वयात्, बहुलीकारान्वयात् सम्यङ्मनसिकारान्वयात् तद्रूपं शान्तं चेतःसमाधिं स्पृशति। यथासमाहिते चित्ते विंशतिं संवर्तविवर्तकल्पान् समनुस्मरति। तस्यैवं भवति—शाश्वतोऽयमात्मा, लोकश्चेति। तदेवं सर्व एवैते पूर्वान्तकल्पाः शाश्वतवादिनः अनया शाश्वतदृष्ट्या आत्मानं लोकं चालम्बमानाः कामधातुमप्यालम्बन्ते।" इत्येवं कामधात्वालम्बमानानां दृष्टीनां समुदाचार उक्तः।

तथा तस्मिन्नेव *ब्रह्मजालसूत्रे* पूर्वान्तकल्पकानामेकत्यशाश्वतिकानां वीतरागाणां कामधात्वालम्बनानां दृष्टीनां समुदाचार उक्तः। कथम्? "भवति भिक्षवः स समयो यदयं लोकः संवर्तते, संवर्तमाने लोके यद्भूयसा सत्त्वा आभास्वरे देवनिकाय उपपद्यन्ते। ते तत्र भवन्ति रूपिणो मनोमया अविकला अहीनेन्द्रियाः सर्वाङ्गप्रत्यङ्गोपेताः शुभा वर्णस्थायिनः स्वयम्प्रभाः विहायसङ्गमाः प्रीतिभक्षाः प्रीत्याहारा दीर्घायुषा दीर्घमध्वानं तिष्ठन्ति। भवति भिक्षवः स समयो यदयं लोको विवर्तते, विवर्तमाने लोके आकाशे शून्यं ब्राह्मं विमानमभिनिर्वर्तते। अथान्यतरः सत्त्व आयुःक्षयात् पुण्यक्षयात् कर्मक्षयात् आभास्वराद् देवनिकायाच्च्युत्वा शून्ये ब्राह्मे विमान उपपद्यते। स तत्रैकाकी अद्वितीयोऽनुपस्थायको दीर्घायुर्दीर्घमध्वानं तिष्ठति। अथ तस्य सत्त्वस्य दीर्घस्याध्वनोऽत्ययात् तृष्णोत्पन्ना, अरतिः सञ्जाता—'अहो बतान्येऽपि सत्त्वा इहोपपद्येरन् मम सभागतायाम्'। एवं च तस्य सत्त्वस्य चेतःप्रणिधिः। अन्ये च सत्त्वा आयुःक्षयात् पुण्यक्षयात् कर्मक्षयात् आभास्वराद् देवनिकायाच्च्युत्वा तस्य सत्त्वस्य सभागतायामुपपन्नाः। अथ तस्य सत्त्वस्यैतदभवत्—'अहमस्म्येकाकी अद्वितीयोऽनुपस्थायको दीर्घायुः' यावद् 'अन्येऽपि सत्त्वा इहोपपद्येरन् मम सभागतायाम्'। एवं चेतःप्रणिधिः। 'इमे च सत्त्वा इहोपपन्ना मम सभागतायाम्, मयैते सत्त्वा निर्मिताः, अहमेषां सत्त्वानामीश्वरः कर्ता निर्माता स्रष्टा सृजः पितृभूतो भावानाम्' इति। तेषामपि सत्त्वानामेवं भवति—'इमं वयं सत्त्वमद्राक्ष्म एकाकिनमद्वितीयमनुपस्थायकं दीर्घायुषं दीर्घमध्वानं तिष्ठन्तम्, तस्यास्य

वीतरागाणां च कामधात्वालम्बनानां दृष्टीनां समुदाचार उक्तः । न च रूपाव-चराणां क्लेशानां कामधातुरालम्बनम्; वीतरागत्वात् । तस्मात् कामप्रतिसंयुक्ता

सत्त्वस्य दीर्घस्याध्वनोऽत्ययात् तृष्णोत्पन्ना, अरतिः सञ्जाता—'अहो बतान्येऽपि सत्त्वा इहोपपद्येरन् मम सभागतायाम्' । एवं चास्य सत्त्वस्य चेतसः प्रणिधिः । वयं चेहोपपन्ना अस्य सत्त्वस्य सभागतायाम् । अनेन वयं सत्त्वेन निर्मिताः । एषोऽस्माकं सत्त्व ईश्वरो यावत् पितृभूतो भावानाम्' । अथान्यतरः सत्त्व आयुःक्षयात् पुण्यक्षयात् कर्मक्षयात् तस्मात् स्थानाच्च्युत्वा तेषामित्थन्त्वमा-गच्छति मनुष्याणां सभागतायाम् । स वृद्धेरन्वयाद् इन्द्रियाणां परिपाकात् केशश्मश्रूण्यवतार्य काषायाणि वस्त्राण्याच्छाद्य सम्यगेव श्रद्धया अगारादना-गारिकां प्रव्रजति । सोऽरण्यगतो वा वृक्षमूलगतो वा विस्तरेण यावत् तद्रूपं शान्तं चेतःसमाधिं स्पृशति । यथासमाहिते चित्ते पूर्वकमात्मभावं समनुस्मरति, तस्यैवं भवति—'योऽसौ ब्रह्मा, येन वयं निर्मिताः, स नित्यो ध्रुवः शाश्वतोऽ-विपरिणामधर्मा । ये तु वयं तेन ब्रह्मणा निर्मिताः, ते वयमनित्या अध्रुवा अशाश्वता विपरिणामधर्माणः" इति । तदेवं कामधातुरपि तयाऽन्तग्राहदृष्ट्या-ऽऽलम्बितो भवति । अतः कामधात्वालम्बनानां दृष्टीनां समुदाचार उक्तः ।

तथा तत्रैव *ब्रह्मजालसूत्रे* अहेतुसमुत्पत्तिकानां पूर्वान्तकल्पानामिति प्रकृतम् । *वीतरागाणां कामधात्वालम्बनानां दृष्टीनां समुदाचार उक्तः ।* कथम् ? "सन्ति रूपधातावसंज्ञिसत्त्वा नाम देवाः । संज्ञोत्पादात् तेषां सत्त्वानां तस्मात् स्थानाच्च्युतिर्भवति । अतोऽन्यतमः सत्त्वस्तस्मात् स्थानाच्च्युत्वा इत्थन्त्वमा-गच्छति मनुष्याणां सभागतायाम् । पूर्ववद् यावत् पूर्वकमात्मभावं समनु-स्मरति । तस्यैवं भवति—'अहेतुसमुत्पन्न आत्मा लोकश्च' । तदनेनैवमेव भवति—अहेतुसमुत्पन्न आत्मा लोकश्च । अहमस्मि पूर्वं नाभूवम्, सोऽस्म्येतर्हि सम्भूत इत्यहेतुसमुत्पन्न आत्मा लोकश्च । इत्येवमात्मानं लोकं चालम्बमानास्तया मिथ्यादृष्ट्या कामधातुमप्यालम्बन्ते" इत्येतेषां कामधात्वालम्बनानां दृष्टीनां समुदाचार उक्तः ।

कथं च पुनरेषामात्मा लोकश्चाहेतुसमुत्पन्न इत्येयं मिथ्यादृष्टिर्भवति । पूर्वकृतं कुशलसास्रवमकुशलं वा न हेतुरात्मनो लोकस्येत्येवमपवदति । इति कामधातुवीतरागाणां तेषां रूपावचर्यस्ता दृष्टयो भविष्यन्तीति वचनावकाशं मत्वाह—*न च रूपावचराणां क्लेशानां कामधातुरालम्बनं वीतरागत्वादिति ।* नैताः कामावचर्यो दृष्टयः, मिथ्याज्ञानानि पुनरेतानि—इति केचित् परिहरन्ति. तदेषामयुक्तम्; तद्दृष्टिरूपत्वात् ।

एव ता अप्रहीणा इति। दृष्ट्युत्पादसमकालं ते परिहीणा देवदत्त इवेति वैभाषिकाः ॥ ६ ॥

दृष्टयः पञ्च नामतो निर्दिष्टाः, न तु स्वभावतः, तत् कस्तासां स्वभावः ?

आत्मात्मीयध्रुवोच्छेदनास्तिहीनाग्रदृष्टयः।

अहेतवमार्गे तद्दृष्टिरेतास्ताः पञ्च दृष्टयः ॥ ७ ॥

१. आत्मदृष्टिरात्मीयदृष्टिर्वा सत्कायदृष्टिः। सीदतीति सत्। चयः कायः संघातः, स्कन्ध इत्यर्थः। सच्चायं कायश्चेति सत्कायः=पञ्चोपादानस्कन्धाः। नित्यसंज्ञां पिण्डसंज्ञां च त्याजयितुमेवं द्योतिता। एतत्पूर्वको हि तेष्वात्मग्रहः। सत्काये दृष्टिः सत्कायदृष्टिः। सर्वैव सास्रवालम्बना दृष्टिः सत्काये। आत्मात्मीयदृष्टिरेव तु सत्कायदृष्टिरुक्ता। यथा गम्येत सत्कायदृष्टिरियं नात्मनि नात्मीये वेति। यथोक्तम्—"ये केचिद् भिक्षवः श्रमणा वा ब्राह्मणा वा आत्मेति समनुपश्यन्तः समनुपश्यन्ति सर्वे त इमानेव पञ्चोपादानस्कन्धान्" ( ) इति।

२. तस्यैवात्माभिमतस्य वस्तुनो ध्रुवदृष्टिरुच्छेददृष्टिर्वा अन्तग्राहदृष्टिः, शाश्वतोच्छेदान्तग्रहणात्।

३. सति दुःखादिसत्ये नास्तीति दृष्टिर्मिथ्यादृष्टिः। सर्वैव हि विपरीतस्वभावप्रवृत्ता दृष्टिर्मिथ्यादृष्टिः एकैव तूक्ता; अतिशयवत्त्वात् दुर्गन्धक्षतवत्। एषा ह्यपवादिका, अन्यास्तु समारोपिकाः।

परिहीणाः। (कथं तर्हि वीतरागाणां कामालम्बनदृष्टिसमुदाचार इत्याह—*दृष्ट्युत्पादेत्यादि*।) *देवदत्त इवेति वैभाषिकः*। यथा देवदत्तो भगवतोऽल्पोत्सुकविहारिताशयस्य भिक्षुसङ्घपरिकर्षणाय पापकेच्छासमुत्पादादृद्धेः परिहीणः; सूत्रे वचनात्। एवं हि सूत्रे पठ्यते—"अथ देवदत्तस्य लाभसत्कारेणाभिभूतस्य इदमेवंरूपं पापकमिच्छागतमुत्पन्नम्—अहो बत मे भगवान् भिक्षुसङ्घं प्रतिनिःसृजेत्, अहं भिक्षुसङ्घं परिकर्षयन्...भगवानल्पोत्सुको विहरेत् दृष्टधर्मसुखविहारयोगमनुयुक्तः। सहाचत्तोत्पादाद् देवदत्तस्तस्या ऋद्धेः परिहीण इति विस्तरः। एवं तेऽपि *दृष्ट्युत्पादसमकालं परिहीणा* इति ॥ ६ ॥

एतत्पूर्वको हि तेष्वात्मग्राह इति। नित्यपिण्डसंज्ञापूर्वकः। *सर्वैवेति*। पञ्चप्रकारापि। *सत्काय* इति। पञ्चसूपादानस्कन्धेषु। *सर्वैव हि विपरीत*दृष्टिस्वभावप्रवृत्ता *दृष्टिर्मिथ्यादृष्टिः* सत्कायदृष्ट्यादिका; मिथ्योपनिध्यानात्।

४. हीने अग्रदृष्टिर्दृष्टिपरामर्शः । किं हीनम् ? सर्वं सास्रवम् ; आर्यैः[1] प्रहीणत्वात् । तस्याग्रतो ग्रहणं दृष्टिपरामर्शः । 'दृष्ट्यादिपरामर्शः' इति वक्तव्ये आदिशब्दलोपः कृतः ।

५. अहेतौ हेतुदृष्टिरमार्गे च[2] मार्गदृष्टिः शीलव्रतपरामर्शः । तद्यथा—महेश्वरो न हेतुर्लोकानाम् , तं च हेतुं पश्यति प्रजापतिमन्यं वा । अग्निजलप्रवेशादयश्च न हेतुः स्वर्गस्य, तांश्च हेतुं पश्यति । शीलव्रतमात्रकं सांख्ययोगज्ञानादयश्च न मार्गो मोक्षस्य, तांश्च मार्गं पश्यति । अत्रापि किलादिशब्दलोपः कृत इत्येतास्ताः पञ्च दृष्टयो वेदितव्याः । सत्यकारणे कारणदृष्टिः शीलव्रत-परामर्शः ॥ ७ ॥

कस्मादयं न समुदयदर्शनप्रहातव्यः । यो हि कश्चिदीश्वरं प्रजापतिमन्यं वा कारणं पश्यति स तन्नित्यमेकं चात्मानं कर्तारमभिनिविश्य । तद्यस्मात् सः—

ईश्वरादिषु नित्यात्मविपर्यासात् प्रवर्तते ।
कारणाभिनिवेशोऽतो दुःखदृग्घेय एव सः ॥ ८ ॥

दुःखदर्शनादेव हि तेषु तौ नित्यात्मग्राहौ प्रहीयेते । तस्मात् तत्कृतोऽपि कारणाभिनिवेशस्तत एव प्रहीयते ।

अन्यास्तु समारोपिका इति । कथमुच्छेददृष्टिः समारोपिका ? बाहुलिक एष निर्देशः । *आर्यैः प्रहीणत्वादिति* । त्यक्तत्वात् । "ओहाक् त्यागे"(पा० धा० जु०) इत्येतस्य धातोर्ग्रहणात् । *आदिशब्दलोपः कृत* इति । दृष्ट्यादीनामुपादान-स्कन्धानां परत्वेन प्रधानत्वेनामर्शो दृष्टिपरामर्श इति । परशब्दप्रयोगेण चाय-मतिशयार्थो लभ्यत इत्याचार्यसङ्घभद्रः ।

अहेतौ हेतुदृष्टिरिति । दुःखदर्शनप्रहातव्य उच्यते । *अमार्गे च मार्गदृष्टि-रिति* । मार्गदर्शनप्रहातव्यः । *शीलव्रतमात्रकमिति* । शीलव्रतमपि बुद्धानां मोक्षप्राप्तये भवति, न तु तन्मात्रकमित्यतस्तदन्येषां दृष्टिः । *अत्रापि किल आदिशब्द* इति । शीलव्रतादिपरामर्शः शीलव्रतपरामर्शः । किं कारणम् ? शील-व्रतं हि रूपस्कन्धसंगृहीतम् । अतोऽन्यस्कन्धग्रहणार्थमादिशब्द इति ॥ ७ ॥

कस्मादयं न समुदयदर्शनप्रहातव्य इति । हेतौ विप्रतिपन्नत्वादित्यभिप्रायः । *तत्कृतोऽपि कारणाभिनिवेश* इति । नित्यैकात्मकर्तृग्राहकृतोऽपीत्यर्थः । *तत एव*

---

१. आर्यैः—जा० । २. का० पुस्तके नास्ति ।

यस्तर्हि जलाग्निप्रवेशादिभिः स्वर्गोपपत्तिं पश्यति शीलव्रतेन वा शुद्धिम्, सोऽपि दुःखदर्शनप्रहातव्य एव। एष हि शास्त्रपाठः—"ये चैवन्दृष्टय एवं-वादिनो यदयं पुरुषपुद्गलो गोशीलं समादाय वर्तते मृगशीलं कुक्कुरशीलम्, स तेन शुध्यति मुच्यते, सुखदुःखं व्यतिक्रामति, सुखदुःखव्यतिक्रमं चानुप्राप्नोति। अकारणं कारणतः प्रत्येति शीलव्रतपरामर्शो दुःखदर्शनप्रहातव्यः" (   ) इति विस्तरः।

किं पुनः कारणमसौ दुःखदर्शनप्रहातव्यः? दुःखे विप्रतिपन्नत्वादतिप्रसङ्गः; सर्वेषां सास्रवालम्बनानां दुःखे विप्रतिपन्नत्वात्।

कीदृशो वाऽन्यः शीलव्रतपरामर्शो मार्गदर्शनप्रहातव्यः? यो मार्गदर्शन-प्रहातव्यालम्बनः। सोऽपि हि नाम दुःखे विप्रतिपन्नः। यस्य च मार्गालम्बना

प्रहीयत इति। दुःखदर्शनादेव प्रहीयते। *यस्तर्हि जलाग्निप्रवेशादिभिः स्वर्गो-पपत्तिं पश्यति, शीलव्रतेन वा शुद्धिमिति*। नायं तत्कर्तृकः कारणाभिनिवेशः, कथं दुःखदर्शनात् प्रहीयते! तस्मात् समुदयदर्शनप्रहाव्य एवायं भविष्यती-त्यभिप्रायः।

वैभाषिक आह—*सोऽपि दुःखदर्शनप्रहातव्य* इति। विस्तरः—*दुःखे विप्र-तिपन्नत्वाद्* इति *वैभाषिकः*। कथं च पुनर्दुःखे विप्रतिपन्नः? तेन स्वर्गे गमना-च्छुद्धिदर्शनाद्वा। *अतिप्रसङ्ग* इति विस्तरेणा*चार्यः*। *सर्वेषां सास्रवालम्ब-नानामदृष्टिस्वभावानां च दुःखादिदर्शनप्रहातव्यानां दुःखे विप्रतिपन्नत्वात्*। 'सर्वं हि सास्रवं वस्तु दुःखम्' इति दुःखदर्शनप्रहातव्यप्रसङ्गः। तथा च सति न कश्चित् समुदयादिदर्शनप्रहातव्यः स्यात्।

इदं चापरं वक्तव्यम्—*कीदृशो वान्यः शीलव्रतपरामर्शो मार्गदर्शनप्रहातव्यः स वक्तव्यः*। योऽपि हि 'गोशीलादिना शुद्ध्यति, यावत् सुखदुःखव्यतिक्रमं चानुप्राप्नोति' इति पश्यति, तस्याप्ययमकारणं कारणतः प्रत्येतीति दुःखदर्शन-प्रहातव्यः शीलव्रतपरामर्श इति पठ्यते।

वैभाषिक आह—*यो मार्गदर्शनप्रहातव्यालम्बन* इति। यो मार्गदर्शन-हेयानष्टौ मिथ्यादृष्ट्यादीनालम्बते, स मार्गदर्शनप्रहातव्यः शीलव्रतपरामर्श इति। *सोऽपि हि नाम दुःखे विप्रतिपन्न* इत्या*चार्यः*। मिथ्यादृष्ट्यादयो हि मार्गदर्शनप्रहातव्या अष्टावनुशयाः शीलव्रतपरामर्शस्यालम्बनम्। ते च सास्र-वत्वाद् दुःखसत्यसंगृहीताः। तत्र च स विप्रतिपन्न इति दुःखदर्शनप्रहातव्य

मिथ्यादृष्टिर्विचिकित्सा वाऽस्ति, स नास्ति मोक्षमार्ग इति पश्यन् विचिकित्सन् वा कथं तया शुद्धिं प्रत्येष्यति !

अथान्यं मोक्षमार्गं परामृश्य एष मोक्षमार्गो नास्तीत्याह, सोऽपि तेनैवान्येन शुद्धिं प्रत्येति न तया मिथ्यादृष्ट्येति । तस्याप्यसौ मार्गदर्शनप्रहातव्यालम्बनो न सिध्यति ।

यश्चापि समुदयनिरोधदर्शनप्रहातव्यालम्बनया मिथ्यादृष्ट्या शुद्धिं प्रत्येति स कस्मान्न तद्दर्शनहेयः ! तस्मात् परीक्ष्य एषोऽर्थः ॥ ८ ॥

एव स्यादित्यभिप्रायः । *यस्य* चेति । विस्तरः—यस्य च पुद्गलस्य नास्ति मार्ग इति मार्गालम्बना नित्या दृष्टिरस्ति विचिकित्सा वा, स पुद्गलः 'नास्ति मोक्षमार्गः' इति पश्यन् । *विचिकित्सा वा* । किमस्ति मार्गः, नास्तीति सन्दिह्यन् । कथं *तया* मिथ्यादृष्ट्या *शुद्धिं प्रत्येष्यति* प्रतिपत्स्यते, एतया वा विचिकित्सयेति । मिथ्यादृष्टिविचिकित्सायोगाद् एव हि तस्य शुद्धिप्रतिपत्तिर्नास्ति ।

अथान्यमिति । विस्तरः—अथान्यं *साङ्ख्यादिपरिकल्पितं मोक्षमार्गं परामृश्य* गृहीत्वा । एष मोक्षमार्गो बौद्धीयो नास्तीत्याह—*सोऽपीति* । तीर्थिकः । *तेनैवान्येन* साङ्ख्यादिपरिकल्पितेन *शुद्धिं प्रत्येति । न तया मिथ्यादृष्ट्येति* कृत्वा । *तस्याप्यसौ* शीलव्रतपरामर्शो *मार्गदर्शनप्रहातव्यालम्बनो न सिद्ध्यति* । किं तर्हि ? साङ्ख्यादिपरिकल्पितमार्गालम्बन एवेति ।

अयं चान्यो दोषः - *यश्चापीति* । विस्तरः—यश्चापि मिथ्यादृष्टिकः समुदयनिरोधदर्शनप्रहातव्यया मिथ्यादृष्ट्या सिद्धिं प्रत्येति, स कस्मान्न तद्दर्शनहेयः । स शीलव्रतपरामर्शः कस्मान्न समुदयनिरोधदर्शनहेय इत्यर्थः । *तस्मात् परीक्ष्य एषोऽर्थ* इति । यस्मादयं दुःखदर्शनप्रहातव्यः शीलव्रतपरामर्शो न सम्भवति, मार्गदर्शनप्रहातव्यश्च, अतिप्रसङ्गादिदोषात्; तस्मात् परीक्ष्य एषोऽर्थः—शीलव्रतपरामर्शो दुःखदर्शनप्रहातव्यः मार्गदर्शनप्रहातव्यश्चेति । तदिदमाचार्येण संशयावद्यं कृतम्, न स्वमतं दर्शितम् ।

अन्य आहुः—*योगाचारमतिमपेक्ष्यैवं* कृतम् । *योगाचारा* हि अष्टाविंशत्युत्तरं क्लेशशतं वर्णयन्ति । यथैव हि दुःखदर्शनप्रहातव्या इमे दशानुशया भवन्ति—सत्कायदृष्टिः, अन्तग्राहदृष्टिः, मिथ्यादृष्टिः, दृष्टिपरामर्शः, शीलव्रतपरामर्शः, विचिकित्सा, रागः, प्रतिघः, मानः, अविद्या चेति; तथैवेमे दश समुदयदर्शनप्रहातव्याः; तथैव च दश निरोधदर्शनप्रहातव्याः,

यदुक्तम्—"नित्यात्मविपर्यासात्" इति। किमेतावेव द्वौ विपर्यासौ ?

दश मार्गदर्शनप्रहातव्या इति चत्वारिंशत् कामावचरा दर्शनहेया भवन्ति। भावनाहेयास्तु षट्—आकल्पिका सत्कायदृष्टिः, उच्छेददृष्टिः, सहजो रागः, प्रतिघः, मानः, अविद्या चेति; षट्चत्वारिंशत् कामावचरा अनुशया भवन्ति। रूपावचरास्त्वेकचत्वारिंशत्, एत एव प्रतिघवर्ज्याः। यथा रूपावचरा एवमरूपावचरा इति।

अत्र कश्चित् समाधिमाह—

यदुक्तम्—'अतिप्रसङ्गः, सर्वेषां सास्रवलम्बनानां दुःखे विप्रतिपन्नत्वात्' इति, अत्र ब्रूमः—नातिप्रसङ्गः; दुखादिमुखेन विप्रतिपत्तेः। यद्यपि सास्रवालम्बना दुःखसत्यविप्रतिपन्नाः, तथापि तु केचिद् दुःखमुखेन विप्रतिपन्नाः, केचित् समुदयमुखेन, केचिन्निरोधविप्रतिपन्नविप्रतिपन्नाः, केचिन्मार्गविप्रतिपन्नविप्रतिपन्नाः। तत्र ये दुःखमुखेन दुःखे विप्रतिपन्नाः ते दुःखदर्शनप्रहातव्याः। शीलव्रतपरामर्शश्च दुःखमुखेन दुःखे विप्रतिपन्नः, नित्यात्मग्रहणात्; तस्माद् दुःखदर्शनप्रहातव्यः। यस्तु मार्गदर्शनविप्रतिपन्नः, तद्यथा—*साङ्ख्यनिर्ग्रन्थादयः* स्वपरिकल्पितं मार्गं गृहीत्वा 'नास्ति बुद्धानां मोक्षमार्गः' इति मिथ्यादृष्टिमुत्पादयन्ति, तां च मिथ्यादृष्टिं शीलव्रतपरामर्शोऽग्रतः पश्यति, अयमेषां शीलव्रतपरामर्शो मार्गदर्शनप्रहातव्यः; मार्गविप्रतिपन्नविप्रतिपन्नत्वात्। नास्ति तु स शीलव्रतपरामर्शो यः समुदयमुखेन विप्रतिपद्यते। नापि यो निरोधमुखेन विप्रतिपन्नविप्रतिपन्नः स्यात्। तस्माद् दुःखमार्गदर्शनप्रहातव्य एवायं शीलव्रतपरामर्श इति।

कथं पुनः समुदयनिरोधमुखेन विप्रतिपद्येत ?

अत्राचार्यः *सङ्घभद्र* आह शीलव्रतपरामर्शः समुदयनिरोधदर्शनप्रहातव्यः, तच्छरीरानुपपत्तेः। अकारणे हि कारणाभिनिवेशः, अमार्गे च मार्गाभिनिवेशः शीलव्रतपरामर्शशरीरम्। समुदयापवादिकायां मिथ्यादृष्टयां शुद्धयभिनिवेशे नन्वाकस्मिकाज्जन्मदर्शनमस्य स्यात्, क्वचिदपि कारणबुद्धयभावात्। दुःखसमुदययोर्हि द्रव्यतोऽव्यतिरेकात्। ईश्वरादिस्कन्धा अपि तेनापोदिताः स्युः। निरोधापवादिकायां तु मिथ्यादृष्टौ शुद्धिप्रत्यागमनान्निरोधोपायकल्पनैव न सम्भवति। कथम् ? 'नास्ति निरोधः' इति तद्दर्शनपृष्ठेन तदुपायकल्पना व्यर्था भवेत्। एवं च शीलव्रतपरामर्शशरीरानुपपत्तिः। मार्गदर्शनप्रहातव्योऽपि शीलव्रतपरामर्श एवं न सम्भवेत्, 'नास्ति मार्गः' इति दर्शनपृष्ठेन मार्गपरिकल्पनानुपपत्तेः; यस्य हि मार्गालम्बना मिथ्यादृष्टिर्विचिकित्सा वास्ति, स

चत्वारो विपर्यासाः—अनित्ये नित्यमिति, दुःखे सुखमिति, अशुचौ शुचीति, अनात्मन्यात्मेति ।

अथैतद् विपर्यासचतुष्कं किंस्वभावम् ?

'नास्ति मोक्षमार्गः' इति पश्यन् विचिकित्सन् वा कथं तया शुद्धिं प्रत्येष्यतीति ? उपपद्यत एवैष आर्यमार्गापवादिकायां मिथ्यादृष्टयां शुद्ध्यभिनिवेशः; न्यायतस्तद्ग्रहणात् । अन्यो हि तेन मोक्षमार्गो हृदि निवेशितो भवति, यतोऽस्य सद्भूतमार्गापवादिकायां मिथ्यादृष्टौ न्यायबुद्धिरुत्पद्यते । एष न्यायो यद् अन्यो मोक्षमार्गो नास्ति । यच्च 'स्यान्न वा' इति अन्यं मोक्षमार्गं विचिकित्सतीति न्यायतो हि शुद्ध्युपायग्रहणमुपपद्यते । यश्चैवान्यो मोक्षमार्गस्तेन हृदि निवेशितः, स नैव तस्य मार्गदर्शनहेयस्य शीलव्रतपरामर्शस्य विषयः; स्वनैकायिकमात्रालम्बनत्वात् ।

अथ मतम्—निरोधदर्शनहेयोऽपि प्रयुज्यते, तत्कल्पनासामर्थ्यात् । अन्यद्धि तेन मोक्षस्थानं हृदि निवेशितं भवति; यतोऽस्य सद्भूतमोक्षापवादिकायां मिथ्यादृष्टौ न्यायतो ग्रहणम् । अथ समानमेतदिति ? तन्न; नित्यशान्तग्रहणसामान्येन तदपवादे शुद्ध्यभिनिवेशानुपपत्तेः । द्रव्याद्रव्यसम्प्रतिपत्तिभेदे हि कश्चिन्मोक्षो ग्रायमन्वेषते, 'ध्रुवं तस्यास्ति मोक्षः' इति निश्चयः । यस्य चास्ति मोक्षनिश्चयो ध्रुवम्, तस्य तत्र नित्यशान्तग्रहणम् । अन्यथा तत्र प्रार्थनानुपपत्तेः । तत्र यथेहधार्मिकाणां निर्वाणे द्रव्याद्रव्यसम्प्रतिपत्तिभेदोऽपि नित्यशान्तग्रहणसामान्यात् तदपवादे दोषो दर्शनमेव । येनापि किञ्चन मोक्षस्थानं हृदि निवेशितं स्यात्, तस्यापि नित्यशान्तग्रहणसामान्येन मोक्षापवादे न्यायग्रहणमुपपद्यते । भिन्ना हि शीलव्रतादयः स्वभावतश्चाकारतश्च आर्यमार्गात् । नास्ति तु नित्यशान्तग्रहणभेद इति नास्ति कल्पनासामान्यम् । अतो मार्गदर्शनप्रहातव्य एव शीलव्रतपरामर्शः, न निरोधदर्शनप्रहातव्य इति ।

इह शीलव्रतपरामर्शो द्विःप्रकार इष्यत *आभिधर्मिकैः*, तत्र कीदृशः शीलव्रतपरामर्शो दुःखदर्शनप्रहातव्यो व्यवस्थाप्यते, कीदृशो मार्गदर्शनप्रहातव्यः ? योऽपि हि गोशीलादिना शुद्धिं प्रत्येति, सोऽप्यमार्गे मार्गं पश्यति । यः शीलव्रतादिदुःखालम्बनः शीलव्रतपरामर्शः, स दुःखदर्शनप्रहातव्यः । यो मार्गविप्रतिपत्त्यालम्बनः, स मार्गदर्शनप्रहातव्यः । यः शीलव्रताद्यालम्बनः, स न मार्गविप्रतिपत्तिः । तथा न बाधते यथा मार्गविप्रतिपत्त्यालम्बनः; यस्माच्छीलव्रताद्यालम्बन औदरिकः, न दूरगतः, न दृढाशयः, अल्पयत्नघात्यः । तद्विपर्ययात् मार्गविप्रतिपत्त्यालम्बन इति ॥ ८ ॥

दृष्टित्रयाद् विपर्यासचतुष्कम्,

अन्तग्राहदृष्टेः शाश्वतदृष्टिर्नित्यविपर्यासः । दृष्टिपरामर्शात् सुखशुचिविपर्यासौ । सत्कायदृष्टेरात्मविपर्यासः ।

सकलेत्यपरे ।

कथमात्मीयदृष्टिर्विपर्यासः । कथं च न भवितव्यम्[1] ? **विपर्याससूत्राद् ।** आत्मानमेव तत्र वासिनं[2] पश्यन्नात्मीयं पश्यतीत्यात्मदृष्टिरेवासौ द्विमुखी अथाहमित्येतस्मात् ममेति दृष्ट्यन्तरं स्यात् । मया मह्यमित्येतदपि स्यात् ।

कस्मादन्ये क्लेशा न विपर्यासाः ? यस्मात् त्रिभिः कारणैर्विपर्यासानां व्यवस्थानम् ।

कतमैस्त्रिभिः ?

विपरीततः ।

नितीरणात् समारोपात्,

"*दृष्टित्रयाद्विपर्यासचतुष्कम्*" इति । दृष्टित्रयस्वभावा विपर्यासा इति दर्शयति । *सत्कायदृष्टेरात्मविपर्यास* इति । नात्मीयदृष्टिरित्यभिप्रायः ।

सकलेत्यपर इति । सकला सत्कायदृष्टिरात्मदृष्टिरात्मीयदृष्टिश्च आत्मविपर्यास इत्यर्थः ।

वैभाषिक आह· *कथमात्मीयदृष्टिर्विपर्यास* इति । न ह्यात्मीयविपर्यास इत्युच्यते । *कथं च न भवितव्यमिति* परः । *विपर्याससूत्रादिति* वैभाषिकः । "अनात्मनि आत्मेति विपर्यासः" इति सूत्रवचनात् । न पुनरात्मीय इति । अस्त्येवं सूत्रनिर्देशः, न पुनरसावात्मदृष्टेरर्थान्तरभूता । कथं कृत्वा ? *आत्मानमेव तत्र* पञ्चोपादानस्कन्धेषु *वासिनं पश्यन् आत्मीयं पश्यतीति* । न केवलमात्मानं पश्यति, आत्मीयमपि पश्यतीत्यर्थः । *आत्मदृष्टिरेवासौ द्विमुखे*ति । आत्मात्मीयमुखी एका द्रष्टव्यतोऽस्तीति अहङ्कार-ममकारमुखद्वयवतीत्यर्थः । *अथाहमिति* । एतस्मात् प्रथमानिर्देशान्ममेति षष्ठीनिर्दिष्टं स्यात् । *मया, मह्यमित्येतदपि स्यात्* । दृष्ट्यन्तरमिति प्रकृतम् । मयेति तृतीयानिर्देशात्, मह्यमिति च चतुर्थीनिर्देशात् । अनिष्टं चैतत् । तस्मात् सकलेति सिद्धम् ।

कस्मादन्ये क्लेशा न विपर्यासा इति । सत्कायदृष्ट्यन्तग्राहदृष्टिपरामर्श-

---

१. विपर्यासः–का० । २. वशिनं–का० ; वाशिनं—जा० ।

एकान्तविपर्यस्तत्वादालम्बने नितीरकत्वात्, समारोपणाच्च । उच्छेददृष्टि-र्मिथ्यादृष्टिश्च न समारोपिके; अभावमुखप्रवृत्तत्वात् । शीलव्रतपरामर्शो नैकान्त-विपर्यस्तः; तन्मात्रशुद्ध्यालम्बनत्वात् । अन्ये क्लेशा न सन्तीरकाः, अतो न विपर्यासाः ।

यत्तर्हि सूत्रे उक्तम्—"अनित्ये नित्यमिति संज्ञाविपर्यासः चित्तविपर्यासो दृष्टिविपर्यासः" (   ) इति ? दृष्टिरेवात्र विपर्यासः ।

संज्ञाचित्ते तु तद्वशात् ।। ९ ।।

दृष्टिविपर्यासवशादेव तत्सम्प्रयुक्ते संज्ञाचित्ते विपर्यासावुक्तौ ।

वेदनादयोऽपि कस्मान्नोक्ताः ? लोकप्रसिद्धया । लोके हि विपर्यस्तसंज्ञो विपर्यस्तचित्त इति प्रसिद्धम्, न पुनर्विपर्यस्तवेदन इति ।

त एते विपर्यासाः सर्वेऽपि स्रोतआपन्नस्य प्रहीणा भवन्ति; दर्शनप्रहेय-त्वाद् दृष्टीनां ससम्प्रयोगाणाम् । द्वादश विपर्यासाः—अनित्ये नित्यमिति संज्ञादृष्टिचित्तविपर्यासास्त्रयः, एवं यावदनात्मन्यात्मेति । तत्राष्टौ दर्शनप्रहातव्याः,

---

भ्योऽन्ये उच्छेद-मिथ्यादृष्टिशीलव्रतपरामर्शरागादयः । *त्रिभिः कारणैरिति ।* *विपरीत-नितीरण-समारोपैः ।* विपर्यासानां व्यवस्थापनम् । यत्रैतानि समस्तानि कारणानि सन्ति, ते विपर्यासाः स्थापिताः; यत्र तु न समस्तानि ते न विपर्यासाः—इत्युक्तं भवति ।

तन्मात्रशुद्ध्यालम्बनादिति । यस्माच्छीलव्रतमात्रेण शुद्धिरित्यालम्बते नितीरयति, तस्मान्नैकान्तविपर्यस्तः शीलव्रतपरामर्शः । न हि शीलव्रतं शुद्धिकारणं न भवति, केवलं तु न भवतीति । कथमस्य समारोपकत्वम् ? तन्मात्रेण शुद्धिकारणभावसमारोपात् । यद्यसन्तीरको न विपर्यासः, *यत्तर्हि सूत्र उक्तं* तत् कथम् ? न हि संज्ञा सन्तीरिका, नापि चित्तम् ।

द्वादश विपर्यासा इति । चतुर्षु विपर्यासेषु प्रत्येकं संज्ञा-चित्त-दृष्टिविपर्यासा इति । कथम् ? इत्युच्यते—*अनित्ये नित्यमिति विस्तरः ।* *एवं यावदनात्मन्यात्मेति ।* दुःखे सुखमिति संज्ञा-दृष्टि-चित्तविपर्यासास्त्रयः । अशुचौ शुचीत्येत एव त्रयः । यावदनात्मन्यात्मेति एत एव त्रय इति । *तत्राष्टौ दर्शनप्रहातव्या* इति । अनित्ये नित्यमिति संज्ञा-चित्त-दृष्टिविपर्यासास्त्रयः । अनात्मन्यात्मेति पुनस्त्रयः । दुःखे सुखमिति दृष्टिविपर्यासः । अशुचौ शुचीति दृष्टिविपर्यास

चत्वारो भावनाप्रहातव्याः । दुःखे च संज्ञाचित्तविपर्यासावशुचौ चेति निकायान्तरीयाः । इतरथा हि कथमन्तरेण सुखशुचिसंज्ञामवीतरागस्यार्यस्य कामरागः सम्भवेदिति ।

तदेतन्नेच्छन्ति वैभाषिकाः । यदि हि सुखशुचिसंज्ञाचित्तसमुदाचारादार्यस्य तद्विपर्यासावीक्ष्येते, सत्त्वसंज्ञाचित्तसमुदाचारात् तद्विपर्यासावपि किं नेष्येते ! न हि स्त्रियामात्मनि च विना सत्त्वसंज्ञया कामरागो युक्त इति ।

सूत्रेऽपि चोक्तम्—"यतश्च श्रुतवानार्यश्रावक इदं दुःखमार्यसत्यमिति यथाभूतं प्रजानाति । यावत् तस्य तस्मिन् समये योऽनित्ये नित्यमिति संज्ञाविपर्यासः चित्तविपर्यासो दृष्टिविपर्यासः स प्रहीयते" इति (   ) विस्तरः । तस्माद् दृष्टिसमुत्थे एव संज्ञाचित्ते विपर्यासौ, नान्ये; तत्कालभ्रान्तिमात्रत्वादलातचक्र-चित्रयक्षभ्रान्तिवत् ।

इति । *चत्वारो भावनाप्रहातव्याः ।* कथम् ? इत्याह—*दुःखे च संज्ञाचित्तविपर्यासावशुचौ* चेति । दुःखे सुखमिति संज्ञाचित्तविपर्यासौ द्वौ । अशुचौ शुचीति संज्ञाचित्तविपर्यासावपरौ द्वाविति चत्वारः । *अवीतरागस्यार्यस्येति* । स्रोतआपन्नस्य सकृदागामिनश्च ।

तद्विपर्यासावपीति । सत्त्वसंज्ञासमुदाचारात्, सत्त्वचित्तसमुदाचाराच्च । *तद्विपर्यासावपि किं नेष्येते* इति । सत्त्वालम्बनसंज्ञाचित्तविपर्यासावपि किं नेष्येते । आत्मविपर्यासावपि किं नेष्येते इत्यभिप्रायः । किं कारणम् ? इत्याह - *नहि स्त्रियामात्मनि च विना सत्त्वसंज्ञया* कामरागो युक्त इति । तस्मादेनावप्यनात्मनि आत्मेति संज्ञाचित्तविपर्यासौ भावनाप्रहातव्याविति प्राप्तम् । *विस्तर* इति वचनादेवं नेयम्—दुःखे सुखमिति अशुचौ शुचीति यावदनात्मन्यात्मेति संज्ञाविपर्यासः, चित्तविपर्यासः, दृष्टिविपर्यासः प्रहीयत इति । तस्माद् *दृष्टिसमुत्थे एव* दृष्टिसम्प्रयुक्त एव *संज्ञाचित्ते विपर्यासौ, नान्ये* । नादृष्टिसम्प्रयुक्तके इत्यर्थः । एतदुक्तं भवति—अस्त्यसौ संज्ञाचित्तविभ्रमः, न तु विपर्यासः; यस्मादसौ दृष्टिसमुत्थो न भवति । कस्माद् ? इत्याह—*तत्कालभ्रान्तिमात्रत्वादिति* । स्त्रीदर्शनकाले भ्रान्तिमात्रत्वादित्यभिप्रायः । यस्मात् तत्कालमेव दर्शनकालमेवार्याणां भ्रान्तिः । तथा मिथ्याज्ञानं भवति । *अलातचक्र-चित्रयक्षभ्रान्तिवत्* । यथा अलात आशु भ्रम्यमाणे तत्कालमात्रं चक्रमिति भ्रान्तिरुत्पद्यते, न पश्चात् । चित्रलिखितं च यक्षं दृष्ट्वा तत्कालं भ्रान्तिरुत्पद्यते—यक्ष इति ।

यत्तर्हि स्थविरानन्देनार्यवागीशमधिकृत्योक्तम्—

"विपर्यासेन[1] संज्ञानां चित्तं ते परिदह्यते ।
निमित्तं वर्ज्यतां तस्माच्छुभं रागोपसंहितम्" ॥

तस्मात् सर्व एवाष्टौ संज्ञाचित्तविपर्यासाः शैक्षस्याप्रहीणा इत्यपरे । तेऽपि चार्यसत्यानां यथाभूतज्ञानात्[2] प्रहीयन्ते । न विना तेनेत्युपायसमाख्यानान्नास्ति सूत्रविरोधः ॥ ९ ॥

तद्वत् । आर्यस्यात्र परिख्यानान्मुहूर्तं सुखशुचिभ्रान्तिः, सत्त्वभ्रान्तिर्वा, न त्वसौ विपर्यासः । उक्तं हि *भगवता*—"धन्धाः खलु भिक्षव. श्रुतवत आर्यश्रावकस्य स्मृतिसम्प्रमोषा उत्पद्यन्ते, अथ च पुनः क्षिप्रमेवास्तं परिक्षयं पर्यादानं गच्छन्ति" (　　　) इति ।

यद्यसौ संज्ञाचित्तभ्रमो न विपर्यासः, *यत्तर्हि स्थविरानन्देनेति* विस्तरः । आर्येण *वागीशेन* स्थविर *आनन्द* उक्तः—

कामरागाभिभूतत्वाच्चित्तं मे परिदह्यते ।
अङ्ग मे गौतम ब्रूहि शान्तित्वमनुकम्पय ॥ (　　　) इति ।

आर्य *आनन्दस्तं* प्रत्याह—

विपर्यासेन संज्ञानां चित्तं ते परिदह्यते ।
निमित्तं वर्ज्यतां तस्माच्छुभं रागोपसंहितम् ॥ (　　　) इति ।

स हि स्रोतापन्नः । तस्य चानया गाथया विपर्यासास्तित्वं परिदीपितमिति । *तस्मादिति* विस्तरः । यस्मान्निकायान्तरीयमतं *वैभाषिकैरागमेन* विरुद्ध्यते, वैभाषिकमतं च निकायान्तरीयैः; तस्मात् *सर्व एवाष्टौ संज्ञाचित्तविपर्यासाः शैक्ष्याप्रहीणा इत्यपरे* । केचित् तृतीयपाक्षिकाः । सूत्रविरोधं च परिहरन्ति । कतरस्य सूत्रस्य ? यदिदं वैभाषिकैः सूत्रमानीतम्—'यश्च श्रुतवान् आर्यश्रावक इति विस्तरेण यावत् प्रहीयते' इति । *तेऽपि चार्यसत्यानामिति* विस्तरः । तेऽपि चाष्टौ संज्ञा-चित्त-विपर्यासा आर्यसत्यानां दुःखादीनां यथाभूतज्ञानात् प्रहीयन्ते । *न विना तेन* यथाभूतज्ञानेन । *इत्युपायसमाख्यानात्* उपायप्रवर्तनात् *नास्ति तस्य सूत्रस्य विरोधः* । यदिदमुक्तम्—"इदं दुःखम् आर्यसत्यम्, अयं दुःखसमुदयः, अयं दुःखनिरोधः, इयं दुःखनिरोधगामिनी प्रतिपद् आर्यसत्यम्" (　　　) इति, तन्न दर्शनमार्गमेवाधिकृत्य, किं तर्हि ? भावनामार्गमपि । भावनामार्गोऽपि ह्यनास्रवश्चतुरार्यसत्यालम्बन एवेति ॥ ९ ॥

---

1. विपर्यासे च—का० ।　　　2. ०परिज्ञानात्–का० ।

अथ किं दृष्ट्यनुशयस्य एव भेदः, नान्यस्य ? मानस्याप्यस्ति । कथम् ? इत्याह—

सप्त मानाः,

मानः, अतिमानः, मानातिमानः, अस्मिमानः, अभिमानः, ऊनमानः, मिथ्यामानश्च ।

अभेदेन चित्तस्योन्नतिर्मान उक्तः । स प्रवृत्तिभेदात् सप्तधा भवति—१. हीनाद् विशिष्टः समेन वा समोऽस्मीति मन्यमानस्योन्नतिर्मानः । २. समाद्विशिष्टोऽस्मीत्यतिमानः[1] । ३. विशिष्टाद्विशिष्टोऽस्मीति मानातिमानः । ४. पञ्चोपादानस्कन्धानात्मत आत्मीयतो वा मन्यमानस्यास्मिमानः । ५. अप्राप्ते विशेषाधिगमे प्राप्तो मयेत्यभिमानः । ६. बह्वन्तरविशिष्टादल्पान्तरहीनोऽस्मीत्यूनमानः । ७. अगुणवतो गुणवानस्मीति मिथ्यामानः ।

यत्तर्हि शास्त्रे नव मानविधा उक्ताः—"श्रेयानस्मीति मानविधा, सदृशोऽस्मीति मानविधा, हीनोऽस्मीति मानविधा, अस्ति मे श्रेयान्, अस्ति मे सदृशः, अस्ति मे हीनः, नास्ति मे श्रेयान्, नास्ति मे सदृशः, नास्ति मे हीनः" इति ? एभ्य एव मानेभ्य एताः

नवविधास्त्रिभ्यः,

कतमेभ्यस्त्रिभ्यः ? मानातिमानोनमानेभ्यः । तत्र प्रथमं त्रयम्—दृष्टिसंनि-

---

प्रवृत्तिभेदादिति । आकारभेदादित्यर्थः । *अप्राप्ते विशेषाधिगमे* इति । समाधिसन्निश्रिताः सास्रवाश्च धर्मा *विशेषास्तस्याधिगमः* प्राप्तो मयेत्यभिमानः । *अगुणवतो गुणवानहमिति* । अगुणान्वित गुणवानहमस्मीति विपरीतविषयो मानो *मिथ्यामानः* । मिथ्यामानाभिमानयोः कः प्रतिविशेषः ? प्रतिलाभविशेषाधिगम-प्रतिरूपकगुणस्याभिप्राय इति सवस्तुकोऽभिमानः । मिथ्यामानस्तु निर्गुणस्य सतो गुणवानहमस्मीति निर्वस्तुकः । *मानविधा* इति । मानप्रकारः । सदृशो हीनोऽस्तीति मानविधा । सदृशोऽस्मीति मानविधा, हीनोऽस्मीति मानविधेति वक्तव्यम् ।

दृष्टिसन्निश्रितास्त्रय इति । पृथग्जनमधिकृत्य 'दृष्टिसन्निश्रिताः' इत्युच्यन्ते । आत्मदृष्टिः 'पूर्वमहम्' इति । पश्चाद् = अनन्तरम् इमे मानाः ।

---

१. ०त्यभिमानः—का० ।

श्रितास्त्रयो मानाः अतिमानमानोनमानाः। द्वितीयं त्रयम्—ऊनमानमानातिमानाः। तृतीयम्—मानातिमानोनमानाः।

युक्तस्तावद् बह्वन्तरविशिष्टादल्पान्तरहीनोऽस्मीत्यूनमानः; उन्नतिस्थानत्वात्। 'नास्ति मे हीनः' इत्यत्र किमुन्नतिस्थानम्? अस्ति सदृशो योऽभिप्रेते वरे सत्त्वराशौ निहीनमप्यात्मानं बहु मन्यते।

अपि चास्त्येव ज्ञानप्रस्थानविहितो विधिः। प्राकरणं तु निर्देशं परिगृह्य श्रेयानस्मीत्येकेषु मानोऽपि स्याद्, अतिमानोऽपि मानातिमानोऽपि, हीनसमविशिष्टापेक्षया।

अथैते सप्त मानाः किम्प्रहातव्याः? इत्याह—

दृग्भावनाक्षयाः।

दृग्भावनाभ्यामेषां क्षयः। एतदुक्तं भवति—सर्वे दर्शनभावनाप्रहातव्या इति यद् भावनाहेयमप्रहीणं किमवश्यं तदार्याणां समुदाचरति? नावश्यम्, तद्यथा

अतिमान-मानोन्मानाः यथाक्रममेते भवन्ति। कथम्? श्रेयानहमस्मीति मानविधा दृष्टिसन्निश्रितोऽतिमानः। सदृशोऽस्मीति मानविधा दृष्टिसन्निश्रितो *मानः*। हीनोस्मीति मानविधा दृष्टिसन्निश्रित *उन्मानः*। *द्वितीयं* त्रयमेतत् प्रातिलौम्येन यथाक्रमं नेयम्। 'अस्ति मे श्रेयान्' 'अस्ति मे सदृशः', 'अस्ति मे हीनः' इति दृष्टिसन्निश्रिता *उन्मान-मानातिमानाः*। *तृतीयम्* 'नास्ति मे श्रेयान्', 'नास्ति मे सदृशः', 'नास्ति मे हीनः' इति। यथाक्रमं दृष्टिसन्निश्रिता *मानातिमानोन्मानाः*। *प्राकरणं तु निर्देशं परिगृह्येति*। प्रकरणपादनिर्देशः। कोऽसौ? योऽसौ पूर्वमुक्तः—'हीनाद्विशिष्टोऽस्मि, समेन वा' इत्यादिनिर्देशः। श्रेयानस्मीति मानोऽपि स्याद् *हीनापेक्षया*; हीनाद्विशिष्टोऽस्मि समेन वा इति मानलक्षणनिर्देशात्। *अतिमानोऽप्ययं* स्यात् *समापेक्षया*। 'समाद् विशिष्टोऽस्मि' इत्यतिमानलक्षणनिर्देशात्। मानातिमानोऽप्ययं स्याद् *विशिष्टापेक्षया*; 'विशिष्टाद् विशिष्टोऽस्मि' इति मानातिमानलक्षणनिर्देशात्।

सर्वे इति ग्रहणमस्मिमानोऽपि भावनाप्रहातव्यः, न केवलं शेषाः। शेषा अपि दर्शनप्रहातव्याः, न केवलमस्मिमान इति प्रदर्शनार्थम्। *नावश्यमिति*। प्रहीणं न समुदाचरतीति नियमः। तथा हि— श्रद्धादिमिद्धदुःखेन्द्रियचक्षुरादयः प्रहीणा अपि समुदाचरन्ति; दर्शनहेयानामन्तर्मुखत्वात्। भावनाहेयालम्बनैव रागद्वेषमोहैर्विज्ञप्तिरुत्थाप्यत इति। भावनाहेयमेव वधादिपर्यवस्थानम्।

वधादिपर्यवस्थानं हेयं भावनया,

येन क्लेशपर्यवस्थानेन सञ्चिन्त्य प्राणिवधं कुर्याद् यावन्मृषावादम्, तद् भावनाहेयम्; भावनाहेयधर्मालम्बनत्वात् ।

तथा ॥ १० ॥

विभवेच्छा;

विभवतृष्णाऽपि भावनाहेया । विभवो नाम क एष धर्मः ? त्रैधातुकी अनित्यता । तत्र प्रार्थना विभवतृष्णा । तथाशब्देन भवतृष्णायाः प्रदेशो गृह्यते । "अहो बताहमैरावणो नागराजः स्याम्" इत्येवमादि ।

मानविधा अपि भावनाप्रहातव्याः सन्तीत्युक्तमस्मिमानश्च ।

न चार्यस्य सम्भवन्ति विधादयः ।

नास्मिता,

"वधादिपर्यवस्थानम्" इति । आदिशब्देनादत्तादान-काम-मिथ्याचार-मृषावादग्रहणम् । *तद् भावनाहेयम्, भावनाहेयधर्मालम्बनत्वादिति* । भावनाहेया वधादिकसत्त्वादय एव धर्मा अस्यालम्बनमिति कृत्वा । सत्यदृष्टयादयोऽपि हि यद्यपि भावनाहेयान् धर्मानालम्बन्ते, न तु केवलं भावनाहेया इत्यतो न ते भावनाहेयाः । *तत्र प्रार्थनेति* । तत्र त्रैधातुक्यामनित्यतायां प्रार्थना । किं तत्रापि प्रार्थना भवति ? भवतीत्याह । यथोक्तं सूत्रे—"यावदयमात्मा जीवति, तिष्ठति, ध्रियते, यापयति; तावत् सरोगः, सगन्धः, सशल्यः, सज्वरः, सपरिदाहकः । यतश्चायमात्मा उच्छिद्यते विनश्यति न भवति । इयताऽयमात्मा सम्यक् समुच्छिन्नो भवति" (   ) इति । *भवतृष्णायाः प्रदेशो गृह्यत इति* । अहो बताहमैरावणो नागराजः स्यामित्येवमादिका भवतृष्णा न समुदाचरति । आदिशब्देन 'कुबेरः स्याम्', 'स्त्री स्याम्' इत्येवमादिका गृह्यते । प्रदेशग्रहणात् 'इन्द्रः स्याम्' इत्येवमादिका समुदाचरतीति दर्शितं भवति ॥ १० ॥

मानविधा अपि भावनाप्रहातव्याः सन्तीत्युक्तमिति । 'दृग्भावनाक्षयाः" (अभि० को० ५.१०) इति वचनात् ।

"न चार्यस्य सम्भवन्ति विधादयो नास्मिता" इति । पूर्वं भावनाहेयपरिग्रहणं कृतम्, "दृग्भावनाक्षयाः वधादिपर्यवस्थानं हेयं भावनया तथा विभवेच्छा" (अभि० ५.१०) इत्यनेन ग्रन्थेन । सम्प्रति तेषां विधादीनामार्यस्यासमुदाचार उच्यते—*न चार्यस्य सम्भवन्ति विधादयो नास्मितेति* ।

आदिग्रहणेन यावद् भवतृष्णाया[1] ग्रहणम् ।
किं कारणमप्रहीणा अप्येते न सम्भवन्ति[2] ?

दृष्टिपुष्टत्वात्

सत्कायदृष्टिपुष्टा हि मानविधा अस्मिमानश्च, अतो भग्नपृष्ठत्वात् नोत्थातुं पुनरुत्सहन्ते । वधादिपर्यवस्थानं मिथ्यादृष्टिपुष्टत्वात् । विभवतृष्णा उच्छेद-दृष्टिपुष्टत्वात् । भवतृष्णायाः प्रदेशः शाश्वतदृष्टिपुष्टत्वात् ।

कौकृत्यं नापि चाशुभम् ।। ११ ।।

अकुशलं चापि कौकृत्यं भावनाप्रहातव्यम् । न चार्यस्य तत् सम्भवति विचिकित्सासमुत्थितत्वात् ॥ १०–११ ॥

अथैषामष्टानवतेरनुशयानां कति सर्वत्रगाः ? कत्यसर्वत्रगाः ?

सर्वत्रगा दुःखहेतुदृग्घेया दृष्टयस्तथा ।
विमतिः सह ताभिश्च याऽविद्याऽऽवेणिकी च या ।। १२ ।।

दुःखसमुदयदर्शनप्रहातव्या दृष्टयो विचिकित्सा च, ताभिश्च सम्प्रयुक्ता अविद्या आवेणिकी च दुःखसमुदयप्रहातव्ये चाविद्या । इतीमे एकादशानुशयाः सभागधातुसर्वत्रगाः—सप्त दृष्टयः, द्वे विचिकित्से, द्वे अविद्ये; सकलस्वधात्वालम्बनत्वात् ।

आदिग्रहणेन यावद् भवतृष्णाया ग्रहणमिति । वधादिपर्यवस्थानस्य विभवतृष्णायाः प्रदेशस्य भवतृष्णायाश्च ग्रहणमित्यर्थः । *न सम्भवन्ति* न समुदाचरन्ति । *दृष्टिपुष्टत्वादिति* । तत्पूर्वकत्वेन तदुपबृंहितत्वात् *वधादिपर्यवस्थानं मिथ्यादृष्टिपुष्टम्* ; तदभ्यासेन कर्मफलापवादित्वात् । *भग्नपृष्ठत्वात्* । तत्पोषकाभावेन भग्नपृष्ठत्वादित्यर्थः ।

कौकृत्यं भावनाप्रहातव्यम्, भावनाहेयधर्मालम्बनत्वात् ॥ ११ ॥

"*सर्वत्रगाः*" इति । सर्वत्र गच्छतीति सर्वत्रगः, पञ्चापि निकायान् आलम्बत इत्यर्थः । पञ्चानामपि निकायानां हेतुभावेनावतिष्ठन्त इत्यपरे । वक्ष्यति हि—"एषां प्रभावेणान्यनैकायिका अपि क्लेशा उपजायन्ते" इति । *एकादशानुशया* इति विस्तरः । *सप्त दृष्टयो* दुःखदर्शनप्रहातव्याः सत्कायदृष्ट्यादयः पञ्च, समुदयदर्शनप्रहातव्ये द्वे दृष्टीमिथ्यादृष्टि-परामर्शदृष्टीति—सप्त । *द्वे विचिकित्से*

---

१. विभवतृष्णायाः–का० । २. समुदाचरन्ति–का० ।

किमेभिर्युगपदालम्बते, आहोस्वित् क्रमेण ? यदि क्रमेण, अन्येषामपि प्रसङ्गः ? अथ युगपत्, कः सकलेन कामधातुना शुद्धिं प्रत्येत्यकारणं वा कारणतः ? नोच्यते[1] सकलं[1] स्वधातुं युगपदालम्बन्त इति, अपि तु पञ्चप्रकारमपि सर्वं युगपत् ।

एवमपि यत्रात्मदृष्टिस्तत्रात्मतृष्णा, यत्राग्रशुद्धिदृष्टी तत्र प्रार्थना[2], तेन च मान इति तृष्णामानयोरपि सर्वत्रगत्वं प्राप्नोति, एवं सति दर्शनभावनाहेयालम्बनत्वादेतदुभयं किम्प्रहातव्यं स्यात् ? भावनाप्रहातव्यम्; व्यामिश्रालम्बनत्वात् ।

दुःख-समुदयदर्शनप्रहातव्ये । द्वे अविद्ये दुःख-समुदयदर्शनप्रहातव्ये एव । एकदेशतो न साकल्यतः । ये ह्यविद्ये एतत्सर्वत्रगसम्प्रयुक्ते, आवेणिक्यौ च ते सर्वत्रगे भवतः, न रागादिसम्प्रयुक्ते । इत्येवमेकादशानुशयाः सर्वत्रगाः । नवानुशयाः साकल्यतः, द्वावेकदेशत इति कृत्वा । धातुभेदेन तु त्रयस्त्रिंशत् ।

आवेणिकीति कोऽर्थः ? एवमाहुः– सम्पर्को वेणीत्युच्यते, न वेणिरवेणिः, पृथग्भव इत्यर्थः । एवं ह्युक्तम् 'अवेणिर्भगवान्, अवेणिर्भिक्षुसङ्घः' इति । पृथग् भगवान्, पृथग् भिक्षुसङ्घ इत्यभिप्रायः । अवेण्या चरतीत्यावेणिकी । नान्यानुशयसहचारिणीत्यर्थः । *सकलस्वधात्वालम्बनत्वादिति* । यस्मादेते सकलं स्वधातुमालम्बन्ते, तस्मात् सर्वत्रगा इत्युच्यन्ते ।

कः सकलेनेति विस्तरः । कः सकलेन कामधातुना शुद्धिं प्रत्येति । अकारणं वा कारणतः सकलं कामधातुं प्रत्येतीत्यधिकृतम् । तस्माच्छीलव्रतपरामर्शो न सर्वत्रग इत्यभिप्रायः । *नोच्यते सकलं* निरवशेषमनेकं भेदभिन्नं *स्वधातु युगपद् आलम्बन्ते, अपि तु पञ्चप्रकारमपि सर्वं युगपदालम्बन्ते* । दुःखदर्शनप्रहातव्यं यावद् भावनाप्रहातव्यमिति । प्रकारसर्वतायां सर्वशब्दोऽयं द्रष्टव्यः—इत्येष *वैभाषिकाणां* परिहारः ।

यत्रात्मदृष्टिरिति । पञ्चसूपादानस्कन्धेषु । *तत्रात्मतृष्णा* तेषामात्माभिनिवेशवस्तुत्वात् । *यत्राग्रशुद्धदृष्टी* । यत्र वस्तुनि पञ्चोपादानस्कन्धलक्षणेऽग्रदृष्टिर्दृष्टिपरामर्शः, *शुद्धिदृष्टिश्च* शीलव्रतपरामर्शः । तत्र *प्रार्थना* तृष्णालक्षणा । *तत्र तत्प्रार्थनेति* केचित् पठन्ति । तत्र = वस्तुनि तस्य = पुद्गलस्य प्रार्थना = तत्प्रार्थनेत्यर्थः । *तेन च मान* इति । तेन च वस्तुना मानः । तद्द्वारेणोन्नतिरित्यर्थः । *एवं सतीति* । एवं तृष्णामानयोः सर्वत्रगत्वे *सति* । सत्कायदृष्ट्यादिवद् *दर्शनभावनाहेयालम्बनत्वादेतदुभयं* तृष्णामानलक्षणं *किम्प्रहातव्यं* केन प्रहातव्यम्—

१–१. सकलं नोच्यते सकलं–का० । २. तत्प्रार्थना–का० ।

अथवा पुनरस्तु दर्शनप्रहातव्यम् ; दृष्टिबलाधानवर्तित्वात् ।

स्वलक्षणक्लेशावेतौ न सामान्यक्लेशौ । तस्मान्न सर्वत्रगाविति वैभाषिकाः ॥१२॥

य एते सभागधातुसर्वत्रगा एकादशानुशया उक्ताः,

नवोर्ध्वालम्बना एषां दृष्टिद्वयविवर्जिताः ।

सत्कायदृष्टिमन्तग्राहदृष्टिं च वर्जयित्वाऽन्ये नवानुशया विसभागधातुसर्वत्रगाः । कदाचित्[1] विसभागमेकं धातुमालम्बन्ते[2], कदाचिद् द्वौ ; "येऽनुशयाः कामप्रतिसंयुक्ता रूपप्रतिसंयुक्तालम्बनाः, कामप्रतिसंयुक्ता आरूप्यप्रतिसंयुक्तालम्बनाः, कामप्रतिसंयुक्ता रूपारूप्यप्रतिसंयुक्तालम्बनाः" ( ) इति वचनात् ।

यदा कामधातौ स्थितो ब्रह्मणि सत्त्वदृष्टिं नित्यदृष्टिं चोत्पादयति, तदा कथं

किं दर्शनप्रहातव्यम् ? उताहो भावनयेति ? ये यद्दर्शनहेयालम्बनास्ते तद्दर्शनहेया इति नियमं मनसिकृत्वा पृच्छति । अन्यथा हि सत्कायदृष्ट्यादिवदेवैतदुभयं दर्शनप्रहातव्यमेव स्यादिति किमत्र प्रष्टव्यं स्यात् । नहि सत्कायदृष्ट्यादयो न दर्शनभावनाहेयालम्बनाः, न च ते न दर्शनहेया भवन्तीति । अत्राचार्यः समाधिमाह—*भावनाप्रहातव्यम्, व्यामिश्रालम्बनत्वा*दिति । यदि तृष्णामानौ दर्शनप्रहातव्यालम्बनावेव, स्यातां दर्शनप्रहातव्यौ ; न त्वेवम्, अतो व्यामिश्रालम्बनत्वाद् भावनाप्रहातव्यौ ; अवशिष्टा भावनाहेयाः' इति लक्षणनियमात् ।

अथ वेति । स एवाचार्यः परावृत्य पुनर्ब्रवीति । *पुनरस्तु दर्शनप्रहातव्या*विति । किम् ? एतदुभयमिति वर्तते । कस्माद् ? इत्याह—*दृष्टिबलाधानवर्तित्वा*दिति । दृष्टेर्बलाधानम् = सामर्थ्यम्, दृष्टिबलाधानेन वर्तितुं शीलमस्येति दृष्टिबलाधानवर्ति तदुभयं दर्शनप्रहातव्यमस्त्विति ।

वैभाषिका इदानीं स्वपक्षं स्थापयन्ति—*स्वलक्षणक्लेशावेतौ, न सामान्यक्लेशौ भवतः, तस्मान्न सर्वत्रगा*विति । यत्रात्मदृष्टिस्तत्र तृष्णामानौ, न तु युगपत् सर्वस्मिन्; स्वलक्षणक्लेशत्वात् । एकदेशालम्बनौ हि तौ, तस्मान्न सर्वत्रगौ । न चेत् सर्वत्रगौ, तेन यौ यद्दर्शनहेयालम्बनौ तौ तद्दर्शनहेयौ । परिशिष्टौ भावनाहेयौ—इति सिद्धम् ॥ १२ ॥

कदाचिद् विसभागमेकं धातुमालम्बन्ते, कदाचिद् द्वे इति । कदाचित् त्रीन्

---

१. कदाचित्तु—का० । २. ०मालम्बते—जा० ।

सत्कायान्तग्राहदृष्टी विसभागधात्वालम्बने न भवतः ? आत्मात्मीयत्वेनाग्रहणात् । अन्तग्राहदृष्टिश्च ? तत्समुत्थितत्वात् ।

का तर्हीयं दृष्टिः ? नेयं दृष्टिः, मिथ्याज्ञानं पुनरेतदित्याभिधार्मिकाः ।

कुतो नु खल्वेतदन्या तदालम्बना दृष्टिः ।। एषा न दृष्टिरिति सिद्धान्तस्तु प्रमाणयितव्यः ।

किं खल्वनुशयाः एव सर्वत्रगाः ? नेत्याह ।

प्राप्तिवर्ज्याः सहभुवो येऽप्येभिस्तेऽपि सर्वगाः ।। १३ ।।

सर्वत्रगैरनुशयैः सहभुवो येऽप्यन्ये धर्मास्तेऽपि सर्वत्रगाः । प्राप्तयस्तु नैवम्; अनेकफलत्वात् ।

अत एव 'स्युः सर्वत्रगानुशया न हेतुः' इति चतुष्कोटिकं क्रियते । प्रथमा कोटिः—अनागताः सर्वत्रगा अनुशयाः । द्वितीया—अतीतप्रत्युत्पन्नास्तत्सहभुवः । तृतीयचतुर्थ्यौ[1] योज्ये ॥ १३ ॥

धातून् इति नोक्तमेतत् । कामधातुस्थास्तु कदाचिद् विसभागमेकरूपधातुमारूप्यधातुं वालम्बन्ते, कदाचिद् रूपारूप्यौ द्वाविति ।

आत्मात्मीयत्वेनाग्रहणादिति । यस्मात्तं ब्रह्माणमात्मत्वेन आत्मीयत्वेन न गृह्णाति, अथ सत्कायदृष्टिर्न भवति ब्रह्मणि सत्त्वदृष्टिः । *यस्माच्चान्तग्राहदृष्टिः सत्कायदृष्टिसमुत्थिता*, अतो नित्यदृष्टिरपि ब्रह्मणि नान्तग्राहदृष्टिरिति । *का तर्हीयं दृष्टिरिति* । येयं ब्रह्मणि सत्त्वदृष्टिः, नित्यदृष्टिश्च, *नेयं दृष्टिः, मिथ्याज्ञानं पुनरेतदिति* । विपरीतालम्बनत्वात् मिथ्याज्ञानमेतत् । नहि सर्वा विपरीतालम्बना प्रज्ञा दृष्टिरिष्यते, अनात्मन्येवात्मनि विपरीता प्रज्ञा सत्कायदृष्टिरिष्यते । तत्समुत्थापिता च नित्यदृष्टिरन्तग्राहदृष्टिः, नान्या । यैव ह्यहङ्कारस्य सन्निश्रयीभवति, सैव सत्कायदृष्टि । महाब्रह्मणि च सत्त्वदृष्टिरहमित्यहङ्कारस्य न सन्निश्रयीभवति । तेनोक्तम्—आत्मात्मीयत्वेनाग्रहणादिति ।

"प्राप्तिवर्ज्याः सहभुवः" इति । वेदनादयः । *प्राप्तयस्तु नैवम्, अनेकफलत्वादिति* । अनेकफलविपाकनिष्यन्दा हि प्राप्तयः प्राप्तिमतेरयुक्तम् । अतो न सर्वत्रगधर्मप्राप्तयः सर्वत्रगाः व्यवस्थाप्यन्ते । *अत एवेति* । यस्मात् सहभुवोऽपि सर्वत्रगा व्यवस्थाप्यन्ते, तस्माच्चतुष्कोटिकं क्रियते । *प्रथमा कोटिरनागताः सर्वत्रगा अनुशया* इति । एते सर्वत्रगस्य स्वाभाव्यात् । न सर्वत्रगहेतुरनागता-

१. तृतीया०–का०; तृतीयचतुर्थ्यौ–जा० ।

एषामष्टानवतेरनुशयानां कति सास्रवालम्बनाः ? कत्यनास्रवालम्बनाः ?

मिथ्यादृग्विमती ताभ्यां युक्ताऽविद्याऽथ केवला ।
निरोधमार्गदृग्घेयाः षडनास्रवगोचराः ।। १४ ।।

निरोधदर्शनप्रहातव्यास्त्रयोऽनुशया मिथ्यादृष्टिविचिकित्साऽविद्या च, ताभ्यां सम्प्रयुक्ताऽऽवेणिकी च । मार्गदर्शनप्रहातव्या अप्येत एव त्रयः ।

इत्येते षडनास्रवालम्बनाः, शेषाः सास्रवालम्बना इति सिद्धम् ।। १४ ।।

तत्र पुनः—

स्वभूम्युपरमो मार्गः षड्भूमिनवभूमिकः ।

वस्थायां सर्वत्रगहेतोरनवस्थापनात् । *द्वितीया अतीतप्रत्युत्पन्नाः तत्सहभुवः ।* सर्वत्रगसहभुवोऽतीतप्रत्युत्पन्नत्वात् सर्वत्रगहेतुर्भवन्ति । न सर्वत्रगा अनुशयाः, अननुशयस्वभावत्वात् । *तृतीयचतुर्थौ*[1] *योज्ये ।* तृतीया—अतीतप्रत्युत्पन्नाः सर्वत्रगा अनुशयाः । चतुर्थी—तानाकारान् स्थापयित्वा । तद्यथा—अनागतास्तत्सहभुवः, प्राप्त्यादयश्च ।। १३ ।।

"*षडनास्रवगोचराः*" इति । षडेवेत्यवधारणम् । तस्मान्न रागादयोऽनास्रवालम्बना युज्यन्ते । 'न रागस्तस्य वर्ज्यत्वान्न द्वेषोऽनपकारतः' (अभि० को० ५.१६) इत्यादिवचनात् । *अविद्या च ताभ्यामिति ।* मिथ्यादृष्टिविचिकित्साभ्यां या सम्प्रयुक्ता । *या चावेणिकी अविद्या ।* स एकोऽविद्यानुशय इति । *त्रयो निरोधदर्शनप्रहातव्या अनास्रवालम्बनाः ।* एवं *मार्गदर्शनप्रहातव्या अप्येत एव त्रय* इति । षड् भूमौ भूमौ भवन्ति ।। १४ ।।

"*तद्गोचराणां विषयः*" इति । तौ निरोधमार्गौ गोचर एषामिति तद्गोचराः, तेषां यथाक्रमं त्रयाणाम् ।

"*स्वभूम्युपरमः*" । स्वभूमिनिरोधः । *गोचरः* आलम्बनम् । *मार्गस्तु* धर्मज्ञानपक्ष्यः षड्भूमिकोऽन्वयज्ञानपक्ष्यो नवभूमिको मार्गगोचराणामपरेषां त्रयाणामनुशयानामालम्बनम् । कथं कृत्वा ? निरोधालम्बना एते त्रयोऽनुशया[2]नवभूमिका भवन्ति कामावचरा यावद् भवाग्रिकाः । तेषां कामावचराणां कामावचरधर्मनिरोध एवालम्बनम् । प्रथमध्यानभूमिकानां प्रथमध्यानभूमिकधर्मनिरोध एवालम्बनम् । तेषां यावद् भवाग्रभूमिकानां भवाग्रभूमिकधर्मनिरोध एवालम्बनम् । मार्गस्तु धर्मज्ञानपक्ष्यः षड्भूमिकः । अनागम्यध्यानान्तरभूमिकः,

---

१. ०चतुष्टयौ—जा० । २. त्रयानुशया—जा० ।

अभि० को० ३:३

तद्गोचराणां विषयो मार्गो ह्यन्योऽन्यहेतुकः ।। १५ ।।

निरोधालम्बनानां मिथ्यादृष्ट्यादीनां स्वभूमिनिरोध एवालम्बनं कामावचराणां कामधातोरेव, यावद् भवाग्रभूमिकानां भवाग्रस्यैव । मार्गालम्बनानां कामावचराणां षड्भूमिको धर्मज्ञानपक्षो मार्गः सर्व एवालम्बनम् । योऽपि रूपारूप्यप्रतिपक्षः रूपारूप्यावचराणामप्यदृष्टभूमिकानां नवभूमिकः, स एवान्वयज्ञानपक्ष्यो मार्ग आलम्बनम्; मार्गस्यान्योन्यहेतुकत्वात् ।

यद्यपि धर्मज्ञानान्वयज्ञाने अप्यन्योन्यहेतुके अन्वयज्ञानं[1] न[1] कामधातुप्रतिपक्ष इति; न कामावचरा मार्गालम्बना अन्वयज्ञानपक्षानालम्बन्ते ।

धर्मज्ञानं तर्हि रूपारूप्यप्रतिपक्षत्वात् तद्भूमिकानां मार्गालम्बनामालम्बनं

चतुर्ध्यानभूमिकश्च । स सर्व एव कामावचराणामेषां त्रयाणामनुशयानामालम्बनम् । अन्वयज्ञानपक्ष्यः पुनर्नवभूमिकः । अनागम्यध्यानान्तरचतुर्ध्यानाकाशविज्ञानाकिञ्चन्यायतनभूमिकः । स सर्व एव प्रथमध्यानभूमिकानामेषां त्रयाणामनुशयानामालम्बनम् । एवं यावद् भवाग्रभूमिकानामिति ।

कस्मात् पुनः स्वभूमिनिरोध एव तद्गोचरालम्बनम्, मार्गस्तु षड्भूमिकोऽपि वा नवभूमिकोऽपि वा तेषामालम्बनमिति ? अत्र हेतुं दर्शयति—"*मार्गो ह्यन्योन्यहेतुकः*" इति । कथमन्योन्यहेतुकः ? षड्भूमिको धर्मज्ञानपक्ष्यो मार्गोऽधरभूमिकस्योर्ध्वभूमिकस्य वा, समस्य विशिष्टस्य वा धर्मज्ञानपक्ष्यान्तरस्यान्वयज्ञानपक्ष्यस्यापि च मार्गस्य हेतुर्भवति । सोऽपि तस्यान्वयज्ञानपक्ष्यो[2] नवभूमिको योज्यः । विस्तरेणैतद् व्याख्यातम्—"अन्योन्यनवभूमिस्तु मार्गः समविशिष्टयोः" (अभि० को० २. ५३) इत्यत्र ।

तदेवं कामावचराणां मार्गालम्बनानामनागम्यभूमिको धर्मज्ञानपक्ष्यो यावच्चतुर्थध्यानभूमिक आलम्बनम् । अन्वयज्ञानपक्ष्योऽपि मार्गोऽनागम्यभूमिको यावदाकिञ्चन्यायतनभूमिकः प्रथमध्यानभूमिकानामेषां मार्गालम्बनानामालम्बनम् । एवं यावद् भवाग्रभूमिकानामिति ।

यदि कामावचरा मार्गालम्बना मिथ्यादृष्ट्यादयो रूपारूप्यप्रतिपक्षमपि निरोधमार्गाख्यं धर्मज्ञानमालम्बन्ते, सकलोऽपि हि धर्मज्ञानपक्ष्योऽन्योन्यहेतुक इति; कस्मात् त एव मिथ्यादृष्ट्यादयोऽन्वयज्ञानपक्ष्यमपि मार्गं नालम्बन्ते; धर्मज्ञानान्वयज्ञानयोरन्योन्यहेतुकत्वाद् ? इत्याह—*यद्यपि धर्मज्ञानान्वयज्ञान*

१–१. नत्वन्वयज्ञान–का० । २. ०पक्षो–जा० ।

भविष्यति । न तत् सकलं प्रतिपक्षः, दुःखसमुदयधर्मज्ञानयोरेतदप्रतिपक्षत्वात्[1] । नापि सकलयो रूपारूप्ययोर्दर्शनप्रहातव्यानामप्रतिपक्षत्वादित्याद्याभावान्न भवत्यालम्बनम् ॥ १५ ॥

अथ कस्माद्रागप्रतिघमाना दृष्टिशीलव्रतपरामर्शौ चानास्रवालम्बना नेष्यन्ते?

न रागस्तस्य वर्ज्यत्वात्

वर्जनीयो हि रागः यदि चानास्रवालम्बनः स्यान्न वर्जनीयः स्यात्; कुशलधर्मच्छन्दवत् ।

इति । विस्तरः—*अन्वयज्ञानं न कामधातुप्रतिपक्ष* इति । न ते तदालम्बन्ते । *धर्मज्ञानं तर्हीति* विस्तरः ।

"धर्मज्ञानं निरोधे यन्मार्गे वा भावनापथे ।

त्रिधातुप्रतिपक्षस्तद्" (अभि० को० ३.९) इति सिद्धान्ताद् *धर्मज्ञानं रूपारूप्यप्रतिपक्षस्तदभावात् तद्भूमिकानां* रूपारूप्यभूमिकानां मिथ्यादृष्ट्यादीनाम*ालम्बनं भविष्यति । न तत्सकलमिति* विस्तर. । न तद् धर्मज्ञानं सकलं *प्रतिपक्षो* रूपारूप्यधात्वोः । *किं तर्हि ?* किं कारणम् । *दुःखसमुदयधर्मज्ञानयो*र्भावनामार्गसंगृहीतयोरे*तदप्रतिपक्षत्वात् ।* रूपारूप्यधात्वोरप्रतिपक्षत्वादित्यर्थः। अतो न रूपारूप्यावचराणां मिथ्यादृष्ट्यादीनां तद्धर्मज्ञानमालम्बनम् । किञ्च *नापि सकलयोरिति* विस्तरः । नापि सकलयो *रूपारूप्यधात्वो*स्तद्धर्मज्ञानं *प्रतिपक्षः ।* किं कारणम् ? *दर्शनप्रहातव्यानामप्रतिपक्षत्वात्* "धर्मज्ञानं निरोधे यन्मार्गे वा भावनापथे" (अभि० को० ३.६) इति वचनात् ।

अत्र निगमनं करोति—*इत्याद्याभावान्न भवत्यालम्बनमि*ति । दुःख-समुदय-निरोधमार्गाणाम*ाद्ययो*र्दुःखसमुदयधर्मज्ञानयोर्यथोक्तरूपारूप्यप्रतिपक्षत्वं प्रत्य*भावात्* । रूपारूप्यावचराणां दर्शनभावनाप्रहातव्यानां चाद्येषु दर्शनप्रहातव्येषु प्रतिपक्षत्वं प्रति तस्य धर्मज्ञानस्याभावात् । न तद्भूमिकानां मिथ्यादृष्ट्यादीनां मार्गालम्बनानां रूपारूप्यभूमिकानां धर्मज्ञानमालम्बनं भवति । तदेव त्रैधातुकानष्टादशानास्रवालम्बनानपास्य शेषा अशीतिरनुशयाः सर्वालम्बनाः—इति स्थापितम् ॥ १५ ॥

न वर्जनीयः स्यादिति । न प्राप्तिच्छेदेन प्रहेयः स्यादित्यर्थः । *यथा कुशलो धर्मच्छन्दो*ऽभिलाषरूपः सम्यग्दृष्टिरिति न प्राप्तिच्छेदेन प्रहेयः, *तद्वदयं* स्यात् । अतो नाऽनास्रवालम्बनः।

---

[1] १. •रतत्प्रतिपक्ष०—का० ।

न द्वेषोऽनपकारतः ।

अपकारवस्तुनि हि प्रतिघ उत्पद्यते । न चैवं निरोधमार्गौ ।

न मानो न परामर्शौ शान्तशुद्धयग्रभावतः ।। १६ ।।

निरोधमार्गयोः शान्तत्वान्न ताभ्यामुन्नतिर्भवितुमर्हति । भूतार्थशुद्धित्वान्न तयोः शुद्धिग्राहः शीलव्रतपरामर्शः । अग्रौ च तौ । हीने चाग्रग्राहो दृष्टिपरामर्शः । तस्मादयुक्तमेषामनास्रवालम्बनत्वम् ।। १६ ।।

एषामष्टानवतेरनुशयानां कत्यालम्बनतोऽनुशेरते ? कति सम्प्रयोगत एव ?

सर्वत्रगा अनुशयाः सकलामनुशेरते ।

स्वभूमिमालम्बनतः स्वनिकायमसर्वगाः ।। १७ ।।

ये सर्वत्रगा अनुशयास्ते सकलां पञ्चप्रकारामपि स्वां भूमिमालम्बनतोऽनुशेरते । असर्वत्रगास्तु स्वस्यां भूमौ स्वमेव निकायमालम्बनतोऽनुशेरते, नान्यम् । तद्यथा—दुःखदर्शनप्रहातव्या दुःखदर्शनप्रहातव्यमेव निकायम्, एवं यावद्भावनाप्रहातव्या भावनाप्रहातव्यमेव, नान्यम् ।। १७ ।।

उत्सर्गं कृत्वाऽपवादं करोति—

नानास्रवोर्ध्वविषयाः,

"*न द्वेषोऽनपकारत*." इति । नवाघातवस्तुलक्षणव्यतीतत्वान्निरोधमार्गयोर्नात्र द्वेषः, *भूतार्थशुद्धित्वादिति* । भूतार्थेन शुद्धिः = निरोधः । क्लेशमलप्रहीणत्वात् । मार्गोऽपि परमार्थशुद्धिः, परमार्थेन शुद्धयत्यनयेति कृत्वा । यस्तयोः शुद्धिरिति ग्राहो न शीलव्रतपरामर्श इति युज्यते व्यवस्थापयितुम् । *अग्रौ च ताविति* । भूतार्थशुद्धित्वात् *तौ* निरोधमार्गौ *अग्रौ* । अपि च—परामर्शौ यद्यनास्रवालम्बनौ स्याताम्, सम्यग्दृष्टिलक्षणं भजेताम्; शुद्धत्वादग्रत्वाच्चानास्रवाणाम् । अतश्च न दर्शनहेयौ स्यातामग्रौ । *हीने* च वस्तुन्य*ग्र* इति *ग्राहो दृष्टिपरामर्शो* ुच्यते, न चैवं निरोधमार्गाविति । न तयोरग्रग्राहो दृष्टिपरामर्शो भवति ।। १६ ।।

कत्यालम्बनतोऽनुशेरते, कति सम्प्रयोगत एवेति । कत्यालम्बनत एवेति नावधारणेन पृच्छति; यस्माद् य आलम्बनतोऽनुशेरते, तेऽवश्यं सम्प्रयोगतोऽनुशेरत इति । ये तु सम्प्रयोगत एवानुशेरते, ते नालम्बनतोऽनास्रवविसभागभूम्यालम्बना अनुशया इति ।। १७ ।।

अनास्रवालम्बना अनुशया नैवालम्बनतोऽनुशेरते। नाप्यूर्ध्वभूम्यालम्बनाः। किं कारणम्? तदालम्बनस्य वस्तुनः

अस्वीकाराद्विपक्षतः।

यदि वस्त्वात्मदृष्टितृष्णाभ्यां स्वीकृतं भवति तत्रान्येऽप्यनुशया अनुगमयितुमुत्सहन्ते। आर्द्र इव पटे रजांसि संस्थातुम्। न चैवमनास्रवाः, नाप्येवमूर्ध्वा भूमिः। अतो न तदालम्बनास्तेष्वनुशेरते। यस्त्विहस्थस्तां भूमिं प्रार्थयते, कुशलोऽसौ धर्मच्छन्दः विपक्षभूतौ च निर्वाणमार्गौ तदालम्बनानां क्लेशानामूर्ध्वा च भूमिरधराणाम्। अतो न तेषु प्रतिष्ठां लभन्ते तप्त इवोपले तलानि पादानाम्।

आनुगुण्यार्थोऽत्रानुशयार्थः। न च ते तदनुगुणा इत्यपरे। वातिकस्य रूक्षाननुशयनवत्। अत उक्ता आलम्बनतोऽनुशेरते।

येन यः सम्प्रयुक्तस्तु स तस्मिन् सम्प्रयोगतः ॥ १८ ॥

'अनुशेरते' इति वर्त्तते। योऽनुशयो येन धर्मेण संप्रयुक्तस्तस्मिन् संप्रयोगतोऽनुशेते। यावदप्रहीण इति विशेषणार्थस्तुशब्दः। स्युरनशया नानास्रवालम्बना न विसभागधातुसर्वत्रगाः। ते चानुशयाः सम्प्रयोगतोऽनुशयीरन्नालम्बनतः, न स्युर्विसभागभूमिसर्वत्रगा अनुशयाः ॥ १८ ॥

एषामष्टानवतेरनुशयानां कत्यकुशलाः? कत्यव्याकृताः?

ऊर्ध्वमव्याकृताः सर्वे,

रूपारूप्यावचरास्तावत् सर्व एवाव्याकृताः। किं कारणम्? क्लिष्टानां धर्माणां दुःखविपाकः स्यात्। तच्च तयोर्नास्ति; परव्याबाधहेत्वभावात्।

आनुगुण्यार्थोऽत्रानुशयार्थः। न तद्भूमिकाः प्रत्ययास्तदुपपत्तये आनुगुण्येन वर्तन्त इति। *न च ते तदनुगुणा* इति। न च ते निरोधादयः तेषां मिथ्यादृष्टयादीनामनुगुणाः, *वातिकस्य रूक्षाननुशयनवत्।* यथा 'वातिकस्य रूक्षं नानुशेते' इत्युक्ते 'न कायस्यानुगुण्येन वर्तते' इति गम्यते। पूर्वस्मिस्तु पक्षे प्रतिष्ठालाभार्थः न तेषु प्रतिष्ठां लभत इति वचनात्।

*येन धर्मेणे*ति। वेदनादिना ॥ १८ ॥

*तच्च तयोर्नास्ती*ति। तच्च दुःखं तयोः रूपारूप्यधात्वोर्नास्ति। कस्मात्? *परव्याबाधाहेत्वभावात्*। परव्याबाधस्य हेतुर्व्यापादादिः, तस्याभावात्।

कामे सत्कायदर्शनम् ।

अन्तग्राहः सहाभ्यां च मोहः,

कामधातौ सत्कायान्तग्राहदृष्टी तत्सम्प्रयुक्ता चाविद्या अव्याकृताः । किं कारणम् ? दानादिभिरविरुद्धत्वात् । 'अहं प्रेत्य सुखी भविष्यामि' इति दानं ददाति शीलं रक्षति । उच्छेददृष्टिरपि मोक्षानुकूला ।

अतएवोक्तं *भगवता*—"एतदग्रं दृष्टिगतानां[1] यदुत नो च स्यां नो च मे स्यात् न भविष्यामि न मे भविष्यति" (   ) इति ।

अपि चानयोर्दृष्ट्योः स्वद्रव्यसम्मूढत्वादपरपीडाप्रवृत्तत्वाच्च स्वर्गतृष्णाऽस्मिमानयोरप्येष[2] प्रसङ्गः ।

सहजा सत्कायदृष्टिरव्याकृता । या मृगपक्षिणामपि वर्त्तते । विकल्पिता त्वकुशलेति पूर्वाचार्याः ।

शेषास्त्विहाशुभाः ॥ १९ ॥

---

*एतदग्रं दृष्टिगतानामि*ति । एतद् विशिष्टं दृष्टिप्रकारेभ्यः । नातिसावद्यमित्यर्थः । मोक्षो मार्गोपनिषत्, उच्छेदस्तु निर्हेतुकोऽभिप्रेत इति, भ्रान्तेः सावद्यमुच्छेददर्शनमिति विशेषः । *स्वद्रव्यसम्मूढत्वादि*ति । स्वसन्ततिपतितानामुपादानस्कन्धानामात्मात्मीयत्वेन ग्रहणात् स्वद्रव्यसम्मूढा सत्कायदृष्टिः । तेषामेव शाश्वतोच्छेदग्राहदृष्टिरपि तथैव । यथा च ते दृष्टी तथा तत्सम्प्रयोगिन्यप्यविद्येति ।

अपरपीडाप्रवृत्तत्वाच्च । किम् ? अव्याकृते सत्कायान्तग्राहदृष्टी इति प्रकृतम् । ते हि न काचिदपि परपीडां कुरुतः । *स्वर्गतृष्णास्मिमानयोरप्येष प्रसङ्ग* इति । स्वर्गतृष्णाया अस्मिमानस्य च दानादिभिरविरोधात् स्वद्रव्यसम्मूढत्वाद्[3] अपरपीडाप्रवृत्तत्वाच्चाव्याकृतत्वप्रसङ्गः । न चेष्यते ।

तस्मान्नैभिः कारणैरनयोरव्याकृतत्वमित्यनेनाभिप्रायेण *पूर्वाचार्यमत*मुपस्थापयति—*सहजा सत्कायदृष्टिरि*त्यादि । *विकल्पिता त्वकुशले*ति । या आत्मवादिभिः *कपिलोलूका*दिभिर्विकल्पिता सा नाव्याकृता, किं तर्हि ? अकुशलेति । अन्तग्राहदृष्टिरपि । या तैर्विकल्पिता, साऽप्यकुशला । तत्पूर्वकत्वात्तु सा तुल्यवार्त्तेत्यनुक्तापि गम्यत एव ।

---

१. बाह्यकानां दृष्टि०–का० । २. ०रप्येवं–का० ।

३. °सम्मूढात्वाद्–जा० ।

शेषास्त्विहाशुभा अनुशयाः कामधातावकुशलाः ॥ १९ ॥

कत्यकुशलमूलानि ? कति न ?

कामेऽकुशलमूलानि रागप्रतिघमूढयः ।

कामधातौ सर्वरागः सर्वप्रतिघः सर्वो मोहोऽन्यत्र सत्कायान्तग्राहदृष्टिसम्प्रयुक्ताद् यथाक्रमम् ।

त्रीण्यकुशलमूलानि,

लोभोऽकुशलमूलम्, द्वेषो मोहोऽकुशलमूलम् । यद्यकुशलं[1] चाकुशलस्यैव मूलमिष्टम्[1], एत एवाकुशलमूलानि । शेषा अनुशया नाकुशलमूलानीति सिद्धम् ।

कत्यव्याकृतमूलानि ? कति न ? त्रीण्यव्याकृतमूलानि । कतमानि त्रीणि ?

तृष्णाविद्या मतिश्च सा ॥ २० ॥

'सा' इत्यव्याकृततां दर्शयति । या काचिदव्याकृता तृष्णा अविद्या प्रज्ञा चान्ततो विपाकजा अपि सर्वाऽसावव्याकृतमूलमिति काश्मीराः ॥ २० ॥

"*शेषास्त्विहाशुभाः*" इति । इहेति कामावचरशेषाभिसङ्ग्रहार्थम् । कामधातौ सत्कायदृष्ट्यादिशेषाः क्लेशा अकुशला एवेत्यवधार्यते ॥ १९ ॥

कत्यकुशलमूलानि, कति नेति । एषामष्टानवतेरनुशयानामित्यनुवृत्तत्वेनैवं विवर्जनं क्रियते ।

"*कामेऽकुशलमूलानि रागप्रतिघमूढयः*[2]" इति । कामधातौ ये राग-प्रतिघ-मोहाः ते सर्व एव पञ्चप्रकाराः अप्यकुशलमूलानि; कुशलमूलविपक्षेण व्यवस्थापनात् । नान्येऽनुशया इति । मूढिरिति मोहपर्यायः । *सर्वो मोहः अन्यत्र सत्कायान्तग्राहदृष्टिसम्प्रयुक्तान्मोहादिति* । कथमिह न सूत्रितं लभ्यते ? "अशुभाः" (अभि: ५.१९) इत्यधिकाराद्, एकदेशनिर्देशात् । अत एवोच्यते – *यद्यकुशलं चाकुशलस्यैव च मूलम्. इष्टमिति* । *एतदेवेत्यवधारणाच्छेषा अनुशया* मिथ्यादृष्ट्यादयो नाकुशलमूलानीति सिद्धम् ॥

"*त्रीण्यव्याकृतमूलानि*" इति । एषामेवाष्टानवतेरनुशयानां त्रीणि अव्याकृतमूलानीति । त्रिग्रहणं बहिर्देशकमताद् विशेषणार्थः । त्रीण्येव, न चत्वारीति । *कतमानि त्रीणि ?* इत्याह–"*तृष्णाऽविद्या मतिश्च सा । सेति अव्याकृततां दर्शयति* । *अव्याकृतमूलानीति* । अनेनाव्याकृतशब्देन केवलेन तृष्णाविद्या-

---

१–१. यद्यकुशलं चाकुशलस्य च मूलं तदेवाकुशलमूलमिष्टम्–का० ।

२. °मूढया–जा० ।

द्वैधोर्ध्ववृत्तेर्नातोऽन्यौ,

विचिकित्सा किल द्वैधवृत्तेर्न मूलं भवितुमर्हति; चलत्वात् । उन्नतिलक्षणेनोर्ध्ववृत्तेर्न मानो मूलम् । विविधस्मृतिमूलानि हि स्थिराण्यधोवृत्तीनि च लोके दृष्टानीति ।

चत्वार्येवेति बाह्यकाः ।

बाह्यकाश्चत्वार्यव्याकृतमूलानीच्छन्ति ।

तृष्णादृङ्मानमोहास्ते,

त इत्यव्याकृता इति दर्शयति । अव्याकृता तृष्णा दृष्टिर्मानोऽविद्या च । किं कारणमेतान्यव्याकृतमूलानीच्छन्ति ?

ध्यायित्रित्वादविद्यया ।। २१ ।।

यस्मत् त्रयो ध्यायिनः । तृष्णादृष्टिमानोत्तरध्यायिनः । ते चाविद्यावशाद् भवन्तीति ॥ २१ ॥

मतयो विशेषिता इति दर्शयति । अत्र च मतिरक्लेशस्वभावाप्यव्याकृतमूलमितीष्यते *वैभाषिकैः । या काचिदव्याकृता तृष्णेति ।* आस्वादनासम्प्रयुक्तेषु ध्यानारूप्येषूपपत्तिकाले वा विमानादिषु सम्भवतः । या काचिदविद्या रूपारूप्यधात्वोः कामधातौ च सत्कायान्तग्राहदृष्टिसम्प्रयोगिनीति । एवं प्रज्ञा च या काचिदव्याकृता । *अन्ततो विपाकजापि ।* कामधातौ विपाकजैर्यापथिकशैल्पस्थानिक-निर्माणचित्तसम्प्रयुक्ता सत्कायान्तग्राहदृष्टिसम्प्रयुक्ता च रूपारूप्यधात्वोः सर्वक्लेशसम्प्रयुक्ता प्रज्ञा । विपाकजादिसम्प्रयुक्ता च यथासम्भवमव्याकृता प्रज्ञा । *द्वैधवृत्तेरिति ।* द्विधाभावो द्वैधम्, द्वैधे वृत्तिः तस्याः॥ २० ॥

न विचिकित्सा मूलं भवितुमर्हति; द्विधावृत्तितश्चलत्वात् । *उन्नतिलक्षणेनेति ।* उन्नतेर्लक्षणम्, तेन ऊर्ध्ववृत्तिर्भवति । तस्मान्न *मानो मूलं भवितुमर्हति । मूलानि स्थिराण्यधोवृत्तीनि चेति ।* मूलवैधर्म्यान्न *विचिकित्सा* मूलम्; अस्थिरत्वात् । न मानः; अनधोवृत्तित्वादिति वक्तव्यम् ।

ते इत्यव्याकृताः । अव्याकृता तृष्णेति । रूपारूप्यधात्वोः । दृष्टिरपि तयोश्च कामधातौ च सत्कायान्तग्राहदृष्टिस्वभावा । अविद्यापि कामधातौ तत्सम्प्रयोगिन्येव । रूपारूप्यधात्वोश्च सर्वा । *तृष्णादृष्टिमानोत्तरध्यायिन* इति । य आस्वादनासम्प्रयुक्तध्यानध्यायी, स तृष्णोत्तरध्यायी । यो ध्याननिश्रयेण शाश्वतादिदृष्टिमुत्पादयति, स दृष्ट्युत्तरध्यायी, मानोत्तरध्यायी च । यश्च मन्यते-—

यानि सूत्रे चतुर्दशाव्याकृतवस्तूनि, किं तानि अव्याकृतत्वात् ? नेत्याह । किं तर्हि ? स्थापनीयः प्रश्नोऽव्याकृत इत्युक्तम् । चतुर्विधो हि प्रश्नः—एकांशव्याकरणीयः, विभज्यव्याकरणीयः, परिपृच्छ्य व्याकरणीयः, स्थापनीयश्च । तत्र यथाक्रमं वेदितव्यम्—

एकांशतो व्याकरणं विभज्य परिपृच्छ्य च ।
स्थाप्यं च मरणोत्पत्तिविशिष्टात्मान्यतादिवत् ॥ २२ ॥

'किं सर्वसत्त्वा मरिष्यन्ति' इत्येकांशेन व्याकर्त्तव्यम्—मरिष्यन्तीति ।

'किं सर्वे जनिष्यन्ते' इति विभज्य व्याकर्त्तव्यम्—सक्लेशा[1] जनिष्यन्ते, न निःक्लेशा इति ।

'किं मनुष्यो विशिष्टो हीनः' इति परिपृच्छ्य व्याकर्त्तव्यम्—कानधिकृत्य प्रश्नयसीति । यदि ब्रूयाद्—देवानिति । हीन इति व्याकर्त्तव्यम् । अथ ब्रूयाद्—अपायानिति । विशिष्ट इति व्याकर्त्तव्यम् ।

'लाभी अहमस्य ध्यानस्य, नान्ये तथा' इति, स मानोत्तरध्यायी । तत्र *तृष्णोत्तरम्* तृष्णोपरिकम्, ध्यातुं शीलमस्येति *तृष्णोत्तरध्यायी* । अथ वा—*तृष्णोत्तरश्च* तृष्णाधिक इत्यर्थः, ध्यायी च तृष्णोत्तरध्यायी । एवं दृष्ट्युत्तरध्यायी च, मानोत्तरध्यायी च । *ते चाविद्यावशाद् भवन्तीति* । ते च त्रयो ध्यायिनोऽविद्यावशाद् अविद्यायोगात् तथा भवन्ति । अतोऽविद्याप्यव्याकृतमूलमिति । समापत्तिसमापन्नानां च एताः क्लेशसमुदाचारावस्थाः अव्याकृतानां धर्माणां मूलं कारणमिति ॥ २१ ॥

अव्याकृतसम्बन्धेन पर्यनुयुङ्क्ते *यानि सूत्रे चतुर्दशाव्याकृतवस्तूनीति* । विस्तरः—शाश्वतो लोकः, अशाश्वतो लोकः—इत्येवमादि । *किं तान्यव्याकृतत्वादिति* । किं तानि नैव कुशलानि, नाकुशलानीत्यव्याकृतत्वात् । नाव्याकृतवस्तून्यपदिश्यन्ते । *स्थापनीयः प्रश्नोऽव्याकृत इति* । यः स्थापनीयत्वेन न व्याकृतो न कथितः, सोऽव्याकृतः प्रश्नः, तस्य वस्त्वधिष्ठानमित्यव्याकृतवस्तु ।

तत्प्रसङ्गेनेदमुपन्यस्यते—*चतुर्विधो हि प्रश्नः* इति विस्तरः ।

मरणोत्पत्तिविशिष्टात्मान्यतादिवदिति । मरणवत्, उत्पत्तिवत्, विशिष्टवत्, आत्मान्यतादिवदिति । यथासङ्ख्यमेकांशव्याकरणादिषूदाहरणानि । *मरि-*

---

१ संक्लेशाः-का० ।

'किमन्यः स्कन्धेभ्यः सत्त्वोऽनन्यः' इति स्थापनीयः; सत्त्वद्रव्यस्याभावात्, बन्ध्यापुत्रश्यामगौरतादिवत् ।

कथमेतद् व्याकरणं भवति—अव्याकृतमेतदिति ? एवं व्याकरणात् ।

अपर आह—इदमप्येकांशेन व्याकरणं[2] यन्न सर्वे जनिष्यन्त इति । यस्तु पृच्छेद् ये मरिष्यन्ति किं ते जनिष्यन्त इति[3], तस्य विभज्यव्याकरणीयं[3] स्यात् । मनुष्येषु चोभयमस्ति—हीनत्वं विशिष्टत्वं चापेक्षिकमित्युभयमेकांशेन व्याकर्त्तव्यम् । तद्यथा

ष्यन्तीति मरणोदाहरणमेकांशव्याकरणे । 'सक्लेशा जनिष्यन्ते न निःक्लेशाः' इत्युत्पत्त्युदाहरणं परिपृच्छाव्याकरणे । 'किमन्यः स्कन्धेभ्यः सत्त्वः' इति आत्मान्यतोदाहरणं स्थापनीयव्याकरणे इति । 'किं सर्वसत्त्वाः मरिष्यन्ति' इत्येकांशेन व्याकर्तव्यमिति । यथोक्तं *भगवता*—"अल्पकं भिक्षवे मनुष्याणां जीवितम्, गमनीयः सम्परायः, चरितव्यं कुशलम्, नास्ति जातस्यामरणम्" इति । 'किमन्यः स्कन्धेभ्यः सत्त्वोऽनन्यः' इति स्थापनीय इति । यथोक्तं *भगवता*—"किन्नु भो गौतम, स करोति, स प्रतिसंवेदयते ? अव्याकृतमेतद् ब्राह्मण । अन्यः करोति, अन्यः प्रतिसंवेदयते ? अव्याकृतमेतद् ब्राह्मण । 'सः करोति, स प्रतिसंवेदयते' इति पृष्टः 'अव्याकृतमेतद्' इति वदसि, 'अन्यः करोति, अन्यः प्रतिसंवेदयते' इति पृष्ट. 'अव्याकृतमेतद्' इति वदसि; तन् कोऽत्र खल्वस्य भवतो गौतमस्य भाषितस्यार्थः ? 'स करोति. स प्रतिसंवेदयते' इति ब्राह्मण ! शाश्वताय परैति, 'अन्यः करोति, अन्यः प्रतिसंवेदयते' इति उच्छेदाय परैति; एतावन्तावनुगम्य तथागतो मध्यमया प्रतिपदा धर्मं देशयति" (   ) इति ।

अपर आहेति । *भदन्तरामः* । इदमप्येकांशेन व्याकर्तव्यम्—न सर्वे जनिष्यन्त इति । न केवलमिदमेकांशेन व्याकर्तव्यम्—सर्वे सत्त्वा मरिष्यन्तीति । *यस्तु पृच्छेदिति* विस्तरेणाचार्यः । यस्तु पृच्छेद्—अनेन प्रकारेण ये मरिष्यन्ति किं ते जनिष्यन्त इति । तस्य *विभज्यव्याकरणं स्यात्*—न सर्वे जनिष्यन्ते, किं तर्हि ? सक्लेशा जनिष्यन्ते, न निःक्लेशा इति । तस्माद्यदुक्तम्—इदमेकांशेन व्याकर्तव्यम् 'न सर्वे जनिष्यन्ते' इति, तन्नोपपद्यते । तेन युज्यत एव *वैभाषि-कोदाहरणमित्यभिप्रायः* ।

स एव *भदन्तराम* आह—"*मनुष्येषु चोभयमस्ति—हीनत्वं विशिष्टत्वं च* । एतदुभयमापेक्षिकमस्तीत्युभयं व्याकर्तव्यम् । तद्यथा—किं विज्ञानं कार्यं

२–२. ०प्येकांशव्याकरणम्—का० । ३–३. इत्येतद्विभज्य०—का० ।

'किं विज्ञानं कार्यं कारणं च' इति एकान्तेन तु पृच्छतो नैकान्तव्याकरणाद् विभज्य-व्याकरणं युज्यते। स्कन्धेभ्योऽन्यः सत्त्व इत्येतदव्याकृतमेव। न चाव्याकरणमेव व्याकरणं युज्यत इति।

यस्तु स्थापनीयः प्रश्नः स्थापनीयत्वेन व्याक्रियते, कथं न व्याकृतो भवति ?

आभिधर्मिका आहुः—तथागतो भगवानर्हन्, सम्यक् स्वाख्यातोऽस्य धर्मः, सुप्रतिपन्नः श्रावकसंघः रूपमनित्यं यावद्विज्ञानं दुःखप्रज्ञप्तिर्यावन्मार्गप्रज्ञप्ति-रेकांशेन व्याकर्त्तव्यमर्थोपसंहितत्वात्। विभज्यव्याकरणं नाम यदि कश्चिद् ब्रूयाद्—धर्मान् वदेति, स वक्तव्यः—बहवो धर्मा अतीता अनागताः प्रत्युत्पन्नाः कतमान् वदामीति। यदि ब्रूयादतीतानिति, स वक्तव्यः—अतीता अपि बहवो रूपं यावद्विज्ञान-मिति। अथ ब्रूयाद् रूपमिति, स वक्तव्यः—रूपमपि त्रिविधं कुशलमकुशलमव्याकृतं च। यद्याह—कुशलमिति, तदपि सप्तप्रकारं प्राणातिपाताद्विरतिर्यावत्संभिन्नप्रलापा-दिति। यद्याह—प्राणातिपाताद्विरतिमिति, साऽपि त्रिप्रकारा—अलोभजा, अद्वेषजा, अमोहजा। यद्याह—अलोभजामिति, अलोभजापि द्विविधा—विज्ञप्त्यविज्ञप्तिभेदा-दित्येवं विभज्य वक्तव्यमिति। एतदेव[2] शठस्य परिपृच्छ्य व्याकरणम्। तस्य

कारणम्—इति प्रश्न एकांशेन व्याक्रियते—हेतुफलापेक्षया कारणं कार्यं चेति। तत्र यदुक्तम्—'किं मनुष्यो हीनो विशिष्टः' इति परिपृच्छया व्याकर्तव्यम्—'कानधिकृत्य प्रश्नयसि' इति, तदयुक्तम्; यस्मादयमेकांशेन व्याकरणीयः प्रश्न इति। 'एकान्तेन तु पृच्छतः' इत्याचार्यो वैभाषिकपक्षं समर्थयति। 'एकान्तेन तु पृच्छतः किं मनुष्यो हीन एव विशिष्ट एवेति नैकान्तव्याकरणाद् हीन इति वा, विशिष्ट इति वा विभज्यव्याकरणं युज्यते—कानधिकृत्य प्रश्नयसीति। तत्र यदुक्तम्—मनुष्येष्वेवोभयमस्तीति विस्तरेण; तदयुक्तम्। स एवाह—*स्कन्धेभ्योऽन्यः सत्त्वः* इति सर्वम्।

यस्तु स्थापनीय इत्याचार्यः। वैभाषिकनयेनोक्तमेतच्चतुर्विधस्योदाहरणम्।

आभिधर्मिका आहुरिति। षट्पादाभिधर्ममात्रपाठीनाः। *दुःखप्रज्ञप्तिर्यावन्मार्गप्रज्ञप्तिरिति*। चतुर्णामार्यसत्यानां प्रज्ञप्तिः यथासूत्रम्। *अर्थोपसंहितत्वादिति*। अर्थप्रतिसंयुक्तत्वादित्यर्थः। *एतदेव शठस्येति*। एतदेव विभज्यव्याकरणीय-प्रश्नवचनम्। *शठस्य* विहेठनाभिप्रायस्य प्रष्टुः परिपृच्छाव्याकरणं वेदित-

१. का० पुस्तके नास्ति। २. एतदेव च—का०।

वक्तव्यम्—धर्मा बहव इति । न तु विभक्तव्या यावत्तूष्णीं वा तिष्ठति स्वयं वा व्याकरोतीति ।

यदा तौ न किञ्चित् पृच्छतः केवलमध्येषयतः, तयोश्च न किंचिद् व्याक्रियते केवलं परिपृच्छयते[1], तत् कथमनयोः प्रश्नो भवति कथं वा व्याकरणम् ? यो हि पन्थानं ब्रूहीत्याह, किं तेन पन्था न पृष्टो भवति ! परिपृच्छयैव च[2] व्याकरणात् कथं न परिपृच्छाव्याकरणं भवति । स्थापनीयस्तु यथा—अन्तवान् लोकोऽनन्तवानित्येवमादि ।

सूत्रान्तादेव तु प्रश्नव्याकरणानां लक्षणं द्रष्टव्यम् । भदन्तमहासाङ्घिका सूत्रं पठन्ति—"चत्वारीमानि भिक्षवः प्रश्नव्याकरणानीति । कतमानि चत्वारि ? अस्ति भिक्षव एकांशव्याकरणीयः प्रश्नः, अस्ति यावत् स्थापनीयः । कतमश्च भिक्षवः एकांशव्याकरणीयः प्रश्नः ? 'सर्वे संस्कारा अनित्याः' इत्ययं भिक्षव एकांश-

व्यम् । *भदन्तराम* आह—*यदा ता*विति विस्तरः । यदा तौ शठाशठौ न किञ्चित् पृच्छतः, केवलमध्येषयतः—'धर्मान् वद' इति । तयोश्च शठाशठयोर्न किञ्चित् व्याक्रियते—इमे धर्माः रूपादयः सविस्तरप्रभेदा इति, केवलं परिपृच्छयते—कतमान वदामीति । *तत्कथमनयोः* शठाशठयोः *प्रश्नो भवति*, कथं च व्याकरणमाभिधर्मिकस्य ? *यो ही*ति विस्तरेण *आचार्यः* । यो हि पन्थानं ब्रूहीति, तदनभिज्ञ आह । *किं तेन पन्था न पृष्टो भवति* । अध्येषणमुखेनैवास्य इत्यभिप्रायः । यथा 'पन्थानं ब्रूहि' इति ब्रुवतोक्तं भवति 'कतमः पन्थाः' इति; एवं 'धर्मान् वद' इति ब्रुवतोक्तं भवति—'कतमे धर्माः' इति । *परिपृच्छयैव च व्याकरणात्* । बहवो धर्माः, कतमान् वदामीति परिपृच्छयैव तस्य प्रश्नस्य तेषां वा धर्माणां व्याकरणात्, धर्मबहुत्वं व्याकृतमिति कृत्वा । कथं न *परिपृच्छाव्याकरणमि*ति । परिपृच्छय व्याकरणमित्यर्थः । तत्र यदुक्तम्—'तयोश्च न किञ्चिद् व्याक्रियते, केवलं परिपृच्छ्यते यावत् कथं च व्याकरणम्' इति, तदयुक्तम् ।

आचार्य आह—*सूत्रान्तादेवे*ति । एवं तु सूत्रे व्याकृतम् । संस्कृतेन व्यवस्थाप्य पठ्यते । सञ्चेतनीयं कर्म कृत्वा किं प्रतिसंवेदयते—'किं

१. परिप्रश्न्येते–का० ।

२. का० पुस्तके नास्ति ।

व्याकरणीयः प्रश्नः । कतमश्च भिक्षवो विभज्यव्याकरणीयः प्रश्नः ? 'सञ्चेतनीयं कर्म कृत्वा किं प्रतिवेदयते' इत्ययं विभज्यव्याकरणीयः प्रश्नः । कतमश्च भिक्षवः परिपृच्छ्यव्याकरणीयः प्रश्नः ? संज्ञानु पुरुषस्यात्मा, उताहोऽन्या संज्ञा अन्य आत्मेति पृष्टेन सता परिप्रष्टव्यः—कतमं पुनरायुष्मानात्मानं प्रत्येति ? स चेदेवं वदेद्—औदारिकं खल्वहयायुष्मन्नात्मानं प्रत्येमि । एवं सत्यन्या संज्ञा अन्य आत्मेत्येवं वचनीयः । अयं हि परिपृच्छ्य व्याकरणीयः प्रश्नः । कतमश्च भिक्षवः स्थापनीयः प्रश्नः ? तद्यथा—शाश्वतो लोकोऽशाश्वतः, शाश्वतश्चाशाश्वतश्च, नैव शाश्वतो नाशाश्वतः ; अन्तवानन्तश्च नैवान्तवान्नानन्तवान् । भवति तथागतः परं मरणान्न भवति तथागतः परं मरणात्, यावदन्यो जीवोऽन्यच्छरीरमित्ययं भिक्षवः स्थापनीयः प्रश्नः" इति ॥ २२ ॥

यस्य पुद्गलस्य योऽनुशयो यस्मिन्नालम्बनेऽनुशेते स तेन तस्मिन् सम्प्रयुक्तः । इदं तु वक्तव्यम्—अतीते न कस्मिन् यावत् प्रत्युत्पन्ने न कस्मिन्निति ?

समासत इमे द्विविधाः क्लेशाः—स्वलक्षणक्लेशाश्च, रागप्रतिघमानाः । सामान्यक्लेशाश्च दृष्टिविचिकित्साऽविद्याः[1] । तत्र तावत्

सुखं दुःखम् अदुःखासुखम्' इत्येवं पृष्टेन विभज्य व्याकरणीयः प्रश्नः । सञ्चेतनीयस्य कुशलादिभेदात् । कुशलसास्रवं सञ्चेतनीयं कर्म कृत्वा सुखमदुःखासुखं वा प्रतिसंवेदयते । अकुशलसञ्चेतनीयं कर्म कृत्वा दुःखं प्रतिसंवेदयते इति । *स चेदेवं वदेत्–औदारिकमिति* रूपि । *विस्तरः* प्रभेदः । *न भवति यावदन्यो जीव* इति । यावच्छब्देन सर्वं वक्तव्यम्—"न भवति तथागतः परं मरणात्, भवति च न भवति तथागतः परं मरणात् । स जीवस्तच्छरीरम्, अन्यो जीवः, अन्यच्छरीरम्" इति ॥ २२ ॥

स तेन तस्मिं संयुक्त इति । स पुद्गलस्तेनानुशयेन बद्ध इति ज्ञायत एवेत्यर्थः । *स्वलक्षणक्लेशाश्चे*ति । स्वलक्षणम्—सुखवेदनीयादि वस्तु, तत्र रागः सुखवेदनीय एव वस्त्वालम्ब्योत्पद्यत इति *स्वलक्षणक्लेश* इत्युच्यते । तेन सुखवेदनीयेनालम्ब्यमानेनोन्नतिर्भवतीति मानोऽपि स्वलक्षणक्लेशः । तथा दुःखवेदनीयं वस्त्वालम्ब्य *प्रतिघ* उत्पद्यते इति प्रतिघोऽपि स्वलक्षणक्लेश इत्युच्यते । *सामान्यक्लेशाश्च* । दृष्टिविचिकित्सादयः । सामान्याः सामान्येन वा

१. ०कित्साऽविद्याः–का० ।

रागप्रतिघमानैः स्यादतीतप्रत्युपस्थितैः ।
यत्रोत्पन्नाऽप्रहीणास्ते तस्मिन् वस्तुनि संयुतः ।। २३ ।।

अतीता प्रत्युत्पन्नाश्च रागप्रतिघमाना यस्मिन् वस्तुन्युत्पन्ना न च प्रहीणास्तस्मिन् वस्तुनि तैः संयुक्तः । एते हि स्वलक्षणक्लेशत्वान्न सर्वस्यावश्यं सर्वत्रोत्पद्यन्ते ॥ २३ ॥

सर्वत्रानागतैरेभिर्मानसैः,

'यत्राप्रहीणास्ते' इति वर्तते । अनागतैरेभिरेव रागप्रतिघमानैर्मनोभूमिकैः सर्वत्र वस्तुनि संयुक्तस्त्रैयध्विके ; मानसानां त्र्यध्वविषयत्वात् ।

स्वाध्विकैः परैः ।

अन्यै रागप्रतिघैरनागतैरनागत एव वस्तुनि संयुक्तः । के पुनरन्ये ? ये पञ्च विज्ञानकायिका रागाश्च प्रतिघाश्च । उत्पत्तिधर्मभिरेव । तैरेव तु

अजैः सर्वत्र,

अनुत्पत्तिधर्मभिः पञ्चविज्ञानकायिकैरपि सर्वत्र वस्तुनि संयुक्तः । त्रैयध्विकेऽपि

क्लेशाः सामान्यक्लेशाः । एते ह्यविशेषेण सुखवेदनीयादिके वस्तुन्युत्पद्यन्ते इति, अतस्तदालम्ब्य उत्पन्नाः क्लेशाः 'सामान्यक्लेशाः' इत्युच्यन्ते ।

अतीतप्रत्युपस्थितैरिति । अतीतवर्तमानैः । *रागप्रतिघमाना यस्मिन् वस्तुन्युत्पन्ना* इति विस्तरः । एते रागादयः षड्विज्ञानकायिका अप्यविशेषाभिध्यानाद् यथायोगं यस्मिन् वस्तुन्युत्पन्नाः त्रैयध्विके दुःखदर्शनप्रहातव्ये यावद् भावनाप्रहातव्ये । *न च प्रहीणाः, तस्मिन् वस्तुनि* तैः रागादिभिः *संयुक्ताः*, दाम्नेव बलीवर्दाः कीलके । *एते हि स्वलक्षणक्लेशत्वान्न सर्वस्य* पुद्गलस्यावश्यं *सर्वत्रोत्पद्यन्ते* इति । कस्यचित् कस्मिंश्चिदुत्पद्यन्त इत्यर्थः । अतो *यत्रोत्पन्नाप्रहीणास्ते* इति । तद्विशेषणम् । अप्रहीणा इति विशेषणम् । यस्माद् यै रागादिभिर्यस्मिन् वस्तुनि संयुक्त आसीत्, यदि ते प्रहीणा भवेयुः न तैः सर्वत्र प्रहीणेन निरनुशयविषयत्वात् ॥ २३ ॥

"सर्वत्रानागतैरेभिर्मानसैः" इति । मानसग्रहणम् ।

स्वाध्विकैः परैरिति । पञ्चविज्ञानकायिकानामन्यथा व्यवस्थाप्यमानत्वात् । राग-प्रतिघ-विशेषणं चैतत् । मानस्यावश्यं मानसत्वात् । *एभिरनागतैः सर्वत्र त्रैयध्विके* पञ्चनैकायिकेऽपि यथास्वं *संयुक्तः* । नहि तत् सास्रवं वस्तु, यत्

शेषैस्तु सर्वैः सर्वत्र संयुतः ॥ २४ ॥

के पुनः शेषाः ? दृष्टिविचिकित्साऽविद्यास्त्रैयध्विकाः । तैः सर्वैरपि सर्वस्मिन् वस्तुनि संयुक्तः, सामान्यक्लेशत्वात् । 'यावदप्रहीणा.' इत्यधिकारोऽनुवर्त्तत एव ॥ २४ ॥

किं पुनरिदमतीतानागतमुच्यतेऽस्ति, अथ न ? यद्यस्ति सर्वकालास्तित्वात्, संस्काराणां शाश्वतत्वं प्राप्नोति; अथ नास्ति, कथं तत्र तेन च[1] संयुक्तो भवति विसंयुक्तो वा ? न संस्काराणां शाश्वतत्वं प्रतिज्ञायते वैभाषिकैः संस्कृतलक्षणयोगात् । प्रतिज्ञायते तु विशदम्—

स्वलक्षणक्लेशेनापि रागेण न सरागम्, द्वेषेण च न सद्वेषम् । मानेन च न समानम् । सर्वसास्रववस्त्वालम्बना हि यथास्वमपरिमिता अनागता रागादयो भवन्ति । *अन्यै रागप्रतिघैरनागतैरनागत एव वस्तुनि संयुक्त* इति । सर्वे चित्तचैत्ता आलम्बने नियता इति तैरुत्पत्तिधर्मिभिरनागत एव वस्तुनि संयुक्त ; वर्तमानविषयत्वात् पञ्चानां विज्ञानकायानाम । *रागप्रतिघैरिति* । मानावचनं मानसत्वात् । "समानमिद्धा दृग्घेया मनोविज्ञानभूमिकाः" (अभि० ५.५३) इति वचनात् । पञ्चविज्ञानकायिकैरपि न केवलं मानसैरित्यपिशब्दो द्योतयति । *तैरनुत्पत्तिधर्मिभिः सर्वत्र वस्तुनि त्रैयध्विके संयुक्तः* । एते ह्यनुत्पत्तिधर्मिणोऽनागता एवाध्वनि व्यवस्थाप्यन्ते । एषां चालम्बनानि सञ्चरन्ति । ससम्प्रयोगा हि क्लेशा सुवर्चलावदनुत्पत्तिधर्मिणो विषयाभिमुखा एवावतिष्ठन्ते । तथा ह्यनुत्पत्तिधर्मिणो नैवालम्बनमालम्ब्योत्पद्यन्त इति । अथ केषाञ्चिदालम्बनमतीतम्, केषाञ्चिद् वर्तमानम्, केषाञ्चिदनागतं भवति; न ह्यालम्बनानुत्पत्तिः ? न ह्यालम्बनानुत्पत्तित एव तेषामनुत्पत्तिः, किं तर्हि ? प्रत्ययवैकल्यात् । अवस्थाफलं हि सामग्र्यां न द्रव्यफलम्—इति सिद्धान्तः ।

'*शेषैस्तु सर्वैः सर्वत्र संयुतः*" इति । त्रैयध्विकैरपि दृष्ट्यादिभिरनेकनैकायिकैरपि *त्रैयध्विके* पञ्चप्रकारेऽपि वस्तुनि *संयुतः* संयुक्त इत्यर्थः । किं कारणम् ? इत्याह—*सामान्यक्लेशत्वादि*ति । एते हि सर्वस्य सर्वस्मिन् संभवन्ति; पञ्चोपादानस्कन्धालम्बनत्वात् ॥ २४ ॥

कथं तत्र तेन च संयुक्त इति । कथमतीतानागते वस्तुनि । तेन चातीतानागतेनानुशयेन संयुक्त इति । *विसंयुक्तो वा* । कथं वा अप्रहीण-प्रहीणावस्थायां

---

१. वा–का० ।

सर्वकालास्तिता,

किं कारणम् ?

उक्तत्वात्,

उक्तं हि भगवता—"अतीतं चेद् भिक्षवो रूपं नाभविष्यन्न श्रुतवानार्यश्रावकोऽतीते रूपेऽनपेक्षोऽभविष्यत्। यस्मात्तर्ह्यस्त्यतीतं रूपं तस्माच्छ्रुतवानार्यश्रावकोऽतीते रूपेऽनपेक्षो भवति। अनागतं चेद्रूपं नाभविष्यत् न श्रुतवानार्यश्रावकोऽनागतं रूपं नाभ्यनन्दिष्यत्। यस्मात्तर्ह्यस्त्यनागतं रूपम्" इति विस्तरः।

द्वयात्,

"द्वयं प्रतीत्य विज्ञानस्योत्पादः" इत्युक्तम्। द्वयं कतमत्? चक्षू रूपाणि यावत् मनोधर्मा इति। असति वाऽतीतानागते तदालम्बनं विज्ञानं द्वयं प्रतीत्य न स्यात्। एवं तावदागमतोऽस्त्यतीतानागतम्। युक्तितोऽपि—

सद्विषयात्,

व्यवस्थाप्यन्ते ? *संस्कृतलक्षणयोगादिति*। यस्मात् संस्कृतलक्षणानि जात्यादीनि संस्कृतानामर्थसञ्चाराय प्रवर्तन्ते, अतस्तेषामशाश्वतत्वं प्रतिज्ञायते। रूपं चेद् *भिक्षव* इत्यस्य सूत्रस्यायमादितः पाठः—"रूपमनित्यमनागतम्। कः पुनर्वादः प्रत्युत्पन्नस्य ! एवंदर्शी श्रुतवान् आर्यश्रावकोऽतीते रूपेऽनपेक्षो भवति, अनागतं रूपं नाभिनन्दति, प्रत्युत्पन्नस्य रूपस्य निर्विदे विरागाय निरोधाय प्रतिपन्नो भवति। अतीतं चेद् भिक्षवो रूपं नाभविष्यत्, न श्रुतवानार्यश्रावकोऽतीते रूपेऽनपेक्षोऽभविष्यत्। यस्मात् तर्ह्यस्त्यतीतं रूपम्, तस्माच्छ्रुतवानार्यश्रावकोऽतीते रूपेऽनपेक्षो भवति। अनागतं चेद्रूपं नाभविष्यत्, न श्रुतवानार्यश्रावकोऽनागतं रूपं नाभ्यनन्दिष्यत्। यस्मात् तर्हि अस्त्यनागतं रूपम्, तस्मात् श्रुतवानार्यश्रावकोऽनागतं रूपं नाभिनन्दिष्यति। प्रत्युत्पन्नं चेद् भिक्षवो रूपं नाभविष्यदिति विस्तरः, न श्रुतवानार्यश्रावकोऽतीते रूपेऽनपेक्षोऽभविष्यद्" इति। निर्विषयत्वाद् वैराग्यकालेऽतीतविषयापेक्षार्यश्रावकस्यानपेक्षा मतिर्न स्यादित्यर्थः। यदातीतं रूपमपेक्ष्यते तदा तत्रासक्तिरिति। अभ्यनन्दिष्यदिति अभ्यलषिष्यत्। प्रत्युत्पन्नं चेद् भिक्षवो रूपं नाभविष्यत्, न श्रुतवानार्यश्रावकः प्रत्युत्पन्नस्य रूपस्य निर्विदे वैराग्याय निरोधाय प्रतिपन्नोऽभविष्यदित्येतन्नोक्तम्; उभयपक्षप्रसिद्धत्वात्।

सति विषये विज्ञानं प्रवर्तते, नासति। यदि चातीतानागतं न स्यादसदालम्बनं विज्ञानं स्यात्। ततो विज्ञानमेव न स्याद्; आलम्बनाभावात्।

फलात्।

यदि चातीतं न स्यात् शुभाशुभस्य कर्मणः फलमायत्यां कथं स्यात्! न हि फलोत्पत्तिकाले वर्तमानो विपाकहेतुरस्तीति। तस्मादस्त्येवातीतानागतमिति **वैभाषिकाः**।

अवश्यं च किलैतत् सर्वास्तिवादेन सताऽभ्युपगन्तव्यम्। यस्मात्

तदस्तिवादात् सर्वास्तिवादा इष्टाः,

ये हि सर्वमस्तीति वदन्ति अतीतमनागतं प्रत्युत्पन्नं च, ते **सर्वास्तिवादाः**। ये तु केचिदस्ति यत् प्रत्युत्पन्नमदत्तफलं चातीतं कर्म, किञ्चिन्नास्ति यद्दत्तफलमतीतमनागतं चेति विभज्य वदन्ति, ते **विभज्यवादिनः**।

कति चैते सर्वास्तिवादाः? इत्याह—

चतुर्विधाः ॥ २५ ॥

ते भावलक्षणावस्थाऽन्यथाऽन्यथिकसंज्ञिताः।

भावान्यथिको **भदन्तधर्मत्रातः**। स किलाह—धर्मस्याध्वसु प्रवर्तमानस्य भावान्यथात्वं भवति, न द्रव्यान्यथात्वम्। यथा सुवर्णभाजनस्य भित्त्वाऽन्यथा क्रियमाणस्य संस्थानान्यथात्वं भवति, न वर्णान्यथात्वम्। यथा च क्षीरं दधित्वेन

द्वयादिति। पूर्वं कण्ठत उक्तमिति प्रदर्शितम्, इदानीमर्थतो न कण्ठत इति विशेषः। *न द्वयं प्रतीत्य मनोविज्ञानं स्यात्।* यदतीतानागतालम्बनमिति विशेषः।

ततो विज्ञानमेव न स्यादालम्बनाभावादिति। विज्ञेये सति विज्ञानमिति कृत्वा। साधनं चात्र—'सदालम्बनमेव मनोविज्ञानम्; उपलब्धिस्वभावत्वात्, चक्षुर्विज्ञानवत्' इति।

फलादिति। विद्यमानस्वलक्षणं *शुभाशुभ*मतीतं *कर्म*, विपक्तिकाल उत्पद्यमानफलत्वात्, वर्तमानधर्मवदिति ॥ २५ ॥

भावान्यथात्वं भवतीति। अतीतानागतप्रत्युत्पन्नस्य भावस्यान्यथात्वं भवतीत्यर्थः। *न द्रव्यान्यथात्वम्।* न रूपादिस्वलक्षणस्यान्यथात्वं भवतीत्यर्थः।

परिणमद् रसवीर्यविपाकान् परित्यजति, न वर्णम् । एवं धर्मोऽप्यनागतादध्वनः प्रत्युत्पन्नमध्वानमागच्छन्ननागतभावं जहाति, न द्रव्यभावम् । एवं प्रत्युत्पन्नादतीतमध्वानं गच्छन् प्रत्युत्पन्नभावं जहाति, न द्रव्यभावमिति ।

लक्षणान्यथिको भदन्तघोषकः । स किलाह—धर्मोऽध्वसु प्रवर्त्तमानोऽतीतोऽतीतलक्षणयुक्तः, अनागतप्रत्युत्पन्नाभ्यामवियुक्तः । एवं प्रत्युत्पन्नोऽप्यतीतानागताभ्यामवियुक्तः । तद्यथा—पुरुष एकस्यां स्त्रियां रक्तः, शेषास्वविरक्त इति ।

अवस्थाऽन्यथिको भदन्तवसुमित्रः । स किलाह—धर्मोऽध्वसु प्रवर्तमानोऽवस्थामवस्थां प्राप्यान्योऽन्यो निर्दिश्यते अवस्थान्तरतः, न द्रव्यान्तरतः । यथैका गुलिका[1] एकाङ्के निक्षिप्ता एकमित्युच्यते, शताङ्के शतम्, सहस्राङ्के सहस्रमिति ।

अनागतो हि वर्तमानमध्वानं प्रतिपन्नोऽनागतभावं जहाति । वर्तमानभावं प्रतिलभते । वर्तमानोऽप्यतीतम् । सुवर्णं क्षीरं चेति दृष्टान्तद्वयं यथाक्रममाकृतिगुणान्यथात्वज्ञापनार्थम् ।

लक्षणान्यथिकस्य लक्षणवृत्तिलाभापेक्षो व्यवहारः । अत एव आह—*धर्मोऽध्वसु प्रवर्तमानोऽतीतलक्षणयुक्तः, अनागतप्रत्युत्पन्नाभ्यां लक्षणाभ्यामवियुक्त* इति विस्तरः । यद्यनागतम् अतीतप्रत्युत्पन्नाभ्यां वियुक्तं स्यात्, एवं सति नानागतमेव त्पन्नमतीतं वेति स्यात् । अथातीतम् अनागतप्रत्युत्पन्नाभ्यां वियुक्तं स्यात्, नानागतं वर्तमानं चातीतं स्यात् । वर्तमानम् अतीतानागताभ्यां वियुक्तं अनागतमेव वर्तमानम्, वर्तमानमेवातीतं स्यात् । लब्धवृत्तिना हि लक्षणेन युक्तो व्यवस्थाप्यते, तदन्येनावियुक्तो न विरहित इत्यर्थः । अत एवोदाहरति—*तद्यथा पुरुष एकस्यां स्त्रियां रक्तः, शेषास्वविरक्त* इति । एकस्यां स्त्रियामस्य रागाध्यवसानं वर्तते । शेषासु स्त्रीषु रागप्राप्तिरेवास्ति, न समुदाचार इति ।

अवस्थान्यथिकस्यावस्थापेक्षो व्यवहारः, यस्यामवस्थायां यो धर्मः कारित्रं न करोति तस्याम् 'अनागतः' उच्यते, यस्यां करोति तस्यां 'वर्तमानः', यस्यां कृत्वा निरुद्धः तस्याम् 'अतीतः' इत्य*वस्थामवस्थां प्राप्य अन्योऽन्यो* निर्दिश्यते । अनागतावस्थां प्राप्यानागतो यावदतीतावस्थां प्राप्यातीत इति । *अवस्थान्तरतो न द्रव्यान्तरत* इति । अभिन्नलक्षणोऽनागताद्यवस्थाप्राप्तोऽनागतादिशब्दनिर्देशः केवलं भवतीत्यर्थः । अत एवोदाहरति—*यथैका गुलिके*ति विस्तरः । यथैका

१. वर्तिका–का० ।

अन्यथान्यथिको भदन्तबुद्धदेवः । स किलाह--धर्मोऽध्वसु प्रवर्तमानः पूर्वापरमपेक्ष्यान्योऽन्य उच्यते अवस्थान्तरतः, न द्रव्यान्तरतः। यथैका स्त्री माता वोच्यते दुहिता चेति[1] ।

इत्येते चत्वारः सर्वास्तिवादाः ।

एषां तु **प्रथमः** परिणामवादित्वात् सांख्यपक्षे निक्षेप्तव्यः । द्वितीयस्याध्वसङ्करः प्राप्नोति, सर्वस्य सर्वलक्षणयोगात् । पुरुषस्य तु कस्याञ्चित् स्त्रियां रागः समुदाचरति कस्याञ्चित् केवलं समन्वागम इति किमत्र साम्यम् ! चतुर्थस्याप्येकस्मिन्नेवाध्वनि त्रयोऽध्वानः प्राप्नुवन्ति । अतीतेऽध्वनि पूर्वपश्चिमौ क्षणावतीतानागतौ, मध्यमः क्षणः प्रत्युत्पन्न इति । एवमनागतेऽपि ।

गुलिका एकाङ्के निक्षिप्ता एकस्थाने स्थापिता *एकमित्युच्यते, एवं शताङ्के शतम्, सहस्राङ्के* सहस्रम् इत्युच्यते, अवस्थान्तरापेक्षया । न पुनस्तस्याः स्वभावान्यथात्वम्, किं तर्हि ? स्थानान्तरविशेषात् संख्याभिद्योतकं संज्ञामात्रमुत्पद्यत इति ।

पूर्वापरमपेक्ष्य अन्योन्य उच्यते इति । पूर्वम् अपरम् चापेक्ष्य अतीतानागतवर्तमाना उच्यन्त इत्यर्थः । पूर्वमेवातीतं वर्तमानं वापेक्ष्याऽनागत इति, पूर्वं वाऽतीतम्, अपरं वाऽनागतम् अपेक्ष्य वर्तमान इति, अपरमेव वर्तमानमनागतं वा अपेक्ष्याऽतीत इति पूर्वापरापेक्षोऽन्यथिकस्य व्यवहारः। अत एवोदाहरति—*यथैका स्त्री माता वोच्यते दुहिता चेति* । यथैका स्त्री दुहितरमपेक्ष्य मातेत्युच्यते, मातरमपेक्ष्य दुहिता चेति। पूर्वापरापेक्षया, न द्रव्यान्तरतः ।

साङ्ख्यपक्षे निक्षेप्तव्य इति । यः साङ्ख्यपक्षे प्रतिषेधः, स एव तत्पक्षस्य प्रतिषेधः । साङ्ख्यपक्षः पूर्वं प्रतिषिद्ध इत्यभिप्रायः[2] ।

द्वितीयस्यापि भदन्तघोषकस्यापि अध्वसङ्करः प्राप्नोति । योऽतीताध्वाभिप्रेतः, स वर्तमान- अनागतोऽपि प्राप्नोति । कथं कृत्वा ? अतीतेऽतीतलक्षणयुक्तो भवन्ननागतवर्तमानलक्षणाभ्यामवियुक्तः । युक्त एवेत्यर्थः । अनागतोऽप्यनागतलक्षणयुक्तोऽतीतवर्तमानलक्षणाभ्यामवियुक्त इति कृत्वा । एकैकस्य त्रिलक्षणयोगात् अतीतोऽनागतो वर्तमानश्च प्राप्नोति । इत्येवमनागतवर्तमानावपि योज्यौ । *किमत्र साम्यमिति* । पुरुषस्य कस्याञ्चित् केवलं समन्वागमः । किमेवं धर्मस्यैकं लक्षणं विद्यते ? इत एव लक्षणे न विद्यते, यत एवमुदाह्रियते इत्यसाम्यम् ।

---

१. वेति—का० । २. द्र०—अभि० को० २. ३६; ३.२७ का० ।

अत एषां सर्वेषां

तृतीयः शोभनः,

योऽयमवस्थाऽन्यथिकः । तस्य किल

अध्वानः कारित्रेण व्यवस्थिताः ॥ २६ ॥

यदा स धर्मः कारित्रं न करोति तदा अनागतः। यदा करोति तदा प्रत्युत्पन्नः। यदा कृत्वा निरुद्धस्तदा अतीत इति । परिगतमेतत् सर्वम् ।

इदं तु वक्तव्यम्—यद्यतीतमपि द्रव्यतोऽस्त्यनागतमिति कस्मात् तदतीतमित्युच्यते, अनागतमिति वा ? ननु चोक्तमध्वानः कारित्रेण व्यवस्थिता इति ? यद्येवम्, प्रत्युत्पन्नस्य तत्सभागस्य चक्षुषः किं कारित्रम् ? फलदानप्रतिग्रहः । अतीतानामपि तर्हि सभागहेत्वादीनां फलदानात् कारित्रप्रसङ्गोऽर्धकारित्रस्य वेति लक्षणसंकरः ॥ २६ ॥

चतुर्थस्यापि भदन्तबुद्धदेवस्यापि एकस्मिन्नेवाध्वनि त्रयोऽध्वानः प्राप्नुवन्ति । एकस्मिन्नेवातीतेऽध्वनि पूर्वापरक्षणव्यवस्थास्ति । तत्र पूर्वपश्चिमौ क्षणावतीतानागतौ । पूर्वः क्षणोऽतीतः, पश्चिमः क्षणोऽनागत, *मध्यमः* प्रत्युत्पन्नः। इत्यतीतेऽध्वनि त्रयोऽध्वानः प्राप्नुवन्ति ।

अत एषां सर्वेषां "तृतीयः शोभनः" इति वैभाषिकः । कथं कृत्वा शोभनः ? इत्याह—यस्मात् *तस्य "अध्वानः कारित्रेण व्यवस्थिताः"*। कारित्रं पुनः चक्षुरादीनां दर्शनादीनीनि । रूपादीनामपि स्वेन्द्रियगोचरत्वं कारित्रम् । *यद्येवमिति* विस्तरः । यदि कारित्रेण व्यवस्थापिताः, *तत्सभागस्य चक्षुषः किं कारित्रम् ।* यद्धि कारित्रलक्षणं स्वकर्म न करोति, तत् तत्सभागः । तस्य च नास्ति कारित्रं दर्शनलक्षणम् । कथं तत् प्रत्युत्पन्नमित्यभिप्रायः । *फलदानप्रतिग्रह* इति । तच्चक्षुः स्वनिष्यन्दफलं परिगृह्णाति, आक्षिपति, फलं च ददाति, निष्यन्दफलमनन्तरं ददाति । पुरुषकारफलं च यद्यपि दर्शनकारित्रं न करोति, अन्यत्तु फलं करोति । तस्य फलदानपरिग्रहसद्भावात् तत्प्रत्युत्पन्नमिति व्यवस्थाप्यते । *अतीतानामपि तर्हि सभागहेत्वादीनामिति ।* आदिशब्देन विपाकहेत्वादीनां परिग्रहणम्; तेषां फलदानात् । "वर्तमानाभ्यतीतौ द्वावेकोऽतीतः प्रयच्छति" (अभि० को० २.५९) इति वचनात् ।

कारित्रप्रसङ्गः । कारित्रमस्तीति । ततश्चैषां सभागहेत्वादीनामतीतानां वर्तमानत्वप्रसङ्गः, वर्तमानवत् कारित्रसद्भावात् इति लक्षणसङ्करः ।

इदं च वक्तव्यम्—तेनैवात्मना सतो धर्मस्य नित्यं कारित्रकरणे किं विघ्नम्?

येन कदाचित् कारित्रं करोति कदाचिन्नेति । प्रत्ययानामसामग्र्यमिति चेत् ? न; नित्यमस्तित्वाभ्युपगमात् । यच्च तत् कारित्रमतीतानागतं प्रत्युत्पन्नं चोच्यते

तत् कथम्?

किं कारित्रस्याप्यन्यदस्ति कारित्रम्! अथ तन्नैवातीतं नाप्यनागतं न प्रत्युत्पन्नमस्ति च । तेनासंस्कृतत्वान्नित्यमस्तीति प्राप्तम् । अतो न वक्तव्यम्—यदा कारित्रं न करोति धर्मस्तदानागत इति ।

स्यादेष दोषो यदि धर्मात कारित्रमन्यत् स्यात् , तत्तु खलु—

ब्रूयास्त्वम्—'येषां फलपरिग्रहः, फलदानं चोभयमस्ति, ते वर्तमानाः; येषां त्वेकतरम्, न ते वर्तमानाः' इति, तत इदमुच्यते—*अर्धकारित्रस्य वेति* । प्रसङ्ग इत्यधिकृतम् । अर्धकारित्रस्य वा प्रसङ्गः । अर्धवर्तमाना इति वा तेऽनीताः प्रसज्यन्ते । उपरतफलपरिग्रहकारित्रत्वाद्धि तेऽतीतलक्षणयुक्ता, वर्तमानफलदानकारित्रत्वाच्च वर्तमानलक्षणयुक्ता इति स एव लक्षणसङ्करदोषः । एतद्ध्यतीतादीनामध्वनां लक्षणमिष्टम्—उपरतकारित्रमतीतम्, अप्राप्तकारित्रमनागतम्, प्रत्युत्पन्नकारित्रं वर्तमानमिति ॥ २६ ॥

किं विघ्नमिति । नपुंसकलिङ्गमेतच्छब्दरूपम् । को विबन्ध इत्यर्थः । को विघ्नोऽस्येति किंविघ्नं कारित्रमित्यपरे । *प्रत्ययानामसामग्र्यमिति चेत्* । तत्रेतत् स्यात्—प्रत्ययानां हेतुसमनन्तरादीनामसामग्र्यम्, अतो न सर्वदा कारित्रं करोति । *न, नित्यमस्तित्वाभ्युपगमात्* । न प्रत्ययानामसामग्र्यं कल्पयितुं युज्यते; यस्मादिह भवद्भिर्नित्यं प्रत्ययानामस्तित्वमभ्युपगम्यते; सतामविनाशात् ।

यच्च तत्कारित्रमतीतमिति विस्तरः । यच्च कारित्रमतीतमुच्यते, अनागतं प्रत्युत्पन्नमिति चोच्यते; सिद्धान्ते उपरतकारित्रमतीतम्' इत्येवमादिवचनात् । *किं कारित्रस्याप्यन्यत् कारित्रमस्ति*; यतस्तस्यातीतादित्वं कथ्यते? यद्यस्ति, अनवस्थाप्रसङ्गः । न चेदस्ति, यथानागतादित्वं कारित्रस्य स्वरूपसत्तापेक्षया, एवं भावानामप्यनागतादित्वं भविष्यति, किं कारित्रकल्पनया! कथं तदतीतमित्यादि! *अथ तन्नैवातीतमिति* विस्तरः । यन्नैवातीतम्, नाप्यनागतम्, न प्रत्युत्पन्नम्, तदसंस्कृतमिति असंस्कृतत्वान्नित्यमस्तीति प्राप्तम् । *न करोति धर्मस्तदानागत* इति । कारित्रस्य कर्तुमसख्यत्वप्राप्तेः ।

स्यादेष दोष इति विस्तरः । स्यादेष दोषः कारित्रस्यान्यत् कारित्रमित्यति-

नान्यत्,

अतो न भवत्येष दोषः ।

एवं तर्हि स एव

अध्वायोगः,

यदि धर्म एव कारित्रं कस्मात्स एव धर्मस्तेनैवात्मना विद्यमानः कदाचिदतीत इत्युच्यते, कदाचिदनागत इत्यध्वनां व्यवस्था न सिध्यति । किमत्र न सिध्यति ? यो ह्यजातो धर्मः सोऽनागतः, यो जातो भवति न च विनष्टः स वर्त्तमानः, यो विनष्टः सोऽतीत इति । एतदेवात्र वक्तव्यम्——यदि यथा वर्त्तमानं द्रव्यतोऽस्ति तथाऽतीतमनागतं चास्ति । तस्य

तथा सतः ।

अजातनष्टता केन ?

तेनैव स्वभावेन सतो धर्मस्य कथमिदं सिध्यत्यजात इति यो विनष्ट इति वेति। किमस्य पूर्वं नासीद् यस्याभावादजात इत्युच्यते ! किं च पश्चान्नास्ति यस्याभावाद् विनष्ट इत्युच्यते ! तस्मान्न सिध्यति सर्वथाप्यत्राध्वत्रयम्, यद्यभूत्वा भवतीति नेष्यते भूत्वा च पुनर्न भवतीति । यदप्युक्तम्——"संस्कृतलक्षणयोगान्न शाश्वतत्वप्रसङ्गः" इति । तदिदं केवलं वाङ्मात्रमुत्पादविनाशयोरयोगात् । नित्यं च नामास्ति स धर्मो न च नित्य इत्यपूर्वैषा वाचोयुक्तिः । आह खल्वपि——

प्रसङ्गोऽसंस्कृतत्वप्रसङ्गो वा । *यदि धर्मात् कारित्रमन्यत् स्यात् ? तत्तु खलु नान्यदिति* । *नैष* दोषः ।

तेनैवात्मनेति । यः प्रत्युत्पन्नस्य स्वभावस्तेनेत्यर्थः ।

*किमस्य पूर्वं नासीदि*त्यनागतावस्थायां यदि कारित्रम्, अनन्यत्वाद्धर्म एव नासीदित्युक्तं भवेत् । *किञ्च पश्चान्नासीदि*त्यतीतावस्थायां यदि कारित्रम्, धर्म एव नासीदित्युक्तं भवेत्; धर्मकारित्रयोरनन्यत्वात् । *यद्यभूत्वा भवतीति नेष्यते*, प्रत्युत्पन्नो न सिद्ध्यति । भूत्वा च पुनर्नभवतीति यदि नेष्यते, अतीतोऽध्वा न सिद्ध्यति । अनागतस्तु यो न तावदभूत्वा भवतीत्यर्थाद् गम्यते । एवं अध्वत्रयं सिद्ध्यति, अतोऽन्यथा न सिद्ध्यतीति वाक्यार्थः ।

उत्पादविनाशयोरयोगादिति । सर्वकालास्तित्वादुत्पादविनाशयोरयोगः, तस्माद् वाङ्मात्रमेतत्——संस्कृतलक्षणयोगान्न शाश्वतत्वप्रसङ्ग इति । *अपूर्वैषा*

"स्वभावः सर्वदा चास्ति भावो नित्यश्च नेष्यते ।
न च स्वभावाद् भावोऽन्यो व्यक्तमीश्वरचेष्टितम्" ॥

यदुक्तम्—उक्तत्वादिति । वयमपि ब्रूमोऽस्त्यतीतानागतमिति। अतीतं तु यद् भूतपूर्वम्, अनागतं यत्सति हेतौ भविष्यति । एवं हि[1] कृत्वाऽस्तीत्युच्यते न तु पुनर्द्रव्यतः । कश्चैवमाह—वर्त्तमानवत्तदस्तीति ? कथमन्यथाऽस्ति ? अतीतानागतात्मना । इदं पुनस्तवोपस्थितम्—कथं तदतीतमनागतं चोच्यते यदि नित्यमस्तीति । तस्मात् भूतपूर्वस्य च हेतोर्भाविनश्च फलस्य भूतपूर्वतां भावितां च ज्ञापयितुं हेतुफलापवाददृष्टिप्रतिषेधार्थमुक्तं भगवता—"अस्त्यतीतमस्त्यनागतम्" इति । अस्तिशब्दस्य निपातत्वात् । यथाऽस्ति दीपस्य प्रागभावोऽस्ति पश्चादभाव

वाचोयुक्तिरिति । पूर्वापरविरुद्धैषा वाचोयुक्तिरित्यर्थः । सर्वदा चास्ति, उत्पादविनाशाभ्यां च युज्यत इति ।

स्वभावः सर्वदा चास्तीति । यद् रूपादेः स्वलक्षणम्, तत् सर्वस्मिन् काले विद्यत इतीष्यते।

यदि रूपादेः स्वभावः सर्वदास्ति, तेन रूपादिभावो नित्यः प्राप्नोति ? अत आह—*भावो नित्यश्च नेष्यते* । एवं सति तस्मात् स्वभावाद् भावो नूनमन्य इति ? अत आह—*न च स्वभावाद् भावोऽन्य* इति । तदिदमिच्छामात्रत्वात् *व्यक्तमीश्वरचेष्टितम्* । नात्र युक्तिरस्ति ।

अतीतं तु यद् भूतपूर्वमिति । न स्वलक्षणेनास्तीति दर्शयति । *अनागतं यत् सति हेतौ भविष्यतीति* । अविद्यमानमपि हेतुसद्भावाद् व्यवस्थाप्यत इति दर्शयति । *एवं हि कृत्वाऽस्तीत्युच्यत* इति । भूतपूर्वम्, भविष्यति चेति कृत्वा । *न तु पुनर्द्रव्यत एवं भवति* । *हेतुफलापवाददृष्टिप्रतिषेधार्थमिति* । हेत्वपवाददृष्टिप्रतिषेधार्थम् 'अस्त्यतीतम्' इत्युक्तम् । फलापवाददृष्टिप्रतिषेधार्थमस्त्यनागतमिति । 'आसीदतीतम्' 'भविष्यत्यनागतम्' इति वक्तव्ये 'अस्ति' इति वचनम्; *अस्तिशब्दस्य निपातत्वात्* । त्रिकालविषयो हि निपातः । आसीदर्थे भविष्यदर्थेऽपि वर्तते ।

यथास्ति दीपस्येति विस्तरः । यथा 'अस्ति दीपस्य प्रागभावः, अस्ति

---

१. च—का० ।

इति वक्तारो भवन्ति, यथा चास्ति निरुद्धः स प्रदीपो[1] न तु मया निरोधित इति। एवमतीतानागतमस्तीत्युक्तम्[2]। अन्यथा ह्यतीतानागत[3] एव न सिध्येत्।

यत्तर्हि लगुडशिखीयकान् परिव्राजकानधिकृत्योक्तं भगवता—"यत् कर्माभ्यतीतं क्षीणं निरुद्धं विगतं विपरिणतं तदस्ति" इति, किं ते तस्य तस्य कर्मणो भूतपूर्वत्वं नेच्छन्ति स्म? तत्र पुनस्तदाहितं तस्यां सन्ततौ फलदानसामर्थ्यं सन्धायोक्तम्। अन्यथा हि स्वेन भावेन विद्यमानमतीतं न सिध्येत्। इत्थं

पश्चादभावः' इति *वक्तारो भवन्ति*, न च द्रव्यतोऽस्ति। यथा च 'अस्ति निरुद्धः स प्रदीपः, न तु मया निरोधितः' इति वक्तारो भवन्ति, न च 'अस्ति' प्रयोगान्निरुद्धोऽप्यसावस्तीति। ननु च *वैभाषिकस्य* निरुद्धोऽप्यसावस्तीति? सत्यमस्ति, न तु प्रदीपरूपतामेव बिभ्राणः सोऽस्ति। *एवमतीतागतमस्तीत्युक्तम्* असत्यपि द्रव्यसत्त्वे; *अन्यथा हि अतीतानागत एव न सिद्ध्येत्।* यदि तेनैव लक्षणेन विद्येत, अतीतानागत एव न सिद्ध्येदित्यर्थः। यद्यतीतं भूतपूर्वम्, *यत्तर्हि लगुडशिखीयकानिति* विस्तरः। लगुडशिखीयकैः परिव्राजकैर्नार्यो निदानम्। *नालन्दायां* बुद्धभाषितं च सूत्रम्, संयुक्तकागमे च। आर्यमहामौद्गल्यायनश्च मारित इत्याहुरभियुक्ताः। यतो न मारित इत्यत्र सूत्र एवं पठ्यते—लगुडशिखीयकाः परिव्राजका आनन्तर्यकारिणो यत्कर्माभ्यतीतं तन्नास्तीत्येवंवादिन इति विस्तरः। *किं ते लगुडशिखीयकाः परिव्राजकाः तस्य कर्मणः* आनन्तर्यस्य *भूतपूर्वत्वं नेच्छन्ति।* एतदुक्तं भवति—इच्छन्ति स्म ते तस्य कर्मणो भूतपूर्वत्वम्, किन्तु न द्रव्यमिति ते तस्मिन् कर्मणि विप्रतिपन्नाः। नास्ति तत् कर्माभ्यतीतमिति। यतो भगवता यत्र ते विप्रतिपन्नाः स्वभावे तत्कर्माभ्यतीतमस्तीति विस्तरेण। तस्माद् अस्ति स्वभावेनातीतमिति विस्तरः।

तत्र पुनः सूत्रे यद् भूतपूर्वं कर्म न तदेवातीतमित्यभिसन्धायोक्तम्—तत्कर्मास्तीति, किं तर्हि? *तदाहितम्।* भूतपूर्वेण कर्मणा आहितम् = अर्पितम्। *तस्यां सन्ततौ फलदानसामर्थ्यं सन्धायोक्तमित्यनेनाभिप्रायेणोक्तमिति।* कथं गम्यते? इत्याह—*अन्यथा हि स्वेन भावेन विद्यमानमतीतं न सिद्ध्येदिति।* स्वलक्षणेन *विद्यमानं* तत् कर्म प्रत्युत्पन्नलक्षणेन *विद्यमानमतीतमिति न सिद्ध्येत्।* प्रत्युत्पन्नमेव सिद्ध्येदित्यभिप्रायः। तदाहितमिति विस्तरेणैवमुच्यमानेऽभ्यतीतं तत् कर्मास्तीति सिद्ध्यति।

---

१. दीपो—का०। २. °मप्यस्ती०—का०।
३. °नागतभाव—का०।

चैतदेवं यत् परमार्थशून्यतायामुक्तं भगवता—"चक्षुरुत्पद्यमानं न कुतश्चिदागच्छति निरुध्यमानं न क्वचित् संनिचयं गच्छति। इति हि भिक्षवश्चक्षुरभूत्वा भवति भूत्वा च प्रतिगच्छति" इति। यदि चानागतं चक्षुः स्यान्नोक्तं स्याद्—भूत्वा न भवतीति। वर्तमानेऽध्वन्यभूत्वा भवतीति चेत्? न; अध्वनो भावादनर्थान्तरत्वात्। अथ स्वात्मन्यभूत्वा भवति? सिद्धमिदमनागतं चक्षुर्नास्तीति।

यदप्युक्तम्—"द्वयं प्रतीत्य विज्ञानस्योत्पादात्" इति, इदं तावदिह सम्प्रधार्यम्— यन्मनः प्रतीत्य धर्मश्चोत्पद्यते मनोविज्ञानम्, किं तस्य यथा मनोजनकः प्रत्यय एवं धर्माः, आहोस्विदालम्बनमात्रं धर्मा इति। यदि तावत् जनकः प्रत्ययो धर्माः, कथं यदनागतं महस्त्रैर्भविष्यति[1] वा, न वा तदिदानीं विज्ञानं जनयिष्यति। निर्वाणं च सर्वप्रवृत्तिनिरोधाज्जनकं नोपपद्यते। अथालम्बनमात्रं धर्मा भवन्ति? अतीतानागतमप्यालम्बनं भवतीति ब्रूमः। यदि नास्ति कथमालम्बनम्? अत्रेदानीं ब्रूमः—यदा तदालम्बनं तथास्ति, कथं तदालम्बनम् अभूत् भविष्यति चेति। न हि कश्चिदतीतं रूपं वेदनां वा स्मरन्नस्तीति पश्यति। किं तर्हि?

इत्थं चैतदेवमिति। यथाऽनागतं द्रव्यतो नास्त्यतीतं चेति। वर्तमानेऽध्वनीति विस्तरः। वर्तमानभावेनाभूत्वा भवतीत्यर्थः। न, अध्वनो भावादनर्थान्तरत्वात्। नैव तदेवम्। अध्वनः प्रत्युत्पन्नस्य भावाच्चक्षुःसंज्ञकादनर्थान्तरत्वाद्। अद्रव्यान्तरत्वादित्यर्थः। य एव वर्तमानोऽध्वा स एव भावः, तत् कथं स एव वर्तमानः स्वात्मन्यध्वन्यभूत्वा भविष्यति! तथा ह्युक्तम्—"त एवाध्वा कथावस्तु" (अभि० को० १.७) इति।

अथ स्वात्मनि चक्षुषि चक्षुर्भूत्वा भवति, सिद्धमिदम्—अनागतं चक्षुर्नास्ति। आलम्बनमात्रमिति। मात्र-शब्दो जनकत्वव्यावर्तनार्थः। तदूपोत्पत्तेरालम्बनम् धर्मा इत्यभिप्रायः। यदनागतं महस्त्रैरिति। सन्निकृष्टमप्यनागतं जनकं न युज्यते, किमङ्ग अतिचिरेण कालेन यद् भविष्यति! नहि पूर्वकालीनस्य फलस्य पश्चात्कालीनो हेतुर्युज्यत इति। निर्वाणं चेति। निर्वाणं हि विज्ञानं निरुद्धं न जनयेत्। संसारप्रवृत्तिनिरोधादित्यभिप्रायः। अभूद् भविष्यति चेति। यद् वर्तमानावस्थायां रूपमभूत्, भविष्यति च तदालम्बनमित्यर्थः। कथं ज्ञायते

---

१. कल्पसहस्रेण०—का०।

अभूदिति। यथा खल्वपि वर्तमानं रूपमनुभूतं तथा तदतीतं स्मर्यते। यथा चानागतं वर्तमानं भविष्यति तथा बुद्धया गृह्यते। यदि च तत्तथैवास्ति वर्त्तमानं प्राप्नोति, अथ नास्ति असदप्यालम्बनं भवतीति सिद्धम्। तदेव तद्विकीर्णमिति चेत्? न; विकीर्णस्याग्रहणात्। यदि च तत्तदेव रूपं केवलं परमाणुशो विभक्तम्? एवं सति परमाणवो नित्याः स्युः[1]। परमाणुसञ्चयविभागमात्रं चैवं सति प्राप्नोति। न तु किञ्चिदुत्पद्यते नापि निरुध्यत इत्याजीविकवादः परिगृहीतो[2] भवति।

सूत्रं चापविद्धं भवति—"चक्षुरुत्पद्यमानं न कुतश्चिदागच्छति" इति

एवम्—तदालम्ब्यते, न पुनरस्तीति? अत आह—*नहि कश्चिदतीतं रूपं वेदनां वा स्मरन्नस्तीति पश्यति*, किं तर्हि? *अभूदिति* स्मरति तद्रूपं यथा दृष्टं यथानुभूतां च वेदनां चक्षुर्विज्ञानानुभवबलेन। *यथा खल्वपीति*। विस्तरेणाचार्य एवोपचयहेतुमा.। वर्तमानरूपमिव भूतं भविष्यच्च गृह्यत इत्यभिप्रायः। *यदि च तथैवास्तीति*। यथा वर्तमानम्। *वर्तमानं तत् प्राप्नोति*। *अथ नास्ति तत्तथैव, असदप्यालम्बनं भवतीति* सिद्धम्; वर्तमानवद् रूपस्याभावात्। तस्य च स्मर्यमाणत्वात्। *तदेव तद्विकीर्णमिति*। यदेव तद् वर्तमानम्, तदेव विकीर्णमतीतानागतम्। *न, विकीर्णस्याग्रहणादिति*। न युक्तमेतत्; विकीर्णस्याग्रहणात्। पूर्वं न विकीर्णम्, इदानीं विकीर्णमेतद्रूपम्—इत्येवमस्याग्रहणात्। *यदि च तत् तदेवेति* विस्तरः। यदि च वर्तमानावस्थायां पिण्डीभूतं रूपम्, तदतीतावस्थायामनागतावस्थायां च परमाणुषु विभक्तम्, अतो न वर्तमानवद् गृह्यते। *एवं सति* तादवस्थ्यान्नित्याः परमाणवः स्युः। अनागताः प्रत्युत्पन्ना अतीताश्च त एव त इति। एवं च सति परमाणुसञ्चयविभागमात्रमेव प्राप्नोति, न तु कश्चिदुत्पादो नापि निरोध इत्याजीवकानां पाषण्डिनां वादः परिगृहीतो भवति।

तथा चेष्यमाणे *सूत्रमपास्तं भवति*—"चक्षुर्भिक्षवः उत्पद्यमानं न कुतश्चिदागच्छति। निरुध्यमानं न क्वचित् सन्निचयं गच्छति। इति हि भिक्षवः चक्षुरभूत्वा भवति, भूत्वा च प्रतिविगच्छति" (   ) इति।

कथं पुनरिदं सूत्रमपविद्धं विरोधितं भवति? यस्माच्चक्षुरुत्पद्यमानं स्वेन रूपेण न कुतश्चिद् आगच्छतीत्येतत्पदं बाधितं भवति। निरुध्यमानं न क्वचित् सन्निचयं गच्छतीत्येतदपि पदं बाधितं भवति; अतीतेऽध्वनि तत्परमाणूनां

१. प्राप्नुवन्ति—का०। २. आलम्बितो—का०।

विस्तरः । अपरमाणुसंचितानां वेदनादीनां कथं विप्रकीर्णत्वम्[1] । तेऽपि च यथोत्पन्नानुभूताः स्मर्यन्ते । यदि च ते तथैव सन्ति, नित्याः प्राप्नुवन्ति । अथ न सन्ति, असदप्यालम्बनमिति सिद्धम् । यद्यसदप्यालम्बनं स्यात्, त्रयोदशमप्यालम्बनमायतनं[2] स्यात् ।

अथ त्रयोदशमायतनं नास्तीत्यस्य विज्ञानस्य किमालम्बनम् ? एतदेव नामालम्बनम् । एवं तर्हि नाम एव नास्तीति प्रतीयते । यश्च शब्दस्य प्रागभावमालम्बते किं तस्यालम्बनम् ? शब्द एव । एवं तर्हि यः शब्दाभावं प्रार्थयते तस्य शब्द एव कर्तव्यः स्यात् । अनागतावस्थ इति चेत् ? सति कथं नास्तिबुद्धिः । वर्तमानो नास्तीति चेत् ? न; एकत्वात् । यो[3] वा[3] तस्य विशेषस्तस्याभूत्वाभावसिद्धिः । तस्मादुभयं विज्ञानस्यालम्बनम्—भावश्च, अभावश्च ।

विप्रकीर्णसञ्चितत्वाभ्युपगमात् । *अपरमाणुसञ्चितानामिति* । वेदनादीनामपरमाण्वात्मनां कथं विप्रकीर्णत्वम् ? मूर्तानां हि सञ्चितत्वं विप्रकीर्णत्वं वा अभवत् भवेत्, नामूर्तानाम् । *तेऽपि च यथोत्पन्नानुभूताः स्मर्यन्ते* इति । वर्तमानरूपा एव स्मर्यन्ते । यदि च ते तथैव सन्ति यथा वर्तमानाः, नित्याः प्राप्नुवन्ति । अथ न सन्ति तद्रूपाः, असदप्यालम्बनमिति सिद्धम् ।

त्रयोदशमप्यायतनमालम्बनं स्यादिति । त्रयोदशानामायतनानां पूरणं त्रयोदशमायतनम् । तद्विज्ञानस्यालम्बनं स्यात् । असदालम्बनत्व इष्यमाणे तदालम्बनं वा विज्ञानं स्यात् । एवं वैभाषिकेनोक्ते *आचार्य* आह—*अथ त्रयोदशमिति* विस्तरः । *एतदेव नामेति* वैभाषिकः । यदेतन्नाम त्रयोदशमायतनमिति तदालम्बनम् । *एवं तर्हि नामैव नास्तीति प्रतीयते* । नाभिधेयं त्रयोदशायतनाभावलक्षणम् । *किञ्च यश्च शब्दस्य प्रागभावमालम्बते, किं तस्यालम्बनम्* । भवतीति वाक्यशेषः । एवं प्रकृते *वैभाषिक* आह—*शब्द एव* । *आलम्बनमिति* प्रकृतम् । *एवं तर्हीति* विस्तरेणाचार्यः । यः शब्दस्य प्रागभावमालम्बते, शब्द एव तेनालम्बिता भवति, न प्रागभावः । प्राप्तमिदं भवति—यः शब्दाभावं प्रार्थयते, तस्य शब्द एव कर्तव्यः स्यादिति । *अनागतावस्था इति चेत्* । *स्यान्मतम्*— यस्यासौ प्रागभावः, सोऽनागतावस्थस्तेनालम्ब्यते । तस्माद् यः शब्दाभावं प्रार्थयते, तस्य न शब्द एव कर्तव्यः स्यादिति । तदुच्यते—*सति कथं नास्तीति बुद्धिरिति* । विद्यमाने तस्मिन् शब्दे यस्यासौ प्रागभावः कथमस्य नास्तिबुद्धिः, या प्रागभावमालम्बते । *वर्तमानो नास्तीति चेत्* । तत्रैतत् स्यात्—

१. विकीर्णत्वम्—का० । २. °मप्यायतनं—का० । ३–३. यावता—का० ।

यत्तर्हि बोधिसत्त्वेनोक्तम्—"*यल्लोके*[१] नास्ति तदहं ज्ञास्यामि वा द्रक्ष्यामि वा नेदं स्थानं विद्यते" इति। अपरे आभिमानिका भवन्त्यसन्तमप्यवभासं सन्तं पश्यन्ति। अहं तु सन्तमेवास्तीति पश्यामीत्ययं तत्राभिप्रायः। इतरथा हि सर्वबुद्धीनां सदालम्बनत्वे कुतोऽस्य विमर्शः स्यात्, को वा विशेषः! इत्थं चैतदेवम्।

यदन्यत्र भगवतोक्तम्—"एतत् भिक्षुर्मम श्रावको यावत्स मया कल्पमवोदितः सायं विशेषाय परैष्यति। सायमवोदितः कल्पं विशेषाय परैष्यति। सच्च सतो ज्ञास्यति, असच्चासतः, सोत्तरं च सोत्तरतः, अनुत्तरं चानुत्तरतः" इति। तस्मादयमप्यहेतुः; सदालम्बनत्वाद् विज्ञानस्येति।

वर्तमानो नास्तीत्येवं तदालम्बनात् नास्तिबुद्धिस्तस्योत्पद्यत इति। न, एकत्वात्। यदेव तदनागतम् तदेव वर्तमानं भवति, न तस्मादन्यदिति यथं तस्मिन्नेव वर्तमाने नास्तिबुद्धिरुत्पद्यते। *यो वा तस्य विशेषः*। यो वा तस्यानागतस्य पश्चाद्विशेषो वर्तमानावस्थायां भवति, तत्र विशेषे वर्तमानो नास्तीति तद्बुद्धिरुत्पद्यते। *तस्याभूत्वाभावसिद्धिः*। तस्य विशेषस्याभूत्वा पूर्वं पश्चाद् भावः, तस्य सिद्धिरिति। *भावश्चाभावश्चेति*। भावो वर्तमानावस्थायाम्, अभावोऽतीतानागतावस्थयोः। *इति विज्ञानस्योभयमालम्बनं भवति*।

यद्यभावो विज्ञानस्यालम्बनम्, *यत्तर्हीति* विस्तरः। *बोधिसत्त्वेन* चरमभविकेनैवमुक्तम्—"*यल्लोकेनास्ति, तज्ज्ञास्यामीत्येव* सम्भवो नास्ति" इति वचनात् अभावालम्बनं न भवतीति दर्शितं भवति।

आचार्योऽन्याभिप्रायतामस्य सूत्रस्य दर्शयन्नाह—*अपरे आभिमानिका* इति विस्तरः। अपरिशुद्धसमाधयोऽपरे आभिमानिका भवन्ति। *असन्तमप्यवभासम्*। दिव्यचक्षुरवभासम् प्रयोगावस्थायां सन्तमित्येव पश्यन्ति। अहं तु सन्तमेवावभासं पूर्वरूपं दिव्यचक्षुषोऽस्तीति पश्यामीति अयं तत्र सूत्रेऽभिप्रायः। *कुतोऽस्य विमर्श* इति। सर्वबुद्धीनां सद्विषयत्वे व्यवस्थाप्यमाने कुतोऽस्य विमर्शः विचारः सन्देहो वा स्यात् यदुत लोके नास्तीति विस्तरेण य उक्तः। सदसदालम्बने तु बुद्धीनामयं विमर्शः सम्भवति, नान्यथा। *को वा विशेष इति*। को वा बोधिसत्त्वस्यान्येभ्यो विशेषो यदि तेऽपि सन्तमेवावभासं पश्यन्ति, नासन्तम्। सदसदालम्बनत्वे हि बुद्धीनामयं विशेषो भवति। *इत्थं चैतदेवं मत्*। *असदालम्बना बुद्धय इति*। सच्च सतो ज्ञास्यति, असच्चासत इतीदमत्रोदाहरणम्।

---

१. यत्तत् लोके—का०।

यदप्युक्तम्—फलादिति। नैव हि सौत्रान्तिका अतीतात् कर्मणः फलोत्पत्तिं वर्णयन्ति। किं तर्हि? तत्पूर्वकात् सन्तानविशेषादित्यात्मवादप्रतिषेधे सम्प्रवेदयिष्यामः।

यस्य त्वतीतानागतं द्रव्यतोऽस्ति तस्य फलं नित्यमेवास्तीति किं तत्र कर्मण. सामर्थ्यम्? उत्पादने सामर्थ्यम्। उत्पादस्तर्ह्यभूत्वा भवतीति सिद्धम्। अथ सर्व[1] एवास्ति[1], कस्येदानीं क्व सामर्थ्यम्? वार्षगण्यवादश्चैवं द्योतितो भवति—"यदस्त्यस्त्येव तत्। यन्नास्ति नास्त्येव तत्। असतो नास्ति सम्भवः, सतो नास्ति विनाशः" इति। वर्तमानीकरणे तर्हि सामर्थ्यम्। किमिदं वर्त्तमानीकरणं नाम? देशान्तराकर्षणं चेत्, नित्यं प्रसक्तम्। अरूपिणां च कथं तत्? यच्च तदाकर्षणं तदभूत्वाभूतम्। स्वभावविशेषणं चेत्, सिद्धमभूत्वाभवनम्।

सच्च वस्तु सत्त्वतः परैष्यति, ज्ञास्यति; असच्चासत्त्वत इत्यसदालम्बना बुद्धय इति सिद्धम्। *तस्मादयमप्यहेतुरिति*। यदेतद् बोधिसत्त्वेनोक्तमिति।

तत्पूर्वकादिति। कर्मपूर्वकात् चित्तसन्तानविशेषात्। *आत्मवादप्रतिषेध* इति। शास्त्रावसाने *वात्सीपुत्रीयमतप्रतिषेधे*। *उत्पादस्तर्हि अभूत्वा भवतीति*। उत्पादः पूर्वं नास्ति, इदानीं भवतीति सिद्धोऽपूर्वप्रादुर्भावः। उत्पादस्योत्पादवता सह तुल्यवार्तत्वात्। *अथ सर्व एवास्तीति*। उत्पादोऽपि यद्यस्ति, न केवलं हेतुः, अनागतं च फलमित्यभिप्राय। *कस्येदानीं क्व सामर्थ्यमिति*। कस्य हेतो. क्व फले सामर्थ्यम्। हेतुश्च यथोक्त उत्पादः फलं चानागतमस्तीति। *वर्तमानीकरण इति वैभाषिकः*। *किमिदानीं वर्तमानीकरणमिति* विस्तरेणाचार्यः। नोत्पादो वर्तमानीकरणम्; तस्य वर्तमानत्वात्। अत एवं पृच्छति। *देशान्तराकर्षणं चेत्*। यदि मन्यसे—हेतुना फलस्य देशान्तराकर्षणं वर्तमानीकरणमिति? अत्र ब्रूमः—*नित्यं प्रसक्तम्*। फलमिति वाक्यशेषः। केवलं देशान्तराद् देशान्तराकर्षणम्। न किञ्चिदपूर्वमुत्पद्यत इति। *नित्यं प्रसक्तम्* अरूपिणां च वेदनादीनाम्। कथं तद्देशान्तराकर्षणं। अमूर्तत्वेनादेशस्थत्वान्न तद्युज्यत इत्यभिप्रायः। यच्च *तदाकर्षणम्* क्रियासंज्ञकम्, तदभूत्वा भूतमित्यभूत्वा-*भावसिद्धिरित्यभि*प्रायः। *स्वभावविशेषणं चेत्*। यदि मन्यसे—हेतुना स्वभावोऽस्य फलस्य

१-१. सर्वमेव चास्ति—का०—।

तस्मान्नैवं सर्वास्तिवादः शासने साधुर्भवति यदतीतानागतं द्रव्यतोऽस्तीति वदति ।

एवं तु साधुर्भवति—यथा सूत्रे सर्वमस्तीत्युक्तं तथा वदति । कथं च सूत्रे सर्वमस्तीत्युक्तम् ? "सर्वमस्तीति ब्राह्मण यावदेव द्वादशायतनानि" इति । **अध्वत्रयं वा ।** यथात्र[1] तदस्ति तथोक्तम् ।

अथासत्यतीतानागते कथं तेन तस्मिन् वा संयुक्तो भवति ? **तज्जतद्धेत्वनुशयभावात् क्लेशेन** तदालम्बनक्लेशानुशयभावाद्[2] वस्तुनि संयुक्तो **भवति । अस्त्येव त्वतीतानागतमिति वैभाषिकाः ।** यत्र नेतुं शक्यते तत्रात्मकात्मनैवं वेदितव्यम् ।

गम्भीरा खलुधर्मता ॥२७॥

नावश्यं तर्क्षसाध्या भवतीति । अस्ति पर्यायो यदुत्पद्यते तन्निरुध्यते । रूपमुत्पद्यते रूपं निरुध्यते । अस्ति पर्यायोऽन्यदुत्पद्यतेऽन्यन्निरुध्यते । अनागत

विशेष्यते, तेन फलविशेषणं भवति ? अत्र ब्रूमः—सिद्धमभूत्वाभवनमिति । सिद्धमभूत्वा विशेषणस्य भवनम् = प्रादुर्भाव इति ।

अध्वत्रयं वा । किम् ? सर्वमस्तीत्यधिकृतम् । *यथात्र तदस्ति तथोक्तमिति* । यद् भूतपूर्वं तदतीतम् । यत् सति हेतौ भविष्यति तदनागतम् । यद् भूत्वाऽविनष्टम् तत्प्रत्युत्पन्नम्—इत्येवं *सर्वास्तिवाद*ः शासने साधुर्भवति ।

कथं *तेन तस्मिन् वा संयुक्त* इति । कथं तेनातीतानागतेन क्लेशेन तस्मिन् वा अतीतानागते वस्तुनि कथं संयुक्त इति । *तज्जतद्धेत्वनुशयभावात् क्लेशेनेति* । तस्मात् अतीताज्जातास्तज्जाः, तस्यानागतस्य हेतुस्तद्धेतुः तज्जश्चासौ तद्धेतुश्च तज्जतद्धेतुः, तज्जतद्धेतोरनुशया बीजं तज्जतद्धेत्वनुशयः, तस्य भावात् । अतीतानागतेन च क्लेशेन यथाक्रमं संयुक्तः । तद् अतीतानागतं वस्त्वालम्बनमस्येति *तदालम्बनः क्लेशस्तस्यानुशयः* । तस्य भावादतीतेऽनागते च वस्तुनि यथाक्रमं संयुक्त इति ।

धर्मतेति । धर्माणां स्वभावः । अतीतादिकाध्वव्यवस्थाने सति तत्संव्यवहारव्युत्पादनार्थमाह—*अस्ति पर्याय* इत्यादि । अस्ति वचनक्रमः—यदुत्पद्यते तन्निरुद्ध्यते इत्युक्त्वा दृष्टान्तमाह—*रूपमुत्पद्यते रूपं निरुद्ध्यते*, द्रव्यानन्यत्वात् । *अन्यदुत्पद्यते, अन्यन्निरुद्ध्यते, अनागतमुत्पद्यते*, अन्यदुत्पादाभिमुखत्वात् । वर्तमानं निरुद्ध्यते; अन्यन्निरोधाभिमुखत्वात् । अध्वाप्युत्पद्यते; उत्पद्यमानस्य धर्मस्याध्वसंग्रहीतत्वात् । अध्वस्वभावत्वादित्यर्थः । "त एवाध्वा कथावस्तु"

१. यथा तु—का० । २. तदालम्बने क्लेशा०—का० ।

मुत्पद्यते वर्त्तमानं निरुध्यते । अध्वाऽप्युत्पद्यते; उत्पद्यमानस्याध्वसंगृहीतत्वात् । अध्वनोऽप्युत्पद्यते; अनेकक्षणिकत्वादनागतस्याध्वनः ॥ २७ ॥

गतमेतत् यत्प्रसङ्गेनागतम् ॥

इदानीमिदं विचार्यते—यद्वस्तु प्रहीणं विसंयुक्तः स तस्मिन् वस्तुनि; यत्र वा विसंयुक्तः प्रहीणं तस्य तद्वास्त्विति । यत्र तावद्विसंयुक्तः प्रहीणं तस्य तद्वस्तु । स्यात्तु प्रहीणं न च तत्र विसंयुक्तः, तद्यथा—

प्रहीणे दुःखदृग्घेये संयुक्तः शेषसर्वगैः ।
प्राक् प्रहीणे प्रकारे च शेषैस्तद्विषयैर्मलैः ।। २८ ।।

दुःखज्ञाने समुत्पन्ने समुदयज्ञानेऽनुत्पन्ने दुःखदर्शनप्रहातव्यो निकायः प्रहीणो भवति । तस्मिन् प्रहीणे तदालम्बनैः समुदयदर्शनप्रहातव्यैः सर्वत्रगैः संयुक्तः । भावनाप्रहातव्येऽपि निकाये नवानां प्रकाराणां यः प्रकारः प्राक् प्रहीणस्तस्मिन् प्रहीणेऽपि शेषैस्तदालम्बनैः क्लेशैः संयुक्तो वेदितव्यः ॥ २८ ॥

कस्मिन् वस्तुनि कत्यनुशया अनुशेरत इति एतत्प्रतिपदमभिधीयमानं बहुतरं वक्तव्यं जायते, तस्मात् पिण्डविभाषां कुर्वन्ति—कथमल्पेनाल्पेन यत्नेन महतो महतः प्रश्नौघान् प्रतिपद्येमहीति ? समासत इमे षोडश धर्माः कामरूपा-

---

(अभि० को० १.७) इति लक्षणात् । *अध्वनोऽप्युत्पादनरूपादुत्पद्यते धर्मः* । कस्माद् ? इत्याह—*अनेकक्षणिकत्वादनागतस्याध्वन* इति । यस्मादनेकेषां क्षणानां राशिरूपाणां कश्चिदेव क्षण उत्पद्यते, अतोऽध्वनोऽप्युत्पद्यते—इत्युच्यते ॥ २७ ॥

*प्रसङ्गेनागत*मिति । "शेषैस्तु सर्वैः सर्वत्र" (अभि० को० ५.२४) इति प्रसङ्गेनागतमतीतानागतविचारणम् ।

*यद् वस्तु प्रहीण*मित्यादि । इह *प्रहाणम्*, प्राप्तिविगमात्, *विसंयोगः* तदालम्बनक्लेशप्रहाणात्, दर्शनभावनामार्गावधिकृत्य । *प्रहीणे दुःखदृग्घेय* इत्यादि । प्राक् *प्रहीण* इत्यादि । *शेषसर्वगै*रिति । समुदयदर्शनप्रहातव्यैः सर्वगैः । *शेषैस्तद्विषयैर्मलै*रिति । प्रहीणप्रकारविषयानुशयैरित्यर्थः । तद्यथा—अधिमात्राधिमात्रे प्रकारे प्रहीणेऽधिमात्रमध्यादिभिः शेषैरपरिहीणैरनुशयैः संयुक्तः । तथा हि असावधिमात्राधिमात्रेण प्रहीणेन क्लेशप्रकारेण विसंयुक्तोऽपि संयुक्त एव तैः शेषैरिति ॥ २८ ॥

पिण्डविभाषां कुर्वन्ति । संक्षेपव्याख्यां कुर्वन्तीत्यर्थः । के ? वैभाषिकाः ।

रूप्यावचराः पञ्चप्रकाराः अनास्रवाश्च । चित्तान्यपि षोडश एतान्येव । तत्र कतमो धर्मः कस्य चित्तस्यालम्बनमिति ज्ञात्वा 'अमुष्मिन्नियन्तोऽनुशया अनुशेरते' इत्येतदभ्यूहितव्यम् । तत्र तावत् —

दुःखहेतुदृगभ्यासप्रहेयाः कामधातुजाः ।
स्वकत्रयैकरूपाप्तामलविज्ञानगोचराः ॥ २९ ॥

स्वकं च तत् त्रयं च स्वकत्रयम्, एकं च तद्रूपाप्तं च एकरूपाप्तम्——एषा विग्रहजातिः ।

कामावचरास्तावद् दुःखसमुदयदर्शनहेया भावनाहेयाश्च धर्माः पञ्चानां षोडशेति । *कामावचराः पञ्चप्रकाराः*—दुःख-समुदय निरोध-मार्गदर्शनप्रहातव्याः चत्वारः, भावनाप्रहातव्यश्च पञ्चमः । एवं यावद् *आरूप्यावचरा पञ्चप्रकाराः* इति पञ्चदश । *अनास्रवश्च षोडश* इति *षोडश* धर्मा । इमे च धर्मा ये दर्शनप्रहातव्याः, ते चतुःस्कन्धस्वभावाः । ये भावनाप्रहातव्यास्ते पञ्चस्कन्धस्वभावाः । कथम् ? या वेदना यैर्दर्शनप्रहातव्यैरनुशयैः सम्प्रयुक्ता, स वेदनास्कन्धः । याः संज्ञाः संज्ञास्कन्धः । येऽनुशयाः, ये च तत्सम्प्रयुक्ताश्चेतनादयो यश्चैषां वेदनादीनां सर्वेषां चैतसिकानां प्राप्त्यो जाति-जरा-स्थित्य-नित्याश्च विप्रयुक्ताः, स संस्कारस्कन्धः । यच्चैभिः सम्प्रयुक्तं मनोविज्ञानम्, स विज्ञानस्कन्धः । इति चतुःस्कन्धस्वभावाः दर्शनप्रहातव्याः । भावनाप्रहातव्याः पुनरतोऽन्ये सास्रवा धर्माः । कथम् ? बाह्याध्यात्मिकं सर्वं सास्रवं रूपं रूपस्कन्धः । अनास्रवदर्शनप्रहातव्यवर्ज्याश्च वेदना संज्ञा-संस्कार-विज्ञानस्कन्धा इति पञ्चस्कन्धस्वभावा भावनाप्रहातव्या वेदितव्याः ।

चित्तान्यपि षोडशैतान्येवेति । कामावचरं दुःखदर्शनप्रहातव्यं यावद् भावनाप्रहातव्यमिति पञ्च चित्तानि । एवं रूपावचराणि अरूपावचराणि च पञ्च पञ्च, अनास्रवं च चित्तमिति षोडश चित्तानि । तानि तत्षोडशधर्मालम्बनानि वर्ण्यन्ते । *अमुष्मिन्नियन्तोऽनुशया* इति । अमुष्मिन् धर्मे इयन्तोऽनुशया । ये तेन चित्तेन सम्प्रयुक्ता आलम्बनतः सम्प्रयोगतो वाऽनुशेरते—इत्येतदभ्यूहितव्यम् ।

"*दुःखहेतुदृगभ्यासप्रहेयाः कामधातुजाः*" इति । दुःखसमुदयदर्शनभावनाप्रहातव्याः कामावचरा इत्यर्थः ।

एषा विग्रहजातिरिति । स्वकत्रयं चैकरूपाप्तं चामलं च स्वकत्रयैकरूपाप्तामलानि विज्ञानानि । *स्वकत्रयैकरूपाप्तामलविज्ञानानि* तेषां *गोचराः* । *कामावचरास्तावदिति* विस्तरः । कामावचराः दुःखसमुदयदर्शनप्रहातव्या दश-सप्तानुशयाः ।

चित्तानामालम्बनम्। स्वधातुकानां त्रयाणां तेषामेव ऊर्ध्वधातुकस्यैकस्य भावनाहेयस्यैव, अनास्रवस्य चेति ॥ २९ ॥

स्वकाधरत्रयोर्ध्वैकामलानां रूपधातुजाः ।

रूपावचरास्त एव त्रिप्रकारा धर्मा अष्टानां चित्तानामालम्बनम्। स्वधातुकानां त्रयाणां तेषामेव। अधरधातुकानां त्रयाणां तेषामेव। ऊर्ध्वधातुकस्यैकस्य भावनाहेयस्यैव, अनास्रवस्य चेति।

तत्सहभुवस्तत्प्राप्तयश्च सानुचराः। भावनाहेयाश्चतुरनुशयाः, तत्सहभुवः, तत्प्राप्तयश्च सानुचराः। सर्वं सास्रवं रूपम्, अन्ये चाक्लिष्टा धर्माः। *एते धर्माः पञ्चानां चित्तानामालम्बनम्।* केषाम्? इत्याह—*स्वधातुकानां त्रयाणां तेषामेवेति।* कामावचराणां दुःख-समुदयदर्शन-भावनाहेयानाम्। कथं कृत्वा? दुःखदर्शनहेयास्तावद् दुःखदर्शनहेयस्य सर्वत्रगासर्वत्रगसम्प्रयुक्तस्य। समुदयदर्शनप्रहातव्यस्य च सर्वत्रगसम्प्रयुक्तस्य, भावनाहेयस्य च कुशलस्य। *रूपावचरस्यैकस्य भावनाहेयस्यैव।* लौकिकेन मार्गेण कामधातूपपन्नस्य कामावचरधर्मालम्बनावस्थायाम्। रूपधातूपपन्नस्य च कामधातुदर्शनावस्थायाम्। *अनास्रवस्य* च धर्मज्ञानपक्षस्य चेति पञ्चानां चित्तानामालम्बनं भवन्ति। न कामावचरयोर्निरोध-मार्गदर्शन-हेययोश्चित्तयोरालम्बनम्; अनास्रवालम्बनयोश्चित्तयोर्निरोधमार्गालम्बनत्वात्। सास्रवालम्बनयोश्च निरोधमार्गदर्शनहेयमात्रालम्बनत्वात्। नोर्ध्वभूमिकानां क्लिष्टनाम्; अधरभूमिकानालम्बनत्वात्। नारूप्यावचरस्य कुशलस्य; चतसृभिर्दूरताभिर्दूरत्वात्। एवं समुदयदर्शनहेया अपि द्विप्रकारस्य समुदयदर्शनहेयस्य। दुःखदर्शने हेयस्य च सर्वत्रगसम्प्रयुक्तस्य, भावनाहेयस्य कुशलस्य, रूपावचरस्यैकस्य भावनाहेयस्यैव, अनास्रवस्य चेति पञ्चानामेवालम्बनानां भवन्ति। व्याख्यानं च पूर्ववदेव कर्तव्यम्। भावनाहेया अपि पञ्चानामेवालम्बनानां भवन्ति। दुःखसमुदयदर्शनहेययोः सर्वत्रगसम्प्रयुक्तयोश्चित्तयोर्भावनाहेयस्य च कुशलाकुशलाव्याकृतस्य यथासम्भवम्। रूपावचरस्यैकस्य भावनाहेयस्यैव, अनास्रवस्य चेति पूर्ववदेव वाच्यम् ॥ २९ ॥

"*स्वकाधरत्रयोर्ध्वैकामलानाम्*" इति। स्वकानामधराणां च त्रयं स्वकाधरत्रयम् च ऊर्ध्वैकं चामलं चेति विग्रहः। *रूपावचरास्त एव त्रिप्रकारा धर्मा* इति। दुःख-समुदयदर्शन-भावनाहेयाः, तेषामधिकृतत्वात्। *तेऽष्टानां चित्तानामालम्बनम्।* स्वधातुकानां त्रयाणां तेषामेव दुःख-समुदयदर्शन-भावनाहेयानाम्। पूर्ववदेव व्याख्येयम्। अधरधातुकानां त्रयाणां तेषामेव। तेषां दुःखदर्शनसमुदयहेययोर्विसभागधातुसर्वत्रगसम्प्रयुक्तयोश्चित्तयोर्भावनाहेययोश्च, श्रुतमयस्य च चिन्तामयस्य वा। *ऊर्ध्वधातुकस्यैकस्य भावनाहेयस्यैव,* आकाशा-

आरूप्यजास्त्रिधात्वाप्तत्रयानास्रवगोचराः ॥३०॥

आरूप्यावचरास्त एव त्रिप्रकारा धर्मा दशानां चित्तानामालम्बनम् । त्रैधातुकानां त्रिप्रकाराणां तेषामेव । अनास्रवस्य चेति ॥ ३० ॥

उक्तास्त्रैधातुका दुःखसमुदयदर्शनहेयाश्च धर्माः ॥

निरोधमार्गदृग्घेयाः सर्वस्वाधिकगोचराः[1] ।

निरोधमार्गदर्शनहेयानां स्वं चित्तं निरोधमार्गदर्शनहेयमेव । तस्याधिकस्य ते धर्मा आलम्बनं ज्ञेयाः । कथं कृत्वा ? कामावचरा हि निरोधदर्शनहेया धर्माः षण्णां विज्ञानानामालम्बनम्—पूर्वोक्तानां पञ्चानाम्, तस्यैव च निरोधदर्शनप्रहातव्यस्याधिकस्य । मार्गदर्शनप्रहातव्या अप्येवम् --पञ्चानां पूर्वोक्तानां तस्यैव च मार्गदर्शनप्रहातव्यस्याधिकस्य । एवं रूपारूप्यावचराणि । निरोधमार्गदर्शनप्रहातव्यास्तस्यैव निरोधमार्गदर्शनप्रहातव्यस्याधिकस्य चित्तस्यालम्बनमिति नवानामेकादशानां च चित्तानामालम्बनं भवन्ति ।

नन्त्यायतनसामग्र्यसंगृहीतस्य, *अनास्रवस्य* चान्वयज्ञानपक्षस्येति ।

"*त्रिधात्वाप्तत्रयानास्रवगोचराः*" इति । त्रिधात्वाप्तानां त्रयाणामनास्रवस्य च गोचराः । *त एवेति* । त एव दुःखसमुदयदर्शनभावनाहेया अधिकृताः । *त्रिप्रकाराणां तेषामेवेति* । काम-रूपावचराणां दुःख-समुदयदर्शनहेयानां विसभागधातु-सर्वत्रग-सम्प्रयुक्तकानां चतुर्णां भावनाप्रहातव्ययोर्द्वयोर्यथायोगम् । स्वधातुकानां च त्रयाणाम् । कतमेषाम् ? सर्वत्रगासर्वत्रगसम्प्रयुक्तयोर्यथायोगं द्वयोर्भावनाप्रहातव्यस्य चानास्रवस्य *चेति दशानां चित्तानामालम्बनं भवन्ति* ॥ ३० ॥

"*निरोधमार्गदृग्घेयाः सर्वस्वाधिकगोचराः*" इति । सर्व-ग्रहणं त्रिधातुकोपसंग्रहार्थम्; "स्वस्याधिकस्य गोचराः" इति वचनात् पूर्वोक्तानां च गोचरा इत्यर्थादुक्तं भवति । अथ वा—स्वेनाधिकानि स्वाधिकानि, स्वाधिकानां गोचराः स्वाधिकगोचरा इति । *तस्याधिकस्येति* । रागादिसम्प्रयुक्तस्य । न मिथ्यादृष्ट्यादिसम्प्रयुक्तस्य । तस्य नित्यं निरोधमार्गालम्बनत्वात् । *पूर्वोक्तानां पञ्चानामिति* । कामावचराणां त्रयाणाम्, द्विनिकायसर्वत्रगसम्प्रयुक्तकभावनाप्रहातव्यानाम् । रूपावचरस्य भावनाप्रहातव्यस्यैव, अनास्रवस्य चेति । *मार्गदर्शनप्रहातव्या अप्येवमिति* । किमेवम् ? षण्णां चित्तानामालम्बनमिति । *नवानामेकादशानां च चित्तानामालम्बनं भवतीति* । रूपावचरा निरोधमार्गदर्शन-

---

१. सर्वे स्वाधिक०—का० ।

उक्तास्त्रैधातुकाः पञ्चप्रकारा धर्माः ॥

अनास्रवास्त्रिधात्वन्त्यत्रयानास्रवगोचराः ॥ ३१ ॥

अनास्रवा धर्मा दशानां चित्तानामालम्बनम्। त्रैधातुकानामन्त्यानां त्रिप्रकाराणां निरोधमार्गदर्शनभावनाहेयानामनास्रवस्येति। पुनरस्यैवार्थस्याध्यर्धेन श्लोकेन संग्रहो भवति—

"दुःखहेतुदृगभ्यासहेया धातुत्रयेऽमलाः।
पञ्चाष्टदशविज्ञानदशविज्ञानगोचराः।

प्रहातव्या नवानां चित्तानामालम्बनं भवन्ति। आरूप्यावचरा एकादशानामिति। कथम्? रूपावचरा निरोधमार्गदर्शनप्रहातव्या धर्माः कामावचराणां विसभाग-धातु-सर्वत्रगसम्प्रयुक्त-भावनाहेयानां त्रयाणाम्। स्वधातुकानां च त्रयाणां द्विनिकाय सर्वत्रगसम्प्रयुक्तकभावनाप्रहातव्यानाम्। आरूप्यावचरस्य भावना-प्रहातव्यस्य आकाशानन्त्यायतनसंगृहीतस्य अनास्रवस्य चान्वयज्ञानपक्षस्य। तस्यैव चाधिकस्य निरोधदर्शनप्रहातव्यस्य मार्गदर्शनप्रहातव्यस्य वा चित्तस्य। इति नवानां प्रत्येकमालम्बनं भवन्ति। आरूप्यावचरा अपि निरोधमार्ग-दर्शनप्रहातव्या धर्माः प्रत्येकमेकादशानां चित्तानामालम्बनं भवन्ति—कामरूपावचराणां विसभाग-धातु-सर्वत्रग-सम्प्रयुक्तभावनाप्रहातव्यानां षण्णाम्, स्वधातुकानां च त्रयाणां द्विनिकायसर्वत्रगसम्प्रयुक्तकभावनाप्रहातव्यानाम्, निरोधमार्गदर्शनप्रहातव्यस्य च प्रत्येकमधिकस्य, अनास्रवस्य चान्वयज्ञान-पक्षस्य—इत्येकादशानामालम्बनं भवन्ति।

"*अनास्रवास्त्रिधात्वन्त्यत्रयानास्रवगोचराः*" इति। अनास्रवाः निरोधादयः। *त्रिषु धातुषु यानि अन्त्यानि त्रयाणि* निरोधमार्गदर्शनभावनाप्रहातव्यलक्षणैः। तेषां यथायोगमनास्रवस्य च गोचराः। कथम्? प्रतिसङ्ख्यानिरोधार्यमार्गौ तावत् तदालम्बनानां मिथ्यादृष्टिविचिकित्साऽविद्यासम्प्रयुक्तानां भावनाप्रहा-तव्यानामनास्रवस्य च धर्मज्ञानान्वयज्ञानपक्षस्य यथायोगमालम्बनम्। आकाश-प्रतिसङ्ख्यानिरोधौ तु भावनाप्रहातव्यस्यैवाक्लिष्टस्य चित्तस्यालम्बनमिति वेदितव्यम्।

आचार्य*गुणमति-वसुमित्रौ* तु व्याचक्षाते—आकाशाप्रतिसंख्यानिरोधौ भावनाप्रहातव्यस्य क्लिष्टाक्लिष्टस्यालम्बनमिति, तदयुक्तम्;

"मिथ्यादृग्विमती ताभ्यां युक्ताऽविद्याऽथ केवला।
निरोधमार्गदृग्घेयाः षडनास्रवगोचरा ॥" (अभि० को० ५.१४)

इति नियमात्। अतो न क्लिष्टचित्तस्य भावनालम्बनमिति सिद्धान्तः।

निरोधमार्गदृग्घेयाः सर्वस्वाधिकगोचराः" ॥ इति ॥

एवमेषां षोडशानां चित्तानां षोडशधर्मालम्बनव्यवस्थां विदित्वा **कथमनुशय-कार्यं योजयितव्यम् ? दिङ्मात्रं दर्शयिष्यामः—**

'सुखेन्द्रियालम्बने विज्ञाने कत्यनुशया अनुशेरते' इति प्रश्न आगते विचार-यितव्यम्—सुखेन्द्रियं सप्तविधं कामावचरं भावनाप्रहातव्यं **रूपावचरं च पञ्च-**प्रकारमनास्रवं चेति ।

तदेतत् समासतो द्वादशधर्मस्य विज्ञानस्यालम्बनं भवति; **कामावचरस्य** चतुष्प्रकारस्यान्यत्र निरोधदर्शनहेयात् । रूपावचरस्य **पञ्चप्रकारस्यारूप्यावचरस्य**

"पञ्चाष्टदशविज्ञानदशविज्ञानगोचराः" इति । दुःखसमुदयदर्शनभावनाहेयाः पञ्चानां गोचराः । रूपावचरा अष्टानाम् । आरूप्यावचरा दशानाम् । अमला अपि दशानामेवेति पूर्वव्याख्यानुसारेण योज्यम् । *एतान्येव षोडश चित्तानि* षट्त्रिंशत् भवन्ति । कामधातुदुःखसमुदयदर्शनहेयमसर्वत्रगसम्प्रयुक्तं च । एवं रूपधातौ दुःखसमुदयदर्शनहेयं प्रत्येकं त्रिप्रकारम् । आरूप्यधातौ अन्यत्र-विसभागधातुभूमिसर्वत्रगसम्प्रयुक्तान् । निरोधमार्गदर्शनहेयं धातुत्रयेऽपि प्रत्येकं द्विधा, सास्रवानास्रवालम्बनत्वात् । भावनाहेयमपि क्लिष्टाक्लिष्टभेदात् द्विप्रकारम् । अनास्रवमपि धर्मज्ञानपक्षम्, अन्वयज्ञानपक्षं चेति द्विधा ।

कामावचरं भावनाप्रहातव्यमिति । पञ्चविज्ञानकायिकं सुखेन्द्रियम् । *रूपावचरं पञ्चप्रकारमिति ।* प्रथमध्यानभूमिकं त्रिविज्ञानकायिकम् । तृतीय-ध्यानभूमिकं मानसमित्यभिसमस्य यथायोगं पञ्चप्रकारं दुःखदर्शनप्रहातव्यम्, यावद् भावनाप्रहातव्यम् । अनास्रवं च तृतीयध्यानभूमिकमेव ।

कामावचरस्य चतुःप्रकारस्येति । दुःखसमुदयमार्गदर्शनभावनाप्रहेयस्य । दुःखसमुदयदर्शनहेययोः सुखेन्द्रियमालम्बनं भवति । यस्माद् दुःखसमुदय-सत्यसंगृहीतं स्वभूमिकम्, ऊर्ध्वभूमिक वा सुखेन्द्रियं सत्कायमिथ्यादृष्ट्यादीना-मालम्बनं भवति । मार्गदर्शनहेयस्य च मिथ्यादृष्ट्यादिसम्प्रयुक्तस्य मार्गसत्य-संगृहीतं सुखेन्द्रियमालम्बनम् । भावनाहेयरागादिसम्प्रयुक्तस्य च चित्तस्य तत्पञ्चविज्ञानकायिकं सुखेन्द्रियमालम्बनम् । इति चतुःप्रकारस्यास्य तदा-लम्बनम् । न तु निरोधदर्शनहेयस्य चित्तस्य; तत्र मिथ्यादृष्ट्यादीनां निरोधा-लम्बनत्वात् । दृष्टिपरामर्शादीनां च स्वनिकायालम्बनत्वात्, तत्र च सुखेन्द्रिया-भावात् । तेनोच्यते—*अन्यत्र निरोधदर्शनहेयादिति ।*

रूपावचरस्य पञ्चप्रकारस्येति । यस्मात् तृतीयध्यानसंगृहीतं पञ्चप्रकारं

द्विप्रकारस्य मार्गदर्शनभावनाहेयस्यानास्रवस्य च । इदं द्वादशविधं सुखेन्द्रियालम्बनं विज्ञानम् ।

तत्र यथासम्भवं कामावचराश्चत्वारो निकाया रूपावचराश्च संस्कृतालम्बनाः, आरूप्यावचरौ च द्वौ निकायौ, सर्वत्रगाश्चानुशया अनुशेरत इति विज्ञातव्यम्[1] ।

सुखेन्द्रियं भवति । *मार्गदर्शनभावनाहेयस्येति* । आरूप्यावचरस्य मार्गदर्शनहेयस्य मिथ्यादृष्ट्यादिसम्प्रयुक्तस्य चित्तस्य मार्गसंगृहीतं सुखेन्द्रियमालम्बनम् । तदेव च भावनाहेयस्य कुशलस्य चित्तस्यालम्बनम् । अनास्रवस्य च सर्वमप्यालम्बनं भवति ।

तत्र यथासम्भवमिति । यस्माद् अनास्रवेऽनुशया अनुशेरते, यस्मात् क्वचिदेव केचिदनुशेरते, तस्माद् '*यथासम्भवम्*' इत्युच्यते । तत्र विज्ञाने कामावचराश्चत्वारो निकायाः । तद्यथा —मिथ्यादृष्टिसम्प्रयुक्ते सुखेन्द्रियालम्बने दशापि दुःखदर्शनप्रहातव्या अनुशया आलम्बनतोऽनुशेरते, सम्प्रयोगतो वा यथासम्भवम् । एवं समुदयदर्शनप्रहातव्याः । मार्गदर्शनप्रहातव्या अपि तत्र सुखेन्द्रियालम्बने विज्ञानेऽनुशेरते । मार्गसुखेन्द्रियालम्बने हि मिथ्यादृष्ट्यादिसम्प्रयुक्ते विज्ञाने मिथ्यादृष्ट्यादयः सम्प्रयोगतोऽनुशेरते । दृष्टिपरामर्शादयोऽप्यालम्बनतोऽनुशेरते । तस्मात् सोऽपि निकायस्तत्रानुशेते । भावनाहेयोऽपि निकायोऽप्यत्रानुशेते; तत्र रागादीनां सुखेन्द्रियालम्बनविज्ञानालम्बनयोगात् । निरोधदर्शनप्रहातव्यनिकायस्तु तत्र नानुशेते; सुखेन्द्रियालम्बनविज्ञानाभावात् ।

रूपावचराः संस्कृतालम्बना इति । रूपावचरं सुखेन्द्रियालम्बनं पञ्चप्रकारमस्ति । तत्र चत्वारो निकाया अनुशेरत इति सुगममेतत् । निरोधदर्शनप्रहातव्यास्तु संस्कृतालम्बनाः कथमनुशेरते ? तृतीये ध्याने दृष्टिपरामर्शादयः सुखेन्द्रियेण सम्प्रयुज्यन्ते, ते चान्योन्यालम्बनाः । ते तत्र सुखेन्द्रियालम्बनविज्ञाने सम्प्रयोगत आलम्बनतो वाऽनुशेरते ।

आरूप्यावचरौ द्वौ निकायाविति । मार्गदर्शन-भावनाहेयनिकायौ । मार्गसुखेन्द्रियालम्बने मिथ्यादृष्ट्यादिसम्प्रयुक्ते मिथ्यादृष्ट्यादयः सम्प्रयोगतोऽनुशेरते । दृष्टिपरामर्शादयस्तु तत्रालम्बनतोऽनुशेरते । भावनाहेयोऽपि निकायोऽनुशेते । भावनाहेयं हि कुशलं चित्तं मार्गमालम्बते । तत्र स रागादिनिकायोऽनुशेते । *सर्वत्रगाश्चारूप्यावचरा अनुशयास्तत्रैव* विज्ञाने, मार्गालम्बनमिथ्यादृष्ट्यादिसम्प्रयुक्ते वा विज्ञानेऽ*नुशेरते—इति विज्ञातव्यम्* ।

---

१. ज्ञातव्यम्—का० ।

सुखेन्द्रियालम्बनालम्बने विज्ञाने कत्यनुशया अनुशेरते ? तत् पुनः सुखेन्द्रियालम्बनं द्वादशविधं विज्ञानं कतमस्य विज्ञानस्यालम्बनम् ? तस्यैव द्वादशविधस्यारूप्यावचरस्य च भूयो द्विप्रकारस्य दुःखसमुदयदर्शनप्रहातव्यस्य। इदं चतुर्दशविधं सुखेन्द्रियालम्बनं विज्ञानम्। तत्रारूप्यावचरौ[1] दुःखसमुदयदर्शन-हेयौ वर्धयित्वा कामावचरा आरूप्यावचराश्चत्वारो निकाया रूपावचराः संस्कृता-लम्बना अनुशया अनुशेरत इति ज्ञातव्यम्।

अनया वर्तन्याऽन्यदपि गन्तव्यम्[2]। यैरनुशयैर्यच्चित्तं सानुशयं तेऽनुशया-

---

तस्यैव द्वादशविधस्येति। कामावचरस्य चतुःप्रकारस्यान्यत्र निरोधदर्शन-हेयात्। रूपावचरस्य पञ्चप्रकारस्य, अरूपावचरस्य च द्विप्रकारस्य मार्ग-दर्शनभावनाहेयस्यानास्रवस्य चेति अन्योन्यालम्बनयोगतस्तस्य सुखेन्द्रिया-लम्बनं विज्ञानमालम्बनं भवति। आरूप्यावचरस्य च भूयो द्विप्रकारस्य तत् सुखेन्द्रियालम्बनं विज्ञानमालम्बनं भवति। कतमस्य ? इत्याह— *दुःखसमुदय-दर्शनप्रहातव्यस्येति*। आरूप्यावचरस्य सर्वत्रगसम्प्रयुक्तस्य हि दुःखसमुदय-दर्शनहेयभेदाद् द्विप्रकारस्य चित्तस्य आरूप्यावचरमार्गदर्शनहेय-मिथ्यादृष्ट्या-दिसम्प्रयुक्तं विज्ञानं मार्गालम्बनं चारूप्यावचरं भावनाहेयं कुशलमालम्बनं भवति। *एवमिद चतुर्दशविधं सुखेन्द्रियालम्बनविज्ञानालम्बनम्। तत्रारूप्या-वचरौ दुःखसमुदयदर्शनहेयौ वर्धयित्वेति*। पूर्वं सर्वत्रगा एवारूप्यावचरा सुखेन्द्रियालम्बने विज्ञानेऽनुशेरते। सुखेन्द्रियालम्बनालम्बने तु सकलावप्या-रूप्यावचरौ दुःखदर्शनसमुदयहेयौ निकायावनुशयाते। तस्मात् तत्र सर्वत्रग-सम्प्रयुक्ते चित्ते दुःखसमुदयदर्शनहेया अनुशयाः सम्प्रयोगत आलम्बनतो वा यथायोगमनुशेरते। शेषास्तु पूर्ववद् याज्याः।

अनया वर्तन्या अन्यदपि गन्तव्यमिति। अनेन वर्त्मना अन्यदपि बोद्ध-व्यम्। कथम् ? 'दुःखेन्द्रियालम्बने कत्यनुशयाः अनुशेरते'— इति प्रश्ने आगते विचारयितव्यम्— दुःखेन्द्रियमेकविधं कामावचरं भावनाप्रहातव्यम्; पञ्चविज्ञानकायिकत्वात्। तत् समासतः पञ्चविधस्य विज्ञानस्यालम्बनं भवति। कामावचरस्य त्रिप्रकारस्य, दुःखसमुदयदर्शनहेययोः सर्वत्रगसम्प्रयुक्तयो-विज्ञानयोर्भावनाप्रहातव्यस्य च। रूपावचरस्य च भावनाप्रहातव्यस्य, अनास्रवस्य च। इदं पञ्चविधं दुःखेन्द्रियालम्बनं विज्ञानम्। तत्र यथासम्भवं कामावचरास्त्रयो निकाया दुःख-समुदयदर्शनभावनाहेयाः। तत्र हि सर्वत्रग-

---

१. ०वचरौ द्वौ—का०। २. अनुगन्तव्यम्—का०।

स्तस्मिंश्चित्तेऽनुशेरते । स्युरनुशेरते । येऽनुशयास्तेन चित्तेन संप्रयुक्ता अप्रहीणा-स्तदालम्बनाश्चाप्रहीणाः । स्युर्नानुशेरते । येऽनुशयास्तेन चित्तेन सम्प्रयुक्ताः प्रहीणास्तदालम्बनाश्च ॥३१॥

सम्प्रयुक्ते चित्ते भावनाहेये च दुःखसमुदयदर्शनहेयौ निकायौ सम्प्रयोगत आलम्बनतो वा यथासम्भवमनुशयाते । भावनाहेये च भावनाहेयो निकायोऽनुशेते । रूपावचर एको भावनाहेयः । तत्र भावनाहेये चित्तेऽनुशेते । सर्वत्रगाश्च रूपावचरास्तत्रैव—इत्यवगन्तव्यम् ।

दुःखेन्द्रियालम्बनालम्बने विज्ञाने कत्यनुशया अनुशेरते ? तत् पुनर्दुःखेन्द्रियालम्बनं पञ्चविज्ञानं कतमस्य विज्ञानस्यालम्बनम् ? तस्यैव पञ्चविधस्यान्योन्यालम्बनयोगेन । कामावचरस्य च भूयो मार्गदर्शनहेयस्यानास्रवालम्बनस्य । रूपावचरस्य च सर्वत्रगसम्प्रयुक्तस्यालम्बनं भवति । तेन हि रूपावचरं दुःखेन्द्रियालम्बनं कुशलं भावनाप्रहातव्यमालम्बते । आरूप्यावचरमप्याकाशानन्त्यायतनसामन्तकसंगृहीतौदारिकाद्याकारं दुःखेन्द्रियालम्बनमालम्बते । तदिदमष्टविधं दुःखेन्द्रियालम्बनालम्बनं विज्ञानम् । तत्र कामावचराश्चत्वारो निकायाः—दुःख-समुदय-मार्गदर्शन-भावनाहेयाः । रूपावचरास्त्रयो निकायाः—दुःख-समुदयदर्शन-भावनाप्रहातव्याः । आरूप्यावचर एकः—भावनाप्रहातव्यः । सर्वत्रगाश्चानुशया अनुशेरत इति विज्ञातव्यम् ।

सौमनस्येन्द्रियालम्बने विज्ञाने कत्यनुशयाः अनुशेरते ?—इति प्रश्ने विचारयितव्यम् । तत् पुनः सौमनस्येन्द्रियालम्बनं विज्ञानं एकादशविधम् । काम-रूपावचरं पञ्च-पञ्चप्रकारम्, अनास्रवं च । तदेतत् समासतस्त्रयोदशविधस्य विज्ञानस्यालम्बनं भवति । कामावचरस्य पञ्चप्रकारस्य संस्कृतालम्बनस्य; तस्य संस्कृतत्वात् । एवं रूपावचरस्य । आरूप्यावचरस्य तु द्विप्रकारस्य मार्गदर्शनभावनाहेयस्य, अनास्रवस्य च । इदं त्रयोदशविधं सौमनस्येन्द्रियालम्बनविज्ञानम् । तत्र यथासम्भवं कामावचर-रूपावचराः पञ्चनिकायाः संस्कृतालम्बनाः, आरूप्यावचरौ द्वौ निकायौ, सर्वत्रगाश्चानुशया अनुशेरते—इति विज्ञातव्यम् ।

सौमनस्येन्द्रियालम्बनालम्बने विज्ञाने कत्यनुशया अनुशेरते ? तत् पुनःसौमनस्येन्द्रियालम्बनं त्रयोदशविज्ञानं कतमस्य विज्ञानस्यालम्बनम् ? तस्यैव त्रयोदशविज्ञानस्य । आरूप्यावचरस्य च भूयो द्विप्रकारस्य दुःख-समुदय-दर्शनप्रहातव्यस्य । इदं पञ्चदशविधं सौमनस्येन्द्रियालम्बनं विज्ञानम् । तत्रारूप्यावचरौ द्वौ—दुःख-समुदयदर्शनहेयौ वर्धयित्वा । कामावचर-रूपावचराः संस्कृतालम्बनाः । आरूप्यावचराश्चत्वारो निकायाः, अन्यत्र निरोधदर्शनहेयात् ।

तदेवं कृत्वा भवति—

द्विधा सानुशयं क्लिष्टमक्लिष्टमनुशायकैः ।

क्लिष्टं चित्तमनुशयानैश्चानुशयैः सानुशयम्; तत्सम्प्रयुक्ततदालम्बनैरप्रहीणैरननुशयानैश्च तत्सम्प्रयुक्तैः प्रहीणैस्तत्सहितत्वात् । अक्लिष्टं तु चित्तमनुशयानैरेव तदालम्बनैरप्रहीणैरिति ।

अथैषां दशानामनुशयानां कथं प्रवृत्तिरिति ? आदित एव तावदविद्यायोगात् सत्येषु स मुह्यति, दुःखमस्मै न रोचते यावत् मार्गः । ततः

मोहात्काङ्क्षा,

मूढस्य पक्षद्वयं श्रुत्वा विचिकित्सोत्पद्यते—दुःखं न्विदम्, न त्विदं दुःखमित्येवमादि ।

ततो मिथ्यादृष्टिः,

विचिकित्साया मिथ्यादृष्टिः प्रवर्तते । संशयितस्य मिथ्याश्रमणचित्तानां मिथ्यानिश्चयोत्पत्तेः—नास्ति दुःखमित्येवमादि ।

सत्कायदृक् ततः ॥ ३२ ॥

मिथ्यादृष्टेः किल सत्कायदृष्टिः प्रवर्तते; दुःखतः स्कन्धानपोह्यात्मतोऽभिनिवेशात् ।

ततोऽन्तग्रहणम्,

सत्कायदृष्टेरन्तग्राहदृष्टिः प्रवर्तते; आत्मनः शाश्वतोच्छेदान्तग्रहणात् ।

तस्माच्छीलामर्शः,

अनुशया अनुशेरत इति विज्ञातव्यम् । अनया दिशा अन्यदपि गन्तव्यमिति ॥ ३१ ॥

"*द्विधा सानुशयं क्लिष्टम्*" इति । अनुशयानैरननुशयानैश्चानुशयैः *सानुशयं क्लिष्टमि*त्यर्थः । *तत्सहितत्वात्* । सदावस्थितत्वादित्यर्थः । *अक्लिष्टं चित्तमनुशयानैरेव* सानुशयं विवेचयितुं शक्यत्वात् । तथा हि वक्ष्यति—'प्रहातव्यः क्लेश आलम्बनात्मत.' (अभि० को० ६.६०) इति ॥ ३२ ॥

सर्वस्य सर्वानन्तरमुत्पत्तिसम्भवान्नास्त्येषामुत्पत्तौ सार्वजन्यः क्रमनियमः । *दुःखतः स्कन्धानपोह्येति* । नेदं दुःखमित्यात्मतोऽभिनिवेशात् । 'रूपमात्मा' इत्येवन्दृष्टिकस्य वेदनाद्यात्मग्राहदृष्टिः प्रत्यनीका ॥ ३३ ॥

अन्तग्रहाच्छीलव्रतपरामर्शः । यमेवान्तं गृह्णाति तेन शुद्धिमस्यागमनात् ।

ततो दृशः ।

'आमर्शः' इति वर्तते । शीलव्रतपरामर्शाद् दृष्टिपरामर्शः प्रवर्तते । येन शुद्धिं प्रत्येति तस्याग्रतो ग्रहणात् । ततः—

रागः स्वदृष्टौ मानश्च

तस्यामभिष्वङ्गात्, तया चोन्नतिगमनात् ।

द्वेषोऽन्यत्र

स्वदृष्ट्यध्यवसितस्य तत्प्रत्यनीकभूतायां परदृष्टौ द्वेषः प्रवर्तते ।

अपरे स्वदृष्टावेवान्यत्र गृहीते त्यक्तायां द्वेषमिच्छन्ति । दर्शनहेयानां रागादीनां स्वसान्तानिकदृष्ट्यालम्बनत्वात् ।

इत्यनुक्रमः ॥ ३३ ॥

एष एषां दशानां क्लेशानां प्रवृत्तिक्रमः ॥ ३३ ॥

उत्पद्यमानस्तु त्रिभिः कारणैरुत्पद्यते—

अप्रहीणादनुशयाद् विषयात् प्रत्युपस्थितात् ।
अयोनिशो मनस्कारात् क्लेशः,

तद्यथा—रागानुशयोऽप्रहीणो भवत्यपरिज्ञातः कामरागपर्यवस्थानीयाश्च धर्मा आभासगता भवन्ति । तत्र चायोनिशो मनस्कार एवं कामराग उत्पद्यते । तान्येतानि यथाक्रमं हेतुविषयप्रयोगबलानि ।

अप्रहीणो भवत्यपरिज्ञात इति । अप्रहीणः; तत्प्राप्त्यनुच्छेदात् । अपरिज्ञातः; तत्प्रतिपक्षस्य चानुत्पत्तेः । *कामरागपर्यवस्थानीया* इति । पर्यवतिष्ठत एभिरिति पर्यवस्थानीयाः स्नानीयवत् । कामरागस्य पर्यवस्थानीया अनुकूला इति । कामराग एव वा पर्यवस्थानम् कामरागपर्यवस्थानम्, तस्मै हिताः कामरागपर्यवस्थानीयाः । ते पुनः रूपादयो *विषया आभासगता भवन्तीति* । विषयरूपतामापन्ना भवन्तीत्यर्थः । *तत्र चायोनिशोमनस्कार* इति । तत्र चाभासगतेषु विषयेषु विपरीतः समनन्तरप्रत्यय इत्यर्थः । *हेतुविषयप्रयोगबलानिति* । हेतुबलम्—कामरागोत्पत्तये कामरागानुशयोऽप्रहीणो भवत्यपरिज्ञातः । कामरागपर्यवस्थानीया विषयबलम् । तत्र चायोनिशोमनस्कारः—प्रयोगबलम् । एव-

एवमन्योऽपि क्लेश उत्पद्यत इति वेदितव्यः, यः—

सम्पूर्णाकारणः ।। ३४ ।।

कदाचित्किल विषयबलेनैवोत्पद्यन्ते, न हेतुबलेन । यथा—परिहाणधर्मकस्यार्हत इति ॥ ३४ ॥

एत एवानुशयाः सूत्रे भगवता त्रय आस्रवा उक्ताः—कामास्रवः, भवास्रवः, अविद्यास्रव इति । चत्वार ओघाः—कामौघः, भवौघः, दृष्ट्योघः, अविद्यौघश्च । चत्वारो योगा एत एव । चत्वार्युपादानानि—कामोपादानम्, दृष्ट्युपादानम्, शीलव्रतोपादानम्, आत्मवादोपादानमिति । तत्र तावत्

कामे सपर्यवस्थानाः क्लेशाः कामास्रवो विना ।

मोहेन,

अविद्यां वर्जयित्वाऽन्ये कामावचराः क्लेशाः सह पर्यवस्थानैः कामास्रवो वेदितव्य एकचत्वारिंशद् द्रव्याणि । एकत्रिंशदनुशयाः पञ्चप्रकारामविद्यां हित्वा दश पर्यवस्थानानि ।

अनुशया एव रूपारूप्ये भवास्रवः ।। ३५ ।।

'विना मोहेन' इति वर्तते । रूपारूप्यावचरा अविद्यावर्ज्या अनुशया भवास्रवो द्वापञ्चाशद् द्रव्याणि—रूपावचराः षड्विंशतिरनुशयाः पञ्चप्रकारामविद्यां हित्वा, आरूप्यावचराः षड्विंशतिः ।

मन्योऽपि क्लेश उत्पद्यत इति । प्रतिघानुशयोऽप्रहीणो भवत्यपरिज्ञातः, प्रतिघपर्यवस्थानीया धर्मा आभासगता भवन्ति, तत्र चायोनिशोमनस्कार इत्येष नयः ॥ ३४ ॥

चत्वारो योगा एत एवेति कामयोगः, भवयोगः, दृष्टियोगः, अविद्यायोगश्चेति ।

"*विना मोहेन*" इति । अविद्यास्रवस्य पृथगुक्तत्वात् । *सह पर्यवस्थानै*राह्रीक्यादिभिर्वक्ष्यमाणैः *एकचत्वारिंशद् द्रव्याणि एकत्रिंशदनुशया* इति । द्वादश दृष्टयः—दुःखदर्शनप्रहातव्याः पञ्च, समुदयदर्शनप्रहातव्ये द्वे, निरोधदर्शनप्रहातव्ये द्वे एव, तिस्रो मार्गदर्शनप्रहातव्याः । चतस्रो विचिकित्साः । पञ्च रागाः । एवं प्रतिघाः, मानाश्च दश पर्यवस्थानानि—इत्येवमेकचत्वारिंशत् ।

"*अनुशया एव*" इति । एवकारः पर्यवस्थाननिरासार्थः । *षड्विंशतिरनुशया* इति । द्वादश दृष्टयः, चतस्रो विचिकित्साः, पञ्च रागाः, पञ्च माना इति ।

ननु च तत्राप्यस्ति पर्यवस्थानद्वयम्—स्त्यानमौद्धत्यं च, प्रकरणेषु चोक्तम् "भवास्रवः कतमः ? अविद्यां स्थापयित्वा यानि तदन्यानि रूपारूप्यप्रतिसंयुक्तानि । संयोजनबन्धनानुशयोपक्लेशपर्यवस्थानानि" (   ) इति, कस्मादिह तस्याग्रहणम् ? अस्वातन्त्र्यादिति **काश्मीराः** ॥ ३५ ॥

किं पुनः कारणं रूपारूप्यवचरा अनुशयाः समस्यैको भवाम्र उक्तः ?

अव्याकृतान्तर्मुखा हि ते समाहितभूमिकाः ।

अत एकीकृताः

ते ह्युभयेऽप्यव्याकृता अन्तर्मुखप्रवृत्ताः समाहितभूमिकाश्चेति त्रिविधेन साधर्म्येणैकीकृताः । येनैव च कारणेन भवराग उक्तस्तेनैव भवास्रव इत्यविद्येदानीं त्रैधातुक्यविद्यास्रव इति सिद्धम् । तानि पञ्चदश द्रव्याणि ।

किं कारणमसौ पृथग्व्यवस्थाप्यते ? सर्वेषां तेषाम्[१]—

मूलमविद्येत्यास्रवः पृथक् ॥ ३६ ॥

यथा चैते आस्रवा उक्ता वेदितव्या ,

ननु च *तत्राप्यस्ति पर्यवस्थानद्वयमिति* । तत्र रूपारूप्यधात्वोः । "स्त्यानौद्धत्यमदा धातुत्रये" (अभि० ५.५३) इति वचनात् । *कस्मादिह तस्याग्रहणमिति* । तस्य पर्यवस्थानद्वयस्य । *अस्वातन्त्र्यादिति* । कथमस्वातन्त्र्यम् ? रागादिसम्प्रयोगित्वादीर्ष्यावद् अविद्यामात्रासम्प्रयोगित्वाच्च । एतद्धि द्वयं रागादिभिः सम्प्रयुज्यते । न तथा ईर्ष्यामात्सर्यकौकृत्यक्रोधम्रक्षाः स्वतन्त्राः, अविद्यामात्रेण सम्प्रयोगादिति ॥ ३५ ॥

ते ह्युभयेऽपीति । रूपारूपावचरा अपीत्यर्थः । *अन्तर्मुखप्रवृत्ता* इति । न विषयप्रधाना इत्यर्थः । *येनैव च कारणेन भवराग* उक्त इति । "अन्तर्मुखत्वात्तन्मोक्षसंज्ञाव्यावृत्तये कृतः" (अभि० ५ २) इति । *अनेन च भवास्रव* इति । *अविद्यास्रव इति सिद्धमिति* । अविद्या पूर्वोक्ताभ्यामास्रवाभ्यां बहिष्कृता । तस्मात् सा त्रैधातुकी अपि अविद्यास्रव इति सिद्धमेतत् । *पञ्चदश द्रव्याणीति* । त्रिष्वपि धातुष्वविद्यायाः प्रत्येकं पञ्चप्रकारत्वात् । *सर्वेषां तेषामिति* । कामास्रवादीनां संसारस्य च । उक्तो ह्यविद्याहेतुः संरागायेत्यादि ।

"याः काश्चन दुर्गतयो ह्यस्मिन् लोके परत्र च ।

---

१. हि तेषाम्—का० ।

तथौघयोगा दृष्टीनां पृथग्भावस्तु पाटवात् ।

कामास्रव एव कामौघः कामयोगश्च । एवं भवास्रव एव भवौघो भवयोगश्च, अन्यत्र दृष्टिभ्यः । ताः किल पटुत्वादोघयोगेषु पृथक् स्थापिताः ।

नास्रवेष्वसहायानां न किलास्यानुकूलता ।। ३७ ।।

आसयन्तीत्यास्रवाणां निर्वचनं पश्चाद्वक्ष्यति । न च किल केवला दृष्टय आस्यानुकूलाः; पटुत्वात् । अत आस्रवेषु न पृथक् स्थापिताः । मिश्रीकृत्य स्थापिता इति । तदेवं कामौघ एकान्नत्रिंशद् द्रव्याणि । रागप्रतिघमानाः पञ्चदश विचिकित्साश्चतस्रो दश पर्यवस्थानानीति । भवौघोऽष्टाविंशतिद्रव्याणि । रागमाना विंशतिः । विचिकित्साऽष्टौ । दृष्ट्योघः षट्त्रिंशद् द्रव्याणि । अविद्योघः पञ्चदश द्रव्याणि ।

अविद्यामूलिकाः सर्वा इच्छालोभसमुत्थिताः ।।" ( ) इति च ।। ३६ ।।

"*तथोघयोगा*" इति । आस्रवा एवौघा योगाश्च भवन्ति । केवलम् *दृष्टयः पृथग् अवस्थाप्यन्ते ।* कथम् ? इति विव्रियते—कामास्रव एव कामौघः, कामयोगश्च । एवं भवास्रव एव भवौघः, भवयोगश्च । अविद्यौघयोगस्तु पूर्ववदेवावगन्तव्यः । दृष्टियोग इह चतुर्थ उक्तः । तेनाह—*अन्यत्र दृष्टिभ्य* इति । *ताः किलेति* । किल-शब्दः परमतद्योतकः । विनेयजनवशात्तु दृष्टियोगः पृथगुक्त इत्यभिप्रायो युज्यते ।

आस्रवेषु दृष्टयः किमर्थं न पृथक स्थापिताः ? इत्याह—"*नास्रवेष्वसहायानाम्*" इत्यादि । असहायानां दृष्टीनाम् आस्यानुकूलता = अवस्थानानुकूलता, चलत्वात् पटुत्वाच्च न भवति । नासनानुकूलनेत्यर्थः । आसेति रूपे प्राप्ते, *आपिशलेष्ट्या* 'आस्या' इति रूपं भवति । तदिदमुक्तं भवति—यस्मादेता दृष्टयोऽसहायाः, नासनानुकूलाः । ससहायास्त्वासनानुकूला भवन्ति । तस्मात् ससहाया एवैता आस्रवेषूक्ता । मिश्रीकृत्योक्ता इत्यर्थः । किमर्थम् ? इत्याह—*आसयन्तीत्यास्रवाणां* निवर्चनं पश्चाद् वक्ष्यतीत्यत आसनार्थमास्रवेषु भवितव्यमित्यभिप्रायः । *तदेवं कामौघ एकान्नत्रिंशद् द्रव्याणी*ति । द्वादशदृष्ट्यपनयनात् नास्रववद् एकचत्वारिंशद् द्रव्याणि भवन्ति, किं तर्हि ? एकान्नत्रिंशद् द्रव्याणि भवन्ति । कथम् ? इत्याह—*राग-प्रतिघ-माना* इति सर्वम् । *भवौघोऽष्टाविंशतिद्रव्याणी*ति । भवास्रवो द्वापञ्चाशद् द्रव्याण्युक्तानि, ततश्चतुर्विंशतिदृष्टीरपनीय अष्टाविंशतिर्द्रव्याणि । *राग-माना विंशतिरि*ति । द्विधातुका रागा दश भवन्ति, माना अपि दशेति विंशतिः । *दृष्ट्योघः षट्त्रिंशद् द्रव्याणी*ति । त्रिषु धातुषु त्रिर्द्वादश दृष्टय इति । *अविद्यौघः पञ्चदशद्रव्याणि ।* पूर्ववत् ।

ओघवद् योगा वेदितव्याः ॥ ३७ ॥

यथोक्ता एव सार्विद्या द्विधा दृष्टेर्विवेचनात् ।

उपादानानि,

कामयोग एव सहाविद्यया कामोपादानं चतुस्त्रिंशद् द्रव्याणि—रागप्रतिघमानाऽविद्या विंशतिः, विचिकित्साश्चतस्रः, दश पर्यवस्थानानि । भवयोग एव सहाविद्यया आत्मवादोपादानमष्टत्रिंशद् द्रव्याणि । रागमानाविद्यास्त्रिंशद्विचिकित्सा अष्टौ । दृष्टियोगाच्छीलव्रतं निष्कृष्य दृष्ट्युपादानं त्रिंशद् द्रव्याणि । शीलव्रतोपादानं षड्द्रव्याणि कर्मदृष्टिभ्यो निष्कृष्टम् । मार्गप्रतिद्वन्द्वाद्[1], उभयपक्षविप्रलम्भनाच्च । गृहिणोऽप्यनेन विप्रलब्धा अनशनादिभिः स्वर्गमार्गसंज्ञया । प्रव्रजिता अपीष्टविषयपरिवर्जनेन शुद्धिप्रत्यागमनादिति ।

किं कारणमविद्यां मिश्रयित्वोपादानमुक्तं न पृथक् ? भवग्रहणादुपादानानि ।

ओघवद् योगा इति । कामयोग एकान्नत्रिंशद् द्रव्याणि । राग-प्रतिघ-मानाः पञ्चदश, विचिकित्साश्चतस्रो दश पर्यवस्थानानि । भवयोगोऽष्टाविंशतिर्द्रव्याणि । राग-मानाः विंशतिः, विचिकित्सा अष्टौ । दृष्टियोगः षट्त्रिंशद् द्रव्याणि । अविद्यायोगः पञ्चदश द्रव्याणि ॥ ३७ ॥

"*यथोक्ता एव साऽविद्या*" इति विस्तरः । के यथोक्ताः ? 'योगाः' इत्यधिकृतम् । तस्माद् विक्रियते—कामयोग एव सहाविद्यया कामोपादानमिति । अविद्या कामोपादान-आत्मवादोपादानयोर्यथास्वमन्तर्भाव्यते ।

द्विधा दृष्टेः । पृथक्करणाच्चतुष्टवम्— कामोपादानम्, दृष्ट्युपादानम्, शीलव्रतोपादानम्, आत्मवादोपादानमिति । *दृष्टियोगाच्छीलव्रतं निष्कृष्येति* । षट्त्रिंशद्द्रव्यकाद् दृष्टियोगाद् धातुभेदेन पञ्चशीलव्रतपरामर्शान्निष्कृष्य । *दृष्ट्युपादानं त्रिंशद् द्रव्याणि । शीलव्रतोपादानं षड् द्रव्याणि ।* कामधातौ द्वे, एवं रूपधातौ आरूप्यधातौ चेति । *मार्गप्रतिद्वन्द्वादिति* । सांख्य-योगज्ञानादिभिर्मोक्षप्राप्तिदर्शनान्मार्गप्रतिद्वन्द्वभूतं शीलव्रतोपादानम् । *उभयपक्षविप्रलम्भनाच्चेति* विस्तरः । गृहिप्रव्रजितपक्षविप्रलम्भनाच्चेत्यर्थः । *अनशनादिभिरिति* । आदि-शब्देन जलाग्निप्रपतन-मौनवीरादानादिर्गृह्यते । अनशनादीनि शीलव्रतसंगृहीतानि, इष्टविषयपरिवर्जनं च । *इष्टविषयपरिवर्जनेनेति* । रसपरित्यागभूमिशय्यामलपङ्कधारण-नग्नचर्या-केशोल्लुञ्चनादिना *शुद्धिप्रत्यागमनात्* ।

[1]. प्रतिद्वन्द्वित्वात् —का० ।

अविद्या तु ग्राहिका नेति मिश्रिता ॥ ३८ ॥

असम्प्रख्यानलक्षणतयाऽपटुत्वादविद्या न ग्राहिका भवति, अतः किल मिश्रिता । सूत्रे तु भगवतोक्तम्—"कामयोगः कतमः ? विस्तरेण यावद्योऽस्य भवति कामेषु कामरागः कामच्छन्दः कामस्नेहः काममेम कामेच्छा काममूर्छा कामगृद्धः कामपरिगर्द्धः कामनन्दी कामनियन्तिः कामाध्यवसानम्, तदन्यचित्तं पर्यादाय तिष्ठति । अयमुच्यते कामयोगः । एवं यावद् भवयोगः" । ( ) । छन्दरागश्चोपादानमुक्तं सूत्रान्तरेषु, अतो विज्ञायते कामा ह्युपादानमपि कामादिषु यश्छन्दराग[1] इति ॥ ३८ ॥

उक्तमिदमनुशया एवास्त्रवौघयोगोपादानसशब्दिताः सूत्रेष्विति ।

अथ कोऽयमनुशयार्थः ? कश्च यावदुपादानार्थः ?

अणवोऽनुगताश्चैते द्विधा चाप्यनुशेरते ।

अनुबध्नन्ति यस्माच्च तस्मादनुशयाः स्मृताः ॥ ३९ ॥

तत्राणवः सूक्ष्मप्रचारत्वात् दुर्विज्ञानतया । अनुगताः प्राप्त्यनुषङ्गतः । अनुशेरते द्वाभ्यां प्रकाराभ्याम्—आलम्बनतः, संप्रयोगतश्च । अनुबध्नन्ति; अप्रयोगेण प्रतिनिवारयतोऽपि[2] पुनः पुनः सम्मुखीभावात् । एभिः करणैरनुशया उच्यन्ते ॥

"*अविद्या तु ग्राहिका नेति मिश्रिता*" इति । न केवलम् अविद्या भवमुपाददाति । कस्मात् ? इत्याह—*असम्प्रख्यानलक्षणतया अपटुत्वादिति* । मिश्रिता त्वन्यक्लेशसम्पर्कवशादुपाददतीत्यभिप्रायः । *अथ किलेति* । किल-शब्दः परमतद्योतकः । तेन स्वमतमुच्यते । *सूत्रे तु भगवतोक्तमिति* विस्तरेण । *एवं यावद् दृष्टियोग* इति । कथम् ? 'दृष्टियोग कतमः ? विस्तरेण यावद् योऽस्य दृष्टिषु दृष्टिरागो दृष्टिच्छन्दो दृष्टिस्नेहः' इति पूर्ववत् । *छन्दरागश्चोपादानमुक्तं सूत्रान्तरेषु* । कथम् ? "उपादानं कतमत् ? योऽत्र छन्दरागः" इति । एतदाचार्यमतम् । तदुक्तं भवति—राग एवात्र योगः, उपादानं वा, नान्ये क्लेशा इति । तेनोच्यते—कामादिषु यश्छन्दराग इति ॥ ३८ ॥

"*अणवः*" इति विस्तरेण । अणवः शेरते इत्यनुशयाः । नैरुक्तेन विधिनाऽस्य सिद्धिः । *सूक्ष्मप्रचारत्वादिति* । सूक्ष्मप्रवृत्तित्वादित्यर्थः । कथं पुनः सूक्ष्मा प्रवृत्तिः ? अरूपिणां दुर्विज्ञानतया । *आलम्बनतश्छद्रान्वेशिशत्रुवत्*, दृष्टिविषवच्च । *सम्प्रयोगतोऽयोगुडोदकसन्तापवत्*, स्पर्शवच्च । उभयतो धात्र्यः

१. छन्दराग—का० । २. प्रतिवारयतोऽपि—का० ।

आसयन्त्यास्रवन्त्येते हरन्ति श्लेषयन्त्यथ ।
उपगृह्णन्ति चेत्येषामास्रवादिनिरुक्तयः ।। ४० ।।

आसयन्ति संसारे आस्रवन्ति भवाग्राद् यावदवीचिं षड्भिरायतनव्रणैरित्यास्रवाः । हरन्तीत्योघाः । श्लेषयन्तीति योगाः । उपगृह्णन्तीति उपादानानि ।

एवं तु साधीयः स्याद्––आस्रवत्येभिः संततिर्विषयेष्वित्यास्रवाः । "तद्यथा आयुष्मन्तो नौर्महद्भिरभिसंस्कारैः प्रतिस्रोतो नीयते । सा तेषामेव संस्काराणां प्रतिप्रस्रब्ध्याऽल्पकृच्छ्रेणानुस्रोत उह्यते" इति सूत्रवादानुसारात् । अधिमात्रवेगत्वादोघाः । तर्हि तद्वानुह्यते तदनुविधानात् । नाधिमात्रसमुदाचारि-

---

कुमारकमनुशेरते, एवमेतेऽध्यालम्बनात् सम्प्रयुक्तेभ्यो वा स्वां सन्तति वर्धयन्तः प्राप्तिभिरुपचिन्वन्ति । *अनुबध्नन्तीति* । अनुक्रान्तेश्चातुर्थकज्वरवत् मूषिकाविषवदित्यन्ये । *अप्रयोगेण* अनाभोगेन । *प्रतिनिवारयतोऽपि* निषेधयतोऽपि पुद्गलस्य *पुनः पुनः सम्मुखीभावादनुबध्नन्तीत्यतोऽनुशया* इति ।। ३९ ।।

आसयन्ति संसार इति आस्रवा इति । नैरुक्तो विधिः । आसनार्थो वा । *आस्रवन्ति भवाग्राद् यावदवीचिमिति* । षड्भिरायतनव्रणैश्चक्षुरादिभिरायतनैर्व्रणभूतैरास्रवन्ति क्षरन्ति । भवाग्राद् यावदवीचि गच्छन्ति । भवाग्रावीतरागस्यापि आवीचिकक्लेशसमुदाचाराद्, तदुत्पन्नस्य वा तत्रोत्पत्तिसम्भवात् । के आस्रवन्ति ? अनुशयाः । आस्रवन्तीत्यास्रवा इत्यच्-प्रत्ययः । हरन्तीत्योघाः । श्लेषयन्तीति योगाः । उपगृह्णन्तीति उपादानानीत्यर्थप्रदर्शनम् ।

एतदुक्तं *वैभाषिकैः*—वहने एतद् रूपम्—ओघ इति । *वहन्ति* = हरन्ति गत्यन्तरं विषयान्तरं वेत्योघाः । *योजयन्ति* = श्लेषयन्ति गत्यन्तरे विषयान्तरे वेति योगाः । *उपाददति* = उपगृह्णन्ति *पुनर्भवे कामादिषु वा* विज्ञानसन्ततिमि*त्युपादानानीति ।*

एवं तु साधीयः स्यादिति । एवं तु साधुतरं स्यादित्याचार्यः । कथम् ? इत्याह—*आस्रवन्ति* गच्छन्ति *एभिरनुशयैर्विज्ञानसन्ततिर्विषयेष्वित्यास्रवाः* । करणसाधनम् । *महद्भिरभिसंस्कारेण* कुशलैर्धर्मैश्छिन्तसन्तानः *प्रतिस्रोतो नीयत* विषयेभ्यो निवार्यते । *तेषामेव संस्काराणां प्रतिप्रश्रब्ध्येति* । तेषामेव प्रयत्नानां व्युपरमेणेत्यर्थः । *अधिमात्रवेगत्वादोघा इति* । ओघसाधर्म्यं दर्शयति, ओघ इवौघा इति कृत्वा । *तदनुविधानादिति* । रागाद्यनुविधानात् । *नाधिमात्रसमुदाचारिणो हि योगा इति* । ओघयोगानां नानाकरणं दर्शयति । ये हि नाधिमात्र-

णोऽपि[1] योगाः; विविधदुःखयोजनात्[2] । अभीक्ष्णानुषक्ततो[3] वा कामाद्युपादानादुपादानानीति ॥ ४० ॥

संयोजनादिभेदेन पुनस्ते पञ्चधोदिताः ।

त एवानुशयाः पुनः संयोजनबन्धनानुशयोपक्लेशपर्यवस्थानभेदेन पञ्चधा भित्त्वोक्ताः । तत्र नव संयोजनानि—अनुनयप्रतिघमानाविद्यादृष्टिपरामर्शविचिकित्सेर्ष्यामात्सर्यसंयोजनानि । तत्रानुनयसंयोजनं त्रैधातुको रागः । एवमन्यानि यथासम्भवं योज्यानि । दृष्टिसंयोजनं तिस्रो दृष्टयः । परामर्शसंयोजनं द्वे दृष्टी ।

अत एवोच्यते—स्याद् दृष्टिसम्प्रयुक्तेषु धर्मेष्वनुनयसंयोजनेन संयुक्तो

समुदाचारिणस्ते योगाः, ये त्वधिमात्रसमुदाचारिण एव ते ओघा इति । कथं च ते योगाः ? इत्याह—*विविधदुःखयोजनात्* । जात्यादिभिर्विविधैर्दुःखैर्योजनादित्यर्थः । *अभीक्ष्णानुषक्ततो वा* । यस्माद् वा सन्ततायभीक्ष्णं युज्यते, तस्माद् योगा इति । *कामाद्युपादानादिति* । यैः कामादय उपादीयन्ते, तानि कामाद्युपादानानिच्छन्दरागात्मकानि ॥ ४० ॥

ते एवानुशयाः पुनर्यावत् पर्यवस्थानभेदेन पञ्चधाभित्त्वोक्ताः इति । त एवानुशया आस्रवादिभेदेन चतुर्धोक्ताः संयोजन-बन्धनानुशयोपक्लेश-पर्यवस्थानभेदेन पुनः पञ्चधा भित्त्वोक्ता *सूत्रे ऽभिधर्मे* च । ननु चानुशयव्यतिरिक्तान्याह्रीक्यादीनि पर्यवस्थानानि निर्दिश्यन्ते, कथमिदमुच्यते—अनुशया एव पर्यवस्थानानि ? सत्यं भवन्ति तद्व्यतिरिक्तानि, अव्यतिरिक्तान्यपि त्विष्यन्ते । तथा हि वक्ष्यति—"क्लेशोऽपि हि पर्यवस्थानम् ; 'कामरागपर्यवस्थानप्रत्ययं दुःखं प्रतिसंवेदयते' इति सूत्रे वचनात्" (अभि० को० ५.४७) इति ।

एवमन्यान्यपि यथासम्भवं योज्यानीति । प्रतिघेर्ष्यामात्सर्यसंयोजनानि कामावचराणि । मानाविद्यादृष्टिपरामर्शविचिकित्सासंयोजनानि त्रिधातुकानि । *दृष्टिसंयोजनं तिस्रो दृष्टयः* इति । सत्कायान्तग्राहमिथ्यादृष्टयः । *परामर्शसंयोजनं द्वे दृष्टीति* । दृष्टि-शीलव्रतपरामर्शौ । *अत एवोच्यत* इति । यत एव तिस्रो दृष्टयः— दृष्टिसंयोजनम् , द्वे दृष्टी—परामर्शसंयोजनम् अत एवोच्यते ।

---

१. नातिमात्र०—का० । २. °दुःखसंयोजनात्—का० ।
३. आभीक्ष्ण्या०—का० ।

न दृष्टिसंयोजनेन; न च तत्र दृष्ट्यनुशयो नानुशयिता। आह—स्यात् समुदयज्ञाने उत्पन्ने निरोधज्ञानेऽनुत्पन्ने निरोधमार्गदर्शनप्रहातव्येषु दृष्टिशीलव्रतपरामर्शसम्प्रयुक्तेषु यावद्[1] धर्मेषु। तेषु ह्यनुनयसंयोजनेन[2] संयुक्तस्तदालम्बनेन दृष्टिसंयोजनेनासंयुक्तः; सर्वत्रगस्य प्रहीणत्वादसर्वत्रगस्य च तदालम्बनसंप्रयोगिणो दृष्टिसंयोजनस्याभावात्। दृष्ट्यनुशयश्च तेष्वनुशेते। ते एव परामर्शदृष्टी सम्प्रयोगतः।

स्याद् दृष्टिसम्प्रयुक्तेष्विति विस्तरेण प्रश्नः। *दृष्टिसम्प्रयुक्तेष्विति* परामर्शदृष्टिसम्प्रयुक्तेषु वेदनादिषु। *अनुनयसंयोजनेन संयुक्तो* रागेण। *न दृष्टिसंयोजनेन* सत्कायदृष्ट्यादिलक्षणेन। *नच तत्र दृष्ट्यनुशयो नानुशयितेति*। न च तत्र दृष्टिसम्प्रयुक्तेषु धर्मेषु दृष्ट्यनुशयो नानुशयिता, किं तर्हि ? अनुशयिता। द्विःप्रतिषेधः प्रकारान्तरं गमयति। *आह स्यादिति* विस्तरेण प्रश्नविसर्जनम्। *समुदयज्ञाने उत्पन्न* इति विशेषणं सर्वत्रगदृष्टिसंयोजनप्रहाणसन्दर्शनार्थम्। *निरोधज्ञानेऽनुत्पन्न इति* परामर्शदृष्टिद्वयाप्रहाणेन तत्सम्प्रयोगसत्ताप्रदर्शनार्थम्। *निरोध-मार्गदर्शनप्रहातव्येषु यावद् धर्मेष्विति*। वेदनादिषु। *तेषु ह्यनुनयसंयोजनेन* निरोधदर्शनहेयेन, मार्गदर्शनहेयेन वा *संयुक्तः*। कीदृशेन ? *तदालम्बनेन*। यस्मादसावेतान् निरोधदर्शनमार्गप्रहातव्यान् दृष्टिपरामर्श-शीलव्रतपरामर्शसम्प्रयुक्तान् वेदनादिधर्मान् आलम्ब्य राग उत्पद्यते, तस्मादालम्बनतस्तेन संयुक्तः। *दृष्टिसंयोजनेनासंयुक्तः*। कस्माद् ? इत्याह · *सर्वत्रगस्य* दुःख-समुदयदर्शनहेयस्वभावस्य समुदयज्ञानोत्पत्ते· *प्रहीणत्वात्*। *असर्वत्रगस्य च तदालम्बनसम्प्रयोगिणो दृष्टिसंयोजनस्याभावादिति*। यद्यपि ह्यसर्वत्रगं मिथ्यादृष्टिस्वभावं निरोधमार्गदर्शनप्रहातव्यं दृष्टिसंयोजनमस्ति, न तु तत् परामर्शदृष्टिसम्प्रयुक्तवेदनादिधर्मालम्बनम्; अनास्रवालम्बनत्वात्। तस्मान्नालम्बतो दृष्टिसंयोजनेन संयुक्तः। न चापि तत् तैर्वेदनादिभिः सम्प्रयोगि, तत्पृथक्कलापत्वात्। तस्मात् सम्प्रयोगतोऽपि न तेन संयुक्तः। दृष्ट्यनुशयश्च तेष्वनुशेते। कीदृशः सः ? इत्याह—*ते एव परामर्शदृष्टी सम्प्रयोगत* इति। दृष्टिपरामर्शः, शीलव्रतपरामर्शो वा तेषु वेदनादिषु धर्मेषु सम्प्रयोगतोऽनुशेते; स्वकलापसम्भूतत्वात्। न च तत्र दृष्टिसंयोजनमनुशेते; तयोर्दृष्टिसंयोजनमित्यसंज्ञितत्वान्न दृष्ट्यनुशयग्रहणे पञ्चदृष्टिग्रहणं भवति। दृष्टिसंयोजनग्रहणे तु सत्कायान्तग्राहमिथ्यादृष्टीनामेव ग्रहणम्, न परामर्शदृष्ट्योः—इत्यवगन्तव्यम्।

१. का० पुस्तके नास्ति।　　२. तेष्वनुनय०—का०।

किं पुनः कारणं संयोजनेषु तिस्रो दृष्टयो दृष्टिसंयोजनं पृथगुक्तम्, द्वे पुनर्दृष्टी परामर्शसंयोजनं पृथक् ?

द्रव्यामर्शनसामान्याद् दृष्टिः संयोजनान्तरम् ॥ ४१ ॥

अष्टादश द्रव्याणि तिस्रो दृष्टयः। अष्टादशैव द्वे परामर्शदृष्टी। अतः किल द्रव्यसामान्यादेते संयोजनान्तरं कृते। एते च द्वे परामर्शस्वभावे[1], न[1] शेषा इति परामर्शनसामान्यादप्येते पृथग्विहिते; ग्राह्यग्राहकभेदात् ॥ ४१ ॥

अथ कस्मादीर्ष्यामात्सर्ये संयोजने पृथक् संयोजनद्वयमुक्तं नान्यत् पर्यवस्थानम् ?

एकान्ताकुशलं यस्मात् स्वतन्त्रं चोभयं यतः।
ईर्ष्यामात्सर्यमेषूक्तं पृथक् संयोजनद्वयम् ॥ ४२ ॥

"*दृष्टिः संयोजनान्तरम्*" इति। परामर्शदृष्टिः। अष्टादश द्रव्याणि तिस्रो दृष्टयो भवन्तीति वाक्यशेषः। अष्टादशसंख्येयद्रव्याः सत्कायान्तग्राहमिथ्यादृष्टय इति वाक्यार्थः। *अष्टादशैव*। द्रव्याणीति प्रकृतम्। *द्वे परामर्शदृष्टी* भवन्ति। कथम्? कामधातौ सत्कायान्तग्राहान्तग्राहदृष्टी द्वे, ते च दुःखदर्शनप्रहातव्ये एवेष्टे। मिथ्यादृष्टिस्तु चतुःप्रकारा—दुःखदर्शनप्रहातव्या, यावत् मार्गदर्शनप्रहातव्या। इत्येवं कामधातौ षड् भवन्ति। यथा कामधातौ षट्, एवं रूपधातौ, आरूप्यधातौ चेति अष्टादश भवन्ति।

अष्टादशैव द्वे परामर्शदृष्टी। कथम्? कामधातौ दृष्टिपरामर्शो दुःखदर्शनप्रहातव्यो यावत् मार्गदर्शनप्रहातव्यः—इति चतुःप्रकारः; शीलव्रतपरामर्शोऽपि दुःखदर्शनप्रहातव्यः, मार्गदर्शनप्रहातव्यश्चेति द्विप्रकारः—इत्येवं षड् भवन्ति। यथा कामधातौ, एवं रूपधातावारूप्यधातौ च इत्येवमष्टादश द्रव्याणि भवन्ति।

न शेषा इति द्रष्टव्यः। *ग्राह्यग्राहकभेदादिति*। दृष्टिसंयोजनं ग्राह्यम्, परामर्शसंयोजनं ग्राहकमिति ॥ ४१ ॥

"*यतः*" इति। यतः कारणात्। एकान्तकुशलत्वस्वातन्त्र्यलक्षणात्।

"*एषूक्तम्*" इति। एषु आह्रीक्यादिषु पर्यवस्थानेषु निष्कृष्योभयम् ईर्ष्या-

---

१-१. ०स्वभावेन—का०।

नह्यन्यत् पर्यवस्थानमेवञ्जातीयकमस्ति यत्रैतदुभयं स्याद्—एकान्ताकुशलत्वं स्वतन्त्रत्वं चेति ।

यस्याष्टौ पर्यवस्थानानि तस्यैवं स्यात् । यस्य पुनर्दश तस्य क्रोधम्रक्षावप्युभयप्रकारौ । तस्मान्न भवत्ययं परिहार इत्यपरे ॥ ४२ ॥

पुनरन्यत्र भगवता संयोजनमुक्तम्—

पञ्चधाऽवरभागीयम्,

तद्यथा सत्कायदृष्टिः, शीलव्रतपरामर्शः, विचिकित्सा, कामच्छन्दः, व्यापाद

मात्सर्यम् उक्तम् । *न ह्यन्यत् पर्यवस्थानमेवञ्जातीयक*मिति । अनाह्रीक्यानपत्राप्यमप्येकान्तकुशलम्, न तु स्वतन्त्रम्; रागादिक्लेशसम्प्रयोगात् । कौकृत्यमपि स्वतन्त्रम्; अविद्यामात्रसम्प्रयोगात् । न त्वेकान्तकुशलम्, तदधिकुशलमपि । स्त्यानौद्धत्यमिद्धान्यपि अस्वतन्त्राणि, रागादिसम्प्रयोगात् । न त्वेकान्तकुशलानि । कुशलाव्याकृतान्यपि हि तानि भवन्ति । *यत्रैतदुभयमि*ति । यत्रैकान्ताकुशलत्वं च स्वातन्त्र्यं चेति एतदुभयं स्यात् । तदेवञ्जातीयकमन्यत् प्रत्यवस्थानं नास्तीत्यभिसम्बन्धः ।

*यस्य पुनर्दशे*ति । यस्य वैभाषिकस्य दश पर्यवस्थानानि, तस्य क्रोधम्रक्षावपि उभयप्रकाराविति । एकान्तकुशलौ स्वतन्त्रौ चेति । *तस्मान्न भवत्ययं परिहार* इति । कस्तर्हि परिहारस्तस्येति ? अत्राचार्यसङ्घभद्र आह—अभीक्ष्णसमुदाचारित्वाद् ईर्ष्यामात्सर्ययोः पृथक्संयोजनमिति । अत एव च षट्त्रिंशत्संयोजनत्वेऽपि कामधातूपपन्नानामीर्ष्या-मात्सर्य-संयोजनाः कुशला देवमनुष्या इत्युक्तम् । आधिक्येन हि सुगतावेतत् क्लेशद्वयं बन्धनमिति ।

अथवा—

अल्पेशाख्याल्पभोगकारणत्वात् सर्वसूचनात् ।
द्विपक्षसंक्लेशत्वाच्च मात्सर्येर्ष्ये पृथक् कृते ॥

यदयं सुगतावप्युपपन्नः प्रगाढं परिभवमुद्वहति, तन्नेर्ष्यामात्सर्ये कारणम् । तथा हि—

"अल्पेशाख्योऽल्पभोगश्च बन्धनावप्युभयान्मतः" इति । द्विविधाश्चोपक्लेशाः सन्तापसहगताः । ते आभ्यां सर्वे सुचिता भवन्ति । गृहिपक्षश्चाभ्यां भोगाधिष्ठानाभ्यामतीव क्लिश्यते । प्रव्रजितपक्षोऽपि धर्माधिष्ठानाभ्याम् । देवासुरपक्षौ वा भिन्नोदरहेतोरत्यन्तं क्लिश्यतः । अत एवोक्तं भगवता—

इति । कस्मादेतान्यवरभागीयान्युच्यन्ते ? अवरभागहितत्वात् । अवरो हि भागः कामधातुः, एतानि च तस्यानुगुणानि । यस्मात्—

द्वाभ्यां कामानतिक्रमः ।

त्रिभिस्तु पुनरावृत्तिः,

कामच्छन्दव्यापादाभ्यां कामधातुं नातिक्रामति । सत्कायदृष्ट्यादिभिरतिक्रान्तोऽपि पुनरावर्त्यते; दौवारिकानुचरसाधर्म्यात् । त्रिभिः सत्त्वावरतां नातिक्रामति पृथग्जनत्वम्, द्वाभ्यां धात्ववरतां कामधातुम् । तस्माद् एव तान्यवरभागीयानीत्यपरे ।

यदा स्रोतआपन्नस्य पर्यादाय त्रिसंयोजनप्रहाणात् षट्क्लेशाः प्रहीणाः, किमर्थं तिस्रो दृष्टीरपहाय त्रयमेवाह—सत्कायदृष्टिं शीलव्रतपरामर्शं विचिकित्सां च ? सर्वमेतद्वक्तव्यं स्यात्, किन्तूक्तम्—

"ईर्ष्या-मात्सर्यसंयोजनाः कौशिका देवमनुष्याः" इति । तस्माद् दशभ्यः पर्यवस्थानेभ्य एतदेव संयोजनमिति ॥ ४२ ॥

अवरो हि भागः कामधातुरिति । त्रैधातुकमसमुदयापेक्षस्य कामधातुरवरो निहीनो धातुः, एकान्तसमाहितत्वात् । अकुशलधर्मापायगतिदुःखदौर्मनस्यसद्भावात् । घनक्लेशत्वाच्च ।

"*द्वाभ्यां कामानतिक्रमः*" इति । तद्प्रहाणे कामधात्वनतिक्रमात् । *दौवारिकानुचरसाधर्म्यादिति* । दौवारिकसधर्माणौ[१] कामच्छन्दव्यापादौ । तौ हि कामधातुबन्धनागारान् निष्क्रमणं न दत्तः, दौवारिकवत् । अनुचरसधर्माणः सत्कायदृष्ट्यादयः । यथा हि दौवारिकप्रमादे बन्धनागारात् पुरुषो निष्क्रान्तोऽपि दौवारिकानुचरैर्निवर्त्यते । तथेहापि अमीभिरिति । त्रिभि. । *सत्त्वावरतामिति* । पृथग्जनत्वलक्षणं सत्त्वावरतां सत्कायदृष्टि-शीलव्रतपरामर्शविचिकित्सासंयोजनै*र्नातिक्रामति* । *द्वाभ्याम्* कामच्छन्दव्यापादाभ्याम् । *धात्ववरताम्* कामधातुस्वभावां *नातिक्रामति* नातिवर्तते । आर्येभ्यो ह्यवराः पृथग्जनाः, धातुषु च कामधातुरवरः । *तस्मादेव तान्यवरभागीयानि* । *अपरे* योगाचाराः ।

पर्यादाय त्रिसंयोजनप्रहाणादिति । निरवशेषतः सत्कायदृष्टि-शीलव्रतपरामर्श-विचिकित्सासंयोजनप्रहाणादित्यर्थः । *षट् क्लेशाः प्रहीणा* इति । पञ्च दृष्टयो विचिकित्सा च । न तु रागादय उक्ताः, सावशेषत्वात् । *तिस्रो दृष्टीरपहायेति* ।

---

१. अन—का० ।　　२. ०सधर्मणौ—जा० ।

मुखमूलग्रहात् त्रयम् ॥ ४३ ॥

त्रिप्रकाराः किल क्लेशाः—एकप्रकारा द्विप्रकाराश्चतुष्प्रकाराश्च । तेषामेभिस्त्रिभिर्मुखं गृहीतमिति ।

अपि चान्तग्राहदृष्टिः सत्कायदृष्टिप्रवर्तिता, दृष्टिपरामर्शः शीलव्रतपरामर्शप्रवर्तितः, मिथ्यादृष्टिर्विचिकित्सा प्रवर्तिता । अतो[1] मूलं गृहीतमिति ॥ ४३ ॥

अपरे पुनराहुः—

अन्तग्राह-मिथ्यादृष्टि-दृष्टिपरामर्शेदृष्टीः । त्रयमेवाहेति । सत्कायदृष्टि-शीलव्रतपरामर्श-विचिकित्सात्रयमेवाह । क आह ? *भगवान्* । तथा हि सूत्रे पठ्यते—"कियता भदन्त स्रोतापन्नो भवति ? यतश्च महानामन् आर्यश्रावकः 'इदं दुःखमार्यसत्यम्' इति यथाभूतं प्रजानाति, 'अयं दुःखसमुदय ···', 'अयं दुःखनिरोधः ··', 'इयं दुःखनिरोधगामिनी प्रतिपदा आर्यसत्यम्' इति यथाभूत प्रजानाति; त्रीणि चास्य संयोजनानि प्रहीणानि भवन्ति, प्रज्ञातानि, तद्यथा—सत्कायदृष्टिः, शीलव्रतपरामर्शः, विचिकित्सा च । स एषां त्रयाणां संयोजनानां प्रहाणात् स्रोतापन्नो भवति अविनिपातधर्मा सम्बोधिपरायणः सप्तकृद्भवपरमः सप्तकृत्वो देवाँश्च मनुष्याँश्च संसृत्य सन्धाव्य दुःखस्यान्तं करिष्यति" (   ) इति ।

सर्वमेतद् वक्तव्यं स्यात् । भवेदित्यर्थः । *त्रिःप्रकाराः किल क्लेशा* इति । दर्शनहेया इहाधिकृताः । *एकप्रकाराः* सत्कायान्तग्राहदृष्टयः, दुःखदर्शनमात्रप्रहेयत्वात् । *द्विप्रकाराः* शीलव्रतपरामर्शाः । *चतुष्प्रकाराः* विचिकित्सा-मिथ्यादृष्टि-दृष्टि-परामर्शाः । तत्र सत्कायदृष्टिर्मुखमेकप्रकाराणाम् । अतः सत्कायदृष्टिग्रहणात् अन्तग्राहदृष्टिरपि गृहीता भवति । विचिकित्सा मुखं चतुःप्रकाराणाम् । अतस्तद्ग्रहणात् मिथ्या-दृष्टि-परामर्शानां ग्रहणं भवति । शीलव्रतपरामर्शास्तु साक्षादेव गृहीताः । ये तु रागादयो दर्शनहेयाः, तेऽपि तदालम्बनत्वाद् गृहीता एवेति शक्यते वक्तुमिति । *अन्तग्राहदृष्टिः सत्कायदृष्टिप्रवर्तितेति* । आत्मनः शाश्वतोच्छेदानुग्रहणात् । *दृष्टिपरामर्शः शीलव्रतपरामर्शप्रवर्तित* इति । येन शुद्धिं प्रत्येति, तस्याग्रतो ग्रहणात् । *मिथ्यादृष्टिर्विचिकित्साप्रवर्तितेति* । संशयितस्य मिथ्याश्रवणचिन्तनान्मिथ्यानिश्चयोत्पत्तेः । अतो मूलग्रहणात् *मूलसम्भूतग्रहणसिद्धि*रित्यन्तग्राहदृष्ट्यादयोऽप्युक्तरूपा वेदितव्याः ॥ ४३ ॥

अपरे पुनराहुरिति । अयमेवाचार्यः ।

---

१. का० पुस्तके नास्ति ।

अगन्तुकामता मार्गविभ्रमो मार्गसंशयः ।
इत्यन्तराया मोक्षस्य गमनेऽतस्त्रिदेशना ।। ४४ ।।

त्रयोऽन्तराया देशान्तरगमने भवन्ति—अगन्तुकामता, मार्गविभ्रमोऽन्यमार्गसंश्रयणात्, मार्गसंशयश्च । एवं मोक्षगमनेऽप्येत एव त्रयोऽन्तरायाः । तत्र सत्कायदृष्ट्या मोक्षादुत्त्रासमापन्नस्यागन्तुकामता भवति । शीलव्रतपरामर्शेनान्यमार्गसंश्रयणान्मोक्षविभ्रमः । विचिकित्सया मार्गसंशयः । एषां मोक्षगमनान्तरायाणां प्रहाणं द्योतयन् भगवान् क्लेशत्रयस्यैव प्रहाणं देशितवान् ।। ४४ ।।

यथा भगवता पञ्चविधमवरभागीयं संयोजनमुक्तम् । एवं पुनः—

पञ्चधैवोर्ध्वभागीयम्,

कथम् ? इत्याह—

द्वौ रागौ रूप्यरूपिजौ ।

तौ

औद्धत्यमानमोहाश्च,

इत्येतानि पञ्चोर्ध्वभागीयानि संयोजनानि । तद्यथा—रूपरागः, आरूप्यरागः, औद्धत्यम्, मानः, अविद्या च । एषामप्रहाणेनोर्ध्वधात्वनतिक्रमात् ।

समाप्तः संयोजनप्रसङ्गः ॥

बन्धनानि कतमानि ? त्रीणि बन्धनानि । रागो बन्धनं सर्वः, द्वेषो बन्धनं सर्वः, मोहो बन्धनं सर्वः ।

कस्मादेतदेव त्रयं बन्धनमुक्तं भगवता ?

विद्वशाद् बन्धनत्रयम् ।। ४५ ।।

मार्गविभ्रमः कथम् ? इत्याह—*अन्यमार्गसंश्रयणादिति* ।। ४४ ।।

अवरभागीयसंयोजनवचनादन्यभागीयमप्यस्तीत्यर्थादुक्तं भवति । अतः इदमुच्यते—*पञ्चधैवोर्ध्वभागीयमि*ति । संयोजनप्रसङ्गः ।

"संयोजनादिभेदेन पुनस्ते पञ्चधोदिता." (अभि० को० ५.४०) इत्यनेन सम्भेदेन संयोजननिर्देशानन्तरं बन्धननिर्देशावसरोऽपरपर्यायः । *रागो बन्धनं सर्वमि*ति । सर्व इति प्रकारतो धातुतश्च । *सर्वद्वेषः* । किं सर्वः ? प्रकारत एव ।

त्रिवेदनावशात् त्रीणि बन्धनानि। सुखायां हि वेदनायां रागोऽनुशेते आलम्बनसम्प्रयोगाभ्याम्। दुःखायां द्वेषः। अदुःखासुखायां मोहो न तथा रागद्वेषौ। स्वसान्तानिकालम्बनतो वा नियमः॥ ४५॥

अनुशया पूर्वमेवोक्ताः॥

उपक्लेशाः वक्तव्याः। तत्र ये यावत् क्लेशा उपक्लेशा अपि ते; चित्तोपक्लेशनात्।

येऽप्यन्ये चैतसाः क्लिष्टाः संस्कारस्कन्धसंज्ञिताः।
क्लेशेभ्यस्तेऽप्युपक्लेशास्ते तु न क्लेशसंज्ञिताः॥ ४६॥

येऽप्यन्ये क्लेशेभ्यः क्लिष्टा धर्माः संस्कारस्कन्धसंगृहीताश्चैतसिकास्त

मोहः सर्वः। प्रकारतो धातुतश्च। *आलम्बन-सम्प्रयोगाभ्या*मिति। स्व-परसान्तानिकयोः *सुखायां वेदनायां* यथायोगं *रागोऽनुशेते। दुःखायां वेदनायां द्वेषः*, आलम्बनसम्प्रयोगाभ्यामित्येव। *अदुःखासुखायां मोहः*, ताभ्यामित्येव।

ननु च रागद्वेषावप्यदुःखासुखायां यथायोगं तथैवानुशयाते, कस्मान्मोह इत्येवोच्यते? इत्याह—*न तथा रागद्वेषा*विति। रागद्वेषावप्यनुशयाते, न तु तथा यथा मोहः। मोहो हि अपटुत्वादपट्वयामदुःखासुखायां वेदनायामनुकूलत्वात् सुतरामनुशेत इति *स्वसान्तानिकालम्बनतो वा नियम* इति। स्वसान्तानिकसुखाद्यनुभूतिसामर्थ्यात् तथा नियमः। स्वसन्तानवेदनायां हि सुखायां रागः, दुःखायां द्वेषः, अदुःखासुखायां मोहः सम्प्रयोगत इति।

अपरे तु व्याचक्षते—*न तथा रागद्वेषा*विति। सुखायां यथा रागोऽनुशेते, न तथा द्वेषः। किं पुनः सुखायामपि द्वेषोऽनुशेते? अनुशेते शत्रुसुखे आलम्बनतः। यथा च दुखायां द्वेषोऽनुशेते, न तथा रागः। किं पुनःर्दुखायामपि रागोऽनुशेते? अनुशेते शत्रुदुःखे आलम्बनतः।

स्वसान्तानिकालम्बनतो वा नियम इति। अथवा—स्वसान्तानिके सुखे आलम्बनतः सम्प्रयोगतो वा रागोऽनुशेते, न परसान्तानिके शत्रुसुखे। एवं दुःखे स्वसान्तानिके द्वेषोऽनुशेते आलम्बनतः सम्प्रयोगतो वा, न पारसान्तानिके शत्रुदुःखे—इत्येवं स्वसान्तानिकालम्बनतो नियमः। सुखायां वेदनायां रागोऽनुशेते, आलम्बनसम्प्रयोगाभ्याम्, दुःखायां द्वेष इति॥ ४५॥

*चित्तोपक्लेशनादि*ति। चित्तक्लिष्टकरणात्। *येऽप्यन्ये चैतसा* इति। क्लेशेभ्योऽन्य इत्यर्थः। *त उपक्लेशा एवे*ति। क्लेशसमीपरूपाः। क्लेशो वा समीपवर्त्येषामिति। क्लेशप्रवृत्त्यनुवृत्तेरपरिपूर्णक्लेशलक्षणत्वाच्चोपक्लेशः। उप-

उपक्लेशा एव[1]। ते पुनर्ये क्षुद्रवस्तुके पठिताः। इह तु पर्यवस्थानक्लेशमल-संगृहीतानेव निर्देक्ष्यामः ॥ ४६ ॥

कानि पुनः पर्यवस्थानानि ? इत्याह—क्लेशा अपीहि पर्यवस्थानम्; काम-रागपर्यवस्थानप्रत्ययदुःखमिति सूत्रे वचनात्। प्रकरणशास्त्रे तु—

आह्रीक्यमनपत्राप्यमीर्ष्यामात्सर्यमुद्धवः।
कौकृत्यं स्त्यानमिद्धं च पर्यवस्थानमष्टधा ॥ ४७ ॥

वैभाषिकन्यायेन पुनर्दश पर्यवस्थानानि—एतानि चाष्टौ,

क्रोधम्रक्षौ च,

तत्राह्रीक्यानपत्राप्ये व्याख्याते। परसम्पत्तौ चेतसो व्यारोष ईर्ष्या। धर्मा-मिषकौशलप्रदानविरोधी चित्ताग्रहो मात्सर्यम्। औद्धत्यं चेतसोऽव्युपशमः। कौकृत्यं स्त्यानं च व्याख्याते। कायसन्धारणासमर्थश्चित्ताभिसंक्षेपो मिद्धम्। तत्तु क्लिष्टमेव पर्यवस्थानम्, कौकृत्यं च। व्यापादविहिंसावर्जितः सत्त्वासत्त्व-योराघातः क्रोधः। अवद्यप्रच्छादनं म्रक्षः।

क्लेशाश्चैतसा एव, न न चित्तविप्रयुक्ताः। ये क्षुद्रवस्तुके *पठिता* इति। क्षुद्रवस्तुके प्रवचनभागे ये पठिताः। न तु चेतनादय एवेत्यभिप्रायः। तद्यथा—अरतिः, विजृम्भिका, चेतसो लीनत्वम् तन्द्री[2] भक्षेऽसमता, नानात्वसंज्ञा, अमनसिकारः, कायदौष्ठुल्यम्, शृङ्गी, भित्तिरीका, अनार्जवम्, अमार्दवता, अस्वभावानुवृत्तिता, कामवितर्कः, व्यापादवितर्कः, विहिंसावितर्कः, ज्ञातिवितर्कः, जनपदवितर्कः, अमरमन्यनाप्रतिसंयुक्तो वितर्कः, कुलोदयताप्रतिसंयुक्तो वितर्कः, शोकः, दुःखम्, दौर्मनस्यम्, उपायास इति ॥ ४६-४७ ॥

तत्राह्रीक्यानपत्राप्ये व्याख्याते इति। "अह्रीरगुरुतावद्ये भयादर्शित्वमत्रपा" (अभि० को० २.३३) इति। *धर्मामिषेति* विस्तरः। *धर्मस्यामिषस्य च प्रदाने विरोधी चित्तस्याग्रहो मात्सर्यम्*। 'मा मत्तः सरतु' इत्याकारो मत्सरः। मत्सर एव मात्सर्यम्। मत्सरिणो वा भावो मात्सर्यम्। *कौकृत्यं स्त्यानं च व्याख्याते* इति। कुकृतभावः कौकृत्यम्। इह तु तदालम्बनधर्मः कौकृत्यम्। कायचित्ता-कर्मण्यता स्त्यानमिति। चित्ताभिसंक्षेपो मिद्धमित्येतावत्युच्यमाने समापत्तावपि प्रसङ्गः इत्यतो विशेष्यते—*कायसन्धारणासमर्थ* इति। तत्तु *क्लिष्टमेव पर्य-*

---

१. का० पुस्तके नास्ति।

२. तन्द्रीति जड़ता—इत्ययं जा० पुस्तके कोष्ठके पाठः।

एषां च दशानां पर्यवस्थानां

रागोत्था आह्रीक्यौद्धत्यमत्सराः ।

एते त्रय उपक्लेशा रागनिःष्यन्दाः ।

त्रक्षे विवादः,

तृष्णानिःष्यन्द इत्येके । अविद्यानिःष्यन्द इत्यपरे । उभयोरित्यन्ये । यथाक्रमं ज्ञाताज्ञातानामिति ।

अविद्यातः स्त्यानमिद्धनपत्रपाः ॥ ४८ ॥

एते त्रयोऽविद्यानिःष्यन्दाः ॥ ४८ ॥

कौकृत्यं विचिकित्साजं[1] क्रोधेर्ष्ये प्रतिघान्वये ।

प्रतिघसमुत्थे इति । एते च दश क्लेशनिःष्यन्दा उपक्लेशाः ।

अन्ये च षट्क्लेशमलाः

तद्यथा--

माया शाठ्यं मदस्तथा ॥ ४९ ॥

प्रदाश उपनाहश्च विहिंसा चेति,

तत्र परवञ्चना माया । चित्तकौटिल्यं शाठ्यम्, येन यथाभूतं नाविष्करोति विक्षिपत्यपरिस्फुटं वा प्रतिपद्यते । मदः पूर्वोक्तः । सावद्यवस्तुदृढग्राहिता प्रदाशः,

वस्थानम् । *कौकृत्यं चेति* । यत् क्लिष्टं मिद्धम्, तत् पर्यवस्थानम् । यत्तु कुशलमव्याकृतं वा, न तत् पर्यवस्थानम् । त्रिविधं हि मिद्धमिष्यते, कौकृत्यं च । यत् क्लिष्टं तत् पर्यवस्थानम्, न कुशलम् । कुशलाकुशलं हि तदिष्यते । *व्यापादविहिंसावर्जितः* सत्त्वासत्त्वयोराघातः *क्रोधः ।* सत्त्वविषये आघातविशेषो व्यापादः । 'अमी भवन्तः सत्त्वाः हन्यन्तां वा, बध्यन्तां वा, शीर्यन्तां वा अनयेन व्यसनेन आपद्यन्ताम्' इत्याकारप्रवृत्तो व्यापादः । सत्त्वाकर्षणसन्त्रासन तर्जनादिकर्मप्रवृत्ता विहिंसा । ताभ्यामन्यः *सत्त्वासत्त्वयोराघातः क्रोधः ।* तद्यथा--शिक्षाकामस्य भिक्षोश्चित्तप्रकोपः, कण्टकादिषु च प्रकोप इति ।

यथाक्रमं ज्ञाताज्ञातानामिति । राजादिभिर्ज्ञातानां प्रक्षवतां पुद्गलानां प्रक्षस्तृष्णानिष्यन्दः 'मा मे लाभसत्कारो न भविष्यति' इति । अज्ञातानाम-

---

१. विचिकित्सातः--का० ।

येन न्यायसंज्ञप्तिं न गृह्णाति। आघातवस्तुबहुलीकार उपनाहः। विहेठनं विहिंसा, येन प्रहारपारुष्यादिभिः परान् विहेठयते।

एषां पुनः षण्णां क्लेशमलानां

रागजौ।

मायामदौ प्रतिघजे उपनाहविहिंसने ॥ ५० ॥

दृष्टयामर्शात् प्रदाशस्तु शाठ्यं दृष्टिसमुत्थितम्।

"किं कुटिलम्? पापिका दृष्टिः" इति गाथावचनाद् युज्यते। शाठ्यं दृष्टिनिःष्यन्दः ॥ ४९-५० ॥

क एषां किंप्रहातव्यः? यानि तावत् दश पर्यवस्थानान्युक्तानि,

तत्राह्रीक्यानपत्राप्स्यत्यानमिद्धोद्धवा द्विधा ॥ ५१ ॥

एते पञ्च धर्मा द्विविधा दर्शन-भावनाप्रहातव्याः; उभयप्रकारक्लेशसंप्रयोगात्। यश्च यद्दर्शनहेयसंप्रयुक्तः स तद्दर्शनप्रहातव्यः ॥ ५१ ॥

तदन्ये भावनाहेयाः,

तेभ्योऽन्ये पर्यवस्थानसंगृहीता उपक्लेशा भावनाहेया एव। ईर्ष्यामात्सर्य-

---

विद्यानिष्यन्दः कर्मस्वकतामश्रद्दधानस्तदवद्यं प्रच्छादयति। न परस्यान्तिकं विशुद्ध्यर्थं देशयतीति एवमुभयनिष्यन्दो म्रक्ष इत्येके।

कथमनपत्राप्यमविद्यानिष्यन्दः? यस्मात् 'अवद्ये भयदर्शित्वमत्रपा' (अभि० को० २.३२) इति। यत् क्लिष्टं तदेव पर्यवस्थानाधिकारात् ॥ ४८ ॥

"*क्लेशमलाः*" इति। यथा शरीरान्मला जायन्ते, एवमिमे मायादयो मला इव क्लेशेभ्य उत्पद्यन्ते। *क्षिपति* प्रेरयति। मदः पूर्वोक्तः। "मदः स्वधर्मे रक्तस्य पर्यादानं तु चेतसः" (अभि० को० २ ३४) इति ॥ ४९-५० ॥

यश्च यद्दर्शनहेयसम्प्रयुक्त इति। यस्य सत्यस्य दर्शनम् = यद्दर्शनम्, यद्दर्शनेन हेयः = यद्दर्शनहेयः, तेन सम्प्रयुक्तः = यद्दर्शनहेयसम्प्रयुक्तः। *स तद्दर्शनहेयः।* स तस्य दर्शनस्य दर्शनेन हेयः। कः? आह्रीक्यादिः। तदन्ये भावनाहेया एव ॥ ५१ ॥

तेभ्योऽन्य इति आह्रीक्यादिभ्योऽन्ये ईर्ष्यादयो भावनाहेया एव। न दर्शनहेयाः।

कौकृत्यक्रोधम्रक्षाः स्वतन्त्राश्च । स्वतन्त्राश्चैते पञ्चोपक्लेशाः; अधिमात्रसम्प्रयोगित्वात् । यथैते ईर्ष्यादयः पञ्चोपक्लेशा भावनाहेयाः,

स्वतन्त्राश्च तथा मलाः ।

षट्क्लेशमलास्तथैव । एते पुनर्यथोक्ता उपक्लेशाः

कामेऽशुभाः,

कामधातावकुशलाः । तत्रापि

त्रयो द्विधा,

स्त्यानौद्धत्यमिद्धानि अकुशलाव्याकृतानि ।

परेणाव्याकृतास्ततः ॥ ५२ ॥

कामधातोरूर्ध्वमव्याकृताः उपक्लेशा यथासम्भवम् ॥ ५२ ॥

कति पुनरेषां कुतस्त्या वेदितव्याः ?

माया शाठ्यं च कामाद्यध्यानयोः,

एतौ द्वौ कामधातौ प्रथमे च ध्याने । कथं ब्रह्मलोके माया ?

ब्रह्मवचनात् ।

स हि तत्र महाब्रह्मा वितथात्मसन्दर्शनतया आयुष्मन्तमश्वजितं वञ्चयितुं प्रवृत्तः । उक्तमपि शाठ्यं प्रसङ्गेनागतं[1] पुनरेवोक्तम् ।

स्वतन्त्राश्चैते । न रागादिपरतन्त्रा इत्यर्थः ।

*स्त्यानौद्धत्यमिद्धान्यकुशलाव्याकृतानी*ति । पर्यवस्थानाधिकारात् मिद्धं कुशलमपीति नोच्यते ।

"*परेणाव्याकृतास्ततः*" इति । *यथासम्भव*मिति । कामधातोः परेण यावन्तः सम्भवन्ति, ते पुनर्मायाशाठ्यादयः ॥ ५२ ॥

*वितथात्मसन्दर्शनतये*ति । वितथस्यात्मनः सन्दर्शनतया महाब्रह्मा आयुष्मन्तमश्वजितं वञ्चयितुं प्रवृत्तः 'कुत्रेमानि ब्रह्मन् ! महाभूतानि अपरिशेषं निरुध्यन्ते" इति पृष्टोऽप्रजानन् क्षेपमकार्षीत्—"अहमस्मि ब्रह्मा महाब्रह्मा ईश्वरः कर्ता निर्माता स्रष्टा सृजः पितृभूतो भावानाम्" इति मायया वञ्चयितुमारब्धः । अथ स महाब्रह्मा आयुष्मन्तमश्वजितं करे गृहीत्वा एकान्तेऽस्थात् ।

---

१. प्रसङ्गागतं—का० ।

स्त्यानौद्धत्यमदा धातुत्रये,

एते त्रयस्त्रैधातुकाः ।

अन्ये कामधातुजाः ।। ५३ ।।

षोडशभ्यः पञ्चापनीयान्य एकादशोपक्लेशाः कामावचरा एव ॥ ५३ ॥

उक्ताः क्लेशा उपक्लेशाश्च ॥

अथैषामनुशयानां कति मनोभूमिकाः ? कति षड्विज्ञानकायिकाः ? संक्षेपतः

समानमिद्धा दृग्घेया मनोविज्ञानभूमिकाः ।

दर्शनप्रहातव्याः सर्वे मनोभूमिकाः सह मानसिद्धाभ्यां भावनाहेयाभ्यामपि । ते हि सकले मनोभूमिके ।

उपक्लेशाः स्वतन्त्राश्च,

ये च केचिदुपक्लेशाः स्वतन्त्रास्ते भावनाहेया अपि सन्तो मनोभूमिका एव द्रष्टव्याः ।

षड्विज्ञानाश्रयाः परे ।। ५४ ।।

अन्ये क्लेशोपक्लेशाः षड्विज्ञानभूमिकाः वेदितव्याः । के पुनरन्ये ? भावनाप्रहातव्या रागप्रतिघाविद्या उपक्लेशाश्च तत्सम्प्रयुक्ताः, आह्रीक्यानपत्राप्य-स्त्यानौद्धत्यानि, ये च क्लेशमहाभूमिकेषूक्ताः ॥ ५४ ॥

यानीमानि सुखादीनि पञ्चेन्द्रियाणि, एषां कतमेनेन्द्रियेण कतमः क्लेश उपक्लेशो वा सम्प्रयुक्तः ?

सुखाभ्यां सम्प्रयुक्तो हि रागः,

एकान्ते स्थितश्चेदमुक्तवान्—'विद्यमाने तथागते मां प्रष्टव्यं मन्यसे'—इतीदमस्य शाठ्यं दृश्यते । स्वपरिषल्लज्जया ह्यात्मीयाज्ञानतां निगूहमानः स तथा कृतवानिति । *उक्तमपि शाठ्यमिति* । तथा हि—"कौकृत्यमिद्धाकुशलान्याद्ये ध्याने न सन्त्यतः" (अभि० को० २.३१) इति । *अत्रोक्तमपि प्रसङ्गेनेति* । "परेणाठ्याकृतास्ततः" इति प्रसङ्गेनेति । *पञ्चापनीयेति* । माया-शाठ्य-स्त्यानौद्धत्य-मदान् ॥ ५३ ॥

ते हि सकले मनोभूमिके इति । मानमिद्धे ।

"*उपक्लेशाः स्वतन्त्राश्च*" इति । ईर्ष्यामात्सर्यादयः । *ये च क्लेशमहाभूमि-*

सुखसौमनस्याभ्यां रागः सम्प्रयुक्तः ।

द्वेषो विपर्ययात् ।

दुःखाभ्यामित्यर्थः । दुःखेन दौर्मनस्येन च । हर्षदैन्याकारवर्तित्वात् षड्-विज्ञानभूमिकत्वाच्च रागद्वेषयोः ।

मोहः सर्वैः

अविद्यायाः सर्वक्लेशसम्प्रयोगित्वात् पञ्चभिरपीन्द्रियैः सम्प्रयोगः ।

असद्दृष्टिर्मनोदुःखसुखेन तु ।। ५५ ।।

मनोदुःखं दौर्मनस्यम्, मनःसुखं सौमनस्यं च । ताभ्यां मिथ्यादृष्टिः सम्प्रयुक्ता पुण्यकर्मणां पापकर्मणां च यथाक्रमम् ॥ ५५ ॥

दौर्मनस्येन काङ्क्षा,

संशयितो हि निश्चयेनार्थी दुर्मनायते ।

अन्ये सौमनस्येन,

अन्येऽनुशयाः सौमनस्येनैव संप्रयुक्ताः । के पुनरन्ये ? चतस्रो दृष्टयः, मानश्च । हर्षाकारवर्तित्वात् ।

किंप्रतिसंयुक्ता इमेऽनुशया निर्दिष्टाः ? आह—

कामजाः ।

एवं प्रतिनियतं सम्प्रयोगमुक्त्वा सामान्येनाह—

सर्वेऽप्युपेक्षया,

केचूक्ता इत्याश्रद्ध्य-कौशीद्य-प्रमादा एव, नान्ये, स्त्यानौद्धत्ययोरिहैव पूर्वं गृहीतत्वात् । मोहस्य क्लेशग्रहणेन ग्रहणात् ॥ ५४ ॥

"*सुखाभ्याम्*" इति । सुखवेदनास्वभावाभ्यामिन्द्रियाभ्यामित्यर्थः । *हर्षदैन्याकारवर्तित्वादि*ति । *हर्षाकारवर्ती* रागः *दैन्याकारवर्ती* द्वेष इति यथासङ्ख्येन । *षड्विज्ञानभूमिकत्वाच्चे*ति । पञ्चविज्ञानभूमिकत्वाद् रागः सुखेन्द्रियेण । मनोविज्ञानभूमिकत्वात्तु रागः सौमनस्येन्द्रियेण, द्वेषश्च दौर्मनस्येन्द्रियेण सम्प्रयुक्तः । *पुण्यकर्मणां पापकर्मणां च यथाक्रममि*ति । पुण्यकर्मणां मिथ्यादृष्टिर्दौर्मनस्येन सम्प्रयुक्ता, पुण्यक्रियाया नैरर्थक्यदर्शनात् । पापकर्मणां मिथ्यादृष्टिः सौमनस्येन सम्प्रयुक्ता, स्वकृतपापवैफल्यदर्शनात् ।

चतस्रो दृष्टय इति । सत्कायदृष्टिः, अन्तग्राहदृष्टिः, दृष्टिपरामर्शः,

सर्वेऽप्येतेऽनुशया उपेक्षेन्द्रियेण सम्प्रयुक्ताः । प्रवाहच्छेदकाले किल क्लेशानामवश्यमुपेक्षा सतिष्ठते ।

अधोभूमिकाः कथम् ? इत्याह—

स्वैः स्वैर्यथाभूम्यूर्ध्वभूमिकाः ।। ५६ ।।

स्वैः स्वैरिन्द्रियैरूर्ध्वभूमिका अनुशयाः सम्प्रयुज्यन्ते । यस्यां भूमौ यावन्तीन्द्रियाणि, तत्रापि चातुर्विज्ञानकायिकाश्चातुर्विज्ञानकायिकैः, मनोभूमिका मनोभूमिकैरेव यथासंभवम् ॥ ५६ ॥

उक्तः क्लेशानामिन्द्रियसम्प्रयोगः ॥

उवक्लेशानां पुनः

दौर्मनस्येन कौकृत्यमीर्ष्या क्रोधो विहिंसनम् ।
उपनाहः प्रदाशश्च,

'सम्प्रयुक्तानि' इति वर्तते । दैन्याकारवर्तित्वादेषाम् , मनोभूमिकत्वाच्च ।

मात्सर्यं तु विपर्ययात् ।। ५७ ।।

सौमनस्येनेत्यर्थः । लोभान्वयत्वेन हर्षाकारवर्तित्वात् ॥ ५७ ॥

माया शाठ्यमथो त्रक्षो मिद्धं चोभयथा,

सौमनस्यदौर्मनस्याभ्याम् । कदाचिद्धि सुमनाः परं वञ्चयते, कदाचिद् दुर्मनाः । एवं यावत् स्वपिति ।

शीलव्रतपरामर्शश्च । कथमुच्छेददृष्टिः सौमनस्येन सम्प्रयुक्ता ? तस्याभिनतत्वात् । *उपेक्षा सन्तिष्ठत* इति । विनाशावस्थायां मन्दत्वात् । *यस्यां भूमौ यावन्तीन्द्रियाणीति* ।

सौमनस्यसुखोपेक्षाः उपेक्षा सुमनस्कजे ।
सुखोपेक्षे उपेक्षा च विदो ध्यानोपपत्तिषु ॥ इत्यवगन्तव्यम् ।

तत्राप्यूर्ध्वभूमिषु । चतुर्विज्ञानकायिकाः प्रथम एव ध्याने । चक्षुः-श्रोत्र-काय-मनोविज्ञानभूमिकाः । प्रथमे हि ध्याने त्रिविज्ञानकायिकं सुखेन्द्रियमस्ति । मनोविज्ञानकायिकं सौमनस्येन्द्रियम् । चतुर्विज्ञानकायिकमुपेक्षेन्द्रियम् । तत ऊर्ध्वं मनोभूमिकमेव । द्वितीये ध्याने सौमनस्योपेक्षेन्द्रिये । तृतीये सुखोपेक्षेन्द्रिये । चतुर्थे ध्याने आरूप्येषु चोपेक्षेन्द्रियमेव । तत्र सर्वेऽप्यनुशया यथायथं वेदनेन्द्रियेण सम्प्रयुक्ताः । तत्र शमथस्निग्धसन्तानत्वात् हर्षदैन्याकारव्यवस्था नास्ति । दैन्याकारवर्तित्वादेषां कौकृत्यादीनां न सौमनस्येन सम्प्रयोगः । मनोभूमिकत्वान्न दुःखेन्द्रियेण ॥ ५६ ॥

मदः ।

सुखाभ्याम्,

तृतीये ध्याने सुखेनाधस्तात्, सौमनस्येन ऊर्ध्वमुपेक्षया । यस्मात्

सर्वगोपेक्षा,

अतस्तया सर्वेऽनुशयाः सम्प्रयुज्यन्ते । न हि तस्याः कश्चित् प्रतिषेधोः, यथाऽविद्यायाः ।

चत्वार्यन्यानि पञ्चभिः ।। ५८ ।।

आह्रीक्यमनपत्राप्यं स्त्यानमौद्धत्यं चैतानि चत्वारि पर्यवस्थानानि पञ्चभिरपीन्द्रियैः संप्रयुज्यन्ते; अकुशलमहाभूमिकत्वात्, क्लेशमहाभूमिकत्वाच्च ॥ ५८ ॥

यानि सूत्रे पञ्च निवरणानि उक्तानि—कामच्छन्दः, व्यापादः, स्त्यानमिद्धम्, औद्धत्यकौकृत्यम्, विचिकित्सा च । किं[1] त्रैधातुक्यः स्त्यानौद्धत्यविचिकित्सा गृह्यन्ते ? अथ कामप्रतिसंयुक्ता एव ? "केवलोऽयं परिपूर्णोऽकुशलराशिर्यदुत पञ्च निवरणानि" इत्येकान्ताः; कुशलत्ववचनात् सूत्रे ।

कामे निवरणानि,

---

*लोभान्वयत्वेने*ति । लोभहेतुकत्वेन । लोभसमुत्थेनेत्यर्थः ।। ५७ ।।

"*मदः सुखाभ्याम्*" इति । सुख-सौमनस्याभ्याम् । *तृतीये ध्याने सुखेने*ति । मदस्य मानसत्वात् । *यथा अविद्याया* इति । न क्वचित् क्लेशे उपक्लेशे वा सम्प्रयोगप्रतिषेधोऽस्ति । एवमुपेक्षाया अपीति । *अकुशलमहाभूमिकत्वात्* आह्रीक्यानपत्राप्ययोः । "अकुशले त्वाह्रीक्यमनपत्रपा" (अभि० को० २.२७) इति वचनात् । *क्लेशमहाभूमिकत्वाच्च* स्त्यानौद्धत्ययोः । षड्विज्ञानकाया अकुशलाः क्लिष्टाः सम्भवन्तीत्यतः पञ्चभिरपीन्द्रियैः सम्प्रयोग एषां सम्भवतीति ॥ ५८ ॥

किं त्रैधातुक्यः स्त्यानमिद्धविचिकित्सा गृह्यन्त इति । आसां त्रिधातुकत्वात् ता एव निष्कृष्य पृच्छ्यन्ते । *केवलोऽयमि*ति विस्तरः । *अकुशला राशिरि*ति । "भिक्षवो यदुत पञ्चनिवरणानीति ते सम्यग् वदमाना वदेयुः । तत् कस्य हेतोः ? केवलोऽयं भिक्षवः परिपूर्णाकुशलराशिर्यदुत पञ्च निवरणानि" इति विस्तरेणैकान्ताकुशलत्ववचनात् । *कामे निवरणानि* नान्यत्रेति । वृत्तिसूत्रपदयोरेकवाक्यता । निवरणानीति ध्यानसम्पत्त्यादीनामावरणानीत्यर्थः ।

---

[1] तत्र०—का० ।

नान्यत्र घाती। किं पुनः कारणं द्वे स्त्यानमिद्धे एकं निवरणमुक्तम्, द्वे चौद्धत्यकौकृत्ये एकम् ?

एकविपक्षाहारकृत्यतः।

द्व्येकता[2]

द्वयोरेकता द्व्येकता। विपक्षः प्रतिपक्षोऽनाहार इत्येकोऽर्थः। स्त्यानमिद्धयोरेक आहारः सूत्रे, अनाहारश्च। कः स्त्यानमिद्धनिवरणस्याहारः? पञ्च धर्माः—तन्द्रा, अरतिः, विजृम्भिका, भक्तेऽसमता, चेतसो लीनत्वमिति। अथ स्त्यानमिद्धनिवरणस्यानाहारः? आलोकसंज्ञेति। कृत्यमनयोरप्येकम्। उभे अपि ह्येते चित्तं लयं चोदयतः। औद्धत्यकौकृत्ययोरप्येक आहार उक्तः, एकोऽनाहारः। कश्चौद्धत्यकौकृत्यनिवरणस्याहारः? चत्वारो धर्माः—ज्ञातिवितर्कः, जनपदवितर्कः, अमरवितर्कः, पौराणस्य च हसितक्रीडितरमितपरिभावितस्यानुस्मर्ता भवतीति। कश्चौद्धत्यकौकृत्यनिवरणस्यानाहारः? शमथ इति। कृत्यमप्यनयोरेकम्। उभे अपि ह्येते चित्तमव्युपशान्तं वर्तयतः। अत एकविपक्षाहारकृत्यत्वात् द्वयोरप्येकत्वमुक्तम्।

यदि सर्वक्लेशा निवरणम्, कस्मात् पञ्चैवोक्तानि ?

पञ्चता स्कन्धविघातविचिकित्सनात् ॥ ५९ ॥

कामच्छन्दव्यापादाभ्यां शीलस्कन्धविघातः। स्त्यानमिद्धेन प्रज्ञास्कन्धस्य,

---

"*एकविपक्षाहारकृत्यतः*" इति। एकविपक्षाहारकृत्यत्वादित्यर्थः। अन्तरेणापि हि भावप्रत्ययं भावप्रधाने निर्देशो भवेत्। अथवा—एकं विपक्षाहारकृत्यम् = एकविपक्षाहारकृत्यम्, तत इति। विपक्षः प्रतिपक्ष इति। श्लोकबन्धानुगुण्येन प्रतिपक्ष इह विपक्षोऽभिप्रेतः। क्लेशविरुद्धः पक्षो विपक्ष इति कृत्वा। *अभिधर्मे* तु कृष्णः पक्षो विपक्षः, अशुक्लविरुद्धः पक्षो विपक्षः, शुक्लविरुद्धः पक्षो विपक्ष इति प्रतीतम्।

भक्ते असमतेति। अति बहु भुक्त्वा आहारस्य यः कायोपरोधः। अनाहार इति प्रतिपक्षः।

स्त्यानमिद्धेन प्रज्ञास्कन्धस्य। किम्? विघात इति प्रकृतम्।

---

२. कता—का०।

औद्धत्यकौकृत्येन समाधिस्कन्धस्य। समाधिप्रज्ञयोरभावे सत्येषु विचिकित्सको भवतीत्यतः पञ्चोक्तानि।

एतस्यां तु कल्पनायां समाधिस्कन्धविरोधिन औद्धत्यकौकृत्यनिवरणस्य पूर्वं ग्रहणं प्राप्नोति। अतो यथासंख्यमेताभ्यां समाधिप्रज्ञास्कन्धोपघात इत्यपरे। समाधिप्रयुक्तस्य हि स्त्यानमिद्धाद् भयम्, धर्मप्रविचयप्रयुक्तस्यौद्धत्यकौकृत्यादिति।

अन्ये त्वन्यथा वर्णयन्ति। कथं वर्णयन्ति? चारगतस्य प्रियाप्रियरूपेषु विषयेषु निमित्तग्राहाद् विहारगतस्य तत्पूर्वकौ कामच्छन्दव्यापादौ समाधिप्रवेशस्यादितोऽन्तरायं कुरुतः। ततः समाधिप्रविष्टस्याप्रयोगेण शमथविपश्यनासेवनात् स्त्यानमिद्धमौद्धत्यकौकृत्यं विचिकित्सा च यथाक्रमं शमथविपश्यनयोरन्तरायं कुरुतः। व्युत्थितस्यापि धर्मनिध्यानकाले विचिकित्सा अन्तरायं करोति। अतः पञ्च निवरणान्युक्तानि॥ ५९॥

एतस्यां तु कल्पनायामिति विस्तरः। शीलस्कन्धः, समाधिस्कन्धः, प्रज्ञास्कन्ध इति यथानुपूर्व्या स्कन्धा व्यवस्थिताः, तथैवानुपूर्व्या तद्विपक्षभूतानि निवरणानि पठ्येरन्—कामच्छन्द, व्यापादः, औद्धत्य-कौकृत्यम्, स्त्यानमिद्धम्, विचिकित्सा चेति। *औद्धत्यकौकृत्यनिवरणस्य पूर्वं ग्रहणं प्राप्नोति*। समाधिस्कन्धस्य प्रज्ञास्कन्धत्वात्। न चैवम्, अतो नैतत् कारणमित्यभिप्रायः। किं पुनरत्र कारणम्? इत्याह—*अतो यथासंख्यस्य एताभ्यां* स्त्यानमिद्धेन औद्धत्यकौकृत्येन च निवरणाभ्यां *समाधिप्रज्ञास्कन्धयोरुपघात* इति। कथम्? इत्याह—*समाधिप्रयुक्तस्य हि स्त्यानमिद्धाद् भयम्*; समानरूपकलपत्वात्। एवं *धर्मप्रविचयप्रयुक्तस्यौद्धत्यकौकृत्याद् भयमिति*।

अन्ये त्वन्यथा वर्णयन्तीति। *पूर्वाचार्याः*। *चारगतस्येति*। पिण्डपातार्थं परिभ्रमतः। *विहारगतस्य* प्रतिसल्लीनस्य स्थितस्य वा निषण्णस्य वा चंक्रम्यमाणस्य वा। *तत्पूर्वकौ* प्रियाप्रियविषयनिमित्तग्राहपूर्वकौ, प्रियाप्रियविषयपूर्वकौ वा। *यथाक्रमं शमथविपश्यनयोरन्तरायं कुरुत* इति। शमथस्य स्त्यानमिद्धमन्तरायं करोति; प्रत्यासन्नरूपतया स्त्यानमिद्धोपस्थानात्। विपश्यनाया औद्धत्यकौकृत्य-विचिकित्से अन्तरायं कुरुतः। औद्धत्यकौकृत्यस्य कृतद्वन्द्वैकवद्भावस्य विचिकित्सया सह पुनर्द्वन्द्वः—औद्धत्यकौकृत्यं च विचिकित्सा च = औद्धत्यकौकृत्यविचिकित्से इति। विचिकित्सा तु पुनर्व्युत्थितस्यापि तस्य धर्मनिध्यानकालेऽन्तरायं करोति।

अपरे पुनरेवं पाठं पठन्ति—*स्त्यानमिद्धमौद्धत्यकौकृत्यं विचिकित्सा चेति*। एवं च व्याचक्षते—स्त्यानमिद्धं शमथस्यान्तरायं करोति, औद्धत्यकौकृत्यं

इदं विचार्यते—विसभागधातुसर्वत्रगाणां निरोधमार्गदर्शनप्रहातव्यानां च सास्रवालम्बनानां यदालम्बनं परिज्ञायते ते[1] तदा न[1] प्रहीयन्ते, यदा प्रहीयन्ते तदालम्बनं न परिज्ञायते इति कथमेषां प्रहाणम् ? नावश्यमालम्बनपरिज्ञानात् क्लेशानां क्षयो भवति । किं तर्हि ? चतुर्भिः प्रकारैः । कतमैश्चतुर्भिः ? दर्शनहेयानां तावत्—

आलम्बनपरिज्ञानात्, तदालम्बनसंक्षयात् ।

आलम्बनप्रहाणाच्च,

तत्रालम्बनपरिज्ञानाद् दुःखसमुदयदर्शनहेयानां स्वभूम्यालम्बनानामास्रवालम्बनानां च । तदालम्बनसंक्षयाद् विसभागधातुसर्वत्रगाणाम् । तदालम्बना[2] सभागधातुसर्वत्रगाः । तेषु प्रहीणेषु तेऽपि प्रहीणा भवन्ति । आलम्बनप्रहाणात्

विपश्यनायाः । विचिकित्सा च व्युत्थितस्य धर्मनिध्यानकालेऽन्तरायं करोति ॥ ५६ ॥

विसभागधातुसर्वत्रगानामिति विस्तरः । विसभागधातुसर्वत्रगानां दुःखसमुदयदर्शनहेयत्वेन द्विभेदानां मिथ्यादृष्ट्यादीनां *यदालम्बनं परिज्ञायते* दुःखसमुदयान्वयज्ञानपक्षेण मार्गेण रूपारूप्य-धात्वालम्बनावस्थायाम्, *न ते तदा प्रहीयन्ते* । दुःखधर्मज्ञानेन समुदयधर्मज्ञानेन च यथायोगं पूर्वमेव प्रहीणत्वात् । धर्मज्ञानवध्या हि ते, कामावचरत्वात् । *निरोधमार्गदर्शनप्रहातव्यानां च सास्रवालम्बनानां* दृष्टिप्रहातव्यानां *यदालम्बनं* निरोधमार्गदृग्घेयं मिथ्यादृष्ट्यादिकं दुःखसमुदयसत्यस्वभावं दुःखसमुदयधर्मज्ञानपक्षेणान्वयज्ञानपक्षेण वा यथाधातु *परिज्ञायते । न ते तदा परिहीयन्ते* । निरोध-मार्गदर्शनप्रहेयत्वादिति । न च तथा *तेषामालम्बनं परिज्ञायते;* पूर्वमेव ज्ञातत्वात् । *कथमेषां प्रहाणम्* आलम्बनपरिज्ञानात् तत्प्रहाणं न युज्यत इत्यभिप्रायः । *तत्रालम्बनपरिज्ञानात्* कामावचराः स्वधात्वालम्बना रूपारूप्यावचराश्च दुःखसमुदयदृग्घेयाः प्रहीयन्ते । तत्र विसभागधात्वालम्बनानामालम्बनपरिज्ञया शमथप्रहाणम्;[3] दुःखसमुदयान्वयज्ञानक्षान्त्योर्युगपत् द्विधात्वालम्बनत्वात् ।

स्वभूम्यालम्बनानामिति विशेषणम् विसभागधातुसर्वत्रगनिरासार्थम् । *तदालम्बनसंक्षयादिति* । विसभागधातुसर्वत्रगा आलम्बनमेषां सत्कायदृष्ट्यादीनामिति । *तदालम्बनाः सभागधातुसर्वत्रगाः ।* तेषां *क्षयात्* प्रहाणात् । ते विसभागधातुसर्वत्रगाः प्रहीयन्ते । (तद्धेतुत्वेनोपस्तम्भप्रहाणाद्

१-१. तदा न—का० । २. तदालम्बना हि—का० । ३. पश्यथ०—जा० ।

निरोधमार्गहेयानां सास्रवालम्बनानाम् । ते ह्यनास्रवालम्बनास्तेषामालम्बनम् । अतस्तेषु प्रहीणेषु तेऽपि प्रहीणा भवन्ति । भावनाहेयानां पुनः—

प्रतिपक्षोदयात् क्षयः ।। ६० ।।

यस्य हि क्लेशप्रकारस्य प्रतिपक्षो मार्ग उत्पद्यते स प्रहीयते ।

कस्य पुनः कः प्रतिपक्षः ? अधिमात्राधिमात्रस्य मृदुमृदुरिति विस्तरेण पश्चात् प्रवेदयिष्यामः ॥ ६० ॥

कतिविधश्च प्रतिपक्षः ? इत्याह—

प्रहाणाधारदूरत्वदूषणाख्यश्चतुर्विधः ।

प्रतिपक्षः,

प्रहाणप्रतिपक्षः आनन्तर्यमार्गः ।

आधारप्रतिपक्षस्तस्मात् परेणार्यो मार्गो येन तत्प्रापितं प्रहाणमाधार्यते ।

दूरीभावप्रतिपक्षो विमुक्तिमार्गात् परेण यो मार्गश्छिन्नप्राप्तिदूरीकरणात् ।

विसभागधातुसर्वत्रगानां प्रहाणमालम्बनप्रहाणात्) । *आलम्बनप्रहाणादिति* । दृष्टिपरामर्शाद्यालम्बनानां *निरोधमार्गदर्शनहेयानां* मिथ्यादृष्ट्यादीनां प्रहाणात् । तेऽपि दृष्टिपरामर्शादयः सास्रवालम्बनाः प्रहीयन्ते ।

"*प्रतिपक्षोदयात् क्षयः*" इति । भावनाहेयानां प्रतिपक्षोदयादेव, नालम्बनपरिज्ञानादिभ्य इति दर्शयति । *पश्चात् प्रवेदयिष्याम* इति । "नवप्रकारा दोषा हि भूमौ भूमौ तथा गुणाः" (अभि० को० ६.३५) इत्यत्र वक्ष्यति ॥ ६० ॥

प्रहाणप्रतिपक्ष आनन्तर्यमार्ग इति । विपक्षप्रतिद्वन्द्वी पक्षः = प्रतिपक्षः । प्रहाणाय प्रतिपक्षः = प्रहाणप्रतिपक्षः । विमुक्तिमार्गोऽपि हि प्रतिपक्षो न तु प्रहाणायेत्यत इत्थं विशेषणम् । प्रहीयते वाऽनेनेति प्रहाणम्, प्रहाणश्चासौ प्रतिपक्षः = प्रहाणप्रतिपक्षः । तद्यथा—दुःखधर्मज्ञानक्षान्तिः । *आधारप्रतिपक्षस्तस्मात् परेणेति* । तस्मात् = आनन्तर्यमार्गात् परेण यो मार्गो विमुक्तिमार्गः, स ह्याधारप्रहाणस्य तत्प्राप्त्याधारणात् । आधार्यतेऽनेनेत्याधारः, स एव प्रतिपक्षः आधारप्रतिपक्षः । तद्यथा—दुःखधर्मज्ञानक्षान्तेः परं दुःखधर्मज्ञानमिति । तेनोच्यते *येन तत्प्रापितमिति* । विस्तरः—येन = मार्गेण तत्प्रापितम् = आनन्तर्यमार्गप्रापितम् प्रहाणमाधार्यते, तत्प्राप्त्यनुच्छेदात् आधारप्रतिपक्ष इति । *दूरीभावप्रतिपक्ष* इति । विस्तरः—क्लेशप्राप्तिर्दूरीभवति येन सः = दूरीभावः, स एव प्रतिपक्षो दूरीभावप्रतिपक्षः । दूरीभवनं वा दूरीभावः, तस्मिन् प्रतिपक्षो दूरीभावप्रतिपक्षः । *विमुक्तिमार्गात् परेण यो मार्ग*

विमुक्तिमार्गोऽपीत्यपरे । सोऽपि हि तां क्लेशप्राप्तिं[1] दूरीकरोति ।

विदूषणप्रतिपक्षो येन मार्गेण तं धातुं दोषतो दर्शनाद् विदूषयति । अपि त्वियमानुपूर्वी[2] साध्वी भवेत् ।

विदूषणप्रतिपक्षो दुःखसमुदयालम्बनः प्रयोगमार्गः । प्रहाणप्रतिपक्षः सर्व आनन्तर्यमार्गः । आधारप्रतिपक्षो विमुक्तिमार्गः । दूरीभाव प्रतिपक्षो विशेषमार्ग इति ।

प्रहीयमाणः क्लेशः कुतः प्रहातव्यः ?

प्रहातव्यः क्लेश आलम्बनात् मतः ।। ६१ ।।

न हि सम्प्रयोगात् क्लेशो विवेचयितुं शक्यते । आलम्बनाच्च शक्यते; यस्मान्न पुनस्तदालम्ब्योत्पद्यते । अनागतस्तावच्छक्येतालम्बनाद् विवेचयितुम्, अतीतस्तु कथम् ? अथालम्बनपरिज्ञानात् प्रहातव्य इत्ययमस्यार्थः ? एषोऽपि

इति । योऽसौ विमुक्तिमार्गः– दुःखे धर्मज्ञानम्, तस्मान् परेण यो मार्गो दुःखेऽन्वयज्ञानक्षान्त्यादिः, स दूरीभावप्रतिपक्ष इति दर्शयति ।

विमुक्तिमार्गोऽपीत्यपर इति । स चाप्याद्यो विमुक्तिमार्गो दूरीभावप्रतिपक्ष इत्युच्यते । *सोऽपि हि तां क्लेशप्राप्तिं दूरीकरोति* । एवं च सति विमुक्तिमार्ग आधारप्रतिपक्षो दूरीभावप्रतिपक्ष इति वचनमद्वयं लभत इत्युक्तं भवति । *तं धातुं दोषतो दर्शनात् विदूषयतीति* । अनित्यादिभिराकारैर्येन तं धातुं विदूषयतीत्यर्थः । तदेवं सति योऽपि दुःखसमुदयालम्बनः प्रहाणप्रतिपक्षः, स चापि विदूषणप्रतिपक्ष इति दर्शितं भवति । *अपि त्वियमानुपूर्वी साध्वी भवेदित्याचार्यः* । सोपानन्यायसमाश्रयात् , लक्षणासाङ्कर्याच्चेयमानुपूर्वी साध्वीति दर्शयति ।

दुःखसमुदयालम्बनः प्रयोगमार्ग इति । प्रयोगमार्ग एवोष्मगतादि गृह्यते, नानन्तर्यमार्गादि ; प्रहाणप्रतिपक्षादित्वेन तद्व्यवस्थापनात् । *सर्वानन्तर्यमार्ग* इति । पश्चात्कालीनोऽपि योऽन्यः । *विमुक्तिमार्गः सर्व* इत्येव चाधिक्रियते । *विशेषमार्गस्तु* य एतत्त्रयव्यतिरिक्तः, स इह गृह्यते ।

न हि सम्प्रयोगात् क्लेशो विवेचयितु शक्यते इति । स्वकलापाद् विवेचनाशक्यत्वात् । *अनागतस्तावच्छक्यत आलम्बनाद् विवेचयितुम्* । विवेचितस्य तस्य न पुनस्तद् वस्त्वालम्ब्योत्पत्तिरित्यतः कारणात् । *अतीतस्तु कथम्* । यद्वस्त्वालम्ब्योत्पन्नः, न ह्यालम्बितं वस्त्वनालम्बनीकर्तुं शक्यते । एषोऽपि नैकान्त इति ।

१. प्राप्ति—का० । २. त्वेषामिय०—का० ।

नैकान्तः । तस्माद् वक्तव्यमेतत्—कियता क्लेशः प्रहीणो वक्तव्यः ? स्वासान्तानिकः प्राप्तिच्छेदात् । पारसान्तानिकस्तु क्लेशः सर्वं च रूपमक्लिष्टश्च धर्मः; तदालम्बन-स्वासान्तानिकक्लेशप्रहाणात् ॥ ६१ ॥

चतुर्भिः प्रकारैः क्लेशानां क्षय इष्यते—

आलम्बनपरिज्ञानात् तदालम्बनसंक्षयात् ।
आलम्बनप्रहाणाच्च प्रतिपक्षोदयात् क्षयः ॥ (अभि० को० ५.६०)

इति । तस्मात् आलम्बनपरिज्ञानादिति नायमेकान्तः । *तस्माद् वक्तव्यमेतदिति* । प्रतिपत्तव्यमेतदित्यर्थः ।

अत्राचार्यसङ्घभद्रः परिहरति—आलम्बनात् क्लेशाः प्रहातव्याः । आलम्बन-परिज्ञानबलेन हि क्लेशाः प्रहीयन्ते । द्विविधं चानुशयालम्बनम्—संयोगवस्तु, असंयोगवस्तु च । तत्र संयोगवस्तुविषयाणामनुशयानां तदनुशयबलोत्पादितानामतद्विषयाणामपि पुद्गलस्य सन्ताने प्राप्तिः अक्लिष्टचित्तस्याप्यविच्छेदेन प्रवृत्तेः अनागतातीतक्लेशहेतुफलभूता । एवम् असंयोगवस्तुविषयाणाम्, अतद्विषयाणामपि च तद्विषयक्लेशपृष्ठसमुदाचारिणां क्लेशानां प्राप्तिर्वेदितव्या । स ह्यनागतानामुत्पत्तौ प्रत्ययगमाद्धेतुभूता भवति । अतीतानां च निष्यन्दभावात् फलभूता । स च तत्प्रहाणप्रतिपक्षनिष्यन्दप्राप्तिसमवधानविरुद्धः तदाधारितत्वात् क्लेशानाम् । अतो येनालम्बनेनोत्पन्नाः क्लेशा अन्यालम्बनानपि क्लेशान् प्रवर्तयन्ति, तदालम्बनप्रहाणप्रतिपक्षनिष्यन्दोत्पत्तौ तत्प्राप्तिविगमे ते क्लेशास्तदालम्बना अपि सन्तो हेतुफलापक्रान्ता प्रहीणा इत्युच्यन्ते । तद् यस्मादपरिज्ञाते कस्मिंश्चित् क्लेशविषयेऽतद्विषयाणामपि क्लेशानां तद्विषयक्लेशबलेनाप्राप्तिरनागतातीतक्लेशहेतुफलभूता सन्ततौ प्रवर्तते यथावस्तु । तस्माद् आलम्बनात् क्लेशाः प्रहातव्या इत्यभिमतमिति ।

ननु च तदालम्बनप्रहाणादिभिरपि क्लेशाः प्रहीयन्त इत्यभिप्रेतम्, किमिदमुक्तम्—आलम्बनपरिज्ञानबलेन क्लेशाः प्रहीयन्त इति ? तेऽपि दुःखसत्यादिपरिज्ञानबलेनैव प्रहीयन्ते । तद्भावाभावयोगे तद्भावाभावयोगात् । येषामपि हि प्रतिपक्षोदयात् प्रहाणमुच्यते, तेऽपि भावनाहेयाः । क्लेशा आलम्बनदुःखसत्यादिपरिज्ञानबलेनेव प्रहीयन्ते—इत्यवगन्तव्यम् । व्यवस्थामात्रं तु तद्, यदुक्तम् । तदालम्बनप्रहाणादिभिरपि क्लेशाः प्रहीयन्ते—इत्यभिप्रायो लक्ष्यते ।

स्वासान्तानिकः प्राप्तिच्छेदादिति । विस्तरः—स्वसन्तानक्लेशः प्राप्तिविगमात् प्रहीणो वक्तव्यः । परसन्तानक्लेशास्तु न प्राप्तिच्छेदात्; स्वसन्ताने तत्प्राप्त्यभावात् । किं तर्हि ? तदालम्बनस्वासान्तानिकक्लेशप्रहाणात् । पारसान्तानिक-

दूरीभाव इत्युच्यते, कतिविधो दूरीभावः ? चतुर्विधा किल दूरता ।

वैलक्षण्याद् विपक्षत्वाद् देशविच्छेदकालतः ।

भूतशीलप्रदेशाध्वद्वयानामिव दूरता ।। ६२ ।।

१. विलक्षणदूरता, यथा महाभूतानाम् । वैलक्षण्यात् सहजानामपि दूरता ।

२. विपक्षदूरता, यथा शीलस्य दौःशील्यम् ।

३. देशविच्छेददूरता, यथा विप्रकृष्टदेशानां देशविच्छेदात् पूर्वपश्चिमसमुद्रवत् ।

४. कालदूरता, यथा अतीतानागतदूरमुच्यते । कुतस्तद् दूरम् ? वर्तमानात् ।

यदनन्तरातीतमुत्पद्यमानं च[1] तत् कथं दूरम् ? अध्वनानात्वेन तद् दूरं न चिरभूतभावित्वेन । वर्तमानमप्येवं दूरं प्राप्नोति ? अकारित्रात् तर्हि तद् दूरम् ।

क्लेशालम्बनस्वासान्तानिकप्राप्तिच्छेदादित्यर्थः । सर्वं रूपं कुशलाकुशलाव्याकृतम् । *अक्लिष्टाश्च धर्मा* इत्यरूपी कुशलास्रवम्, अनिवृताव्याकृतश्च सः । तथैव तदालम्बनस्वासान्तानिकक्लेशप्रहाणात् प्रहीणो वक्तव्य इति ।। ६१ ।।

"*भूतशीलप्रदेशाध्वद्वयानामिव*[2] *दूरता*" इति । इवशब्दोऽत्रोदाहरणम् । तद्यथार्थे द्रष्टव्यः । *वैलक्षण्यात् लक्षणदूरता* । तद्यथा—भूतानाम् । भिन्नलक्षणो हि पृथ्वीधातोरब्धातुः, तस्मात् पृथ्वीधातोरब्धातुर्दूरे भवति । *विपक्षत्वाद् विपक्षदूरता* । तद्यथा—शीलस्य दौःशील्यम् । *देशविच्छेदाद् देशदूरता* । तद्यथा—प्रदेशस्य पश्चिमसमुद्रस्य पूर्वसमुद्रात् । *कालतः कालदूरता* । तद्यथा—अध्वद्वयस्यातीतानागतलक्षणस्य । तद्धि अतीतानागतं दूरमुच्यते । क्वोच्यते ? अभिधर्मे । एवं ह्याह—"दूरेधर्मा कतमे ? अतीतानागता धर्माः । सन्तिकेधर्माः कतमे ? प्रत्युत्पन्नाः धर्माः, असंस्कृतं च" इति । तद् दूरमिति । अतीतानागतम् ।

उत्पद्यमानं चेति । उत्पादाभिमुखम्, अनागतं चेत्यर्थः । *न चिरभूतभावित्वेनेति* । न चिरभूतत्वेनातीतम्, नापि चिरभावित्वेनागतं दूरमित्यर्थः । *वर्तमानमप्येवं दूरं प्राप्नोति* । अध्वनानात्वेन प्रत्युत्पन्नाध्वतया[3] वर्तमानमपि एवं दूरं प्राप्नोति । यथा अतीतानागतमतीतानागताध्वतया । *अकारित्रात् तर्हि*

---

१. वा—का० । २. भूत्वा शील०—जा० । ३. ०न्नोऽध्व०—जा० ।

असंस्कृतस्य कथमन्तिकत्वं सिध्यति ? सर्वत्र तत्प्राप्तेः । अतीतानागतेऽपि प्रसङ्गः[1] । आकाशं च कथम् ? एवं तर्ह्यतीतानागतमन्योन्यं वर्त्तमानव्यवहितत्वाद् दूरम् । वर्त्तमानमुभयोरासन्नत्वादन्तिकम् । असंस्कृतं चाप्यव्यवहितत्वादिति । एवमप्यतीतानागतं वर्त्तमानस्यान्तिकत्वादुभयं प्राप्नोति ?

एवं तु युक्तं स्यात्—धर्मस्वलक्षणादनागतं दूरमसम्प्राप्तत्वात्, अतीतं च प्रच्युतत्वादिति ॥ ६२ ॥

किं मार्गविशेषगमनात् क्लेशानां पुनः प्रहाणविशेषो भवति ? नैतदस्ति । सर्वेषां हि क्लेशानाम्—

तद् दूरमिति । उपरतकारित्रमतीतम्, अप्राप्तकारित्रमनागतमिति तदतीतानागतं दूरमुच्यते ।

असंस्कृतस्य कथमन्तिकत्वमिति । तस्य कारित्राभावादन्तिकत्वं न स्यात्, तच्चेष्यते "अन्तिकेधर्माः कतमे ? प्रत्युत्पन्ना धर्माः, असंस्कृतं च" इति शास्त्रपाठात् । *सर्वत्र तत्प्राप्तेरिति* । सर्वत्र देशे तस्यासंस्कृतस्य प्रतिसंख्यानिरोधस्य प्राप्त्युत्पादात् । *अतीतानागतेऽपि प्रसङ्ग* इति । कुशलादेरतीतानागतस्य सर्वत्र देशे प्राप्तिः सम्भवतीति अतीतानागतेऽपि अन्तिकत्वप्रसङ्गः ।

आकाशं च *कथमिति* । आकाशं च कथमन्तिकम्, न हि तस्य प्राप्तिरस्तीति ? *अतीतानागतमन्योन्यमिति* । अतीतादनागतं दूरम् । अनागताच्चातीतं दूरमित्यर्थः । *असंस्कृतं चाप्यव्यवहितत्वादिति* । न केनचिद् व्यवहितम् । यथा वर्तमानेनातीतानागतमिति, एवं तस्यान्तिकत्वम् ।

एवमपीति । अस्यामपि कल्पनायाम् । यदनन्तरमतीतानागतम्, तद्धयतीतम्, वर्तमानान्तरितत्वाद् अनागताद् दूरम् । वर्तमानाच्चाव्यवहितत्वादन्तिकमिति प्राप्नोति । इत्येवमनागतमपि नेयम् ।

एवं तु युक्तं स्यादिति । स्वमतमाचार्यस्य । *धर्मस्वलक्षणादनागतं दूरम्* । कस्मात् ? असम्प्राप्तत्वात् । यस्मादनागतेन स्वलक्षणं न सम्प्राप्तमिति । अथवा—यस्मात् तत् स्वलक्षणमसम्प्राप्तम् = अनुपस्थितमिति । *अतीतं च* । किं धर्मस्वलक्षणाद् दूरम्, *तत्प्रच्युतत्वात्* । यस्मात् तद्धर्मस्वलक्षणं तस्मादतीतात् प्रच्युतम् । तद्धयतीतं यद् धर्मस्वलक्षणात् प्रच्युतमिति ॥ ६२ ॥

"प्रतिपक्षोदयात् क्षयः" (अभि० को० ५.६०) इत्युक्तम्, अथ पृच्छति—*किं मार्गविशेषगमनादिति* । विस्तरः—*प्रहाणविशेष* इति । विशिष्यते प्रहाणमित्यर्थः ।

---

१. तत्प्रसङ्गः—का० ।

सकृत् क्षयः,

यस्य यः प्रहाणमार्गस्तेनैव तस्य क्षयः ।

विसंयोगलाभस्तेषां पुनः पुनः ।

कतिषु कालेषु ? इत्याह—**षट्सु कालेषु ।**

प्रतिपक्षोदयफलप्राप्तीन्द्रियविवृद्धिषु ॥ ६३ ॥

प्रतिपक्षो विमुक्तिमार्ग एतस्मिन्नभिप्रेतः, फलानि चत्वारि श्रामण्यफलानि, इन्द्रियविवृद्धिरिन्द्रियसंचारः— एतेषु कालेषु क्लेशस्य विसंयोगलाभः ।

स पुनरेष यथायोगं द्रष्टव्यः । केषाञ्चित् षट्सु कालेषु, केषाञ्चिद् यावद् द्वयोः ॥ ६३ ॥

प्रतिपक्षो विमुक्तिमार्ग एतस्मिन्नभिप्रेत इति । तस्य विसंयोगप्राप्तिमहोत्पादादानन्तर्यमार्गे हि न तावत् विसंयोगप्राप्तिरस्ति ; उत्पादाभिमुखत्वात् । विमुक्तिमार्गोऽपि हि प्रतिपक्ष इति शक्यते व्यवस्थापयितुम् । मुख्यप्रतिपक्षेणानन्तर्यमार्गेण सहैककार्यत्वात् । तथा ह्युक्तम्—'उभयाभ्यां हि तस्य प्राप्तिर्विसंयोगप्राप्तेरावाहकसान्निश्रयत्वाद्' इति । *फलानि चत्वारीति* । चतुर्ग्रहणमेकान्नवतिफलप्रतिपत्तिनिरासार्थम् । पुरुषकारादिपञ्चफलप्रतिपत्तिनिरासार्थं वा । फलप्राप्तिरपि विमुक्तिमार्गावस्थायामेव गृह्यते, विसंयोगलाभास्तित्वयोगात् *इन्द्रियविवृद्धिरिन्द्रियसञ्चार* इति । इन्द्रियाधिक्यप्रतिपत्तिनिरासार्थमेतदर्थप्रदर्शनम् 'इन्द्रियविवृद्धिः' इत्युच्यते ।

फलप्राप्तिवचनेनैव सिद्धिः—इत्याचार्यसङ्घभद्रः । अत्र ब्रूमः—सत्यं फलप्राप्तिरेवेन्द्रियविवृद्धिः, फलप्राप्तिविशेषस्तु प्रदर्शयितव्यो यत्र पुनर्विसंयोगफललाभो भवति । अन्यथा हि फलप्राप्तिवचनमपि न कर्तव्यं स्यात् ; प्रतिपक्षोदयवचनेनैव तत्सिद्धेः । इत्यलमनया खलिनिकया ।

केषाञ्चित् यावद् द्वयोरिति । *केषाञ्चित्* क्लेशानां षट्सु, केषाञ्चित् त्रिषु, केषाञ्चिद् द्वयोरिति । 'केषाञ्चिदेकस्मिन् काले' इति नोक्तम् ; पुनः प्राप्तस्य विसंयोगस्याधिकृतत्वात् । सम्भवति हि भावाग्रिकस्य नवमस्य प्रकारस्यैकस्मिन्नेव काले तीक्ष्णेन्द्रियस्य विसंयोगलाभः । स तु न पुनर्लाभ इति नोच्यते । तत्र तावन्मृद्विन्द्रियस्य षट्सु कालेषु विसंयोगलाभः । दुःख-समुदय-निरोधदर्शनहेयानां कामावचराणां मार्गदर्शनहेयानां प्रतिपक्षोदयकाले, स्रोत-आपत्तिफलकाले, सकृदागामिफलकाले, अनागामिफलकाले, अर्हत्त्वफलकाले, इन्द्रियसञ्चारकाले चेति षट्सु कालेषु विसंयोगलाभः । सम्भवं च प्रत्येवमुच्यते ।

स एव विसंयोगस्तासु तास्ववस्थासु परिज्ञासंज्ञां लभते । द्वे हि परिज्ञे—ज्ञानपरिज्ञा, प्रहाणपरिज्ञा च । तत्र ज्ञानपरिज्ञा सास्रवं ज्ञानम् । प्रहाणपरिज्ञा तु प्रहाणमेव । फले हेतूपचारात् ।

किमेकैव परिज्ञा सर्वप्रहाणम् ? नेत्याह । किं तर्हि ?

न हि मृद्विन्द्रियोऽवश्यमिन्द्रियाणि सञ्चरति । तस्यैव मृद्विन्द्रियस्य रूपारूप्यावचराणां मार्गदर्शनहेयानां मार्गान्वयज्ञानकाले प्रतिपक्षोदयकाल इति वा, फलप्राप्तिकाल इति वा गृह्यते प्रथमतो विसंयोगलाभः । पुनः सकृदागामिफलप्राप्तिकाले यावद् इन्द्रियसंचारकाले इति पञ्चसु फलेषु । भावनाहेयानामपि तस्यैव कामावचराणां पञ्च प्रकाराणामधिमात्राधिमात्रस्य यावन्मध्यस्य तेष्वेव स्रोतआपत्तिफलकालवर्ज्येषु पञ्चसु कालेषु विसंयोगलाभः । मध्यमृदोस्तु षष्ठस्य प्रकारस्य तस्यैव चतुर्षु कालेषु प्रतिपक्षोदयफलप्राप्तिकालयोरेकत्वात् । तस्मिन् अन्यतरस्मिन् । अनागामिफलकाले, अर्हत्त्वफलप्राप्तिकाले, इन्द्रियसञ्चारकाले चेति । तस्यैव मृद्वधिमात्रस्य मृदुमध्यस्य च सप्तमाष्टमयोः प्रकारयोः प्रतिपक्षोदयकाले, अनागामिफलकाले यावद् इन्द्रियसञ्चारकाले वेति चतुर्षु एव कालेषु विसंयोगलाभः । तस्यैव मृदुमृदोरन्त्यस्य प्रकारस्य प्रतिपक्षोदयकाल इति वा फलप्राप्तिकाल इति वैकतरस्मिन् अर्हत्त्वफलकाले इन्द्रियसञ्चारकाले चेति त्रिषु कालेषु विसंयोगलाभः । तस्यैवार्हत्त्वफलं प्राप्नुवतो ये नवप्रकारा रूपारूप्यावचराः क्लेशा भावनाप्रहातव्याः प्रहीणा अधिमात्राधिमात्रो यावन्मृदुमृदुरिति । तेषां भावाग्रिकं मृदुमृदुप्रकारमन्त्यं हित्वा सर्वेषां त्रिष्वेव कालेषु विसंयोगलाभः—प्रतिपक्षोदयकाले, अर्हत्त्वफलकाले, इन्द्रियसंचारकाले चेति । यस्त्वस्यैवारूप्यावचरो मृदुमृदुरन्त्यः क्लेशप्रकारः, तस्य प्रतिपक्षोदयार्हत्त्वफलप्राप्तिकालैकत्वात् प्रतिपक्षोदयकाल इति वा अर्हत्त्वफलकाल इति वा, अन्यतरस्मिन् इन्द्रियसञ्चारकाले चेति द्वयोः कालयोर्विसंयोगलाभ इति । एवं तावत् मृद्विन्द्रियस्योक्तम् ।

तीक्ष्णेन्द्रियस्य पुनः केषाञ्चित् क्लेशानां पञ्चसु कालेषु । केषाञ्चित् यावद् द्वयोरिति वक्तव्यम् । इन्द्रियसञ्चारकालमेकमपास्य । तस्य हि सर्वत्रेन्द्रियसञ्चारो नास्ति । तस्यैकस्मिन् एव काले क्लेशानां विसंयोगलाभोऽस्ति । भावाग्रिकस्य भावनाहेयस्य मृदुमृदोः प्रकारस्य । स तु पुनर्लाभो न भवतीति न वक्तव्यः—इति पश्यामः ॥ ६३ ॥

फले हेतूपचारादिति । प्रहाणं फलं परिज्ञा ज्ञानस्वभावो हेतुः, तस्मिन् प्रहाणे फले हेतूपचारः—प्रहाणं परिज्ञेति । तद्यथा—"षडिमानि स्पर्शायतनानि पूर्वमभिसंस्कृतानि अभिसञ्चेतितानि पौराणं कर्म वेदितव्यम्" (　　) इति ।

परिज्ञा नव,

तत्र तावत्,

कामाद्यप्रकारद्वयसंक्षयः ।

एका,

कामधातावाद्यस्य प्रकारद्वयस्य दुःखसमुदयदर्शनहेयस्य प्रहाणमेका परिज्ञा ।

द्वयोः क्षये द्वे ते,

कामधातावेव निरोधदर्शनहेयस्य प्रकारस्य प्रहाणमेका परिज्ञा । मार्गदर्शन-हेयस्यैका ।

यथा कामावचराणां दर्शनप्रहातव्यानां प्रहाणं तिस्रः परिज्ञाः,

तथोर्ध्वं तिस्र एव ताः ।। ६४ ।।

रूपारूप्यावचराणां दर्शनप्रहातव्यानां प्रहाणं तथैव तिस्रः परिज्ञा भवन्ति, दुःखसमुदयदर्शनप्रहातव्यानां प्रहाणमेका, निरोधदर्शनहेयानां प्रहाणं द्वितीया, मार्गदर्शनहेयानां प्रहाणं तृतीया—इति त्रैधातुकानां दर्शनहेयानां प्रहाणं षट् परिज्ञा भवन्ति ।। ६४ ।।

अन्या अवरभागीयरूपसर्वास्रक्षयाः ।

तिस्रः परिज्ञाः

अवरभागीयप्रहाणमेका परिज्ञा । रूपास्रवप्रहाणमेका रूपरागक्षयपरिज्ञा । आरूप्याप्तानां सर्वास्रवप्रहाणमेका सर्वसंयोजनपर्यादानपरिज्ञा[1] ।

कः पुनः प्रहाणं परिज्ञाशब्देनापदिष्टः ? सूत्रे एवं हि पठ्यते—"परिज्ञेयाँश्च वो भिक्षवो धर्मान् देशयिष्यामि परिज्ञां च, परिज्ञावन्तं च पुद्गलम् । परिज्ञेया धर्माः कतमे ? पञ्चोपादानस्कन्धाः । परिज्ञा कतमा ? यदत्र छन्दराग-प्रहाणम्, छन्दरागसमतिक्रमः—इयमुच्यते परिज्ञा" (   ) इति विस्तरः ।

"*कामाद्यप्रकारद्वयसंक्षयः*" इति ।

"अनास्रववियोगाप्तेर्भवाग्रविकलीकृतेः ।

हेतुद्वयसमुद्घातात् परिज्ञा धात्वतिक्रमात्" । (अभि० को० ५.६८)

इत्यत्र परिज्ञाव्यवस्थापने कारणं वक्ष्यते ।

---

१. इत आरभ्य षट्षष्टितमकारिकायाः तृतीयपादपर्यन्तं स्फुटार्थां संस्कृत-भाषायां नोपलब्धा इति मनश्चेखिद्यत एव—सं० ।

कस्माद् रूपारूप्यावचराणां भावनाहेयानां प्रहाणं पृथक् परिज्ञा, न दर्शनहेयानाम् ? भावनाहेयानामतुल्यप्रतिपक्षत्वात् । इत्येता नव परिज्ञाः ।

आसां पूर्विकाः

षट् क्षान्तिफलम्,

या एव दर्शनहेयप्रहाणस्वभावाः ।

ज्ञानस्य शेषिताः ॥६५॥

अवरभागीयप्रहाणादिपरिज्ञा भावनामार्गत्वात् ॥ ६५ ॥

कथं क्षान्तिफलं परिज्ञा भवन्ति ? क्षान्तीनां ज्ञानपरिवारत्वात् । राजपरिवारे राजोपचारवत् । ज्ञानैकफलत्वाच्च ।

अनागम्यफलं सर्वा ध्यानानां पञ्च वाथ वा ।

अष्टौ,

वैभाषिकमतेन मौलध्यानफलं पञ्च परिज्ञा या रूपारूप्यावचरक्लेशप्रहाणस्वभावाः ; कामावचरक्लेशप्रहाणस्यानागम्यफलत्वात् ।

भदन्तघोषकस्य मतेनाष्टौ । स हि वीतरागस्यापि कामावचराणां दर्शनहेयानां प्रहाणं दर्शनमार्गफलमिच्छति, अनास्रवविसंयोगप्राप्तिलाभात् । अवरभागीयप्रहाणपरिज्ञा त्वनागम्यफलमेव । ध्यानान्तरं ध्यानवद् द्रष्टव्यम् ।

आरूप्याणां तु

सामन्तकस्यैका,

आकाशानन्त्यायतनसामन्तकस्यैका रूपरागक्षयपरिज्ञा फलम्[१] ।

अवरभागीयप्रहाणमिति कामधात्वास्रवप्रहाणमित्यर्थः । इयमेव चास्य संज्ञा । *रूपास्रवप्रहाणमिति* । रूपधात्वास्रवप्रहाणमित्यर्थः । *रूपरागक्षयपरिज्ञेति* अस्य नाम । यद्यपि अन्येषां क्लेशोपक्लेशानां मानादीनां रूपावचराणां प्रहाणम्—इयं परिज्ञा व्यवस्थाप्यते । रागस्य तु तत्र प्राधान्याद् ऊर्ध्वभागीयस्य संयोजनस्य प्रहाणं रूपरागक्षयपरिज्ञेत्युक्तम् । *सर्वसंयोजनपर्यादान*···

···ध्यानान्तरं भवतीति । आकाशानन्त्यायतनसामन्तकस्येति । लौकिकस्यापि तस्य परिज्ञा फलं व्यवस्थाप्यते; आर्यस्यैवानास्रवविसंयोगप्राप्तिसम्भवात् ।

मौलारूप्यत्रयस्य च ॥ ६६ ॥

मौलानां च त्रयाणामारूप्याणामेकैव सर्वसंयोजनपर्यादानपरिज्ञा फलम् ॥६६॥

आर्यमार्गस्य सर्वाः,

नव परिज्ञाः फलम् ।

द्वे लौकिकस्य,

लौकिकस्य मार्गस्य द्वे अवरभागीयरूपरागक्षयपरिज्ञे फलम् ।

अन्वयस्य च ।

अन्वयज्ञानस्यापि द्वे परिज्ञे फलं पश्चिमे ।

धर्मज्ञानस्य तिस्रस्तु,

पश्चिमा एव त्रैधातुकभावनाहेयप्रतिपक्षत्वात् ।

षट् तत्पक्षस्य पञ्च वा ॥ ६७ ॥

धर्मज्ञानस्य षट् परिज्ञाः फलम्, या एव धर्मज्ञानक्षान्तिज्ञानानाम् । अन्वय-

---

"मौलारूप्यत्रयस्य च" इति । अनास्रवस्य ॥ ६६ ॥

लौकिकस्य मार्गस्य द्वे इति । आर्यस्य लौकिकेन मार्गेण काम-रूपधातु-वैराग्ये ।

अन्वयज्ञानस्यापि द्वे इति । भावनामार्गसंगृहीतस्य । *पश्चिमे* रूपरागक्षय-सर्वसंयोजनपर्यादानपरिज्ञे ।

"धर्मज्ञानस्य तिस्रः" इति । भावनामार्गसंहीतस्य ।

"धर्मज्ञानं निरोधे यन्मार्गे वा भावनापथे ।
त्रिधातुप्रतिपक्षस्तद्" (अभि० को० ७.६९) इति ।

तस्य पश्चिमास्तिस्रः फलम् । अवरभागीयप्रहाणरूपरागक्षयसर्वसंयोजन-पर्यादानपरिज्ञाः । कस्माद् ? इत्याह—*त्रैधातुकभावनाहेयप्रतिपक्षत्वादि*ति ।

"षट् तत्पक्षस्य पञ्च वा" इति । तयोर्धर्मज्ञानान्वयज्ञानयोः *पक्षस्य । षट् पञ्च च* यथायोगम् । पक्षग्रहणेन क्षान्ति-ज्ञानयोर्ग्रहणम् ।

या एव धर्मज्ञान-क्षान्तिज्ञानानामिति । धर्मज्ञानक्षान्तीनां धर्मज्ञानानां चेति समासः । धर्मज्ञानक्षान्तीनां कामावचरदर्शनहेयप्रहाणस्वभावा यथोक्तास्तिस्रः परिज्ञाः फलम् । धर्मज्ञानानामिति भावनामार्गे । दुःखसमुदयज्ञानसंगृहीतानामेका अवरभागीयप्रहाणपरिज्ञा । निरोधमार्ग-संगृहीतानां तु तिस्रोऽप्यवरभागीयप्रहाणरूपरागक्षयसर्वसंयोजनपर्यादान-

ज्ञानपक्षस्य पक्ष, या एवान्वयक्षान्तिज्ञानानाम् । पक्षग्रहणेन हि क्षान्तिज्ञानानि गृह्यन्ते ॥ ६७ ॥

कस्मान्नैकैकं प्रहाणं परिज्ञा व्यवस्थाप्यते ? यस्मात् क्षान्तिफलं तावद् प्रहाणं व्यवस्थाप्यते ।

अनास्रववियोगाप्तेर्भवाग्रविकलीकृतेः ।

हेतुद्वयसमुद्घातात् परिज्ञा,

यत्रैतानि त्रीणि कारणानि भवन्ति तत् प्रहाणं परिज्ञोच्यते । पृथग्जनस्य तावदनास्रवा विसंयोगप्राप्तिर्नास्ति भवाग्रविकलीकरणं चेति नास्य प्रहाणं परिज्ञाख्यां लभते । आर्यस्यापि यत् क्षान्तिफलं तावत् प्रहाणम् । तत्र तावद् दुःखेऽन्वयज्ञानक्षान्तावनास्रवा विसंयोगप्राप्तिरस्ति, न तु भवाग्रविकलीकृतम् । दुःखेऽन्वयज्ञाने उभयमस्ति, न तु हेतुद्वयसमुद्घातः । समुदयदर्शनप्रहातव्यस्य सर्वत्रगहेतोरप्रहीणत्वात् । अन्येषु धर्मान्वयज्ञानेषु सर्वं त्रयमस्ति । अतस्तास्ववस्थासु प्रहाणं परिज्ञाख्यां लभते । ज्ञानफलं तु प्रहाणम् । अतश्च कारणत्रयात् परिज्ञाख्यां लभते । चतुर्थाच्च—

पर्यादानपरिज्ञाः । *या एवान्वयक्षान्तिज्ञानानामिति* । अन्वयज्ञानक्षान्तीनाम्, अन्वयज्ञानानां च । ताश्च रूपारूप्यावचरदर्शनहेयप्रहाणस्वभावा यथोक्तास्तिस्रः परिज्ञाः, द्वे च पश्चिमे इति ॥ ६७ ॥

कस्मान्नैकैकं प्रहाणमिति । दुःखदर्शनहेयप्रहाण-समुदयदर्शनहेयप्रहाणं विस्तरेण यावद् भावाग्रिकस्य मृदुमृदोः प्रकारस्य प्रहाणमिति कस्मान्न गृह्यते ?

"*अनास्रववियोगाप्तेः*" इति । अनास्रवविसंयोगप्राप्तेरित्यर्थः ।

"*भवाग्रविकलीकृतेः*" इति । भवाग्रप्रदेशप्रहाणादित्यर्थः ।

"*हेतुद्वयसमुद्घाताद्*" इति । दुःखसमुदय-दर्शनहेयसर्वत्रगहेतुद्वयप्रहाणादित्यर्थः ।

तत्प्रहाणं परिज्ञेति । एभिः कारणैः प्रकृष्टं तत्प्रहाणमित्यत्र परिज्ञेति व्यवस्थाप्यत इत्यभिप्रायः । *अन्येषु धर्मान्वयज्ञानेष्विति* । समुदयधर्मज्ञानमारभ्य यावत् क्षयज्ञानमित्येतेषु धर्मज्ञानान्वयज्ञानेषु । *ज्ञानफलं तु प्रहाणमिति* । भावनामार्गे । तद्धि न क्षान्तिफलमिति ।

---

१. च—का० ।

धात्वतिक्रमात् ।। ६८ ।।

यदा धातुं समतिक्रामति । कृत्स्नधातुवैराग्यात् उभयसंयोगविसंयोगपञ्चमं[1] कारणमाहुराभिधर्मिकाः[2] । यः प्रकारः प्रहीणो यदि तत्रान्येन तदालम्बनेन क्लेशेन विसंयुक्तो भवतीति ।

स तु नान्यत्[3] उभयहेतुसमुद्घातात् धातुसमतिक्रमाच्चेति न ब्रूमः ।। ६८ ।।

कः कतिभिः परिज्ञाभिः समन्वागतः ?

नैकया पञ्चभिर्यावद् दर्शनस्थः समन्वितः ।

पृथग्जनस्तावन्नैव समन्वागतः । आर्योऽपि दर्शनमार्गस्थो यावत्समुदय-

---

"*धात्वतिक्रमात्*" इति । च-शब्दो लुप्तनिर्देशः । धात्वतिक्रमाच्चेति । अत एव विव्रियते—चतुर्थाच्चेति । *यदा धातुं समतिक्रामति* । कामधातुं वा समतिक्रामति, तदा परिज्ञाख्यां लभते—इति वाक्यशेषः । कस्मात् ? *कृत्स्नधातुवैराग्यात्* । कृत्स्नस्य धातोर्वैराग्यात्, न विकलीकरणमात्रत्वात् । तदा हि सुष्ठु प्रहाणमित्यभिप्रायः ।

उभयसंयोगविसंयोगमिति । आलम्ब्यालम्बकक्लेशलक्षणः संयोगः = उभयसंयोगः । तस्माद् विसंयोगः = उभयसंयोगविसंयोगः । *तत्पञ्चमं कारणमाहुराभिधर्मिकाः* । अनेन च कारणेन प्रहाणं परिज्ञेत्युच्यते इति ।

यः प्रकारः प्रहीण इति । दुःखदर्शनप्रहातव्यो यावन् मार्गदर्शनप्रहातव्यो भावनाप्रहातव्यश्च । *यदि तत्र* प्रहीणे प्रकारे, अन्येन तदालम्बनेन क्लेशेन दर्शनप्रहातव्येन भावनाप्रहातव्येन विसंयुक्तो भवति । एवमिदमपि पञ्चमं कारणं प्रहाणस्य परिज्ञाविधाने आहुरपरे ।

स तु नान्यदिति विस्तरः । स तूभयसंयोग *उभयहेतुसमुद्घातात्* दुःखदर्शनप्रहातव्यस्य समुदयदर्शनप्रहातव्यस्य च सर्वत्रगहेतोः समुद्घातात् *धातुसमतिक्रमाच्च नान्यः* । तथा हि दुःखदर्शनप्रहातव्येषु प्रहीणेष्वपि न तावदस्ति हेतुद्वयसमुद्घातो यावत्तदालम्बनः समुदयदर्शनप्रहातव्यः सर्वत्रगहेतुरप्रहीणो भवति । भावनाप्रहातव्येषु च प्रहीणेष्वपि यावदष्टासु प्रकारेषु न तावद् धात्वतिक्रमोऽस्ति, यावन्न नवमस्यापि प्रकारस्य प्रहाणमित्यतो न पुनर्ब्रूमः ।। ६८ ।।

नैकयेति । विस्तरः—*पृथग्जनस्तावन्नैव समन्वागतः* । अनास्रवं विसंयोग-

---

१. °वियोगं–का० । २. ०माहुरपरे—का० । ३. नान्यस्य—का० ।

धर्मज्ञानक्षान्तौ[1] नैव समन्वागतः। समुदयधर्मज्ञान एकया समन्वागतः। समुदयान्वयज्ञाने[2] द्वाभ्याम्, निरोधधर्मज्ञाने[3] तिसृभिः, निरोधान्वयज्ञाने चतसृभिः, मार्गधर्मज्ञाने पञ्चभिः।

भावनास्थः पुनः षड्भिरेकया वा द्वयेन वा ॥ ६९ ॥

भावनामार्गस्थः पुनरार्यपुद्गलो मार्गान्वयज्ञाने षड्भिः परिज्ञाभिः समन्वागतो यावत् कामवैराग्यं न प्राप्तः। परिहीणोऽपि ततः कामवैराग्यं प्राप्तः पूर्वं पश्चाद् वा एकया अवरभागीयप्रहाणपरिज्ञया। अर्हत्त्वप्राप्त[4] एकयैव सर्व-

प्राप्त्यभावात्। *आर्योऽपि दर्शनमार्गस्थो यावत् समुदयधर्मज्ञानक्षान्तौ।* यावच्छब्देन दुःखधर्मान्वयज्ञानक्षान्तिज्ञानेषु समुदयधर्मज्ञानक्षान्तौ च नैव *समन्वागतः।* हेतुद्वयस्याप्रहीणत्वात्। *समुदयधर्मज्ञान एकया समन्वागतः।* समुदयान्वयज्ञानक्षान्तावप्येकयैव समन्वागत इत्यवगन्तव्यम्। *समुदयान्वयज्ञाने द्वाभ्याम्।* पूर्वोक्तया एकया कामावचरदुःखसमुदयदर्शनहेयप्रहाणपरिज्ञया, रूपारूप्यावचरदुःखसमुदयदर्शनप्रहाणपरिज्ञया च। निरोधधर्मज्ञानक्षान्तावपि द्वाभ्यामेव। *निरोधधर्मज्ञाने तिसृभिरिति* नेयम्, यावत् *पञ्चभिः।* दर्शनस्थः समन्वागतो न षड्भिः, षोडशस्य क्षणस्य भावनामार्गसंगृहीतत्वात्।

मार्गान्वयज्ञाने षड्भिरिति। पूर्वोक्ताभिश्च रूपारूप्यावचरमार्गदर्शनप्रहाण-परिज्ञया च।

ननु च पश्चाद् वक्ष्यति—

"चतुःफलव्यवस्था तु पञ्चकारणसम्भवात्।
पूर्वत्यागोऽन्यमार्गाप्तिः क्षयसंकलनं फले॥

ज्ञानाष्टकस्य लाभोऽथ षोडशाकारभावना।" (अभि० को० ६.५३) इति? भवति प्रहाणसङ्कलनम्, न तु परिज्ञासंकलनम् इत्यविरोधः। *यावत् कामवैराग्यं न प्राप्त इति।* यावच्छब्देन भावनाहेयक्लेशप्रथमप्रकारप्रहाणे यावत् अष्टमप्रकारप्रहाणेऽपि षड्भिरेव समन्वागतः। *परिहीणोऽपि तत इति।* कामवैराग्यपरिहाण्या हि तत्संकलनविगतः। *कामवैराग्यं प्राप्तः पूर्वं पश्चाद् वेति।* अभिसमयात् पूर्वं पश्चाद् वा। कथम्? लौकिकेन मार्गेण कामवीतरागो भूत्वा नियाममवक्रान्तो मार्गान्वयज्ञाने *एकया अवरभागीयप्रहाणपरिज्ञया*

१. °क्षान्ति–का०। २. समुदयेऽ°–का०।
३. निरोधे– का०। ४. अर्हत्त्वं°–का०।

संयोजनपर्यादानपरिज्ञया। परिहीणोऽपि रूपावचरेण पर्यवस्थानेनैकया अवर-भागीयप्रहाणपरिज्ञया। रूपवैराग्यं प्राप्तो द्वाभ्यामवरभागीयप्रहाण-रूपरागक्षय-परिज्ञाभ्याम्। परिहीणोऽप्यारूप्यावचरेण[1] पर्यवस्थानेनाभ्यामेव ॥ ५९ ॥

किं पुनः कारणमनागाम्यर्हतोरेकैव परिज्ञा व्यवस्थाप्यते, न भूयस्यः ? यस्मात्

तासां संकलनं धातुवैराग्यफललाभतः ।

द्वाभ्यां कारणाभ्यां परिज्ञानां संकलनं भवति, एकत्वेन व्यवस्थापनम्—

समन्वागतः। यस्मादसावार्यः षोडशक्षणं प्राप्तोऽनागामी एव भवति, न स्रोतआपन्नः सकृदागामी वा। पञ्चावरभागीयप्रहाणाच्चानागामीति पठ्यते। तस्माद् दर्शनहेयप्रहाणानां पञ्चावरभागीयप्रहाणस्य च संकलनाद् एकयैवावर-भागीयप्रहाणपरिज्ञया समन्वागतः। पश्चाद् वा अभिसमयाद् आनुपूर्वीकः कामवैराग्यप्राप्त एकयैवावरभागीयप्रहाणपरिज्ञया समन्वागतः। *अर्हत्त्वप्राप्त एकयैवेति*। तदा परिज्ञासंकलनात्। *परिहीणोऽपि रूपावचरेणेति* विशेषणं कामावचरेण परिहाणौ षट्परिज्ञासमन्वागमपरिहारार्थम्, आरूप्यावचरेण च परिहाणौ द्विपरिज्ञासमन्वागमपरिहारार्थमिति। *रूपवैराग्यं प्राप्तो द्वाभ्यामिति*। अनागामी रूपवीतराग इत्यर्थः।

धातुवैराग्येण कस्मान्न संकलनं भवति ? फलप्राप्त्यभावात्। धातुवैराग्य-फलप्राप्तिभ्यां समस्ताभ्यां कारणाभ्यां परिज्ञासंकलनमिष्यते, न केवलेन परिहीणोऽपि। *आरूप्यावचरेणेति*। अर्हत्त्वप्राप्तिसङ्कलितयोरवरभागीयप्रहाण-रूपरागक्षयपरिज्ञयोरारूप्यावचरेण क्लेशेनार्हत्त्वात् परिहाणौ पुनर्लाभात्। रूपावचरेण तु परिहाणावेकया समन्वागतः स्यात्, कामावचरेण च षड्भिः समन्वागतः स्याद् इत्यारूप्यावचरपर्यवस्थानग्रहणम् ॥ ६९ ॥

अनागाम्यर्हतोरिति। कामवीतरागानागामी इह विवक्षितः, रूपवीतरागा-नागामिनः परिज्ञाद्वयसमन्वागमवचनात्। *न भूयस्य* इति। न बहुतराः। आनु-पूर्वीकस्रोतआपन्नत्वादित्यभिप्रायः। *द्वाभ्यां कारणाभ्यामिति*। व्याख्यातम्। *सङ्कलनमिति* कोऽर्थः ? *एकत्वेन व्यवस्थापनमिति* योऽर्थः। तयोश्चावस्थयोरिति। कामवीतरागानागाम्यर्हत्त्वावस्थयोरेतदुभयम्—*धातुवैराग्यं फलप्राप्तिश्चेति*। *एकपरिज्ञोच्यत* इति। रूपावीतरागस्यानागामिन एकावरभागीयप्रहाणपरिज्ञा अर्हतोऽप्येका सर्वसंयोजनपर्यादानपरिज्ञेति।

---

१. प्रहीणो°–का०।

धातुवैराग्यात्, फलप्राप्तितश्च । तयोश्चावस्थयोरेतदुभयं भवति । अतः सर्वं प्रहाणं संकलय्यैकपरिज्ञोच्यते[1] ।

अथ कः कति परिज्ञास्त्यजति ? लभते वा ?

एकां द्वे पञ्च षट् कश्चिज्जहात्याप्नोति पञ्च न ।।७०।।

एकां त्यजति अर्हत्त्वात् कामवैराग्याद् वा परिहीयमाणः । द्वे परिज्ञे त्यजति अनागामी रूपवीतरागः कामवैराग्यात् परिहीयमाणः । पञ्च त्यजति वीतरागपूर्वी मार्गान्वयज्ञाने । स ह्यवरभागीयप्रहाणपरिज्ञालाभे पूर्विकाः पञ्च परिज्ञास्त्यजति । षट् परिज्ञास्त्यजत्यानुपूर्विकः; कामवैराग्यात् ।

लाभोऽप्येवमेव[2] । कश्चिदेकां[3] लभते, यः कश्चिदपूर्वं[4] लभते ।

"एकां द्वे" इति विस्तरः । एकां कश्चित् जहाति, त्यजनीत्यर्थः । कश्चित् द्वे, कश्चित् पञ्च । कश्चित् षट् जहाति आप्नोति वा । 'कश्चिदेकम्, कश्चिद् द्वे, कश्चित् षट्, कश्चित् पञ्च आप्नोति' इत्येतन्नास्ति, अत आह—*पञ्च नेति* । पञ्च नैव कश्चिदाप्नोति इति सूत्रार्थनयः ।

वृत्तिस्तु विव्रियते—*अर्हत्त्वात् परिहीयमाणो* येन केनचित् चित्तेन सर्वसंयोजनपर्यादानपरिज्ञामेकां त्यजति, सङ्कलने तस्या एकैकस्या अर्हत्त्वावस्थायामस्तित्वात् । एवं *कामवैराग्यात् परिहीयमाणो* रूपवीतरागोऽनागामी एकामेवावरभागीयप्रहाणपरिज्ञाम् । *द्वे परिज्ञे त्यजतीति* । अवरभागीयप्रहाणपरिज्ञाम्, रूपरागक्षयपरिज्ञां च । कोऽसौ ? इत्याह—*अनागामी रूपवीतरागः कामवैराग्यात् परिहीयमाण* इति । *पञ्च त्यजति वीतरागपूर्वी मार्गान्वयज्ञान* इति । अभिसमयचित्ते षोडश । *स ह्यवरभागीयप्रहाणपरिज्ञालाभे* । लौकिकमार्गप्राप्तस्य तस्यानास्रवविसंयोगप्राप्त्या पूर्विकाः पञ्च परिज्ञाः पञ्चदशक्षणलाभास्त्यजति । षष्ठीं तु रूपारूप्यावचरमार्गदर्शनहेयप्रहाणपरिज्ञां न त्यजति । किन्तु धातुवैराग्यफललाभतोऽत्रावरभागीयप्रहाणपरिज्ञायां सङ्कलितेति नष्टरूपेव सा नोपन्यस्यते । *आनुपूर्वीको यो* न वीतरागपूर्वी कामवैराग्यात् कारणात् षट् त्यजति यस्त्रैधातुकानां दर्शनप्रहातव्यानां प्रहाणपरिज्ञाः ।

लाभोऽप्येवमिति । *कश्चिदेकं लभते* पञ्च मुक्त्वा । यावत् षट् लभते । *यः कश्चिदपूर्वं लभत* इति । दर्शनमार्गस्थो भावनामार्गस्थो वा नवानां

१. एका परिज्ञो°–का० । २. लाभे०–का० ।
३. °परिज्ञां–का० । ४. °दपूर्वां–का० ।

कश्चिद् द्वे, यः केवलादारूप्यवैराग्यात्[1] परिहीयते । कश्चित् षट्, योऽनागामिफलात् परिहीयते । पञ्च तु नैव कश्चिल्लभते ॥ ७० ॥

समाप्तः परिज्ञाप्रसङ्गः ॥

अभिधर्मकोशभाष्येऽनुशयनिर्देशो नाम

पञ्चमं कोशस्थानं समाप्तमिति[2] ॥

परिज्ञानां योऽप्रतिलब्धपूर्वां प्रतिलभते प्रथमतः, स तामेकां लभते । भावनामार्गेऽपि हि वीतरागपूर्वी दर्शनमार्गान्तेऽवरभागीयप्रहाणपरिज्ञामेकां लभते । आनुपूर्वीकोऽपि कामवैराग्ये नवमे विमुक्तिमार्गे तामेव लभते । अर्हन्नप्यन्यामेकां लभत इति । *केवलादारूप्यवैराग्यात् परिहीयत* इति । नान्यवैराग्यादिति दर्शयति । स ह्यवरभागीयप्रहाणपरिज्ञाम्, रूपरागक्षयपरिज्ञां च लभते । कश्चित् *षड् योऽनागामिफलात् परिहीयत* इति । आनुपूर्वीकोऽनागामी । न हि वीतरागपूर्विणः परिहाणिरस्ति; तद्वैराग्यस्य द्विमार्गप्रापणात् । अत एव च *नैव कश्चित् पञ्च लभते* । वीतरागपूर्विणो हि यदि परिहाणिरभविष्यत्, स एव युगपत् पञ्च परिज्ञा अलप्स्यतेति ॥ ७० ॥

आचार्ययशोमित्रकृतायाम् अभिधर्मकोशव्याख्यायाम्

अनुशयनिर्देशो नाम पञ्चमं कोशस्थानं

समाप्तम्

---

१. ०आरूप्यधातुवैराग्यात्–का० । २. श्रीलामावाकस्य यदत्र पुण्यम्—का० ।

* नमो बुद्धाय *

षष्ठं कोशस्थानम्

(मार्गपुद्गलनिर्देशः)

उक्तं यथा प्रहाणं परिज्ञां[1] लभते । तदपि च—

क्लेशप्रहाणमाख्यातं सत्यदर्शनभावनात् ।

दर्शनहेया भावनाहेयाश्च क्लेशा इति विस्तरेणोक्तम्[2] । ताविदानीं दर्शनभावनामार्गौ किमनास्रवौ ? सास्रवौ ? इति वक्तव्यम् । अत इदमुच्यते—

द्विविधो भावनामार्गो दर्शनाख्यस्त्वनास्रवः ॥१॥

द्विविधो भावनामार्गः—लौकिकः, लोकोत्तरश्च । दर्शनमार्गस्तु लोकोत्तर एव, त्रैधातुकप्रतिपक्षत्वात् । नवप्रकाराणां दर्शनहेयानां सकृत्प्रहाणाच्च । न हि लौकिकस्य एषा शक्तिरस्ति ॥ १ ॥

स्फुटार्थव्याख्यायाम्

षष्ठं कोशस्थानम्

पञ्चमस्य षष्ठस्य च कोशस्थानयोः सम्बन्धमुपदर्शयन्निदमुपन्यस्यति—*उक्तं यथा प्रहाणमित्यादि । यथा प्रहाणं परिज्ञा लभत इति ।* फले हेतूपचारादिति वचनात् । तदपि च *"क्लेशप्रहाणमाख्यातम्"* उक्तम् । कथम् ? इत्याह—*"सत्यदर्शनभावनाद्"* इति । द्वन्द्वैकवद्भावनिर्देशः । सत्यानां दर्शनाद् भावनाच्च भावनाया इति वा सत्यदर्शनभावनात् कारणाद् *दर्शनहेया भावनाहेयाश्च क्लेशा इति विस्तरेणोक्तम् ।*

"दर्शिताः सप्त सप्ताष्टौ त्रिद्विदृष्टिविवर्जिताः ।
यथाक्रमं प्रहीयन्ते कामे दुःखादिदर्शनैः ।
चत्वारो भावनाहेयाः" (अभि० को० ५. ४)

इत्यादिना । सत्यदर्शनं च दर्शनमार्गेण, सत्यभावनं च भावनामार्गेणेत्यत इदमुच्यते । *ताविदानीं दर्शनभावनामार्गौ किमनास्रवौ सास्रवाविति ।*

---

१. परिज्ञाख्यां—का० । २. विस्तरेणाख्यातम्—का० ।

'सत्यदर्शनात्' इत्युक्तम् । कानीमानि सत्यानि ? कति च ?

सत्यान्युक्तानि चत्वारि,

क्वोक्तानि ? सास्रवानास्रवधर्मनिर्देशे[1] । "अनास्रवा मार्गसत्यम्" इति स्वशब्देन "प्रतिसंख्यानिरोधो यो विसंयोगः" इति निरोधसत्यम्, 'दुःखं समुदयो लोकः" इत्यत्र दुःख समुदयसत्ये ।

किमेष एवैषामनुक्रमः ? नेत्याह । किं तर्हि ?

दुःखं समुदयस्तथा ।

निरोधमार्ग इति,

एष एषामनुक्रमः । स्वभावस्तु यथा पूर्वमुक्तस्तथैवेतिप्रदर्शनार्थस्तथाशब्दः ।

स पुनरयम्—

एषां यथाऽभिसमयं क्रमः ॥२॥

यस्य हि सत्यस्याभिसमयः पूर्वस्तस्य[2] पूर्वनिर्देशः । इतरथा हि पूर्वं हेतुनिर्देशोऽभविष्यत्, पश्चात् फलनिर्देशः । केषांचिदुत्पत्त्यनुकूला देशना, यथा स्मृत्युपस्थानध्यानादीनाम् । केषांचित् प्ररूपणानुकूला देशना, यथा सम्यक्

मार्गनिर्देशोपन्यास इति सम्बन्धः । *त्रैधातुकप्रतिपक्षत्वादिति* । दर्शनमार्गस्य । लौकिकत्वे सति भवाग्रप्रतिपक्षो न स्यादिति । *किं च नवप्रकाराणां दर्शनहेयानां सकृत्प्रहाणाच्च* । न भावनामार्गवत् । *न हि लौकिकस्यैषा शक्तिरस्ति* । त्रैधातुकप्रहाणे च प्रकारप्रहाणे च । यदि लोकोत्तरस्य नवप्रकारसकृत्प्रहाणे शक्तिः, भावनाहेयानामपि लोकोत्तरेण सकृत्प्रहाणप्रसङ्गः । लोकोत्तरेणैव सकृत्प्रहाणमित्यवधार्यते । न तु सकृत्प्रहाणमेव लोकोत्तरेणेति, अतो न तत्प्रसङ्गः । भावनाहेया हि क्लेशा दृढाः; सवस्तुकत्वात् । अतो लोकोत्तरेणाप्येषां न सकृत्प्रहाणम् ॥ १ ॥

इतरथा हीति । यदि यथाभिसमयं निर्देशो नाभिप्रीयेत । पूर्वं *हेतुनिर्देशः* समुदयसत्यनिर्देशः । हेतूनां लोके पूर्वं दृष्टत्वात् । *यथा स्मृत्युपस्थानध्यानादीनामिति* । *तद्यथा स्मृत्युपस्थानादीनामुपपत्त्यनुकूला देशना* । कायस्मृत्युपस्थानं

---

१. द्र० अभि० को० प्र० को०, ४-८ का० । २. पूर्वस्य—का० ।

प्रहाणानाम्। न ह्येष नियमो यत् पूर्वमुत्पन्नानां प्रहाणाय छन्दं जनयति, पश्चादनुत्पन्नानामनुत्पादायेति। सत्यानां त्वभिसमयानुकूला देशाना।

किं पुनः कारणमेवमेवैषां सत्यानामभिसमयः ? यत्र हि सक्तो येन च बाध्यते यतश्च मोक्षं प्रार्थयते, तदेवादौ व्यवचारणावस्थायां दुःखसत्यं परीक्ष्यते। पश्चात् कोऽस्य हेतुरिति समुदयसत्यम्, कोऽस्य निरोध इति निरोधसत्यम्, कोऽस्य इति मार्गसत्यम्। व्याधिं दृष्ट्वा तन्निदानक्षयभेषजान्वेषणवत्।

सूत्रेऽप्येष एव सत्यानां दृष्टान्तो दर्शितः। कतमस्मिन् सूत्रे ? "चतुर्भिरङ्गैः समन्वागतो भिषक् शल्यापहर्ता[1]" इत्यत्र। यथा च व्यवचारणावस्थायां सत्यपरीक्षा

हि पूर्वमुत्पद्यते यथौदारिकालम्बनतः, सूक्ष्मौदारिकप्रचारतो वा, पूर्वोत्तरहेतुफलभावतो वा। ततो वेदनास्मृत्युपस्थानम्, ततश्चित्तस्मृत्युपस्थानमित्येषामुपपत्त्यनुकूला देशना। एवं ध्यानानाम्। आदिशब्देन विमोक्षाभिभ्वायतनकृत्स्नायतनादीनामप्युपपत्त्यनुकूला देशना। *केषाञ्चित् प्ररूपणानुकूलेति*। प्रदर्शनानुकूला। अवबोधानुकूलेत्यर्थः। *यथा सम्यक्प्रहाणानामिति*। कृष्णशुक्लपक्षयोः प्रत्येकमुत्पन्नानुत्पन्नभेदतः। उत्पन्नं हि सुखावबोधम् नानुत्पन्नम्। कृष्णपक्षो वा विनेयजनेन सुखमवबुध्यते। कथम्? उत्पन्नानां पापकानामकुशलानां धर्माणां प्रहाणाय छन्दं जनयति व्यायच्छते वीर्यमारभते चित्तं प्रगृह्णाति प्रणिदधाति। अनुत्पन्नानामनुत्पादाय छन्दं जनयतीति पूर्ववत्। अनुत्पन्नानां कुशलानां धर्माणामुत्पादाय छन्दं जनयतीति पूर्ववत्। उत्पन्नानां स्थितये असम्मोषतायै छन्दं जनयतीति पूर्ववत्। *न ह्येष नियमो यत्पूर्वमुत्पन्नानां प्रहाणाय छन्दं जनयतीति। पश्चादनुत्पन्नानामनुत्पादायेति*। किं तर्हि ? पूर्वं चानुत्पन्नानामनुत्पादाय छन्दं जनयति, पश्चाच्चोत्पन्नानां प्रहाणायेत्येदुदाहरणम्। एवं शुक्लपक्षोऽपि योज्यः। *सत्यानां त्वभिसमयानुकूलेति*। हेतुफलयोः पूर्वपश्चाद्भावेन दुःखसमुदयसत्ययोः पश्चात्पूर्वनिर्देशप्रसङ्ग इति दर्शयति।

यत्र हि सक्त इति। दुःखसत्ये। येन बाध्यत इति तेनैवम्। *यतश्च मोक्षमिति*। तत एव दुःखसत्यात्। तदेवादौ प्रयोगावस्थायाम्। कस्मात्? इत्याह—*व्यवचारणावस्थायां* परीक्षावस्थायाम्। निर्वेधभागीयावस्थायामित्यर्थः। *व्याधिं दृष्ट्वेति*। व्याधिर्दुःखसत्यस्योपमानम्। *तन्निदानं* समुदयसत्यस्य। *तत्क्षयो* निरोधसत्यस्य। *तद्भेषजं* मार्गसत्यस्योपमानम्।

सूत्रेऽप्येष सत्यानां दृष्टान्त इति। *व्याध्यादिसूत्रे*। कथम्? "चतुर्भिरङ्गैः

---

१. तल्पसर्ता—का०।

तथाभिसमयावस्थायां सत्याभिसमयः। पूर्वविधात्, दृष्टभूमिनिःसंगाश्वप्रसरणवत्[1]।

अभिसमय इति कोऽर्थः? अभिसंबोधः। इणो बोधनार्थत्वात्। कस्मादनास्रव एव, न सास्रवः? स हि निर्वाणाभिमुखः सम्यग्बोधः। सम्यगिति तत्त्वेन। तत्र फलभूता उपादानस्कन्धा दुःखसत्यम्। हेतुभूताः समुदयसत्यम्, समुदेत्यस्मादिति कृत्वा। अत एव तयोः फलहेतुभावान्नामतो भेदः, न द्रव्यतः। निरोधमार्गयोस्तु द्रव्यतोऽपि।

आर्यसत्यानीति सूत्र उच्यन्ते। कोऽस्यार्थः? आर्याणामेतानि सत्यानि तस्मादार्यसत्यानीति सूत्र एवोक्तम्। किमन्येषामेतानि मृषा? सर्वेषामेतानि सत्यानि; अविपरीतत्वात्। आर्यैस्तु यथैतानि तथा दृष्टानि, नान्यैः। अत आर्याणामेतानि सत्यान्युच्यन्ते न त्वनार्याणाम्; विपरीतदर्शनात्।

समन्वागतो भिषक् शल्यापहर्ता राजार्हश्च भवति राजयोग्यश्च, राजाङ्गत्वे च संख्यां गच्छति। *कतमैश्चतुर्भिः? आबाधकुशलो भवति, आबाधसमुत्थानकुशलः, आबाधप्रहाणकुशलः*, प्रहीणस्य चाबाधस्यायत्यामनुत्पादकुशलः। एवमेव चतुर्भिरङ्गैः समन्वागतस्तथागतोऽर्हन् सम्यक्सम्बुद्धोऽनुत्तरो भिषक् शल्यापहर्तेत्युच्यते। कतमैश्चतुर्भिः? इह भिक्षवस्तथागतोऽर्हन् सम्यक्सम्बुद्ध इदं दुःखमार्यसत्यमिति यथाभूतं प्रजानाति। अयं दुःखसमुदयः, अयं दुःखनिरोधः, इयं दुःखनिरोधगामिनी प्रतिपदार्यसत्यमिति यथाभूतं प्रजानाति" इति। *पूर्वविधादिति*। पूर्वाक्षेपात्। *दृष्टभूमिनिःसङ्गाश्वप्रसरणवदिति*। यथा भूमौ दृष्टायां निःसङ्गमश्वस्य प्रसरणम्, तद्वत्। *अश्वधावनवदिति* केचित् पठन्ति। 'धावि' प्रकृत्यन्तरं व्याचक्षते। *इणो बोधनार्थत्वादिति*। सर्वे गत्यर्था बोधनार्थाऽपि भवतीति।

द्रव्यतोऽपीत्यपिशब्दात् नामतोऽपीति दर्शितम्।

अविपरीतत्वादिति। यस्मात् तदार्याणामन्येषां चाविपरीतम्। दुःखमेव नान्यथा। *आर्यैस्तु यथैतानि* सत्यानि *तथा दृष्टानि*। दुःखसत्यं दुःखतः अनित्यतः शून्यतोऽनात्मतश्च। एवं यावन्मार्गो मार्गतः न्यायतः प्रतिपत्तितो नैर्याणिकतश्च। *नान्यैरनार्यैः एवं दृष्टानि*। *अत आर्याणामेतानि सत्यान्युच्यन्ते*। *न त्वनार्याणां* सत्यान्युच्यन्ते। कस्मात्? *विपरीतदर्शनात्*। ते हि दुःखमदुःखत

---

१. धावनवत्—का०।

"यदार्याः सुखतः प्राहुस्तद् परे दुखतो विदुः ।
यत् परे सुखतः प्राहुस्तदार्या दुःखतो विदुः ॥" (　　)

इति गाथा । द्वे आर्याणां सत्ये द्वे आर्ये चार्याणां च सत्ये इत्यपरे ॥२॥

यदा वेदनैकदेशो दुःखस्वभावः, कथं सर्वे सास्रवाः संस्कारा दुःखमित्युच्यन्ते ?

दुःखास्त्रिदुःखतायोगाद् यथायोगमशेषतः ।
मनापा अमनापाश्च तदन्ये चैव सास्रवाः ॥३॥

तिस्रो हि दुःखताः—दुःखदुःखता, विपरिणामदुखता, संस्कारदुःखता च । ताभिर्यथायोगमशेषतः सर्वे सास्रवाः संस्कारा दुःखाः ।

तत्र मनापा विपरिणामदुःखतया, अमनापा दुःखदुःखतया । तेभ्योऽन्ये संस्कारदुःखतया ।

के पुनर्मनापाः ? केऽमनापाः ? के नोभयथा ?

इत्येवमादिभिराकारैर्दुःखसत्यं पश्यन्ति, समुदयमसमुदयत इत्येवमादिभिः, निरोधमनिरोधत इत्येवमादिभिः, मार्गममार्गत इत्येवमादिभिरिति ।

तत् परे दुःखतो विदुरिति । तद्यथा निरोधसत्यं व्यथन्तेऽपुनर्भवात् प्रपातादिव बालिशा इति ।

आर्यास्तु दुःखतो विदुरिति उपादानस्कन्धपञ्चकः ।

द्वे आर्याणा सत्ये इति । दुःखसमुदयसत्ये ; अविपरीतदर्शनात् । *द्वे आर्ये* । कुशलतया, अनास्रवतया च । आर्याणां च सत्ये, अविपरीतदर्शनात् । एवमेकशेषनिर्देशाच्चार्यसत्ये इति भवति ॥ २ ॥

यदा वेदनैकदेशो दुःखस्वभाव इति । *वेदनास्कन्धैकदेशो* दुःखदौर्मनस्यस्वभावः ।

"यथायोगमशेषतः" इति । *मनापा अपि विपरिणामदुःखतया* संस्कारदुःखतया च दुःखा । *अमनापा दुःखदुःखतया* संस्कारदुःखतया च । *तदन्ये* दुःखाः *संस्कारदुःखतयैवेति यथायोगार्थः* । मन आप्नुवन्तीति मनापाः । पुनः सन्धिकरणं चात्रेति व्याख्यातम् । *तेभ्योऽन्य* इति मनापामनापेभ्योऽन्य इति ।

तिस्रो वेदना यथाक्रमं तद्वशेन सुखवेदनीयादयोऽपि संस्कारा मनापादिसंज्ञां लभन्ते। सुखाया हि वेदनाया विपरिणामेन दुःखता। सूत्र उक्तम्—"सुखा वेदना उत्पादसुखा स्थितिसुखा विपरिणामदुःखा" इति। दुःखायाः दुःखस्वभावेनैव दुःखता। "दुःखा वेदना उत्पाददुःखा स्थितिदुःखा" (   ) इति सूत्रे। अदुःखासुखा-वेदनायाः संस्कारेणैव दुःखता। "प्रत्ययाभिसंस्करणाद्यदनित्यं तद्दुःखम्" इति।

वेदनावत् तद्वेदनीया अपि संस्कारा वेदितव्याः[१]।

तिस्रो वेदना यथाक्रममिति। सुखा वेदना मनापा, दुःखा अमनापा, अदुःखासुखा नैव मनापा नामनापेत्यर्थः। *तद्वशेनेति*। वेदनावशेन। अवेदना-स्वभावा अपि रूपशब्दादयस्तदनुकूलत्वात् *मनापादिसंज्ञां लभन्ते*। *विपरिणामेन दुःखतेति*। अनित्यताविपरिणामेनेत्यर्थः। यथोक्तम्—

> "हा चैत्ररथ हा वापि हा मन्दाकिनि हा प्रिये।
> इत्यार्त्ता विलपन्तोऽपि गां पतन्ति दिवौकसः"॥ (   )

इति। *दुःखस्वभावेनैवेति*। उपघातस्वभावेनेत्यर्थः। *दुःखा वेदना उत्पाददुःखा स्थितिदुःखेति*। नन्वेषा अर्थापत्तितो विपरिणामसुखा प्राप्नोति, तथा च सति लक्षणसङ्करः स्यात्? नेदमस्या लक्षणम्। किं तर्हि? विदूषणार्थमयमुपदेश इति। अथ वा भवत्वेव सात्र। येन रूपेण विदूष्यते, तदेवेहापेक्षते[२] इति दुःखैव भवति। यथा—सुखा वेदना उत्पादस्थितिसुखत्वात् सुखापि सती विपरिणाम-दुःखतया दुःखेत्येव विदूष्यते; विदूषणीयत्वेनाभिप्रीयमाणत्वादिति। *संस्कारेणैव दुःखतेति*। संस्करणेनैव जननेनैवेत्यर्थः। यदनित्यम् तद् दुःखम्, यन्न नियतस्थितम् तद् दुःखम्, यज्जायते विनश्यति च तद् दुःखमित्यर्थः। तेनोक्तम्—*प्रत्ययाभिसंस्करणादिति*। प्रत्ययैरभिसंस्क्रियते यस्मात्। तस्मात् तद् दुःखमिति। *वेदनावत्तद्वेदनीया अपि संस्कारा वेदितव्या* इति। सुखवेदनीयानां संस्काराणां विपरिणामेन दुःखता। सुखवेदनीयाः संस्कारा उत्पादसुखाः स्थितिसुखा विपरिणामदुःखा इति। दुःखवेदनीयानां संस्काराणां दुःखवेदनीय-स्वभावेनैव दुःखता। दुःखवेदनीयाः संस्कारा उत्पाददुःखा स्थितिदुःखा इति। अदुःखासुखवेदनीयानां संस्काराणां संस्कारेणैव दुःखताः प्रत्ययाभिसंस्करणात्। यदनित्यं तद् दुःखमिति।

---

१ उच्यन्ते—का०। २. तदेवेपेक्षते—जा०।

दुःखमेव दुःखता दुःखदुःखता। एवं यावत् संस्कारा एव दुःखतेत्यपरे। असाधारणत्वात् मनापामनापानां विपरिणामदुःखदुःखते उक्ते। सर्वे तु संस्काराः संस्कारदुःखतया दुःखाः। तांस्त्वार्या एव पश्यन्ति।

आह चात्र—

"ऊर्णापक्ष्म यथैव हि करतलसंस्थं न वेद्यते पुम्भिः।
अक्षिगतं तु तथैव हि जनयत्यरतिं च पीडां च॥
करतलसदृशो बालो न वेत्ति[2] संस्कारदुःखतापक्ष्म।
अक्षिसदृशस्तु विद्वांस्तेनैवोद्विज्यते गाढम्"॥ इति

न हि बालानामावीचिकेष्वपि स्कन्धेषु तथा दुःखबुद्धिः प्रवर्तते, यथार्याणां भावाग्रिकेष्वपीति। एवं तर्हि मार्गेऽपि[1] संस्कारदुःखताप्रसङ्गः? संस्कृतत्वात्। प्रतिकूलं हि दुःखमिति लक्षणान्न मार्गो[2] दुःखम्। न हि तस्योत्पाद आर्याणां

दुःखमेव दुःखता दुःखदुःखता। यावदिति वचनात् विपरिणाम एव दुःखता विपरिणामदुःखता, संस्कार एव दुःखता *संस्कारदुःखतेति* वाच्यम्। अयं पर्यायो विग्रहेणैव विशिष्टो नार्थेन। स एव ह्यत्रार्थो ग्रहीतव्यः। *असाधारणत्वादिति* विस्तरः। मनापाः संस्कारा असाधारणा दुःखदुःखतायाः। अतस्तेषामसाधारणत्वाद् विपरिणामदुःखतोक्ता। *अमनापाश्चासाधारणा* विपरिणामदुःखतायाः। अतस्तेषा*मसाधारणत्वाद्* दुःखदुःखतोक्तेति। *सर्वे तु मनापादयः संस्कारदुःखतया दुःखाः*; तस्या व्यापिनीत्वात्। यदि सर्वेऽपि तथा दुःखाः, कस्मात् सर्वे (विपरिणामदुःखतया) न पश्यन्तीति? अतः आह—*तां स्त्वार्या एव पश्यन्ति*। नान्ये। कथमिदमुपन्यस्यते? *आह चात्रेति* सर्वम्।

एवं तर्हीति। यदि संस्कारदुःखतया सर्वेऽपि संस्कारा दुःखाः, *मार्गेऽपि संस्कारदुःखताप्रसङ्गः*। *संस्कृतत्वात्*। प्रत्ययजनितत्वादित्यर्थः। *प्रतिकूलं हि दुःखमिति लक्षणान्मार्गो न दुःखमिति*। किमिदमन्यदेवोच्यते, पूर्वमुक्तम्—प्रत्ययाभिसंस्करणात् सर्वसंस्कारा अनित्याः। यच्चानित्यम् तद् दुःखमिति मार्गश्च प्रत्ययाभिसंस्कृतत्वादनित्यः। तस्माद् दुःखमिति प्रसज्येत। यदि हि प्रतिकूलतैव दुःखलक्षणमिष्येत् तत्पूर्वोक्तमलक्षणं स्यात्; तच्चेद् दुःखतालक्षणम् इदमलक्षणमिति? नैष दोषः। कथम्? यदनित्यमार्याणां प्रतिकूलं

---

१. मार्गस्यापि—का०। २. मार्गो न—जा०।

प्रतिकूलः; सर्वदुःखक्षयावाहनात् । यदापि ते निर्वाणं शान्ततः पश्यन्ति, तदापि यदेव दुःखतो दृष्टं तस्यैव निरोधं शान्ततः पश्यन्ति, न मार्गस्य । यदापि दुःखमप्यत्रास्ति तस्माद् दुःखमेवार्यसत्यमुच्यते, सुखस्याल्पत्वात्; मुद्गादिभावेऽपि माषराश्यपदेशवदित्येके । को हि विद्वान् परिषेकसुखाणुकेन गण्डसुखमिति व्यवस्येत् ! आह खल्वपि—

"दुःखस्य च हेतुत्वात् दुःखैश्चानल्पकैः समुदितत्वात् ।
दुःखे च सति तदिष्टेर्दुःखमिति[1] सुखं[1] व्यवस्यन्ति" ॥ इति

सहैव तु सुखेन सर्वं भवमार्या दुःखतः पश्यन्ति ; संस्कारदुःखतैकरसत्वात् । अतो दुःखमेवार्यसत्यं व्यवस्थाप्यते, न सुखम् । कथमिदानीं सुखस्वभावां वेदनां

तद् दुःखमित्ययमत्राभिप्रेतोऽर्थः । किं चानित्यमार्याणां प्रतिकूलम् ? यत्सास्रवं वस्तु । कस्मात् पुनरनास्रवो मार्गस्तथैवानित्योऽपि न चार्याणां प्रतिकूलः? इत्यत आह *न हि तस्योत्पाद आर्याणां प्रतिकूलः; सर्वदुःखक्षयावाहनादिति* । अविशेषाभिधानेऽपि हि लोके विशेषप्रतिपत्तिर्दृष्टा । तद्यथा—गमनाद् गौः, न च गमनान्महिषोऽपि गौर्भवति । एवं ह्यर्थे नियते गौः (कस्मिचिद्भवति) कस्माद्भवति ? यस्माद् गच्छतीति । एवमिहापि यत् सास्रवं वस्तु तत्प्रतिकूलमार्याणाम् । कस्मात् ? अनित्यत्वादिति । *यदेव दुःखतो दृष्टमिति* । सास्रवं वस्तु । *तस्यैव निरोधं शान्ततः पश्यन्ति* । *न मार्गस्येत्यवगन्तव्यम्* । *मुद्गादिभावेऽपि माषराश्यपदेशवदिति* । माषराशौ मुद्गमसूरकलायादिसद्भावेऽप्यल्पत्वान् मुद्गादीनां माषराशिरिति लोके व्यपदेशो दृश्यते, तद्वत् । *परिषेकसुखाणुकेनेति* । सुखं च तदणुकं च सुखाणुकम्, परिषेकेण सुखाणुकं *परिषेकसुखाणुकम्, तेन* ।

आह खल्वपीति । *भदन्तकुमारलातः दुःखसन्तत्याम्* । *दुःखस्य च हेतुत्वाद्* इति । सुखं दुःखस्य हेतुर्दुःखवेदनीयेन कर्मणा सम्प्रयुक्तत्वादिति ।

दुःखैश्चानल्पकैः समुदितत्वात् । यस्माच्चातिबहुभिर्दुःखैः परसेवाकृत्यादिकृतैः समुदितं सुखमुत्पद्यते । *दुःखे च सति तदिष्टेः* । यस्माच्च क्षुत्पिपासादिकृते दुःखे सति भोजनपानादिकृतं सुखमिष्टम्, नान्यथा । अत एभ्यः कारणेभ्यो *दुःखमिति सुखं व्यवस्यन्तीति* ।

सहैव तु सुखेनेति । तुशब्दः पूर्वपक्षव्यावर्तनार्थः । *संस्कारदुःखतैकरसत्वादिति* । संस्कारदुःखतैकप्रकारत्वात् । *कथमिदानीं सुखस्वभावामिति* । कथमदुःखस्वभावां

१-१. दुःखं सुखमिति—का० ।

दुःखतः पश्यन्ति ? अनित्यतया प्रतिकूलत्वात् । यथा रूपसंज्ञादीन्यपि दुःखतः पश्यन्ति । न च तान्येवं दुःखानि, यथा दुःखा वेदनेति ।

यस्तु मन्यते—दुःखहेतुत्वादिति । तस्यासौ समुदयाकारः स्यान्न दुःखाकारः । आर्याणां च रूपारूप्योपपत्तौ कथं दुःखसंज्ञा प्रवर्तते[1] ! न हि तेषां[2] दुःखवेदनाहेतुः स्कन्धा भवन्ति । संस्कारदुःखता च सूत्रे किमर्थमुक्ता[3] भवेत् !

यदि तर्ह्यनित्यत्वात् दुःखतः पश्यन्ति, अनित्यदुःखाकारयोः कः प्रतिविशेषः ? उदयव्ययधर्मित्वादनित्यं पश्यन्ति । यथा[4] प्रतिकूलत्वाद् दुःखम् । अनित्यं तु दृश्यमानं प्रतिकूलं भवतीत्यनित्याकारो दुःखाकारमाकर्षति ।

वेदनां दुःखतः *पश्यन्ति । अनित्यतया प्रतिकूलत्वादिति* । अनित्यत्वात् प्रतिकूलं प्रतिकूलत्वाद् दुःखतः पश्यन्तीत्यर्थः । *यथा रूपसंज्ञादीन्यपीति* । *यथा* रूपसंज्ञासंस्कारविज्ञानान्यपि *दुःखतः पश्यन्ति । न च तान्येवं दुःखानि । यथा दुःखा वेदना* । तस्या उपघातकस्वभावत्वात्, तेषां वा तल्लक्षणत्वात् ।

यस्तु मन्यत इति । भदन्तकुमारलातः । *तस्य* भदन्तस्यासौ *समुदयाकारः स्यान्न दुःखाकारः* । दुःखहेतुतो दर्शनात् । किञ्च—*आर्याणां* चानागामिनां *रूपारूप्योपपत्तौ कथं दुःखसंज्ञा प्रवर्तते* । नैव प्रवर्तते इत्यर्थः । *न हि तेषाम*नागामिनां दुःखवेदनाहेतुः दुःखाया वेदनाया हेतुः । के ? स्कन्धा रूपारूप्यावचराः । कस्मान्न हेतुः ? पुनर्दुःखस्थानानागमनात् । *संस्कारदुःखता च सूत्रे किमर्थमुक्ता भवेदिति* । यदि दुःखहेतुत्वात् सुखमपि दुःखतः पश्यन्ति, येयं संस्कारदुःखतोक्ता—'यदनित्यम् तद् दुःखम्' इति, सा किम्प्रयोजना ? दुःखहेतुत्वेनैव तत्प्रयोजनसिद्धेः ।

दुःखहेतुवाद्याह—*यदि तर्हीति । यदि* यदनित्यम् तद् दुःखमित्य*नित्यत्वाद् दुःखतः पश्यन्ति* न दुःखहेतुत्वाद*नित्यदुःखाकारयोः कः प्रतिविशेषः* ।

अत्राचार्य आह—*उदयव्ययधर्मित्वादिति* विस्तरः । यथा प्रतिकूलत्वाद् दुःखम् तथा तत्प्रतिपादयन्नाह—*अनित्यं तु दृश्यमानं प्रतिकूलं भवतीत्यनित्याकारो दुःखाकारमाकर्षतीति* । तदुक्तं भवति—यदिदमुक्तं 'यदनित्यम् तद् दुःखम्' इति, नाकारैकत्वादेवमुक्तम्; अपि त्वनित्यं तत् सुखं पश्यतां प्रतिकूलं भवति । प्रतिकूलत्वाद् दुःखतः पश्यन्तीति ।

---

१. प्रवर्तेत—का० ।
२. पुनस्तेषां—का० ।
३. पृथगुक्ता—का० ।
४. का० पुस्तके नास्ति ।

नास्त्येव सुखा वेदनेत्येकीयाः, दुःखैव तु सर्वा। कथमिदं गम्यते ? सूत्राद्, युक्तितश्च। कथं तावत् सूत्रात् ? उक्तं हि भगवता—"यत् किंचिद्वेदितमिदमत्र दुःखस्य" इति, "सुखा[1] वेदना दुःखतो द्रष्टव्या" इति, "दुःखे सुखमिति संज्ञाविपर्यासः" इति। एवं तावत् सूत्रात्। कथं[2] युक्तितः ? सुखहेत्वव्यवस्थानात्। य एव हि केचित् पानभोजनशीतोष्णादय इष्यन्ते सुखहेतवः, त एवात्युपयुक्ता अकालोपयुक्ताश्च पुनर्दुःखहेतवः संपद्यन्ते। न च युक्ता सुखहेतुवृद्ध्या समेन वाऽन्यस्मिन् काले दुःखोत्पत्तिरित्यादित एव ते दुःखहेतवः, न सुखस्य। अन्ते तु तद् दुःखं वृद्धिमापन्नं व्यक्तिमापद्यत इति। एवमीर्यापथविकल्पेऽपि वक्तव्यम्। दुःखप्रतिकारे च सुखबुद्धेर्दुःखविकल्पे च। न हि तावत् सुखमिति वेद्यते किञ्चिद् यावन्न दुःखान्तरेणोपद्रुतो भवति क्षुत्पिपासाशीतोष्णश्रमकामरागप्रभवेण। तस्मात् प्रतीकार एवाविदुषां सुखबुद्धिः, न सुखे दुःखविकल्पे च बालाः सुखबुद्धिमुत्पादयन्ति, यथा—अंशादंशं भारं सञ्चारयन्तः। तस्मान्नास्त्येव सुखमिति।

अस्त्येवेत्याभिधार्मिकाः। एष एव च न्यायः। कथं कृत्वा ? इदं हि तावदयं प्रष्टव्यः सुखापवादी—किमिदं दुःखं नाम, यद् बाधनात्मकं चेत्,

एकीया इति। भदन्तश्रीलातादयः। *इदमत्र दुःखस्येति।* इदमत्र दुःखस्य लक्षणमित्यर्थः। *सुखा वेदना दुःखतो द्रष्टव्येति।* अपरं सूत्रपदम्। *शीतोष्णादय इति।* *आदिशब्देनाम्लमधुरादयो गृह्यन्ते।* *अत्युपयुक्ता* अतिपरिभुक्ताः। *अकालोपयुक्ताश्चेति।* तद्यथा शीता हेमन्ते, उष्णा ग्रीष्मे। *समेन वेति।* सुखहेतुना। *एवमीर्यापथविकल्पेऽपि वक्तव्यमिति।* य एव हि शयनादय इष्यन्ते सुखहेतवः त एवेति सर्वं यावद् व्यक्तिमापद्यन्त इति वक्तव्यम्। *दुःखप्रतीकारे च सुखबुद्धेः।* किम् ? नास्ति सुखा वेदनेति प्रकृतम्। *दुःखविकल्पे च।* किम् ? सुखबुद्धेः। तथैव नास्ति सुखा वेदनेति। दुःखप्रतीकारे सुखबुद्धिं प्रतिपादयन्नाह—*न हि तावत्सुखमिति* विस्तरः। दुःखविकल्पेनेति प्रतिपादयन्नाह—*दुःखविकल्पे च बाला* इति विस्तरः। *अंशादंशं भारं सञ्चारयन्तो भारवाहका* दुःख एवावस्थिते भारातिक्रामणे सुखमिति बुद्धिमुत्पादयन्ति।

१. दुःखा—का०। २. कथः—का०।

कथमिति वक्तव्यम् ? उपघातकं चेत् , अनुग्राहकं सुखमिति सिद्धम् । अनभिप्रेतं चेत् , अभिप्रेतं सुखमिति सिद्धम् । तदेव ह्यभिप्रेतं पुनरनभिप्रतं[1] भवत्यार्याणां नैवाल्पकाले । तस्मादनिष्पन्नमभिप्रेतत्वं चेत् ? न; अन्यथाऽनभिप्रेतत्वात् । या हि वेदना स्वेन लक्षणेनाभिप्रेता, नासौ पुनस्तेनैव जात्वनभिप्रेता भवति । तथा ह्येनामाकारान्तरेण विदूषयन्त्यार्याः, प्रमादपदं चैनां पश्यन्ति महाभिसंस्कारसाध्यां च विपरिणामिनीं चानित्यां च, येनानभिप्रेता भवति । न तु खलु स्वलक्षणाकारेण । यदि चासौ स्वेनात्मनानभिप्रेता भवेन्नैव तस्यां कस्यचिद्रागो भवेद्, यतो वैराग्यार्थमाकारान्तरेणापि[2] दोषवतीं पश्येयुः । तस्मादस्त्येव स्वलक्षणतः सुखा वेदना ॥

यत्तु भगवतोक्तम्—"यत् किञ्चिद्वेदितमिदमत्र दुःखस्य" इति तद्भगवतैव नीतार्थम्—"संस्कारानित्यतामानन्द मया सन्धाय भाषितं संस्कारविपरिणामतां च, यत् किञ्चिद्वेदितमिदमत्र दुःखस्य" इति । अतो न दुःखदुःखतां सन्धायैतदुक्तमिति सिद्धं भवति । यदि च स्वभावत एव सर्वं वेदितव्यं दुःखमभविष्यत्, किमर्थमार्यानन्द एवं भगवन्तमप्रक्ष्यत्—'तिस्र इमे वेदना उक्ता भगवता सुखा दुःखाऽदुःखासुखा च । उक्तं चेदं भगवता—यत् किञ्चिद्वेदितमिदमत्र दुःखस्य इति। किं नु सन्धाय भगवता भाषितम्—यत्किञ्चिद्वेदितमिदमत्र दुःखस्य' इति । एवं हि

एष एव च न्याय इति । आचारः । *अनभिप्रेतं भवत्यार्याणामिति* कामसुखम् । *अन्यथानभिप्रेतत्वादिति* । प्रमादपदत्वादीनाकारान्तरेण । तदर्थं दर्शयन्नाह—*या हि वेदनेति* विस्तरः । *प्रमादपदमिति* । कुशलप्रच्युतिकारणमित्यर्थः । *महाभिसंस्कारसाध्यां च विपरिणामिनीं च* । समनन्तरदुःखोत्पादिनीमदुःखासुखोत्पादिनीं चेत्यर्थः । न्यूनरूपत्वमापन्नामिति वा । *अनित्यां च* विनाशिनीं चेत्यर्थः । *न तु खलु स्वलक्षणाकारेणेति* । अनुग्राहकस्वलक्षणाकारेण आर्याणामपि हि सुखवेदनानुग्राहकेभ्यो विसंवादः । *यदि चासौ सुखा वेदना स्वेनात्मनानुग्राहकात्मनानभिप्रेता भवेत् नैव तस्यां* सुखायां वेदनायां *कस्यचिद्रागो भवेत्* । दुःखवेदनावदित्यभिप्रायः । *यतो वैराग्यार्थमिति* । *यतः* कारणात् *वैराग्यार्थमाकारान्तरेणापि दोषवतीं पश्येयुः* । अन्यथानायासेनैव रागभावसिद्धेः वैराग्यार्थं प्रयत्नोऽनर्थकः स्यात् ।

उक्तं चेदं भगवतेति । *स्थविरानन्दवचनमेवैतत् सूत्रपदम्* । *एवं हि*

१. अनभिप्रीतं—जा० । २. प्रकारान्तरेणापि—का० ।

सोऽप्रक्ष्यत्—'किं नु संधाय भगवता भाषितं तिस्रो वेदनाः' इति। भगवानपि चैवं[1] व्याकरिष्यत्—'इदं मया संधाय भाषितं तिस्रो वेदनाः' इति, न त्वेवमाह। तस्मात् सन्त्येव स्वभावतस्तिस्रो वेदनाः। 'इदं तु संधाय मया भाषितं यत्किंचिद्वेदितमिदमत्र दुःखस्य' इत्याभिप्रायिकमेतद्वाक्यं दर्शयति।

यदप्युक्तम्—"सुखा वेदना दुःखेति द्रष्टव्या" इति। उभयं तस्यामस्ति। सुखत्वं च स्वभावतो मनापत्वाद्, दुःखत्वं च पर्यायतो विपरिणामानित्यधर्मित्वात्[2]। सा तु सुखतो दृश्यमाना बन्धाय कल्पते, तदास्वादनात्। दुःखतो दृश्यमाना मोक्षाय कल्पते, तद्वैराग्यादिति। यथा दृश्यमाना मोक्षाय कल्पते तथैनां द्रष्टुमाज्ञापयन्ति बुद्धाः।

कथमिदं गम्यते—स्वभावतः सा सुखेति ? यदाह—

"संस्कारानित्यतां ज्ञात्वा अथो विपरिणामताम्।
वेदना दुःखतः प्रोक्ता सम्बुद्धेन प्रजानता॥ इति ( )।

यदपि चोक्तम्—"दुःखे सुखमिति संज्ञाविपर्यासः" इति ? आभिप्रायिक एष निर्देशः। लोकस्य हि सुखसंज्ञा वेदनायां कामगुणेषूपपत्तौ च। तत्र सुखां

सोऽप्रक्ष्यदिति। यत्किंचिद्वेदितम्। इदमत्र दुःखस्येति एतदयुक्तरूपं वचनमिति पश्यन् स्थविरानन्दस्तदेव पृष्टवान्। यत्किंचिद्वेदितमिदमत्र दुःखस्येति विरुद्धमेवेति कृत्वा। यदि तु *तिस्रो वेदना* इत्येतदयुक्तरूपमद्रक्ष्यत्, तदेवाप्रक्ष्यत्, किं नु सन्धाय भगवता भाषितं तिस्रो वेदना इत्येतद् विरुद्धमेवेति कृत्वा। *भगवानपि चैवं व्याकरिष्यदिदं मया सन्धाय भाषितं तिस्रो वेदना इति*। न त्वेवं व्याकरिष्यत्। संस्कारानित्यतामानन्द सन्धाय मया भाषितम्, संस्कारविपरिणामताम्। यत्किंचिद् वेदितमिदमत्र दुःखस्येति। *न त्वेवमाह*। पुनश्च तिसृणां वेदनानां वचनात् *तस्मात् सन्त्येव स्वभावतस्तिस्रो वेदनाः*। इदं तु सन्धाय मया भाषितं यत्किंचिद् वेदितमिदमत्र दुःखस्येति वचनादा*भिप्रायिकमेतद्वाक्यं दर्शयति* भगवान्। यत्किंचिद् वेदितमत्र दुःखस्येति संस्कारविपरिणामताभिप्रायात्। *विपरिणामानित्यधर्मित्वादिति*। विपरिणामधर्मित्वादनित्यधर्मित्वाच्च। विपरिणामः पुनरन्यथात्वम्। *कामगुणा* इति। इष्टानां

१. भगवानप्येवं—का०। २. ०धर्मत्वात्—का०।

वेदनां पर्यायेण दुःखां सतीमेकान्तसुखां पश्यतो विपर्यासः । एवमुपपत्तिम् । तस्मान्नातः सुखवेदनाऽभावसिद्धिः ।

यदि तु स्वभावत एव सर्वं वेदितं दुःखमभविष्यत्, 'तिस्रो वेदनाः' इति वचने को गुणोऽभविष्यत् । लोकानुवृत्त्येति चेत् न ? सर्ववेदितदुःखत्वस्य संस्कारविपरिणामानित्यतां संधायभाषितवचनात, यथाभूतवचनाच्च । "यच्च सुखेन्द्रियं यच्च सौमनस्येन्द्रियं सुखैषा वेदना द्रष्टव्या" इति विस्तरेणोक्त्वा "येनेमानि पञ्चेन्द्रियाण्येवं यथाभूतं सम्यक् प्रज्ञया दृष्टानि, त्रीणि चास्य संयोजनानि प्रहीणानि भवन्ति"इत्येवमादि । लोकोऽपि च कथं दुःखां वेदनां त्रिविधां व्यवस्येत् !

मृद्वधिमात्रमध्यासु यथाक्रमं सुखादिबुद्धिरिति चेत ? न ; सुखस्यापि त्रिविधत्वात मृद्वादिषु दुःखेष्वधिमात्रादिसुखबुद्धिः स्यात । यदा च गन्ध-

रूपशब्दगन्धरसस्प्रष्टव्यानामियं संज्ञा । *उपपत्तेरपीष्टस्य* जन्मनः संज्ञा । एवमुपपत्तिमल्पसुखां बहुदुःखामेकान्तसुखां पश्यतो विपर्यासः ।

लोकानुवृत्त्येति चेत् । अथ मतं लोकस्य वेदनां व्यवस्यतोऽनुवृत्त्या तिस्रो वेदना इति वचनम् । *तत्र भवति । सर्ववेदितदुःखत्वस्य सन्धाय भाषितमिति* भगवतो वचनात् । "संस्कारानित्यतामानन्द मया सन्धाय भाषितं संस्कार-विपरिणामताम् । यत्किञ्चिद् वेदितमिदमत्र दुःखस्य" इति । अतो न लोकानुवृत्त्या तिस्रो वेदना इति वचनम् , किं तर्हि ? स्वलक्षणतो निधार्येत्यभिप्रायः । *यथाभूत-वचनाच्च* । न लोकानुवृत्त्या तिस्रो वेदना इति वचनम् । कथमित्याह—*यच्च सुखेन्द्रियं यच्च सौमनस्येन्द्रियम् , सुखैषा वेदना द्रष्टव्येति । विस्तरेणोक्त्वेति ।* 'यच्च दुःखेन्द्रियं यच्च दौर्मनस्येन्द्रियम्, दुःखैषा वेदना । यदुपेक्षेन्द्रियम्, अदुःखासुखैषा वेदना" इत्येवमादिना विस्तरेणोक्त्वा *येनेमानि पञ्चेन्द्रियाण्येवं यथाभूतं सम्यक्प्रज्ञया दृष्टानीति* । इदमत्र वेदनात्रयसद्भावे ज्ञापकम् । *यथाभूत-*मिति । अध्यारोपापवादाभावात् । *लोकोऽपि च कथं दुःखां वेदनां त्रिविधां* दुःखामदुःखासुखां *व्यवस्येद्*; दुःखस्वाभाव्येन दुःखव्यवसायस्यैव प्राप्तेः । *मृद्वधिमात्रमध्यास्विति* विस्तरः । अथ मतम्—मृदुनि दुःखे सुखबुद्धिः, अधिमात्रे दुःखबुद्धिः, मध्य अदुःखासुखबुद्धिरिति । अत्र ब्रूमः—*सुखस्यापि त्रिविधत्वादिति* विस्तरः । मृदुमध्याधिमात्रभेदेन *मृद्वादिषु* दुःखेषु मृदुमध्याधिमात्रेषु ।

रसस्प्रष्टव्यविशेषजं सुखं वेदयते, तदा कतमत् दुःखं मृदुभूतम्, यत्रास्य सुखबुद्धिर्भवति ! अनुत्पन्नविनष्टे च तस्मिन् मृदुनि दुःखे सुतरां सुखबुद्धिः स्यात् ; अशेषदुःखापगमात् ।

एवं कामसुखसम्मुखीभावेऽपि वक्तव्यम् ।

कथं च नामैतद्[1] योक्ष्यते[2] यन्मृदुनि वेदिते सुव्यक्तस्तीव्रोऽनुभवो[3] गृह्यते, मध्ये पुनरव्यक्त इति । त्रिषु च ध्यानेषु सुखवचनात् मृदु दुःखं स्यात् ।

अधिमात्रादिसुखबुद्धिः स्यादधिमात्रमध्यममृदुः सुखबुद्धिः स्यादित्यर्थः । कथम् ? मृदुनि दुःखे अधिमात्रसुखबुद्धिः । मध्ये मध्यसुखबुद्धिः । अधिमात्रे मृदुसुखबुद्धिरिति । न चाधिमात्रे दुःखे मृदुसुखबुद्धिर्युक्ता, किं कारणम् ? अधिमात्रमेव तद् दुःखं न स्याद्, यदि तत्र मृदुसुखबुद्धिः स्यात् । मृदुनि च दुःखे यद्यधिमात्रसुखबुद्धिः, कथं तस्य दुःखस्य मृदुत्वम् ! न हि तथा व्यक्तस्यानुभवस्य मृदुत्वं युज्यत इति । अदुःखासुखानन्तरं सुखानुभवं पश्यन्नाह—*यदा गन्धरसस्प्रष्टव्यविशेषजमिति* । मध्यं हि दुःखमदुःखासुखं भवताम्, न मृदुप्रकारम् । अतो वक्तव्यम्—*तदा कतमद् दुःखं मृदुभूतं यत्रास्य सुखबुद्धिर्भवतीति* । विषयबलादेव हि तत् सुखमुत्पद्यते । मृदुदुःखसमनन्तरप्रत्ययबलादधिमात्रदुःखसमनन्तरप्रत्ययबलाद्वेति । *किं च*—यदि मृदुनि दुःखे सुखबुद्धिरिति मन्यसे, *अनुत्पन्नविनष्टे च तस्मिन् मृदुनि दुःख इति* । *अनुत्पन्ने विनष्टे च तस्मिन् मृदुनि दुःखे* । *सुतरां सुखबुद्धिः स्यात्; अशेषदुःखापगमात्* । यस्मादशेषं दुःखमपगतम्, सशेषापगतेऽपि हि दुःखे सुखबुद्धिमिच्छसि, किमङ्गाशेषापगत इत्यभिप्रायः ।

एवं कामसुखसम्मुखीभावेऽपि वक्तव्यमिति । यथा गन्धरसस्प्रष्टव्यविशेषजं सुखमुक्तम्, एवं कामसुखसम्मुखीभावेऽपि वक्तव्यम् । कथम् ? मृदुनि रागदुःखे कामसुखबुद्धिर्भवति । अनुत्पन्ने विनष्टे च तस्मिन् रागदुःखे सुतरां कामसुखं स्यात् । न चैवं दृष्टमिति ।

कथं च नामेति विस्तरः । कथं च नामैतद्योक्ष्यते । *यन्मृदुनि वेदिते* । यन्मृदुनि दुःख इत्यर्थः । *तीव्रानुभवो गृह्यत इति* । वक्तव्यम् सुखं गृह्यते । *मध्ये पुनरव्यक्त इति* । मध्यदुःखे अदुःखासुखा वेदना गृह्यते इत्यर्थः । मृदुनि दुःखे तेनाव्यक्तेन भवितव्यमित्यभिप्रायः । *त्रिषु चेति* विस्तरः । *त्रिषु च ध्यानेषु* प्रथमद्वितीयतृतीयेषु *सुखवचनात्* । सुखा वेदना तत्रेति सूत्रे वचनात् । *मृदु दुःखं स्यात्* ।

---

१. नामेदं—का० । २. योज्यते—का० । ३. तीव्रानु०—का० ।

ऊर्ध्वमदुःखसुखवचनान्मध्यं दुःखमिति न युज्यते मृद्वादिष्वदुःखेषु सुखादिवेदनाव्यवस्थानम्। उक्तं च भगवता—"रूपं चेन्महानामन् एकान्तदुःखमभविष्यन्न सुखं न सुखानुगतम्" इत्येवमादि। तस्मादस्त्यस्ति किञ्चित् सुखम्। एवं तावन्न सूत्रात् सुखवेदनाऽभावः सिध्यति।

यत् पुनः सुखहेत्वव्यवस्थानादित्युक्तम्, हेत्वपरिज्ञानादिदमुच्यते। आश्रयविशेषापेक्षो हि विषयः सुखहेतुर्वा भवति, दुःखहेतुर्वा। न केवलो विषयः। स यां कामवस्थां प्राप्य सुखहेतुर्भवति न तां पुनः प्राप्य कदाचिन्न भवतीति व्यवस्थित एव सुखहेतुः। तद्यथा—स एवाग्निः पाक्यभूतविशेषापेक्षः स्वादुपाकहेतुर्भवति स एवास्वादपाकहेतुः, न तु यां पाक्यभूतावस्थां प्राप्य स्वादुपाकहेतुस्तां पुनः प्राप्य न हेतुरित्येष दृष्टान्तः। ध्यानेषु च कथं न व्यवस्थितः सुखहेतुः!

यत्तु पुनः दुःखप्रतिकारे सुखबुद्धिरित्युक्तम्, तत्र विहितः प्रतीकारः। यदा

किं कारणम्? मृदुनि दुःखे सुखबुद्धिरिति तत्राभिप्रायात्। ऊर्ध्वं चतुर्थे ध्याने आरूप्येषु चादुःखासुखवचनात् सूत्रे। मध्यं दुःखं स्यात्। कस्मात्? मध्ये दुःखे अदुःखासुखमिति तत्रैवाभिप्रायात्। *इत्यतो न युज्यते मृद्वादिष्वदुःखेषु सुखादिवेदनाव्यवस्थानम्।* कथं हि नामाधोध्यानेषु मद् दुःखम् ऊर्ध्वे पुनर्मध्यमिति युज्यते। *रूपं चेन्महानामन्निति।* "*रूपं चेन्महानामन्नेकान्तदुःखमभविष्यत् न सुखं न सुखानुगतं* न सौमनस्यं न सौमनस्यानुगतं न सुखवेदितं हेतुरपि प्रज्ञायते रूपे संरागाय। यस्मात् तर्हि अस्ति रूपं सुखं सुखानुगतं पूर्ववदतो रूपे हेतुः प्रज्ञायते यदुत संरागाय" इति।

सुखहेत्वव्यवस्थानादिति। अत्र ब्रूमः—यदि सुखहेत्वव्यवस्थानान्न सुखमस्ति वः, दुःखमप्यसत्स्यात्; दुःखहेत्वव्यवस्थानात्। अपि च व्यवस्थित एव सुखहेतुः। कथम्? इत्याह—*आश्रयविशेषापेक्षो हीति* विस्तरः। यदि हि केवल एव विषयो हेतुः स्यात् स्यादेवाव्यवस्थितो हेतुः, न तु केवलो विषयो हेतुः। यस्मादाश्रयविशेषोऽपि हेतुरिति। *स एवाग्निरिति।* तद्यथा—स एवाग्निः पाक्यभूतविशेष ईषत्पक्वावस्थे तण्डुलसमूहे *स्वादुपाकहेतुर्भवति;* अभिमतौदनपाकहेतुत्वात्। *स एवास्वादुपाकहेतुः।* तदाहहेतुत्वादित्यर्थः। *न तु यां पाक्यभूतावस्थां प्राप्य स्वादुपाकहेतुरासीत्। तां पुनः प्राप्य* पश्चान्न हेतुः *स्वादुपाकस्य* तादृशस्येत्यर्थः। एष दृष्टान्तः तस्य पूर्वोक्तस्य दार्ष्टान्तिकस्यार्थस्य। *ध्यानेषु च कथं च व्यवस्थितः सुखहेतुरिति।* न हि तदेव ध्यानं प्रथमं यावत् तृतीयं चिरकालमपि समापन्नानां

गन्धादिविशेषजं सुखं वेदयते तदा कस्य प्रतीकारेषु सुखबुद्धिर्भवति ! अनुत्पन्न-विनष्टे च तस्मिन् दुःखे सुतरां सुखबुद्धिः स्यात् । ध्यानजे सुखे कः कस्य प्रतीकार इत्येवमादि ।

भावसञ्चारेऽपि चावस्थान्तरजं सुखमेवोत्पद्यते । यावदसौ तादृशी कायावस्था नान्तर्धीयते । अन्यथा हि पश्चाद् भूयसी सुखबुद्धिः स्यात् ।

एवं शान्तरूयेर्यापथविकल्पेषु वेदितव्यम् ।

"अन्ते कुतो दुःखबुद्धिरारम्भो यदि नादितः" इति चेत् ? कायपरिणाम-विशेषान्मद्यादीनामन्ते माधुर्यशुक्ततावत् । तस्मादस्त्येव सुखा वेदनेति सिद्धम् । त्रिदुःखतायोगाद् वा सर्वं सास्रवं दुःखमिति ।

यत्तु समुदयसत्यं तदेवोच्यते । इदमुत्सूत्रम् , सूत्रे हि तृष्णैवोक्ता ?

दुःखहेतुर्भवतीति । ध्यानजे च सुखे कस्य प्रतीकार इति । न हि ध्यानेषु दुःख-मस्तीति । आदिशब्देनेदमपि वक्तव्यम् यदि दुःखप्रतीकारेषु सुखबुद्धिः स्यात् । "रूपं चेन्महानामन्नेकान्तदुःखमभविष्यत् , न सुखं न सुखानुगतम्" इत्येवमादि नोक्तं स्यादिति । सुखमेवोत्पद्यत इति । सुखैव सा वेदनोत्पद्यते । न सा दुःखा वेदना सुखत्वेन कल्पतेति । यावदसौ तादृशी कायावस्थेति । सुखोत्पत्त्यनुकूला । अन्यथा हि यद्यवस्थान्तरजं सुखमेव नोत्पद्यते यावदसौ तादृशी कायावस्था नान्तर्धीयते[1] । अन्यथा पश्चाद् भूयसी सुखबुद्धिः स्यात् ।

अन्ते कुत इति विस्तरः । अथ मतम्—पानभोजनाद्यन्ते कुतो दुःखबुद्धिः स्यात् यदि तस्यादितस्तदारम्भो नासीदिति । अत्र ब्रूमः— कायपरिणामविशेषात् । कायस्य तादृशः परिणामविशेषः पश्चादुत्पद्यते पानाद्यासेवनात् यत्सुखोत्पत्त्य-वस्थायां दुःखं नोत्पद्यते, अन्ते तूत्पद्यत इति । किमिव ? इत्याह —मद्यादीनामन्ते माधुर्यशुक्ततावदिति । यथा मद्यक्षीरादीनां तादृश पश्चात्परिणामविशेषो भवति यत्पूर्वं मधुरतावस्थायां माधुर्यस्याविद्यमाना शुक्तता अम्लता अन्ते उत्पद्यते । अथ वा—यथा मद्यादीनां परिणामविशेषात् माधुर्यमेषामादौ भवति, आम्लं वा ; तच्चिरकृतसौपभक्तात् परिणामविशेषान्माधुर्यं भवति । परिणामविशेषा-देव च पश्चाच्छुक्तता । माधुर्यमिह सुखस्योदाहरणम् , शुक्तता दुःखस्येति ।

यत्तु समुदयसत्यम् तदेवोच्यत इति । हेतुभूताः समुदयसत्यमिति वचनात् ।

१. नान्तरीयते—जा० ।

प्राधान्यादसौ सूत्र उक्ता, अन्येऽपि तु समुदयः। कथमिदं प्रत्येतव्यम्? अन्यत्रान्यस्यापि वचनात्। उक्तं हि भगवता—

"कर्म च तृष्णा च अथो अविद्या संस्काराणां हेतुरभिसंपराये" इति।

पुनश्चोक्तम्—"पञ्च बीजजातानीति सोपादानस्य विज्ञानस्यैतदधिवचनम्। पृथिवीधातुरिति चतसृणां विज्ञानस्थितीनामेतदधिवचनम्" इति। तस्मादाभिप्रायिकः सूत्रेषु निर्देशः। लाक्षणिकस्त्वभिधर्मे।

अपि त्वभिनिर्वृत्तिहेतुं ब्रुवता समुदयसत्यं तृष्णैवोक्ता। उपपत्त्यभिनिर्वृत्तिहेतुं सहेतुकं ब्रुवता गाथायां कर्म च तृष्णा चाविद्योक्ता। "कर्महेतुरुपपत्तये,

---

प्रथमे वा कोशस्थाने "दुःखं समुदयो लोकः" (अभि० को० १. ८) इति वचनात्। सूत्रे हि तृष्णैवोक्तेति। समुदयसत्यं कतमत्? यासौ तृष्णा नन्दीरागसहगता तत्र तत्राभिनन्दिनीति। वैभाषिक आह—*प्राधान्यादिति*। *अन्यत्रान्यस्यापि वचनात्*। अन्यत्र सूत्रे अन्यस्यापि कर्माविद्यादेर्वचनादन्येऽपि समुदय इति।

अभिसम्पराये। आयत्यां परलोक इत्यर्थः।

पुनश्चोक्तम्। अन्यत्र सूत्रे "यतश्च भिक्षवः पञ्च बीजजातान्यखण्डानि अच्छिद्राणि अपूतीनि अवातातपहतानि नवानि साराणि सुखशयितानि। पृथिवीधातुश्च भवत्यब्धातुश्च। एवं तानि बीजानि वृद्धिं विरूढिं विपुलतामापद्यन्ते। इति हि भिक्षव उपमेयं कृता यावदेवास्यार्थस्य विज्ञप्तये" इतीमं दृष्टान्तमुपन्यस्येदमुक्तम्—"पञ्च बीजजातानीति भिक्षवः सोपादानस्य विज्ञानस्यैतदधिवचनम्। *पृथिवीधातुरिति चतसृणां विज्ञानस्थितीनामेतदधिवचनम्*" इति। बीजं पुनर्हेतुः। यश्च हेतुः स समुदयः। विज्ञानस्थितोऽपि प्रतिष्ठाहेतुः। *तस्मादिति*। यतः कर्मादीनामपि हेतुत्ववचनात् समुदयसत्यत्वं सिद्धम्, *तस्मादाभिप्रायिकः*। अभिप्राये भवः, अभिप्रायेण वा दीव्यतीत्याभिप्रायिकः *सूत्रे निर्देशः*। तृष्णाधिकृतं पुद्गलमधिकृत्य कृत इत्यभिप्रायः। *लाक्षणिकस्त्वभिधर्मे*। लक्षणे भवो *लाक्षणिको* निर्देशोऽभिधर्मे; 'सर्वं सास्रवं वस्तु समुदयः' इति सास्रवस्य स्कन्धपञ्चकस्य समुदयसत्यत्वलक्षणयोगात्।

स एव *वैभाषिकस्तृष्णादीनामाभिप्रायिकं* समुदयसत्यत्वं विवक्षुराह—*अपि त्विति* विस्तरेण। अभिनिर्वृत्तिहेतुं ब्रुवता *समुदयसत्यं तृष्णैवोक्ता सूत्रे*। *उपपत्त्यभिनिर्वृत्तिहेतुं सहेतुकं ब्रुवता यावत् कर्म च तृष्णा चाविद्या चोक्ता*।

तृष्णाहेतुरभिनिर्वृत्तये" इति सूत्रात्। सहेतुसप्रत्ययसनिदानसूत्रे क्रमेण वा बीजक्षेत्रभावं प्रतिपादयता विज्ञानादयोऽप्युक्ताः।

का पुनरुपपत्तिः? का चाभिनिर्वृत्तिः? धातुगतियोन्यादिप्रकारभेदेनात्मभावस्योपपदनमुपपत्तिः। अभेदेन पुनर्भवप्रतिसन्धानमभिनिर्वृत्तिः। तयोर्यथाक्रमं कर्म च भवतृष्णा च हेतुः। तद्यथा—बीजं शालियवादिजातिप्रकारभेदेनाङ्कुरोप-

उपपत्तिहेतुः कर्म। अभिनिर्वृत्तिहेतुस्तृष्णा भवेषु। तयोः पुनस्तद्धेत्वोः कर्मतृष्णयोरविद्या हेतुरित्याह। कथमेतद्गम्यते—गाथायामुपपत्तिहेतुः कर्माभिनिर्वृत्तिहेतुस्तृष्णेति? *कर्म हेतुरुपपत्तये तृष्णा हेतुरभिनिर्वृत्तय इति सूत्रात्।* सूत्रान्तरे वचनादिति। *सहेतुसप्रत्यय* इति विस्तरः। *अत्र सूत्रे क्रमेण वा।* *कारणपरम्पराक्रमणेन वा।* गाथायामेव निर्देशः। कर्मतृष्णाविद्यासंस्काराणां चक्षुरादीनां हेतुरभिसम्पराय इति। तदेतदुक्तं भवति—कर्म हेतुरुपपत्तय इति। अतो वा सूत्रात्, सहेतुसप्रत्ययकर्मसूत्राद्वा अयमीदृशः गाथार्थ इति। "कथं चक्षुर्भिक्षवः सहेतु सप्रत्ययं सनिदानम्? कश्च भिक्षवः चक्षुषो हेतुः? कः प्रत्ययः? किं निदानम्? चक्षुषो भिक्षवः कर्म हेतुः, कर्म प्रत्ययः, कर्म निदानम्। कर्मापि भिक्षवः सहेतु सप्रत्ययं सनिदानम्। कश्च भिक्षवः कर्मणो हेतुः? कः प्रत्ययः? किं निदानम्? कर्मणो भिक्षवस्तृष्णा हेतुः, तृष्णा प्रत्ययः, तृष्णा निदानम्। तृष्णा भिक्षवः सहेतुका सप्रत्यया सनिदाना। कश्च भिक्षवस्तृष्णाया हेतुः? कः प्रत्ययः? किं निदानम्? तृष्णाया भिक्षवोऽविद्या हेतुः, अविद्या प्रत्ययः, अविद्या निदानम्। अविद्यापि भिक्षवः सहेतुका सप्रत्यया स निदाना। कश्च भिक्षवोऽविद्याया हेतुः? कः प्रत्ययः? किं निदानम्? अविद्याया भिक्षव अयोनिशोमनस्कारो हेतुः, अयोनिशोमनस्कारः प्रत्ययः, अयोनिशोमनस्कारो निदानम्" ( ) इति। *बीजक्षेत्रभावं प्रतिपादयता विज्ञानादयोऽप्युक्ताः।* विज्ञानं बीजम्। तस्य क्षेत्रं वेदनादयः स्कन्धाः। तेऽप्युक्ताः समुदयसत्यम्। न केवलं तृष्णादय इत्याभिप्रायिकः सूत्रे निर्देश इति साधितम्। सर्वस्य च दुःखस्य लाक्षणिकः समुदयभाव इति।

योन्यादिप्रकारभेदेनेति। आदिशब्देन जातिस्त्रीपुरुषादिप्रकारभेदेनेति गृह्यते। *अभेदेनेति।* धातुगतियोन्यादीनाम्। *तयोर्यथाक्रममिति।* उपपत्तेः कर्म हेतुरभिनिर्वृत्तेस्तृष्णेति। *तद्यथा बीजमिति* विस्तरः। शालिबीजं शाल्यङ्कुरोप-

१. सूत्रे वचनात्—का०।

पदनस्य हेतुः । आपः पुनरभेदेन सर्वाङ्कुरप्ररोहमात्रस्य—इत्येव दृष्टान्तः ।

तृष्णा अभिनिर्वृत्तिहेतुरिति कात्र युक्तिः ? १. वीततृष्णस्य जन्माभावात् । उभयेऽपि म्रियन्ते सतृष्णा वीततृष्णाश्च । सतृष्णा एव जाता दृश्यन्ते, न वीततृष्णा इति ; विना तृष्णया जन्माभावात् । भवस्याभिनिर्वृत्तौ तृष्णाहेतुं प्रतीमः । २. सन्ततिनामनाच्च[1] । यत्र च सतृष्णा चित्तसन्ततिः[2] तत्राभीक्ष्णं चित्तसन्ततिं नमन्तीं पश्यामः । तस्मात् पुनर्भवेऽप्येवमिति व्यवस्यामः । न चात्मभाव एवं केनचिदागृहीतो यथा तृष्णया । शुष्कमसूरोपस्नानलेपाङ्गवत् । न चान्यो हेतुरेवमनुषक्तो यथात्मस्नेह इत्येषा युक्तिः ॥ ३ ॥

चत्वार्यपि सत्यान्युक्तानि भगवता, द्वे अपि सत्ये संवृतिसत्यं परमार्थसत्यं च । तयोः किं लक्षणम् ?

यत्र भिन्नेन तद्बुद्धिरन्यापोहे धिया च तत् ।
घटाम्बुवत्[3] संवृतिसत्, परमार्थसदन्यथा ॥ ४ ॥

पादनस्य हेतुः, *यवबीजं* यवाङ्कुरोपपादनस्येत्यादि । *आपः पुनरभेदेन* । यथा शाल्यङ्कुरप्ररोहस्य हेतुः । एवं यवाङ्कुरस्यापीत्यादि । अतस्ताः *सर्वाङ्कुरप्ररोहमात्रस्य हेतुरिति* । *विना तृष्णया जन्माभावादिति* । अत्र साधनम्—'हेतुर्जन्मनस्तृष्णा ; तद्भावाभावभाव्यभावित्वात् । तद्यथा बीजमङ्कुरस्य' । *सन्ततिनामनाच्चेति* । अस्यार्थं विवृण्वन्नाह—*यत्र च सतृष्णेति* विस्तरः । यत्र विषये रूपादौ *सतृष्णा* । का ? *चित्तसन्ततिः* । *तत्राभीक्ष्णं चित्तसन्ततिं नमन्तीं पश्यामः* । *तस्मात् पुनर्भवेऽप्येवमिति* । पुनर्भवेऽप्येवं सतृष्णा चित्तसन्ततिः, तस्मात् तन्नमतीति । यत्र च नमति तत्र च प्रवर्तत इति व्यवस्यामः । साधनं चात्र प्रवर्तते—'पुनर्भवे चित्तसन्ततिः; सतृष्णानमनात्, रूपादिविषयवत्' । *शुष्कमसूरोपस्नानलेपाङ्गवदिति* । मसूर उपस्नानम्, तस्य लेपः शुष्कः । मसूरोपस्नानलेपोऽस्येति शुष्कमसूरोपस्नानलेपमङ्गम्, तद्वद् । यथा शुष्केण मसूरोपस्नानलेपेनागृहीतमङ्गम्, एवं तृष्णयात्मभाव इति दर्शितं भवति । *एषा युक्तिरिति* । तृष्णाभिनिर्वृत्तिहेतुरिति ॥ ३ ॥

अत्रार्थे *द्वे अपि सत्ये* इति सत्यप्रसङ्गेनेदमुच्यते ।

---

१. ०नमनाच्च—का० । २. का० पुस्तके नास्ति ।
३. घटार्थवत्—का० ।

यस्मिन्नवयवशो भिन्ने न तद्बुद्धिर्भवति तत् संवृतिसत् । तद्यथा—घटः । तत्र हि कपालशो भिन्ने घटबुद्धिर्न भवति । यत्र चान्यानपोह्य धर्मान् बुद्ध्या तद्बुद्धिर्न भवति, तच्चापि संवृतिसद् वेदितव्यम् । तद्यथा—अम्बु । तत्र हि बुद्ध्या रूपादीनधर्मानपोह्याम्बुबुद्धिर्न भवति । तेष्वेव तु संवृतिसंज्ञा कृतेति संवृतिवशात् घटश्चाम्बु चास्तीति ब्रुवन्तः सत्यमेवाहुर्न मृषा—इत्येत् संवृतिसत्यम् ।

अतोऽन्यथा परमार्थसत्यम् । तत्र भिन्नेऽपि तद्बुद्धिर्भवत्येव । अन्यधर्मापोहेऽपि बुद्ध्या तत् परमार्थसत् । तद्यथा – रूपम् । तत्र हि परमाणुभिन्ने वस्तुनि रसादीनपि च धर्मानपोह्य बुद्ध्या रूपस्य स्वभावे[१] बुद्धिर्भवत्येव[१] । एवं वेदनादयोऽपि द्रष्टव्याः । एतत् परमार्थेन भावात् परमार्थसत्यमिति । यथा लोकोत्तरेण ज्ञानेन गृह्यते तत् पृष्ठलब्धेन वा लौकिकेन तथा परमार्थसत्यम् । यथाऽन्येन तथा संवृतिसत्यमिति पूर्वाचार्याः ॥ ४ ॥

उक्तानि सत्यानि ॥

"घटाम्बुवद्" इति । दृष्टान्तद्वयोपन्यासो भेदद्वयोपप्रदर्शनार्थः । उपक्रमभेदिनश्च घटादयः, बुद्धिभेदिनश्च जलादय इति । जलादिषूपक्रमेण रसाद्यपकर्षणानुपपत्तेः । अथ वा द्विविधा संवृतिः संवृत्यन्तरव्यपाश्रया, द्रव्यान्तरव्यपाश्रया च । तत्र यासौ संवृत्यन्तरव्यपाश्रया, तस्यां भेदोऽपि सम्भवति, अन्यापोहोऽपि । या त्वसौ द्रव्यान्तरव्यपाश्रया, तस्यामन्यापोह एव सम्भवति, न भेदः । न हि परमाणोरष्टद्रव्यकस्यावयवविश्लेषः शक्यते कर्तुमिति । *संवृतिसदिति* । संव्यवहारेण सत् । *परमार्थसदिति* । **परमार्थेन सत्** । **स्वलक्षणेन सदित्यर्थः ।**

एवं वेदनादयोऽपि द्रष्टव्या इति । **वेदनाचेतनासंज्ञादयोऽपि द्रव्यसन्त एव द्रष्टव्याः । कथम् ? वेदनादीन् धर्मानपोह्य बुद्ध्या वेदनास्वभावे बुद्धिर्भवतीति । द्रव्यसती वेदना ।** एवं संज्ञाचेतनादयोऽपि योज्याः । *घटश्चाम्बु चास्तीति ब्रुवन्तः सत्यमेवाहुः, न मृषेति* । संवृतिसत्यस्य वचने प्रयोजनं दर्शयति । उक्तं च—

> द्वे सत्ये समुपाश्रित्य बुद्धानां धर्मदेशना ।
> लोकसंवृतिसत्यं च सत्यं च परमार्थतः ॥ (म० शा० २४.८) इति ।

तथा परमार्थसत्यमिति । **परमस्य ज्ञानस्यार्थः परमार्थः, परमार्थश्च**

१-१. स्वभावबुद्धिर्भव०—का० ।

कथं पुनस्तेषां दर्शनं भवति, वक्तव्यम् ? अत आदिमस्थानमारभ्योच्यते—

वृत्तस्थः श्रुतचिन्तावान् भावनायां प्रयुज्यते ।

सत्यानि ह द्रष्टुकाम आदित एव शीलं पालयति । ततः सत्यदर्शनस्यानुलोमं श्रुतमुद्गृह्णाति, अर्थं वा शृणोति । श्रुत्वा चिन्तयति । अविपरीतं चिन्तयित्वा भावनायां प्रयुज्यते । समाधौ तस्य श्रुतमयीं प्रज्ञां निश्रित्य चिन्तामयी जायते । चिन्तामयीं निश्रित्य भावनामयी जायते ।

किं पुनरासां प्रज्ञानां लक्षणम् ?

नामोभयार्थविषया श्रुतमय्यादिका धियः ॥ ५ ॥

नामालम्बना किल श्रुतमयी प्रज्ञा । नामार्थालम्बना चिन्तामयी । कदाचिद् व्यञ्जनेनार्थमाकर्षति, कदाचिदर्थेन व्यञ्जनम् । अर्थालम्बनैव भावनामयी । सा हि व्यञ्जननिरपेक्षा अर्थे प्रवर्तते । तद्यथा—अम्भसि प्लोतुमशिक्षितः प्लवन्नेव मुञ्चति । किंयच्छिक्षितः कदाचित् मुञ्चेत्, कदाचिदालम्बते । सुशिक्षितः प्लवन् निरपेक्षस्तरति—इत्येष दृष्टान्त इति वैभाषिकाः ।

सत्यं च तत् *परमार्थसत्यं यथान्येन ज्ञानेन लौकिकेन गृह्यते । तथा संवृतिसत्यम्* । संवृत्या संव्यवहारेण ज्ञानेन वा क्लिष्टेनाक्लिष्टेन वा गृह्यत इति संवृतिसत्यम् । त्रिविधं हि *योगाचाराणां* सत्—परमार्थसंवृतिसत्, द्रव्यसच्च । द्रव्यतः स्वलक्षणतः सद् द्रव्यसदिति ॥ ४ ॥

"*वृत्तस्थः*" इति विस्तरः । वृत्तं शीलम् । तद् अव्यासङ्गकारणम्, अविक्षेपकारणम्, आचारकारणं च । *सत्यदर्शनस्यानुलोमिमिति* । यच्छ्रुतं सत्यदर्शनाधिकारिकम्, *तच्छ्रुतमुद्गृह्णाति* पठति । *अर्थं वा शृणोति* । तदर्थं श्रोत्रद्वारेण विजानाति । कथम् ?

उभयालम्बना चिन्तामयीति दर्शयन्नाह—*कदाचिद् व्यञ्जनेनार्थमाकर्षति* । व्यञ्जननिवृत्तेन नाम्नार्थमाकर्षति—अयमस्य नाम्नोऽर्थ इति । *कदाचिदर्थेन व्यञ्जनमाकर्षति* । इदमस्याभिधेयस्यार्थस्य व्यञ्जनं नामेत्यर्थः । अयं हि व्यञ्जनशब्दो नाम्नि प्रयुक्तः । सूत्रेऽपि चोक्तम्—"स्वर्थं सुव्यञ्जनम्" इति ।

अस्यां तु कल्पनायां चिन्तामयी प्रज्ञा न सिद्धयतीत्यपरे । या हि नामालम्बना श्रुतमयी प्राप्नोति, याऽर्थालम्बना भावनामयीति । इदं तु लक्षणं नानिरवद्यं विद्यते । आप्तवचनप्रामाण्यजातनिश्चया श्रुतमयी, युक्तिनिध्यानजा चिन्तामयी, समाधिजा भावनामयीति; हेतौ मयड्विधानात् । तद्यथा—अन्नमयाः प्राणाः, तृणमय्यो गाव इति ॥ ५ ॥

तस्य पुनरेवं भावनायां प्रयुक्तस्य कथं भावना सम्पद्यते ? इत्याह—

व्यपकर्षद्वयवतः,

यदि हि कायचित्ताभ्यां व्यपकृष्टो भवति, संसर्गाकुशलवितर्कदूरीकरणात् । तत्तर्हि व्यपकर्षद्वयं कस्य सुकरं भवति ? योऽल्पेच्छः, सन्तुष्टश्च ।

नासन्तुष्टमहेच्छयोः ।

का पुनरियमसन्तुष्टिः ? का च महेच्छता ?

लब्धे भूयःस्पृहाऽतुष्टिरलब्धेच्छा महेच्छता ॥६॥

लब्धेषु किल प्रणीतेषु चीवरादिषु भूयस्कामता असन्तुष्टिः । अलब्धेषु तत्कामता महेच्छतेत्याभिधार्मिकाः ।

अस्यां तु कल्पनायामिति विस्तरेणाचार्यः । *चिन्तामयी प्रज्ञा न सिध्यतीति* । श्रुतभावनामयीलक्षणसङ्कीर्णं लक्षणमुच्यते । नासङ्कीर्णमिति न सिध्यति । *युक्तिनिध्यानजा इति* । युक्त्या निध्यानं निर्तीरणम्, ततो जात इति । *हेतौ मयड्विधानादिति* । आप्तवचनं श्रुतं सहेतु श्रुतं सहेतु श्रुतमय्याः प्रज्ञायाः । अत्र मयड्विधानम् । श्रुतहेतुका प्रज्ञा श्रुतमयीति । एवं युक्तिनिध्यानं चिन्ता सहेतुश्चिन्तामय्याः । अत्र मयड्विधानात् । समाधिर्भावना सहेतुर्भावनामय्याः । अत्र मयड्विधानम् । 'तत्प्रकृतवचने मयट्' (पा० सू० ५.४.२१) इति लक्षणात् । "तस्य विकारः" (पा० सू० ४.३.१३४) इति वा लक्षणात् । औपचारिकस्तु विकारः । श्रुतविकार इव श्रुतमयीति लक्षणान्तरं चोपसंख्यातव्यम् । *अन्नमयाः प्राणास्तृणमय्यो गाव इति* लोके प्रयोगदर्शनात् ॥ ५ ॥

संसर्गाकुशलवितर्कदूरीकरणादिति । *संसर्गदूरीकरणं* यदद्वितीयविहारित्वम् । तस्मात् कायेन व्यपकृष्टो भवति । *अकुशलवितर्कदूरीकरणं* यत्क्लिष्टवितर्कविवर्जनम् । तस्माच्चित्तेन व्यपकृष्टो भवति ।

ननु च साऽतिभूयस्कामताऽलब्ध एव, न लब्धे भवतीति कोऽनयोर्विशेष इति वक्तव्यमेतद् ? एवं तु युज्यते—लब्धेनाप्रणीतेनाप्रभूतेन परितासोऽसन्तुष्टिः । अलब्धप्रणीतप्रभूतेच्छा महेच्छता ॥ ६ ॥

विपर्यासात् तद्विपक्षौ,

असन्तुष्टिमहेच्छताविपर्ययेण तत्प्रतिपक्षौ वेदितव्यौ—सन्तुष्टिश्च, अल्पेच्छता चेति ।

त्रिधात्वाप्तामलौ च तौ ।

'तद्विपक्षौ' इति वर्तते । त्रिधातुकौ च प्रतिसंयुक्तौ च ; सास्रवानास्रवत्वात् । असन्तुष्टिमहेच्छते च कामावचर्याविव ।

कः पुनरनयोरल्पेच्छतासन्तुष्ट्योः स्वभावः ? इत्याह—

अलोभः,

अलोभस्वभावे ह्येते ।

आर्यवंशाश्च,

'अलोभः' इति वर्तते । आर्याणामेभ्यः प्रसवादार्यवंशाश्चत्वारः । तेऽप्यलोभस्वभावाः ।

तेषां तुष्ट्यात्मकास्त्रयः ॥ ७ ॥

सन्तुष्टिस्वभावाः । चीवर-पिण्डपात-शयनासनसन्तुष्टयः ।

प्रहाणभावनारामता चतुर्थ आर्यवंशः कथमलोभस्वभावः ? भवकामरागवमुख्यात् ॥ ७ ॥

लब्धेनाप्रणीतेनाप्रभूतेन परितास इति । *परितासो* दौर्मनस्यम् । तेन हि परितस्यति । उपक्षीयत इत्यर्थः । अप्रणीतत्वाद्, अप्रभूतत्वाद्वा । तेन लब्धेन परितासोऽ*सन्तुष्टिः । अलब्धे तु प्रणीतेऽपि वा प्रभूतेऽपि वा* इच्छाभिलाषो *महेच्छते*त्याचार्यमतम् । *कामावचर्याविवे*ति । लोभाकुशलस्वभावत्वात् ॥ ६ ॥

प्रहाणभावनारामता । निरोधमार्गरामता । सा न सन्तुष्टिस्वभावेति *कथं चतुर्थोऽप्ययमार्यवंशो भवत्यलोभस्वभावः ?* इत्यत आह— *भवकामरागवैमुख्या*दिति । भवरागवैमुख्यात्, कामरागवैमुख्याच्च । वैमुख्यं चालोभ इति ॥ ७ ॥

अथ चतुर्भिरार्यवंशैः किं दर्शितं भगवता ?

कर्मान्तेन त्रिभिर्वृत्तिः,

धर्मस्वामिना हि भगवता परित्यक्तस्ववृत्तिकर्मान्तेभ्यः **शिष्येभ्यो मोक्षार्थमभ्युपगतेभ्यो** द्वयं प्रज्ञप्तम्—वृत्तिश्च, कर्म च । त्रिभिरार्यवंशैर्वृत्तिः, **चतुर्थेन कर्म** । 'अनया वृत्त्येदं कर्म कुर्वाणा भवन्तो न चिरान्मोक्षं **प्राप्स्यन्ति' इति** ।

कस्मात् पुनरियमीदृशी वृत्तिरिदं च कर्म प्रज्ञप्तम् ?

तृष्णोत्पादविपक्षतः ।

चत्वारस्तृष्णोत्पादाः सूत्र उक्ताः—"चीवरहेतोर्भिक्षोस्तृष्णोत्पद्यमाना उत्पद्यते, प्रतितिष्ठन्ती प्रतितिष्ठति, अभिनिविशमानाऽभिनिविशते । पिण्डपातहेतोः, शय्यासनहेतोरिति । भवविभवहेतोर्भिक्षोस्तृष्णोत्पद्यमाना उत्पद्यते" इति विस्तरः । एषां प्रतिपक्षेण चत्वार आर्यवंशा देशिताः ।

ममाहङ्कारवस्त्विच्छातत्कालात्यन्तशान्तये ।। ८ ।।

स एवार्थः पुनः परिशेषेणोच्यते । ममकारवस्तु चीवरादयोऽहंकारवस्त्वात्मभावः । तत्रेच्छा तृष्णा । तत्र ममकारवस्त्विच्छायास्तत्कालशान्तये त्रय आर्यवंशा भवन्ति । उभयेच्छात्यन्तशान्तये चतुर्थ इति ॥ ८ ॥

उक्तमिदं यथा भूतस्य भावना सम्पद्यते ॥

तस्य त्वेवं पात्रीभूतस्य कथं तस्यां भावनायामवतारो भवति ?

तत्रावतारोऽशुभया चानापानस्मृतेन च ।

परित्यक्तस्ववृत्तिकर्मान्तेभ्य इति । परित्यक्तस्ववृत्तिभ्यः, परित्यक्तस्वकर्मान्तेभ्यश्च । तत्र वृत्तिः = जीविका, यया जीव्यते अन्नपानादिना । कर्मान्तः = कृषिशिल्पादिः ।

इति भवविभवहेतोरिति । *इति*शब्दो भवविभवप्रकाराभिद्योतकः । तत्र भवप्रकारे तृष्णा 'अहो बताहं इन्द्रः स्यां चक्रवर्ती स्याम्' इत्येवमादि । विभवतृष्णापि विनाशतृष्णा[1]—'अहो बतोच्छिद्येयं परं मरणात्' इत्यादि ॥ ८ ॥

---

१. विणाश०—जा० ।

स्मृतिरेव स्मृतम् ।

केषां पुनरशुभया ? केषामानापानस्मृत्या ? यथाक्रमम्—

अधिरागवितर्काणाम्,

अधिको रागो वितर्कश्चैषां त इमे अधिरागवितर्काः । यो हि प्रत्यासन्नमत्यर्थं रागचरितः, तस्याशुभया । यो हि वितर्कचरितः, तस्यानापानस्मृत्येति ।

अविचित्रालम्बनत्वादेषां वितर्कोपच्छेदाय संवर्तत इत्येके ।

अशुभा तु यत्र संस्थानविशेषलम्बनत्वाद् वितर्कमावहतीति; अबहिर्मुखत्वादित्यपरे । अशुभा हि चक्षुर्विज्ञानवद् बहिर्मुखी; तद्विषयोपनिध्यानात् ।

तत्र पुनश्चतुर्विधो रागः—वर्णरागः, संस्थानरागः, स्पर्शरागः, उपचाररागश्च । प्रथमस्य प्रतिपक्षेण विनीलकाद्याकारालम्बनामशुभां[1] वर्जयन्ति । द्वितीयस्य विखादितकविक्षिप्तालम्बनाम् , तृतीयस्य विपट्टुमकं[2] पूयनिबद्धास्थ्यालम्बनाम्, चतुर्थस्य निश्चेष्टमृतकायालम्बनाम् । अभेदेन तु शस्यते

शंकला सर्वरागिणाम् ।। ९ ।।

अस्थिशंकलायां हि सर्वमेतच्चतुर्विधं रागवस्तु नास्तीति अधिमुक्तिप्रादेशिकमनसिकारत्वादशुभया न क्लेशप्रहाणं विष्कम्भणं तु । स पुनरयमशुभां भावयन्

स्मृतिरेव स्मृतमिति । भावे क्तविधानमिति दर्शयति । *अवतारः = तीर्थं* येनावतरति । *प्रत्यासन्नमत्यर्थं रागचरित* इति । यस्याल्पेन रागः शीघ्रमुपतिष्ठते, स प्रत्यासन्नं रागचरितः । यस्याधिमात्रो रागः, सोऽत्यर्थं रागचरितः ।

*अविचित्रालम्बनत्वादि*ति । वायौ वर्णसंस्थानवैचित्र्यानुपलब्धेः[4] ।

अबहिर्मुखत्वादन्तर्मुखत्वात् । एषा वितर्कोपच्छेदाय संवर्तत इति प्राकृतम् । *तद्विषयोपनिध्यानादि*ति । चक्षुर्विषयनिरूपणादित्यर्थः ।

*विनीलकाद्याकारालम्बनामि*ति । आदिग्रहणेन विपूयकादिग्रहणम् । *विपट्टुमकमि*ति । यदुत्पन्नक्रिमिकम् । *चतुर्विधं रागवस्तु नास्ती*ति वर्णसंस्थानस्पर्शोपचारात्मकम् । *अधिमुक्तिप्रादेशिकमनसिकारत्वादि*ति । अधिमुक्तिमनसिकारत्वात्, प्रादेशिकमनसिकारत्वाच्चेत्यर्थः । अधिमुक्तिप्रधानोऽयं मनसिकारः । प्रादेशिक-

१. विनीलकाद्यालम्बनाम०—का० । २. विपट्टुम्ना—का० ।
३. ०मनस्कार०—का० । ४. संष्ठान०—जा० ।

योगाचारस्त्रिविध उच्यते —१. आदिकर्मिकः, २. कृतपरिजयः, ३. अतिक्रान्तमनस्कारश्च ॥ ९ ॥

तत्र—

आसमुद्रास्थिविस्तारसंक्षेपादादिकर्मिकः ।

१. अशुभां भावयितुकाम आदितो योगाचारः स्वाङ्गावयवे चित्तं निबध्नाति पादाङ्गुष्ठे ललाटे यत्र चास्याभिरतिः । स तत्र मांसक्लेदपीताधिमोक्षक्रमेणास्थि विशोधयन् सकलामस्थिशंकलां पश्यति । तथैव च पुनर्द्वितीयामधिमुच्यते यावद् विहारारामक्षेत्रक्रमेण समुद्रपर्यन्तां पृथिवीमस्थिसंकलां पूर्णामधिमुच्यतेऽधिमोक्षाभिवर्धनार्थम् । पुनश्च संक्षिपन् यावदेकामेव स्वामस्थिशंकलामधिमुच्यते चित्तसंक्षेपार्थम् । इयता किल कालेनाशुभा परिनिष्पन्ना भवति । अयमादिकर्मिको योगाचारः ।

पादास्थ्न आकपालार्धत्यागात् कृतजयः स्मृतः ॥ १० ॥

२. स पुनः चित्तसंक्षेपविशेषार्थं तस्यामस्थिशंकलायां पादास्थीनि हित्वा शेषं मनसिकरोति । एवं क्रमेण यावत् कपालस्यार्धं हित्वाऽर्धं मनसि करोति यः स कृतपरिजयः ॥१०॥

श्चायमव्यापीत्यर्थः । न ह्यशुभा पञ्चस्कन्धालम्बना, सकलभूम्यालम्बना वा । किं तर्हि ? रूपस्कन्धैकदेशालम्बना; तद्भावात् । *नाशुभया क्लेशप्रहाणं विष्कम्भणमात्रं तु* भवतीत्यर्थः ॥ ९ ॥

स्वाङ्गावयवे चित्तमुपनिबध्नातीति वचनात् न तावत् स्त्र्यङ्गावयवे; प्रयोगकाल एव संरागहेतुपरिहारात् । *अस्थि विशोधयन्निति* । अस्थिनो मांसमपयन् *सकलामस्थिशङ्कलां पश्यति* । यथोक्तम्—

"यो भवेन् नवको भिक्षुः शैक्षोऽसम्प्राप्तमानसः ।
गच्छेदसौ शिविपथिकां द्रष्टुं रागं यदीच्छति ॥
ततो विनीलकं पश्येत् ततः पश्येद् विपूयकम् ।
ततो व्याध्मानकं पश्येदस्थिशङ्कलिकामपि" ॥ ( ) इति ।

अत्र समासतोऽशुभायां वर्तमानो योगाचारस्त्रिविधः—आदिकर्मिकः, कृतपरिजयः, अतिक्रान्तमनसिकारश्च । तत्र संक्षेपचित्त आदिकर्मिको योगाचार एकस्मिन् पादांगुष्ठे मन उपनिबध्य पादांगुष्ठं क्लिद्यमानं पश्यति—एतन्मांसम्, एवं यावत् सर्वं शरीरमस्थिशङ्कलमधिमुच्यते । कृतपरिजयस्तु तथैव यावत् कपालार्धम् ॥ १० ॥

अतिक्रान्तमनस्कारो भ्रूमध्ये चित्तधारणात् ।

३. सोऽर्धमपि कपालस्य मुक्त्वा भ्रुवोर्मध्ये चित्तं धारयति । अयं किला-शुभायामतिक्रान्तमनस्कारो योगाचारः । अस्त्यशुभा आलम्बनपरीत्ततया परीत्ता न वशितापरीत्ततया परीत्तेति चतुष्कोटिकम् ; जिताजितमनस्कारयोरजितजितमनस्कार-योश्च स्वकायसमुद्रपर्यन्तालम्बनात् ।

अथ किंस्वभावेयमशुभा ? कतिभूमिका ? किमालम्बना ? क्व चोत्पद्यते ? यथाक्रमम्—

अलोभो दशभूः कामदृश्यालम्बा नृजाऽशुभा ॥ ११ ॥

अलोभस्वभावा दशभूमिका ससामन्तकध्यानान्तरेषु चतुर्षु ध्यानेषु कामधातौ च कामावचरदृश्यालम्बना, किं पुनर्दृश्यवस्तुसंस्थाने । अत एवार्थालम्बनेति सिद्धम् । मनुष्येष्वेवोत्पद्यते, नान्यस्यां गतौ, कुत एव धातौ ! तत्रापि नोत्तरकुरौ । नाम्नैव सिद्धमशुभाकारेति । यदध्विका तदध्वालम्बना । अनुत्पत्ति-

अतिक्रान्तमनसिकारस्तथैव यावद् *भ्रुवोर्मध्ये चित्तं धारयति* । विस्तरचित्तस्तु "आसमुद्रास्थिविस्तारः संक्षेपादादिकर्मिकः" इत्येवमादिस्त्रिविध इति । एवं च कृत्वा *चतुष्कोटिकः* प्रश्नो भवतीति । *जिताजितमनस्कारयोरि*ति विस्तरः । प्रथमा कोटिः—जितमनस्कारस्य *स्वकायालम्बना* अशुभा आलम्बनपरीत्ततया परीत्ता, कायस्याल्पत्वात् , न वशितापरीत्ततया । जितमनस्कारत्वादतिक्रान्तत्वादित्यर्थः । द्वितीया कोटिः- अजितमनस्कारस्य *समुद्रपर्यन्तालम्बना* अशुभा । वशितापरीत्ततया परीत्ता; अजितमनस्कारत्वात् । नालम्बनपरीत्ततया, समुद्रपर्यन्तालम्बनत्वात् । तृतीया कोटिः—अजितमनस्कारस्य स्वकायालम्बना अशुभा । आलम्बनपरीत्ततयापि परीत्ता; कायस्याल्पत्वात् । वशितापरीत्ततयापि; अजितमनस्कारत्वात् । चतुर्थी कोटिः—जितमनस्कारस्य समुद्रपर्यन्तालम्बना अशुभा । नाप्यालम्बनपरीत्ततया परीत्ता; समुद्रपर्यन्तालम्बनत्वात् । नापि वशितापरीत्ततया ; जितमनस्कारत्वात् ।

ससामन्तकध्यानान्तरेष्विति । सामन्तकेषु ध्यानान्तरे *चतुर्षु ध्यानेषु कामधातौ चेति दशभूमिका* । ध्यानसामन्तकानां चतुष्ट्वात् । *अत एवार्थालम्बनेति* । वर्णसंस्थानालम्बनत्वादर्थालम्बना । न तु नामालम्बनेत्यभिप्रायः ।

नाम्नैव सिद्धमशुभाकारेति । आकारार्थं न सूत्रयितव्यमित्यभिप्रायः । *यदध्विका तदध्वालम्बनेति* । चक्षुर्विज्ञानवदतीताया अतीतमालम्बनम् , एवं यावत्

धर्मिणी तु त्र्यध्वालम्बना। अधिमुक्तिमनस्कारत्वात् सास्रवा। वैराग्यलाभिकी च प्रायोगिकी च, उचितानुचितत्वात् ॥११॥

॥ उक्तमशुभायाः सप्रभेदं लक्षणम् ॥

आनापानस्मृतिः प्रज्ञा पञ्चभूर्वायुगोचरा।

कामाश्रया,

आननमानः = आश्वासः, यो वायुः प्रविशति। अपाननमपानः = प्रश्वासः, यो वायुः निष्कामति। तयोः स्मृतिरानापानस्मृतिः। सैव प्रज्ञास्वभावा। स्मृतिवचनं तु स्मृत्युपस्थानवत्; तद्बलाधानवृत्तित्वात्। पञ्चसु भूमिसु त्रिषु सामन्तकेषु ध्यानान्तरे कामधातौ चोपेक्षासम्प्रयोगित्वात्। वितर्कानुगुणत्वात् किल सुखदुःखयोस्तत्प्रतिपक्षस्य ताभ्यामसम्प्रयोगः। सुखसौमनस्ययोश्चावधानपरिपन्थित्वात्। तस्याश्चावधानसाध्यत्वादिति[1]।

प्रत्युत्पन्नायाः प्रत्युत्पन्नमिति। स्वालम्बननियतत्वात्। *अधिमुक्तिमनसिकारत्वात्* सूत्रितम्। *उचितानुचितत्वादिति*। अनादिमति संसारे उचितत्वाद् *वैराग्यलाभिकी*। अनुचितत्वात् *प्रायोगिकी* ॥११॥

कायस्मृत्युपस्थानादीनि प्रज्ञास्वभावानि। *तद्बलाधानवृत्तित्वात्*। तस्याः स्मृतेर्बलस्याधानेन वृत्तिरेषामिति स्मृतिबलाधानवृत्तीनि कायस्मृत्युपस्थानादीनि कायप्रज्ञादय्यादीनि स्मृत्युपस्थानानीत्युच्यन्ते। तद्वदानापानप्रज्ञा स्मृतिबलाधानवृत्तित्वादानापानस्मृतिरित्युच्यते। *पञ्चसु भूमिष्विति*। *त्रिषु सामन्तकेषु* चतुर्थसामन्तकवर्ज्येषु। *ध्यानान्तरे कामधातौ चेति पञ्चसु भूमिषु*। किं कारणम्? *उपेक्षासम्प्रयोगित्वात्*। यस्मात् प्रथमध्याने सामन्तकादिषूपेक्षावेदना भवति। चतुर्थध्याने सामन्तके तु यद्यप्युपेक्षास्ति, सा स्वभूमिराश्वासप्रश्वासानाम्। अथ किमर्थमेषोपेक्षा सम्प्रयोगिण्येवावधार्यत इति? अतो ब्रवीति – *वितर्कानुगुणत्वादिति*। *तत्प्रतिपक्षस्य* वितर्कप्रतिपक्षस्यानापानस्मृतेस्ताभ्यां सुखदुःखाभ्यामसम्प्रयोगः। *सुखसौमनस्ययोश्चावधानप्रतिपन्थित्वात्*। आभोगप्रत्यनीकत्वात्। *तस्याश्चानापानस्मृतेरवधानसाध्यत्वात्* ताभ्यामसम्प्रयोग इति वितर्कानुगुणत्वात्।

---

१. अवधाने०—का०।

ये तु मौलेष्वपि ध्यानेषु समापन्नस्योपेक्षामिच्छन्ति, तेषामष्टभूमिका; परेणाश्वासप्रश्वासानामभूमित्वात् । वाय्वालम्बना चैषा कामधात्वाश्रया । देवमनुष्येषु प्रायोगिकी वैराग्यलाभिकी च ।

तत्त्वमनस्कारश्चैषा इदन्धर्माणामेव,

न बाह्यानाम्,

उपदेशाभावात् । स्वयं च सूक्ष्मधर्मानभिसम्बोधात् ।

सा चेयम्—

षड्विधा गणनादिभिः ॥ १२ ॥

षट्कारणयुक्ता चैषा परिपूर्णा भवति—गणनया, अनुगमेन, स्थापनया, उपलक्षणया, विवर्त्तेन, परिशुद्धया च । तत्र च गणना नाम आश्वासप्रश्वासेषु चित्तं दत्त्वाऽनभिसंस्कारेण कायं चित्तं नाध्युपेक्ष्य[1] स्मृतिमात्रेण गणयति—एकं द्वौ यावद्दश । चित्ताभिसंक्षेपविक्षेपभयान्नाल्पबहुतरा । तस्यां तु त्रयो दोषाः— १. ऊनगणना, यदि द्वावेकं गृह्णाति । २. अधिकगणना, यद्येकं द्वाविति । ३. संकरः, यद्याश्वासं प्रश्वासतो गृह्णाति विपर्ययाद्वा । अतोऽन्यथा सम्यग्गणना । अन्तरविक्षेपे पुनरादितो गणयितव्यं तावद् यावत् समाधिं लभते ।

अनुगमो नाम अनभिसंस्कारेणाश्वासप्रश्वासानां गतिमनुगच्छति—कियद् दूरमेते प्रविशन्ति वा, निष्क्रामन्ति वा, किमेते सर्वशरीरव्यापिन एकदेश-

किलेति । *किलशब्दः* परमतद्योतकः । तेनेदं पक्षान्तरमुपन्यस्यते—*ये तु मौलेष्विति* विस्तरः । *परेणेति* । चतुर्थाद् ध्यानादारभ्य ।

कामधात्वाश्रयेति । तत्र वितर्कभूयस्त्वात् । *प्रायोगिकी* । अनुचितत्वात् । *वैराग्यलाभिकी* । उचितत्वात् ।

इदन्धर्माणामिति । अयं धर्मो बुद्ध एषामिति इदन्धर्माणः, तेषामेव । बौद्धानामित्यर्थः । *उपदेशाभावादिति* । *बाह्यानां* हि प्राणायामोपदेशोऽस्ति, नानापानस्मृत्युपदेश इति । *स्वयं च सूक्ष्मधर्मानभिसम्बोधादिति* । उपदेशमन्तरेण यस्माद् बाह्यानां नास्ति स्वयं सूक्ष्मधर्माभिसम्बोधः । सूक्ष्मत्वं पुनरस्याः षट्कारणयुक्तत्वात् । *कायं चित्तं वाध्युपेक्ष्येति* । अनासज्येत्यर्थः ।

१. चा०—का० ।

चारिण इति। तान् प्रविशतः कण्ठहृदयनाभिकट्यूरुजङ्घाप्रवेशक्रमेण यावत् पादावनुगच्छति।

निष्कामतो वितस्तिव्यामान्तरं यावद्वायुमण्डलं वैरम्भाश्च वायव इत्यपरे। तदेतत् तत्त्वमनसिकारत्वान्न युक्तमेतत्[1]।

स्थापना नाम नासिकाग्रे यावत् पादाङ्गुष्ठे स्थितां पश्यति, मणिसूत्रवत्।

किमनुग्राहका एते उपघातकाः शीता उष्णा इति? उपलक्षणा नाम। नैते केवला वायव एव, चत्वार्येतानि महाभूतानि महाभूताभिनिर्वृत्तमुपादायरूपं तदाश्रिताश्चित्तचैत्ता इति पञ्चस्कन्धानुपलक्षयति।

विवर्तो नाम वाय्वालम्बनां वृद्धिं विवर्त्योत्तरोत्तरेषु[2] कुशलमूलेषु संनियोजनं यावदग्रधर्मेषु।

परिशुद्धिर्दर्शनमार्गादिष्ववतारः।

स्मृत्युपस्थानादिवज्रोपमसमाध्यन्ता विवर्त इत्यपरे। क्षयज्ञानादि-विशुद्धिरिति[3]।

गणानानुगमः स्थानं लक्षणार्थविवर्त्तना;
परिशुद्धिश्च षोढेयमानपानस्मृतिर्मता॥

इति संग्रहश्लोकः॥ १२॥

वितस्तिव्यामान्तरमिति। बलवद्बलप्राणियोगात्।

यावद्वायुमण्डलमिति अधस्तादनुगच्छति। *वैरम्भाश्च वायव* इत्युपरिष्टात्। *तत्त्वमनसिकारत्वान्न युक्तमेतत्*। यावद्वायुमण्डलं वैरम्भाश्च वायव इति। अधिमुक्तिमनस्कारस्यैषा कल्पना युज्येत।

किमनुग्राहका एते यावदुष्णा इति। स्थापनैवेयं द्रष्टव्या। कायप्रदेश एवानुग्राहकादिविशेषस्थापनतः। *तदाश्रिताश्चित्तचैत्ता* इति। तत्प्रतिबद्धवृत्तय इत्यर्थः। *उत्तरोत्तरेषु कुशलमूलेष्विति*। स्मृत्युपस्थानोष्मगतादिष्विति। *दर्शनमार्गादिष्विति*। आदिशब्देन भावनामार्गग्रहणम्।

क्षयज्ञानादिविशुद्धिरिति। *आदिशब्देन* अनुत्पादज्ञानाशैक्षसम्यग्दृष्टि-ग्रहणम्॥ १२॥

१. युक्तम्—का०। २. विवर्त्योत्तरेषु—का०। ३. ०शुद्धिरिति—का०।

तत्र पुनर्वेदितव्यौ—

आनापानौ यतः कायः,

यद्भूमिको हि कायः तद्भूमिकावेतौ ; कायैकदेशत्वात् । कायचित्तविशेषसंनिश्रिता आश्वासप्रश्वासा वर्तन्ते, आरूप्यकललादिगतानामभावात्, अचित्तचतुर्थध्यानसमापन्नानां च । यदि हि कायः शुषिरो भवति आश्वासप्रश्वासभूमिकं च चित्तं संमुखीभूतम्, एवं ते वर्तन्ते। जायमानस्य चतुर्थध्यानाद् व्युत्तिष्ठमानस्य च प्रविशन्ति, म्रियमाणस्य चतुर्थं च ध्यानं समापद्यमानस्य निष्क्रामन्ति ।

एतौ चानापानौ

सत्त्वाख्यौ,

नासत्त्वसंख्यातौ ।

अनुपात्तकौ ।

इन्द्रियविनिर्भागित्वात् ।

नैःष्यन्दिकौ,

नौपचयिकविपाकजौ । कायोपचयेनापचयात्[1] उच्छिन्नानां[2] पुनः प्रतिसन्धानाच्च । न ह्येतद् विपाकरूपस्यास्ति ।

"*आनापानौ यतः कायः*" इति । आनापानस्मृतिसम्बन्धेन सर्वभूमिकावानापानौ निर्दिश्येते । *यद्भूमिको हि काय* इति । कामावचरः यावत् तृतीयध्यानभूमिकः । *तद्भूमिकावेतौ* । नान्यभूमिकौ । *कायचित्तविशेषसंनिश्रिता* इति । कायविशेषसंनिश्रिताः, चित्तविशेषसंनिश्रिताश्च*आश्वासप्रश्वासाः* । कस्माद् ? इत्याह—*आरूप्यकललादिगतानामभावादिति* । कायाभावादारूप्यगतानां न भवन्ति, कललादिगतानां च । कललार्बुदपेश्यादिगतानां च न भवन्ति; *कायविशेषाभावात्*, सुषिरकायाभावादित्यर्थः । *अचित्तानां च न भवन्ति* । चित्ताभावात् । *चतुर्थध्यानसमापन्नानामपि न भवन्ति* । आश्वासप्रश्वासभूमिचित्तविशेषाभावात् । अत एवाह— *यदि कायः सुषिर इति* विस्तरः ।

इन्द्रियविनिर्भागित्वादिति । इन्द्रियपृथग्वृत्तित्वादित्यर्थः । कायोपचयेनापचयान्नौपचयिकौ । *उच्छिन्नानां चाश्वासप्रश्वासानां पुनःप्रतिसन्धानान्न विपाकजौ* ।

---

१. °नानुपचयात्—का० । २. छिन्नाना –का० ।

अभि० को० ३ : १०

नाधरेण लक्ष्येते मनसा च तौ ।। १३ ।।

स्वभूम्युपरिभूमिकेन च तयोश्चित्तेनोपलक्षणम् । नाधरेणैर्यापथिक-नैर्माणिकेन[1] । उक्ते द्वे अवतारमुखे । ताभ्यां तु समाधिर्लभ्या ।।१३।।

निष्पन्नशमथः कुर्यात् स्मृत्युपस्थानभावनाम् ।

विपश्यनायाः सम्पादनार्थम् ।

कथं च पुनः कुर्यात् ?

कायविच्चित्तधर्माणां द्विलक्षणपरीक्षणात् ।। १४ ।।

कायं स्वसामान्यलक्षणाभ्यां परीक्षते, वेदनां चित्तं धर्मांश्च । स्वभाव एवैषां स्वलक्षणम् । सामान्यलक्षणं तु अनित्यता संस्कृतानाम्, दुःखता सास्रवाणाम् शून्यताऽनात्मते सर्वधर्माणाम् ।

कायस्य पुनः कः स्वभावः ? भूतभौतिकत्वम् । धर्मास्त्रिभ्योऽन्ये । समाहितस्य किल कायं परमाणुशः क्षणिकतश्च पश्यतः कायस्मृत्युपस्थानं निष्पन्नं भवति ।। १४ ।।

न ह्येतद्विपाकरूपस्यास्ति । विपाकात्मकस्य रूपस्य चक्षुरादेरेतत् पुनः प्रति-सन्धानं नास्ति । अरूपस्य तु चित्तचैत्तस्य पुनः प्रतिसन्धानं न वार्यते ।

नाधरेणैर्यापथिकनैर्माणिकेनेति । ऐर्यापथिकं नैर्माणिकं च चित्तमधर-भूमिकं सम्मुखीभवति, यावच्चतुर्थध्यानोपपन्नस्येत्यत आशंक्योच्यते— नाधरभूमिकाभ्यां ताभ्यामुपलक्षणमिति ।। १३ ।।

विपश्यनायाः सम्पादनार्थमिति । प्रज्ञायाः सम्पादनार्थमित्यर्थः । निष्पन्नसमाधेरपि हि प्रज्ञामन्तरेण क्लेशा न प्रहीयन्ते । "*ज्ञानवध्याः क्लेशाः*" इति वचनात् । कुतः पुनरेतत् स्मृत्युपस्थानभावनया विपश्यना सम्पद्यत इति ? सूत्रात् । "एकायनोऽयं भिक्षवो मार्गो यदुत स्मृत्युपस्थानानि । केवलोऽयं कुशलराशिः यदुत चत्वारि स्मृत्युपस्थानानि" (   ) इति वचनात् ।

"*कायविद्*" इति । वेदनावित् । *स्वभाव एवैषां स्वलक्षणमिति* । कः स्वभावः ? कायस्य भूतभौतिकत्वम्, वेदनाया अनुभवत्वम्, चित्तस्योप-लब्धित्वम् । एभ्यस्त्रिभ्योऽन्येषां यथास्वं स्वभावः । *दुःखता सास्रवाणामिति* ।

---

१. °णैर्यापथिक — का० ।

अथ स्मृत्युपस्थानानां कः स्वभावः ? त्रिविधस्मृत्युपस्थानं स्वभावसंसर्गालम्बनस्मृत्युपस्थानम् ।

तत्र स्वभावस्मृत्युपस्थानम्

प्रज्ञा,

कीदृशी प्रज्ञा ?

श्रुतादिमयी,

श्रुतमयी, चिन्तामयी, भावनामयी च । त्रिविधानि स्मृत्युपस्थानानि श्रुत-चिन्ता-भावनामयानि ।

अन्ये संसर्गालम्बनात्[1],

अन्ये तत्सहभुवो धर्माः संसर्गस्मृत्युपस्थानम् । तदालम्बनात्[2] आलम्बन-स्मृत्युपस्थानम् ।

स्वभावस्मृत्युपस्थानं प्रज्ञेति कुत एव तत् ? "काये[3] कायानुपश्यना स्मृत्युपस्थानम्" इति वचनात् ।

आर्यप्रतिकूललक्षणं दुःखमिति व्याख्यातमेतत् । धर्मास्त्रिभ्योऽन्य इति असम्भिन्नव्यवस्थामभिसन्धायैवमुच्यते । सम्भिन्नव्यवस्थायां तु कायादयोऽपि निगृह्यन्ते । पुनः सर्वे संस्कृता असंस्कृताश्च धर्मा द्रष्टव्याः ।। १४ ।।

स्वभावस्मृत्युपस्थानं प्रज्ञेति । यस्मात् संसर्गालम्बनपमेक्ष्येयं प्रज्ञोपतिष्ठते, तस्मात् स्मृत्युपस्थानमित्युच्यते ।

"*श्रुतादिमयी*" इति । विशेषणम् । यस्मात् स्मृत्युपस्थानानि प्रायोगिकाणि नोपपत्तिलभ्यानि कस्मात् प्रज्ञास्वभावमित्युच्यते, किमन्यथापि स्मृत्युपस्थानमस्ति ? इति उच्यते—"*अन्ये संसर्गालम्बनाद्*" इति । *अन्ये* तत्सहभुवो वेदनादयः । संसर्गेण स्मृत्युपस्थानं *संसर्गस्मृत्युपस्थानम्* । स्वभावस्मृत्युपस्थानसंसर्गात् । *तदालम्बनादिति* । स्वभावसंसर्गस्मृत्युपस्थानालम्बनाद् *आलम्बनस्मृत्युपस्थानम्* । *तदालम्बना आलम्बनस्मृत्युपस्थानमित्यपरे* पठन्ति । आलम्ब्यन्त इत्यालम्बना । के ? कायवेदनाचित्तधर्माः । तदेवं सति तदालम्बनस्मृत्युपस्थानं सर्वधर्मस्वभावं भवति । उक्तं च भगवता—"सर्वे धर्मा इति भिक्षवश्चतुर्णां स्मृत्युपस्थानानामेतदधिवचनम्" इति ।

---

१. °लम्बनाः—का० । २. तदालम्बना—का० । ३. कामे—का० ।

का पुनरनुपश्यना ? प्रज्ञा । तया हि तद्वाननुपश्यः क्रियते । **यतश्चोक्तम्** "अध्यात्मं काये कायानुपश्यी विहरति" इति । **अनुपश्यमस्यास्ति दर्शनमित्यनुपश्यी,** काये ऽनुपश्यी कायानुपश्यी ।

कस्मात् प्रज्ञा 'स्मृत्युपस्थानम्' इत्युक्ता **भगवता** ? **स्मृत्युद्रेकत्वादिति वैभाषिकाः** । स्मृतिबलाधानवृत्तित्वादिति योऽर्थः । **दारुपाटकीलसन्धारणवत्**[1] ।

एवं तु युज्यते—स्मृतिरनयोपतिष्ठत इति स्मृत्युपस्थानं प्रज्ञा; यथा-

---

तया हि प्रज्ञया तद्वान् *प्रज्ञावान्* । **अनुपश्यः** *क्रियत* इति । **अनुपश्यतीत्यनुपश्यः** । "पाघ्राध्माधेट्दृशः शः" (पा० सू० ३.१.१३७) इति शप्रत्ययः । अनुपश्यं पुद्गलं करोतीत्यनुपश्ययति । प्रज्ञास्वभावे त्वेवं विग्रहः— अनुपश्यस्य करणमनुपश्यनेति । तया हि प्रज्ञया तद्वान् प्रज्ञावाननुपश्यः क्रियते । यथा प्रज्ञायोगात् प्राज्ञः पुद्गल उच्यते, एवमनुपश्यनायोगादनुपश्य इत्यतोऽनुपश्यना प्रज्ञेति सिद्धम् । *यतश्चोक्तं भगवता*—**अध्यात्म** प्रत्यात्मं *काये कायानुपश्यी* कायानुदर्शी *विहरतीति* । तेनापि ज्ञायतेऽनुपश्यना प्रज्ञेति । कथमिति ? साधयति—*अनुपश्यमस्यास्ति* । किं तद् ? दर्शनम् । दर्शनलक्षणं ह्यनुपश्यम् । अतोऽनुपश्यी पुद्गलः, दण्डिवत् । ततः सप्तमीतत्पुरुषः— ***कायेऽनुपश्यी कायानुपश्यीति*** । कायमनुपश्यितुं शीलमस्येति *कायानुपश्यीति* णिनिरपि (पा० सू० ३.२.७८) यदि विधीयेत, तथाप्येतद्रूपं सिद्ध्यतीति पश्यामः ।

स्मृत्युद्रेकत्वादिति । स्मृत्यधिकत्वादित्यर्थः । *स्मृतिबलाधानवृत्तित्वादिति* । बलस्याधानम् स्मृतेर्बलाधानं स्मृतिबलाधानम्, स्मृतिबलाधानेन वृत्तिरस्या इति स्मृतिबलाधानवृत्तिः प्रज्ञा, तद्भावः तस्मात् । *दारुपाटकीलसन्धारणवत्* । यथा दारुपाटेन तीक्ष्णकीलेन दारुपाटस्य सन्धारणम्, एवमस्याः प्रज्ञायाः स्मृतिबलाधानेनालम्बने वृत्तिरिति । यदि हि स्मृतिरालम्बनं धारयत्येवं प्रज्ञा प्रजानातीति, तदेवं स्मृत्योपतिष्ठत इति स्मृत्युपस्थानं प्रज्ञेति *वैभाषिकीयोऽर्थः* । "कृत्यल्युटो बहुलम्" (पा० सू० ३.३.११३) इति कर्तर्यपि ल्युड् भवतीति ।

एवं तु युज्यत इत्याचार्यः । करणसाधनमेतत् । *स्मृतिरनयोपतिष्ठत* इति । अर्थप्रदर्शनमात्रमेतत् । विग्रहस्त्वेवं कर्तव्यः—उपतिष्ठतेऽनेनेत्युपस्थानम्, स्मृतेरुपस्थानं स्मृत्युपस्थानमिति । कथं **स्मृतिरनयोपतिष्ठते** ?

---

१. °पाटन०—का० ।

दृष्टस्याभिलपनात् । तद्यथा ह्युक्तमायुष्मता अनिरुद्धेन—"तस्य काये कायानुपश्यिनो विहरतः कायालम्बनानुस्मृतिस्तिष्ठति सन्तिष्ठते" इति विस्तरः ।

भगवताऽपि चोक्तम्—"तस्य काये कायानुपश्यिनो विहरत उपस्थिता स्मृतिर्भवत्यसम्मूढा" इति ।

यत्र तूक्तम्---"कथं भिक्षवश्चतुर्णां स्मृत्युपस्थानानां समुदयश्च भवत्यस्तङ्गमश्च । आहारसमुदयात् कायस्य समुदयो भवति, आहारनिरोधात् कायस्यास्तङ्गमः" इति । अत्रालम्बनमेव स्मृत्युपस्थानमुक्तम्, स्मृतिरत्रोपतिष्ठत इति कृत्वा । यथालम्बनं चैषां नाम स्वपरोभयसन्तत्यालम्बनत्वात् प्रत्येकमेषां त्रैविध्यम् ।

इत्याह—*यथादृष्टस्याभिलपनादिति* । यस्माद् यथादृष्टोऽर्थः प्रज्ञया, तथैवाभिलप्यते । स्मृत्योद्गृह्यत इत्यर्थः । क्व पुनरुपतिष्ठते ? काये, यावद्धर्मेषु । काये स्मृत्युपस्थानं कायस्मृत्युपस्थानम् । एवं यावद् धर्मेषु स्मृत्युपस्थानं धर्मस्मृत्युपस्थानमिति । यथा च स्वभावस्मृत्युपस्थानस्य, एवं संसर्गस्मृत्युपस्थानस्यापि । यथैव हि प्रज्ञया स्मृतिरुपतिष्ठते कायादिषु, ए ं तत्सम्प्रयुक्तैरपीति ।

इदानीं सूत्रोक्तानां स्मृत्युपस्थानानां करणसाधनत्वमसम्बध्यमानं दृष्ट्वा कारकान्तरेणार्थं विवक्षुराह—*यत्र तूक्तमिति* विस्तरः । यथा *कायस्य समुदयास्तङ्गमावुक्तौ*, एवं वेदनादीनामपि वक्तव्यौ । कथम् ? स्पर्शसमुदयात् वेदनायाः समुदयो भवति, स्पर्शनिरोधाद्वेदनाया अस्तङ्गमः । नामरूपसमुदयाच्चित्तस्य समुदयो भवति, नामरूपनिरोधाच्चित्तस्यास्तङ्गमः । मनसिकारसमुदयाद्धर्माणां समुदयो भवति, मनसिकारनिरोधाद् धर्माणामस्तङ्गम इति । *अत्र सूत्रे आलम्बनमेव* कायवेदनाचित्तधर्माः *स्मृत्युपस्थानम् । स्मृतिरत्र कायादिषूपतिष्ठत इति कृत्वा* । तदेवमधिकरणसाधनं दर्शितं भवति—उपतिष्ठते स्मृतिरस्मिन्नित्युपस्थानम्, स्मृतेरुपस्थानं स्मृत्युपस्थानम् । एवं यावद्धर्मा एव स्मृत्युपस्थानं धर्मस्मृत्युपस्थानमिति विग्रहः । यदि चात्र सूत्रे आलम्बनं स्मृत्युपस्थानं नाभिप्रेतमभविष्यत्, न *भगवानेवमवक्ष्यत्*—'कथं च भिक्षवश्चतुर्णां स्मृत्युपस्थानानां समुदयश्च भवत्यस्तङ्गमश्च । आहारसमुदयात् कायस्य समुदयो भवति, आहारनिरोधात् कायस्यास्तङ्गमः" इति विस्तरः । कायादीनां हि स्मृत्युपस्थानत्वे सति तथा वचनं युज्येत । तस्मात् कायादय आलम्बनस्मृत्युपस्थानमिति सिद्धम् ।

यथालम्बनं चैषां नामेति । एषां कायस्मृत्युपस्थानादीनां आलम्बनापेक्षया कायस्मृत्युपस्थानं यावद्धर्मस्मृत्युपस्थानमिति नाम व्यवस्थाप्यते । *स्वपरोभयसन्तत्यालम्बनत्वात्* । स्वसन्तत्यालम्बनत्वात्, परसन्तत्यालम्बनत्वात्, उभय-

क्रमः ।

यथोत्पत्ति,

कस्मात् पुनरेवमुत्पत्तिः ? औदारिकस्य पूर्वं दर्शनात् । यतो वा कामरागस्य कायोऽधिष्ठानम्, स च वेदनाभिलाषात्, स च चित्तस्यादान्तत्वात्, तत् क्लेशाप्रहाणादिति वैभाषिकाः ।

चतुष्कं तु विपर्यासविपक्षतः ।। १५ ।।

शुचिसुखनित्यात्मविपर्यासानां चतुर्णां प्रतिपक्षेण चत्वारि स्मृत्युपस्थानान्युक्तानि यथाक्रमम्, नाधिकन्यूनानि । एवं च त्रीण्यसम्भिन्नालम्बनानि, चतुर्थमुभयथा । यदि धर्मानेव पश्यत्यसम्भिन्नालम्बनम्, अथ कायादीनां द्वे त्रीणि चत्वारि वा समस्तानि पश्यति सम्भिन्नालम्बनम् ।। १५ ।।

सन्तत्यालम्बनत्वाच्च *प्रत्येकमेकैकश एषां* कायस्मृत्युपस्थानादीनां त्रैविध्यं *भवति* । सूत्रे वचनात् । कथम् ? "अध्यात्मं काये कायानुपश्यी विहरति, आतापी सम्प्रजानन् स्मृतिमान् विनीय लोकेऽभिध्यादौर्मनस्ये । बहिर्धा काये कायानुपश्यी विहरति आतापीति पूर्ववत् । अध्यात्मबहिर्धा काये कायानुपश्यी विहरतीति पूर्ववत् । एवं तावत् कायस्मृत्युपस्थानस्य त्रैविध्यम् । वेदनास्मृत्युपस्थानादीनामप्यध्यात्मं वेदनायां वेदनानुपश्यी विहरति" इति विस्तरेण त्रैविध्यं योज्यम् ।

औदारिकस्य पूर्वं दर्शनादिति । *कायस्त्रिभ्य औदारिकः*, षड्विज्ञानविज्ञेयत्वादिति तस्य पूर्वं दर्शनम् । द्वाभ्यां वेदना प्रकारौदारिकतयेति तदनन्तरं तस्या दर्शनम् । सूक्ष्मप्रचारत्वाद् दुर्विज्ञतया धर्माः सूक्ष्मा इत्यतस्तेभ्यः पूर्वं चित्तस्य दर्शनम् । अन्ते धर्माणामिति । *स चेति* । कामरागः । *स च चित्तस्येति* । स वेदनाभिलाषः । *तत् क्लेशाप्रहाणात्* । तददान्तत्वम् ।

यथाक्रममिति । *शुचिविपर्यासस्य प्रतिपक्षेण* कायस्मृत्युपस्थानम् । *सुखविपर्यासस्य प्रतिपक्षेण* वेदनास्मृत्युपस्थानम् । यत्किञ्चिद् वेदितमिदमत्र दुःखस्येति । *नित्यविपर्यासस्य प्रतिपक्षेण* चित्तस्मृत्युपस्थानम्; चित्तस्य लघुपरिवर्तित्वात् । *आत्मविपर्यासस्य प्रतिपक्षेण* धर्मस्मृत्युपस्थानम् । पिण्डविभागतो धर्माणामनात्मकारित्वाद्धर्ममात्रं रहितमात्मनेति धर्मनिर्वचनतः । धर्मा इमे पृथग्पृथगवस्थिताः । न च कश्चित् स्वतन्त्र आत्मेति । तद्दर्शनाद्वा । *चतुर्थमुभयथेति* । धर्मस्मृत्युपस्थानमसम्भिन्नालम्बनममिश्रालम्बनं *भवति* । कायवेदनाचित्तव्यतिरिक्तधर्मालम्बनत्वसम्भवात् । सम्भिन्नालम्बनमपि भवति । *कायादीनां द्वे त्रीणि चत्वारि वा समस्तानि पश्यतीति* । यदि कायं वेदनां च

एवं कायाद्यालम्बनानि स्मृत्युपस्थानान्यभ्यस्य

स धर्मस्मृत्युपस्थाने समस्तालम्बने स्थितः ।

अनित्यदुःखतः शून्यानात्मतस्तान् विपश्यति ।। १६ ।।

सम्भिन्नालम्बने धर्मस्मृत्युपस्थाने स्थितस्तान् कायादीन् सर्वानभिसमस्य चतुर्भिराकारैः पश्यति—अनित्यतः, दुःखतः, शून्यतः, अनात्मतश्च ॥ १६ ॥

तत ऊष्मगतोत्पत्तिः,

तस्माद्धर्मस्मृत्युपस्थानादेवमभ्यस्तात् क्रमेणोष्मगतं नाम कुशलमूलमुत्पद्यते । ऊष्मगतमिवोष्मगतम् ; क्लेशेन्धनदहनस्यार्यमार्गाग्नेः पूर्वरूपत्वात् ।

तच्चतुःसत्यगोचरम् ।

तदूष्मगतं प्राकर्षिकत्वाच्चतुःसत्यालम्बनम् ।

षोडशाकारम्,

दुःखं चतुर्भिराकारैः पश्यति--अनित्यतः, दुःखतः, शून्यतः, अनात्मतश्च । समुदयं चतुर्भिः—हेतुतः, समुदयतः, प्रभवतः, प्रत्ययतश्च । निरोधं चतुर्भिः—निरोधतः, शान्ततः, प्रणीततः, निःसरणतश्च । मार्गं चतुर्भिः—मार्गतः, न्यायतः, प्रतिपत्तितः, नैर्याणिकतश्च । एषां तु विशेषणं पश्चाद् वक्ष्यामः ।

ऊष्मभ्यो मूर्धानः,

मृदुमध्याधिमात्रक्रमाभिवृद्धेभ्य ऊष्मभ्यो मूर्धान उत्पद्यन्ते ।

तेऽपि तादृशाः ।। १७ ।।

द्वे पश्यति धर्मस्मृत्युपस्थानम्, तत् सम्भिन्नालम्बनम् । यदि कायं यावद्धर्मांश्च पश्यति, तदपि तथैव । यदपि कायं वेदनां चित्तं धर्मांश्च समस्तान् पश्यति, तदपि सम्भिन्नालम्बनं धर्मस्मृत्युपस्थानमिति ॥ १५ ॥

"*समस्तालम्बने स्थितः*" इति । कायवेदनाचित्तधर्मानभिसमस्य ॥ १६ ॥

ऊष्मगतमिति । उष्मप्रकारं कुशलमूलम् । *पूर्वरूपत्वादिति* । प्रथमनिमित्तत्वात् । पूर्वस्वभावत्वाद्वा ।

प्राकर्षिकत्वादिति । प्राबन्धिकत्वादित्यर्थः ।

एषां तु विशेषणं पश्चाद्वक्ष्याम इति । सप्तमे कोशस्थाने "द्रव्यतः षोडशाकाराः" (अभि० को० ७.१३) इत्यर्थः ।

यादृशा ऊष्माणश्चतुःसत्यालम्बनाः **षोडशाकाराश्च**। उत्कृष्टतरत्वात्तु नामान्तरम्। चलकुशलमूलमूर्धत्वात् मूर्धानः। एभ्यो हि पातः, अतिक्रमो वा ॥ १७ ॥

उभयाकरणं धर्मेण,

एषां पुनरुभयेषामूष्मगतमूर्ध्नां धर्मस्मृत्युपस्थानेनाकरणम्।
किमिदमाकरणम्? सत्येष्वाकाराणां प्रथमतो विन्यसनम्।

अन्यैरपि तु वर्धनम्।

चतुर्भिरपि स्मृत्युपस्थानैरेषां वर्धनम्। विवर्धयतः पूर्वप्रतिलब्धानामसम्मुखीभावः; अबहुमानात्[1]।

मृदुमध्याधिमात्रक्रमाभिवृद्धेभ्यः पुनरुत्पद्यते
तेभ्यः क्षान्तिः,

यदि तेऽपि तादृशा अथ किमर्थमुपदिश्यन्ते? इत्यत आह—*उत्कृष्टतरत्वात्तु नामान्तरमिति*। अथ कस्मान्मूर्धान इत्युच्यन्ते? इत्याह—*चलकुशलमूलमूर्धत्वादिति*। मूर्धशब्दोऽयं प्रकर्षपर्यन्तवाची। तथा हि लोके वक्तारो भवन्ति—'मूर्धगता खल्वस्य श्रीः' इति। द्वे हि कुशलमूले चले ऊष्मगतमूर्धलक्षणे; परिहाणिसम्भवात्। द्वे अचले क्षान्तिलौकिकाग्रधर्मलक्षणे; विपर्ययात्। तत्र तयोर्यन्मृदु तदूष्मगतम्। यदधिमात्रम्, ते मूर्धानः। अचलयोरपि यन्मृदु सा क्षान्तिः। यदधिमात्रम् ते लौकिकाग्रधर्माः। *एभ्यो हि पातोऽतिक्रमो वेति*। मूर्ध्नां चलत्वात्। वृक्षादिमूर्धभ्यो हि लोके पातो वा भवेद्, अतिपातो वा। उपरिष्ठानुप्राप्तिरिति मूर्धसाधर्म्यम्॥ १७॥

सत्येष्वाकाराणां प्रथमतो विन्यसनमिति। *सत्येष्वनित्याद्याकाराणामादित* उपनिपातनम्। तदालम्बनानां प्रवर्तनमित्यर्थः।

"*अन्यैरपि*" इति। धर्मस्मृत्युपस्थानादन्यैरपीत्यर्थः। "*वर्धनम्*"। अभ्यासेनोत्तप्तीकरणम्।

विवर्धयत इति विस्तरः। विवर्धयतो योगिनो वर्धनेन विशिष्टानां कुशलमूलानां सम्मुखीभावः। *पूर्वप्रतिलब्धानामिति*। अविशिष्टानामसम्मुखीभावः।

---

१. अबहुमानत्वात्—का०।

अधिमात्रसत्यक्षमणादपरिहाणितः[1]। साऽपि त्रिप्रकारा—मृद्वी, मध्या, अधिमात्रा च।

द्विधा तद्वत्,

यथा मूर्धान उक्ताः, एवं मृदुमध्ये क्षान्ती ; तथैवाकरणात्।

विवर्धने त्वयं विशेषः—सर्वस्याः

क्षान्त्या धर्मेण वर्धनम् ॥ १८ ॥

स्मृत्युपस्थानेनैव, नान्येन ॥ १८ ॥

कामाप्तदुःखविषया त्वधिमात्रा,

'क्षान्तिः' इति वर्त्तते। अग्रधर्मश्लेषादसौ[2] कामावचरदुःखालम्बनैव। अत एवोष्मगतादीनां त्रैधातुकदुःखाद्यालम्बनत्वसिद्धिः; नियमावचनात्।

कस्मात् ? *अबहुमानात्*। न्यूनत्वेनाबहुमानादित्यर्थः। *अधिमात्रसत्यक्षमणादिति*। ऊष्मगतावस्थायां मृदु सत्यं क्षमते रोचते। मूर्धावस्थायां मध्यम्। तदनन्तरमिदानीमधिमात्रसत्यक्षमणात्क्षान्तिरुत्पद्यते। कथम् ? इत्यत आह—*अपरिहाणित* इति। यस्मात् क्षान्तिर्न परिहीयते, मूर्धभ्यस्तु परिहीयत इत्यस्ति सम्भवः।

'*द्विधा तद्वद्*" इति। *मृदुमध्ये क्षान्ती तथैव*। *यथा मूर्धान उक्ताः* तथैवाकारणात् धर्मस्मृत्युपस्थानेन। सत्येष्वाकारागामाकरणादित्यर्थः। *सर्वस्या* इति। मृदुमध्याधिमात्रभेदभिन्नायाः *सर्वस्याः क्षान्तेः*। *धर्मस्मृत्युपस्थानेनैव* वचनम्। *नान्येन* कार्यस्मृत्युपस्थानादिना ॥ १८ ॥

कस्मात् ? *अग्रधर्मश्लेषात्*। अग्रधर्मा हि दर्शनमार्गश्लेषात् धर्मस्मृत्युपस्थानात्मका एवेति। *अग्रधर्मश्लेषादिति*। अग्रधर्माणां *कामावचरदुःखसत्यालम्बनानामनन्तरोत्पादात्* क्षान्तेः कामावचरत्वदुःखसत्यालम्बनम्। अग्रधर्मश्लेषाद्धि तत्सादृश्यमिति। *नियमावचनादिति*। अधिमात्रक्षान्तिवदूष्मगतादीनामालम्बनं प्रतिनियमावचनात्। अधिमात्रक्षान्त्यवधारणेनैव हि त्रैधातुकदुःखाद्यालम्बनत्वमेषामूष्मगतादीनां सिद्ध्यति। कथम् ? कामाप्तमेव दुःखं विषयोऽस्याम्। सेयं कामाप्तदुःखविषया अधिमात्रक्षान्तिः। क्षान्तेरेवेत्यवधारणात् अन्यान्यूष्मगतादीनि त्रैधातुकदुःखाद्यालम्बनानीति सिद्धम्।

---

१. अधिमात्रस्य क्षम०—का०। २. °संश्लेषादसौ—का०।

यदा किल रूपारूप्यप्रतिपक्षादीनामेकैकसत्याकारालम्बनापह्रासेन[1] यावत् कामावचरमेव दुःखं द्वाभ्यां क्षणाभ्यां मनसि करोति, एषा सर्वैव मध्या क्षान्तिः। यदैकमेव क्षणम्, तदधिमात्रेति।

यदा किलेति विस्तरः। यदा किल *रूपारूप्यप्रतिपक्षादीनाम्*। आदिशब्देन रूपारूप्यनिरोधसमुदयदुःखानां कामावचरप्रतिपक्षादीनां च ग्रहणम्। *एकैकसत्याकारालम्बनापह्रासेन*। एकैकस्य सत्याकारस्य एकैकस्य सत्यालम्बनस्य चापह्रासेन *यावत् कामावचरमेव दुःखं द्वाभ्यां क्षणाभ्यां मनसिकरोति*। *एषा सर्वैव* रूपारूप्यप्रतिपक्षाकारह्रासात् प्रभृति *मध्या क्षान्तिः*। कथम्? अन्वयज्ञानपक्षं तावन्मार्गं मार्गतो न्यायतः प्रतिपत्तितो नैर्याणिकतश्चेति तैश्चतुभिराकारैराकारयति। ततस्त्रिभिरेकं हित्वा। ततो द्वाभ्यां द्वौ हित्वा। तत एकेन। ततो मार्गसत्यं हित्वा। रूपारूप्यनिरोधं चतुर्भिः स्वैराकारैराकारयति, ततस्त्रिभिः द्वाभ्यामेकेनैव चाकार्य निरोधसत्यं चापास्य। समुदयसत्यं चतुर्भिः स्वैराकारैः, त्रिभिः द्वाभ्यामेकेन चाकार्य, तथैव तदपास्य। दुःखसत्यं स्वैराकारैर्यावदेकेनाकार्य। तदपि सत्यमपास्य। कामावचरप्रतिपक्षं स्वैश्चतुर्भिराकारैः त्रिभिः द्वाभ्यामेकेन चाकारयति, तदपास्य। कामावचरनिरोधसमुदयसत्ये तथैव स्वाकारह्रासक्रमेणाकार्यापास्य च। कामावचरं दुःखसत्यं चतुर्भिराकारैराकारयति, ततस्त्रिभिः, ततो द्वाभ्यामाकारयतीति। एवं हि ह्रासारम्भात् प्रभृति सर्व एते क्षणा मध्या क्षान्तिरित्युक्तं भवति।

तृतीये क्षणे *तदालम्बनैवाधिमात्रा* क्षान्तिः। चतुर्थे अग्रधर्मास्तदालम्बना एव।

मृद्वी तु क्षान्तिर्या पुरस्तादधिमात्रेभ्यो मूर्धभ्योऽनन्तरं कामावचरं दुःखसत्यं यावन्मार्गसत्यम्। रूपारूप्यावचरं च। स्वैः स्वैः सर्वैराकारैरनपह्रासं मनसिकुर्वत इत्यवगन्तव्यम्।

एवं तावदेके व्याचक्षते—आकारापह्रासपूर्वक आलम्बनापह्रास इति।

अपरे पुनर्व्याचक्षते—एकैकसत्याकारालम्बनापह्रासेनेति। नैवं ग्रहीतव्यम्—एकैकसत्याकारापह्रासेनैकैकालम्बनापह्रासेन चेति। किं तर्हि? रूपारूप्यप्रतिपक्षादीनामेकैकेषां सत्यानां ये आकाराः, तेषाम् आलम्बनह्रासेनेति व्याख्यातव्यमिति।

एकान्नविंशतिक्षणशतं मध्या क्षान्तिरिति वर्णयन्ति। आकारापह्रासपूर्वके ह्यालम्बनापह्रासे सति अतिबह्वश्चित्तक्षणा विसर्पन्ति। न चैतन्न्याय्यम्।

१. ०पक्षादयेकैकसत्याल०—का॰।

क्षणं च सा ।

क्षणिका चासौ, न प्राकर्षिकी ।

तथाग्रधर्माः,

न हि सत्येषु विद्यमानेषु आकारत्यागो युज्यते । यदा तु सत्यानि त्यक्तानि भवन्ति, तदाकारत्याग इति युक्तम् । एवं च सति पूर्वं सत्यालम्बनह्रासं करोति, पश्चादाकारह्रासम् । न हि मौले विषयेऽनपाकृते तदालम्बनापाकरणं न्याय्यम् । समाहितासमाहितदुःख-समुदय-निरोध-मार्गा अष्टौ व्यवस्थाप्यन्ते । एषामाकारा द्वात्रिंशद्भवन्तीत्येतदधुना न्यायान्तरमुपदिश्यते । कथं कृत्वा ? यदा कामावचरं दुःखं चतुर्भिराकारैर्मनसिकरोति, एवं यावद्रूपारूप्यावचराणां प्रतिपक्षं चतुर्भिराकारैर्मनसिकरोतीयं मृद्वी क्षान्तिः । यदा पुनः कामावचरदुःखं चतुर्भिराकारैर्मनसिकरोतीत्येवं यावत् कामावचराणां संस्काराणां प्रतिपक्षं मनसिकरोति चतुर्भिराकारैः । रूपारूप्यावचराणां संस्काराणां प्रतिपक्षं परित्यजतः प्रभृति मध्या क्षान्तिरारब्धा । तत्र च रूपारूप्यावचरप्रतिपक्षपरित्यागेऽष्टाविंशतिश्चित्तक्षणा भवन्ति । कामावचरसंस्कारप्रतिपक्षपरित्यागे चतुर्विंशतिः । रूपारूप्यावचरसंस्कारनिरोधपरित्यागे विंशतिः । कामावचरनिरोधपरित्यागे षोडश । रूपारूप्यावचरसमुदयपरित्यागे द्वादश । कामावचरसमुदयपरित्यागेऽष्टौ । रूपारूप्यावचरदुःखपरित्यागे चत्वारः । कामावचरं दुःखं चतुर्भिराकारैर्मनसिकरोति । तस्य भवन्त्याकाराश्चत्वारः । स च योगाचारो द्विविधः—दृष्टिचरित, तृष्णाचरितश्च । दृष्टिचरितोऽपि द्विविधः, आत्मदृष्टिचरितः, आत्मीयदृष्टिचरितश्च । यो ह्यात्मदृष्टिचरितो भवति, सोऽनात्माकारेण नियाममवक्रामति । यस्त्वात्मीयदृष्टिचरितः, स शून्याकारेण । तृष्णाचरितोऽपि द्विविधः—अस्मिमानोपहतः, कौसीद्याधिकश्च । तत्र योऽस्मिमानोपहतः, सोऽनित्याकारेण नियाममवक्रामति । यः कौसीद्याधिकः, स दुःखाकारेण । तत्रात्मदृष्टिचरितो योगाचारः पुनस्तत्कामावचरं दुःखं त्रिभिराकारैर्मनसिकरोति, एकमाकारं हित्वा । ततो द्वाभ्यामनात्मशून्यताकाराभ्याम् । तत एकमनात्माकारं द्विः संमुखीकरोति । दुःखधर्मज्ञानक्षान्तिदुःखधर्मज्ञानसदृशमिति । एषा मध्या क्षान्तिरित्येवमेकान्नविंशं चित्तशतं भवति । एवमात्मीयाधिमुक्तस्य तु शून्यानात्माकाराभ्यामाकारयतः शून्याकारं द्विः संमुखीकरोति । एषास्य मध्या क्षान्तिः । एवमेकान्नविंशक्षणशतम् । एवं तृष्णाचरितो द्विप्रकारः—अस्मिमानोपहतः, कौसीद्याधिकश्च वक्तव्य इति । अधिमात्रा तु क्षान्तिरेकमेव क्षणम् । सा यथापुद्गलचरितमनित्याकारेण वा दुःखाकारेण वा शून्याकारेण वा अनात्माकारेण वा सम्प्रयुक्तेति ।

यथैवाधिमात्रा क्षान्तिः । तेऽपि हि कामावचरदुःखालम्बनाः क्षणिकाश्च लौकिकाश्चैतेऽग्राश्च धर्माः सर्वलौकिकश्रेष्ठत्वादिति लौकिकाग्रधर्माः । विना सभागहेतुना मार्गस्य ततपुरुषकारेण[1] मार्गाकर्षणात्[1] । त एत ऊष्मगतादय स्मृत्युपस्थानस्वभावत्वात् प्रज्ञात्मका उच्यन्ते ।

सर्वे तु पञ्चस्कन्धाः,

सपरिवारग्रहणात् ।

विनाप्तिभिः ।। १९ ।।

प्राप्तयो नोष्मगतादिभिः संगृह्यन्ते । मा भूदार्यस्य तत्सम्मुखीभावादूष्मगतादीनां सम्मुखीभाव इति ।

तत्र त्रिसत्यालम्बनोष्मगताकरणे धर्मस्मृत्युपस्थानं प्रत्युत्पन्नमनागतानि चत्वारि भाव्यन्ते । निरोधसत्यालम्बने तदेवोभयथा । सर्वत्राकाराः सभागाः ।

अथ किमर्थमेकैकसत्याकारालम्बनह्रासः क्रियते ? पूर्वं हि तेन त्रैधातुकं विदूषयता समस्तः प्रतिपक्ष आलम्बितः । पश्चात् कामधातोः पूर्वं प्रहेयपरिज्ञेयत्वात् कामावचर एव दुःखेऽवतिष्ठत इति । *तत्पुरुषकारेण मार्गाकर्षणादिति । विना सभागहेतुना ।* पूर्वस्यानास्रवस्याभावात् । लौकिकाग्रधर्मपुरुषकारेण मार्गसत्यस्याकर्षणात् । *सर्वलौकिकश्रेष्ठत्वम*ग्रधर्माणां गम्यते ।

सर्वे तु पञ्चस्कन्धाः सपरिवारग्रहणादिति । समाहितभूमिकत्वादूष्मगतादीनामविज्ञप्तिलक्षणो रूपस्कन्धोऽस्तीति पञ्च स्कन्धा ऊष्मगतादयः सपरिवारग्रहणात् सपरिवारा गृह्यन्ते इति ।

मा भूदार्यस्येति । प्राप्तिसम्मुखीभावादार्यपुद्गलस्योष्मगतादीनां फलप्राप्तिप्रयोगभूतानां *सम्मुखीभावो मा भूदिति* प्राप्तयो नोष्मगतादिषु गृह्यन्ते । न हि प्राप्तप्रयोगफलस्यार्यस्य प्रयोगसम्मुखीकरणं न्याय्यमिति ।

त्रिसत्यालम्बनोष्मगताकरण इति । दुःखसमुदयमार्गालम्बनोष्मगताकरणे । *धर्मस्मृत्युपस्थानं प्रत्युत्पन्नम्* । यत्नजन्यस्य कार्यस्याकरणे समस्तालम्बनत्वेन धर्मस्मृत्युपस्थानस्यैव समर्थत्वात् । प्रतिनियतालम्बनत्वेन हि कायस्मृत्यु-

१-१. ०कारेणाकर्षणात्—का० ।

विवर्धने चतुर्णामन्यतमदनागतानि चत्वारि। तत्रैव निरोधालम्बनेऽन्त्यमनागतानि चत्वारि आकाराः सर्वे; लब्धत्वाद् गोत्राणाम्।

मूर्धाकरणे चतुःसत्यालम्बनेऽपि निरोधालम्बनविवर्धनेऽपि[1] चान्त्यम्। अनागतानि चत्वारि आकाराः सर्वे।

त्रिसत्यालम्बनविवर्धने[2] तु[2] चतुर्णामन्यतमत्। अनागतानि चत्वारि आकाराः सर्वे।

क्षान्तीनां सर्वत्र अन्त्यम्[3]। अनागतानि चत्वारि आकाराः सव।

पस्थानादीन्यसमर्थानीति। *अनागतानि चत्वारि भाव्यन्त* इति। यस्मात् स्मृत्युपस्थानेन कायवेदनादयोऽपि दुःखसत्यादिसंगृहीता गृह्यन्ते। कायस्मृत्युपस्थानादीनि च पूर्वं प्रतिलब्धानि भवन्तीत्यश्रुत्वार्यपि भाव्यन्ते प्राप्त्युत्पादादिति। *निरोधसत्यालम्बने तदेवोभयथेति*। निरोधसत्यालम्बने ऊष्मगताकरणे। धर्मस्मृत्युपस्थानं प्रत्युत्पन्नम्। तदेव चानागतं भाव्यते, न कायस्मृत्युस्थानादीनि; निरोधसत्ये कायाद्यभावात्। *सर्वत्राकाराः समागा* इति। त्रिसत्यालम्बनस्य निरोधसत्यालम्बनस्य चोष्मगतस्याकरणे सदृशा एवाकारा भाव्यन्ते। दुःखसत्यालम्बने दुःखसत्याकारा एव चत्वारो भाव्यन्ते, न समुदयसत्याद्याकाराः। समुदयसत्याद्याकारालम्बने समुदयसत्याद्याकारा एव चत्वारो भाव्यन्ते, नान्य इत्यादि। *विवर्धन* इति। त्रिसत्यालम्बने। कायस्मृत्युपस्थानादीनाम*न्यतमत् प्रत्युत्पन्नं सम्भवति। निरोधसत्यालम्बनेऽन्त्यं* प्रत्युत्पन्नम्। उभयत्रा*नागतानि चत्वारि। आकाराः सर्वेऽपि* षोडशापि *भाव्यन्ते*। कि कारणम्? *लब्धत्वात् गोत्राणां* सम्भवतश्चतुःसत्यालम्बनकायस्मृत्युपस्थानादिजातीनां लब्धत्वादित्यर्थः। *मूर्धाकरण* इति विस्तरः। मूर्धाकरणे सर्वत्रापि धर्मस्मृत्युपस्थानमेव प्रत्युत्पन्नम्। कायादिस्मृत्युपस्थानानामाकरणेऽसामर्थ्यात्। *निरोधालम्बनविवर्धनेऽपि अन्त्यं* धर्मस्मृत्युपस्थानं प्रत्युत्पन्नम्; इतरेषामयोगात्।

त्रिसत्यालम्बनविवर्धने तु चतुर्णामन्यतमत् प्रत्युत्पन्नम्। अनागतानि सर्वत्र चत्वारि। आकारा अपि सर्वे। लब्धत्वात् गोत्राणामित्यवगन्तव्यम्। *क्षान्तीनां सर्वत्रान्त्यमिति*। आकरणे विवर्धने चान्त्यं धर्मस्मृत्युपस्थानं प्रत्युत्पन्नम्। तथा ह्युक्तम्—सर्वस्याः क्षान्त्या धर्मेण वर्धनमिति।

---

१. ०लम्बनवर्धने- का०। २-२. ०लम्बनवर्धने—का०।

३. चान्त्यम्—का०।

अग्रधर्मेष्वन्त्यमनागतानि चत्वारि, आकाराश्चत्वार एव ; अन्याभावाद् दर्शनमार्गसादृश्याच्च ॥ १९ ॥

इति निर्वेधभागीयं चतुर्धा,

इत्येतानि चत्वारि निर्वेधभागीयानि कुशलमूलानि यदुतोष्मगतं मूर्धानः क्षान्तयोऽग्रधर्माश्च । एषां द्वे मृदुनी चलत्वात् परिहाणितः क्षान्तयो मध्यमग्रधर्मा अधिमात्रम् ।

निर्वेधभागीयानीति कोऽर्थः ? "विध विभागे" । निश्चितो वेधो निर्वेधः आर्यमार्गः, तेन विचिकित्साप्रहाणात्, सत्यानां च विभजनादिदं दुःखमयं यावत् मार्ग इति । तस्य भागो दर्शनमार्गैकदेशः । तस्यावाहकत्वेन हितत्वान्निर्वेधभागीयानि ।

अग्रधर्मेष्वन्त्यमिति । अग्रधर्मेषु सम्मुखीक्रियमाणेष्वन्त्यं धर्मस्मृत्युपस्थानं प्रत्युत्पन्नम् । *अनागतानि चत्वारि* अनुत्पत्तिधर्माण्येव प्राप्यन्ते । *आकाराश्चत्वार एवेति* । अनित्यदुःखशून्यानात्माकाराः । *अन्याभावादिति* । यस्मादन्यसमुदयाद्याकारा अग्रधर्मा न सन्ति ; दुःखमात्रालम्बनत्वात् । यथा तर्ह्यग्रधर्मास्वभावकायस्मृत्युपस्थानाद्यसम्मुखीभावेऽप्यग्रधर्मसमुदाचारावस्थायामनागतानि कायस्मृत्युपस्थानादीनि भाव्यन्ते ; एवमग्रधर्मास्वभावसमुदयाद्याकारा अनागता भाव्यन्त इति किं नेष्यते ? इत्यतः पुनराह—*दर्शनमार्गसादृश्याच्चेति* । दुःखाकारा एव चत्वारो भाव्यन्ते । कस्मात् ? दर्शनमार्गसादृश्यात् । दर्शनमार्गे हि यस्य सत्यस्य दर्शनं भवति, तदाकारा एव भाव्यन्ते । दर्शनमार्गसदृश्या ह्यग्रधर्माः, किं पुनरेषां दर्शनमार्गेण सादृश्यमनुश्लेषात् । तथैव प्रथमतः कामावचरदुःखालम्बनत्वं तुल्यभूमिकत्वं वा । तथा हि दर्शनमार्गमधिकृत्य वक्ष्यति—"सोऽग्रधर्मैकभूमिकः" (अभि० को० ६.२७) इति । यद्वा—पृथग्जनत्वघाताया दुःखधर्मज्ञानक्षान्तेरानन्तर्यमार्गभूता अग्रधर्मा भवन्ति, तदेषां दर्शनमार्गेण सादृश्यम् । सदृशा ह्यानन्तर्यमार्गा विमुक्तिमार्गैरिति ॥ १९ ॥

विध विभाग इति विस्तरः । तस्य धातोरेतद् यञ्चि (घञि ?) रूपम् । *निश्चित* इति । *निःशब्दस्यार्थं* दर्शयति । कथं पुनर्निश्चितो वेधः ? इत्याह—*तेन विचिकित्साप्रहाणान्निश्चितः । सत्यानां च विभजनात् । इदं दुःखमयं यावन्मार्ग* इति । *निर्वेध आर्यमार्गः । तस्य भागो दर्शनमार्गैकदेशः । तस्यावाहकत्वेनाक-*

तच्चैतच्चतुर्विधमपि निर्वेधभागीयम्

भावनामयम् ।

न श्रुतचिन्तामयम् ।

अनागम्यान्तरध्यानभूमिकम्,

अनागम्यं ध्यानान्तरं चत्वारि च ध्यानान्यस्य भूमिः; तत्संगृहीतत्वात् । नोर्ध्वम्; दर्शनमार्गपरिवारत्वात् । तदभावः कामधात्वालम्बनत्वात् । तस्य[1] पूर्वपरिज्ञेयप्रहेयत्वात् । तेषां रूपधातौ पञ्चस्कन्धको विपाकः । परिपूरकाण्येव[2] नापेक्षेपकाणि; भवद्वेषित्वात् ।

द्वे त्वधोऽपि वा ।। २० ।।

वाशब्दो मतविकल्पार्थः । भदन्तघोषकस्य तु द्वे प्रथमे निर्वेधभागीये सप्तभूमिके कामावचरे अपि ताः ॥ २० ॥

र्षकत्वेन *हितत्वात्* "तस्मै हितम्" (पा० सू० ५.१ ५) इति छः । *तेन निर्वेधभागीयमिति* भवति ।

"*अनागम्यान्तरध्यानभूमिकम्*" इति । अनागम्यं चान्तरं च ध्यानानि च भूमयोऽस्येत्यनागम्यान्तरध्यानभूमिकम् ।

नोर्ध्वमिति । नारूप्येपु निर्वेधभागीयमस्ति । *दर्शनमार्गपरिवारत्वात्* । दर्शनमार्गप्रयोगत्वादित्यर्थः । *तदभावः कामधात्वालम्बनत्वादिति* । तस्य दर्शनमार्गस्याभावस्तद्भावः । क्व ? ऊर्ध्वमिति वर्तते । आरूप्येष्वित्यर्थः । कस्मात् ? कामधात्वनालम्बनात् । यस्मादारूप्याः कामधातुं नालम्बन्ते । आह—किं कामधात्वालम्बनेन दर्शनमार्गेण प्रयोजनमिति ? अत उच्यते—*तस्य पूर्वं परिज्ञेयप्रहेयत्वादिति* । तस्य कामधातोर्दुःखरूपस्य पूर्वं परिज्ञेयत्वात्, समुदयरूपस्य च प्रहेयत्वात् । अत्र च हेतुर्यस्मात् स योगी कामावचरेण दुःखेन विहन्यते, तेन स पूर्वं ततो मोक्षमन्वेषत इति । *तेषां रूपधातौ पञ्चस्कन्धको विपाक* इति । तेषां निर्वेधभागीयानां रूपावचरत्वात् यदि स योगी रूपधातावुपपद्येत, ततस्तस्य तत्र पञ्चस्कन्धको विपाकोऽभिनिर्वर्तते । *परिपूरकाण्येव* च *तानीष्टवेदनीयजननात्* । *नाक्षेपकाणि* निकायसभागस्य । *भवद्वेषित्वात्* । अनित्यादिभिराकारैर्भवं द्विषन्तीति ।

द्वे प्रथमे इति । ऊष्मगतमूर्धस्वभावे ।। २० ।।

---

१. तस्य च—का० । २. परिपूरिकाण्येव—जा० ।

सर्वाण्यपि त्वेतानि चत्वारि

कामाश्रयाणि,

त्रीणि मनुष्येष्वेवोत्पद्यन्ते, त्रिषु द्वीपेषु। उत्पादितपूर्वाणि तु देवेषु सम्मुखीभावः। चतुर्थं देवेष्वपि त्रीणि स्त्रीपुरुषा उभयाश्रयाणि लभन्ते।

अग्रधर्मान् द्व्याश्रयान् लभतेऽङ्गना।

अग्रधर्मास्तु स्त्र्येव द्व्याश्रयान् लभते। पुरुषः पुरुषाश्रयानेव, स्त्रीत्वस्याप्रतिसंख्यानिरोधलाभात्।

कथं निर्वेधभागीयानां त्यागः?

भूमित्यागात् त्यजत्यार्यस्तानि,

"*कामाश्रयाणि*" इति। यस्मादिहैव सत्याभिसमयो नान्यधातौ। नोर्ध्वं हि दृक्पथः असंवेगात्। इह विधा तत्र निष्ठेति चागमादिति। *त्रिषु द्वीपेषु*। उत्तरकुरुवर्ज्येष्विति व्याख्यायते; उत्तरकौरवाणां मृद्विन्द्रियत्वात्। *देवेषु सम्मुखीभाव* इति। कामावचरेषु। चतुर्थं निर्वेधभागीयं *देवेष्वपि*। तेष्वेव च नान्यत्र।

त्रीणि निर्वेधभागीयान्यन्यत्र अग्रधर्मेभ्यः। इहैव जन्मानि स्त्रीपुरुषेन्द्रियपरावृत्तौ *उभयाश्रयाणि* स्त्रीपुरुषेन्द्रियाश्रयाणि *स्त्रियः पुरुषाश्च लभन्ते*। स्त्रियो ह्येतान्युत्पाद्य जन्मान्तरस्त्रीभावप्रादुर्भावे स्त्र्याश्रयाणि सम्मुखीकुर्वन्ति। जन्मान्तरपुरुषभावप्रादुर्भावे तु पुरुषाश्रयाणि संमुखीकुर्वन्ति। न हि तल्लाभिनीनां स्त्रीभावो न सम्भवति। पुरुषा अपि तथैव स्त्रीभावे जन्मान्तरे सति स्त्र्याश्रयाणि सम्मुखीकुर्वन्ति पुरुषभावे पुरुषाश्रयाणीति।

अग्रधर्मान् प्रत्याह—"*अग्रधर्मान् द्व्याश्रयान् लभतेऽङ्गना*" इति।

स्त्र्येवोभयाश्रयानग्रधर्मान् लभते, न पुरुषः। तथा हि—स्त्री तान् लब्ध्वा स्त्र्याश्रयैस्तैस्तदानीन्तनैः समन्वागता भवति। जन्मान्तरपरावृत्तौ च कामधातौ पुरुषाश्रयप्रादुर्भावे पुरुषाश्रयैः स पुरुषः समन्वागत इति। पुरुषस्तु पुरुषाश्रयानेव लभते। कस्मात्? इत्याह—*स्त्रीत्वस्याप्रतिसंख्यानिरोधलाभादिति*। तस्मिन् जन्मनि स्त्रीत्वं जन्मान्तरेऽपि पुनर्नास्तीत्यस्याप्रतिसंख्यानिरोधलाभः। यो ह्यग्रधर्मानुत्पादयति, सोऽवश्यमनन्तरं दर्शनमार्गमुत्पादयेत्। न च दृष्टसत्यस्य पुनः स्त्रीत्वप्रादुर्भाव इति सिद्धान्तः।

यद्भूमिकान्यनेन प्रतिलब्धानि भवन्ति तां भूमिं त्यजनार्यस्तान्यपि त्यजति, नान्यथा । भूमित्यागः पुनर्भूमिसञ्चारात् ।

अनार्यस्तु मृत्युना ॥ २१ ॥

पृथग्जनस्तु निकायसभागत्यागेनैव त्यजति सत्यसति वा भूमिसंचारे ॥२१॥

आद्ये द्वे परिहाण्या च,

त्यजति मृत्युना च पृथग्जन एव । आर्यस्य तु नास्ति ताभ्यां परिहाणिः । क्षान्त्यग्रधर्माभ्यां तु पृथग्जनस्यापि नास्ति परिहाणिः ।

"*भूमित्यागाद्*" इति विस्तरः । *यद्भूमिकानि निर्वेधभागीयानि प्रतिलब्धानि* प्रथमध्यानभूमिकानि यावच्चतुर्थध्यानभूमिकानि । *तां भूमिं त्यजन्* प्रथमं ध्यानं यावच्चतुर्थं *त्यजन्नार्यस्तान्यपि* यथास्वं प्रथमध्यानभूमिकानि यावच्चतुर्थध्यानभूमिकानि *त्यजति* । *नान्यथा* । न मृत्युना, परिहाण्या वा । यथा पृथग्जन इत्यर्थः । *भूमित्यागः पुनर्भूमिसञ्चारादिति* । न वैराग्यत इति दर्शयति ।

पृथग्जनस्त्विति विस्तरः । *पृथग्जनस्तु निकायसभागत्यागेनैव त्यजति* निर्वेधभागीयानि *सत्यसति वा भूमिसञ्चारे* । तथा हि—पृथग्जनो यद्भूमिकनिर्वेधभागीयलाभी भवति, तत ऊर्ध्वमुपपद्यमानस्तानि भूमिसञ्चारेऽपि मृत्युनैव त्यजति । अवीतरागस्त्वसति भूमिसञ्चारे मृत्युना त्यजति । कामधातावेवोपपद्यते । न त्वेवमार्यपुद्गलः; तत्कुशलमूलसन्ततेर्दर्शनमार्गोपबृंहितत्वात् । पृथग्जन एव तथा त्यजतीति कथं गम्यते ? 'अण्डकललादिगतः पृथग्जनः कायेन समन्वागतः, न कायकर्मणा' इति शास्त्रे वचनात् ।

आचार्यवसुमित्रस्तु व्याचष्टे—*पृथग्जनस्तु निकायसभागत्यागेनैव त्यजति सत्यसति वा भूमिसञ्चार* इति । सकलं ध्यानमत्र भूमिग्रहणेन गृह्यते । तत्र पृथग्जनो यदा ब्राह्मकायिकेभ्यश्च्युत्वा ब्रह्मपुरोहितेषूपपद्यते, तदा निकायसभागत्यागेन त्यजति । यदा तु प्रथमात् ध्यानाच्च्युत्वा द्वितीय उपपद्यते, तदा भूमित्यागनिकायसभागत्यागाभ्यामिति ।

तदयुक्तम्; ब्रह्मलोकोपपन्नानां निर्वेधभागीयाभावात् । कामधातौ हि निर्वेधभागीयान्युत्पद्यन्ते । कामधातुच्यवनादेव च तेषां निर्वेधभागीयत्याग इति ।

मौलैस्तत्रैव सत्यदृक् ।

यो मौलध्यानभूमिकानि निर्वेधभागीयान्युत्पादयति स तत्रैव जन्मनि सत्यान्यवश्यं पश्यति; तीव्रसंवेगत्वात् ।

अपूर्वाप्तिर्विहीनेषु,

यदा विहीनेषु पुनर्लाभो भवत्यपूर्वाण्येव तदा लभ्यन्ते, न पूर्वं त्यक्तानि; प्रतिमोक्षसंवरवदनुचितयत्नसाध्यत्वात् । सति प्रतिसीमादैशिके परेणोत्पादयति, असति मूलादेव ।

एते पुनर्विहानि-परिहाणी किंस्वभावे ?

हानी द्वे असमन्वितिः ।। २२ ।।

उभे अप्येते असमन्वागमस्वभावे । परिहाणिस्तु दोषकृता, नावश्यं

आचार्यसङ्घभद्रेणापि दर्शितमेतत्—'ननु च पृथग्जनोऽपि यद्भूमिक-निर्वेधभागीयलाभी भवति, तत ऊर्ध्वमुपपद्यमानो निर्वेधभागीयानि विजह्यात्' इति । नास्त्येतत्; निकायसभागत्यागादेव त्यक्तत्वात् । मरणभवावस्थितो हि तानि त्यजति । अन्तराभवस्थितेन तु त्यक्तानि । अत ऊर्ध्वमुपपद्यमानस्य तन्नास्ति यद्विजह्यादिति । मृत्युनैवेत्युच्यत इति ।। २१ ।।

प्रातिमोक्षसंवरवदिति । यथा प्रातिमोक्षसंवरस्त्यक्तः पुनरादीयमानोऽपूर्व एव लभ्यते । कस्मात् ? *अनुचितयत्नसाध्यत्वात्* । अनुचितत्वात्, यत्नसाध्यत्वाच्च । यस्मादनादिमतिसंसारे नोचितानि भवन्ति, आर्यमार्गपरिवारत्वात्; तस्मान्न वैराग्यलभ्यानि । यस्माद्यत्नसाध्यानि, तस्मान्न पूर्वत्यक्तानि लभ्यन्त इति । *सति प्रतिसीमादैशिक* इति । *सीमा* नाम मर्यादा, तस्या दैशिको देशयिता प्रणिधिज्ञानलाभी । तस्मिन् सति लब्धविहीनात् परेणोत्पादयति । यदनुत्पादितम्, तदुत्पादयतीत्यर्थः । *असति* प्रतिसीमादैशिके *मूलादे*वोष्मगतात् प्रभृतीत्यर्थः ।

एते पुनर्विहानिपरिहाणी इति । "भूमित्यागात् त्यजत्यार्यः" (अभि० को० ६.२१) इत्यादि वचनाद् विहानिरुक्ता । "आद्ये द्वे परिहाण्या च" (अभि० को० ६.२२) इति वचनात् परिहाणिरप्युक्ता । तेनैते इति निर्दिशति ।

हानी इति । विहानि-परिहाण्योः सामान्यरूपपरिग्रहादुभयोर्ग्रहणम् ।

विहानिः । गुणविशेषकृता च सा । परिहीणोऽप्यूष्मगतलाभी नियतं परिनिर्वाणधर्मा भवति ।

मोक्षभागीयात् को विशेषः ? सत्यदर्शनासन्नतरत्वमसत्यन्तराये ॥२२॥

मूर्धलाभी न मूलच्छित्,

परिहीणोऽपि मूर्धलाभी कुशलमूलानि न समुच्छिनत्ति । अपायांस्तु यायादानन्तर्याण्यपि[1] कुर्यात् ।

क्षान्तिलाभ्यनपायगः ।

विहीनायामपि क्षान्तौ न पुनरपायान् याति; तद्भूमिककर्मक्लेशदूरीकरणात् । क्षान्तिलाभादेव हि गतियोन्युपपत्त्याश्रयाष्टमादिभवक्लेशानां केषांचिदनुत्पत्तिधर्मतां प्रतिलभते । *अपायगतीनामण्डजसंस्वेदजयोन्योरसंज्ञिसत्त्वोत्तरकुरुमहाब्रह्मोपपत्तीनां* षण्ढपण्डकोभयव्यञ्जनाश्रयाणामष्टमादिभवानां[2] दर्शनहेयक्लेशानां च । तां तु यथायोगं मृद्वधिमात्रायां च । मृद्व्यामपायगतीनाम् । अधिमात्रायामितरेषाम् ।

निर्वेधभागीयानि त्रिगोत्राणि श्रावकादिगोत्रभेदात् । तत्र

शिष्यगोत्रान्निवर्त्य द्वे बुद्धः स्यात्,

ऊष्मगतं मूर्धानं च श्रावकगोत्रादुत्पन्नं व्यावर्त्य पुनर्बुद्धः स्यादित्यस्ति सम्भवः।

परिहाणिस्तु दोषकृता । क्लेशकृतेत्यर्थः । *नावश्यं विहानिरिति* । सा हि गुणकृतापि भवति, न केवलं दोषकृता । गुणकृता तद्यथा—दर्शनमार्गोत्पत्तौ पृथग्जनत्वस्य विहानिः । दोषकृता तु तद्यथा—मिथ्यादृष्ट्या कुशलमूलविहानिः । प्रतिसन्धिचित्तेन वा केषाञ्चिद् धर्माणां विहानिरिति । तदेवं या परिहाणिः, विहानिरपि सा । या तु विहानिः, नावश्यमसौ परिहाणिः । गुणविशेषेभ्य एव हि परिहाणिरिति ॥ २२ ॥

अनुत्पत्तिधर्मतां प्रतिलभत इति । अपरिसंख्यानिरोधं तेषां गत्यादीनां प्रतिलभत इत्यर्थः । *तां तु यथायोगमिति* । तां त्वनुत्पत्तिधर्मताम् । यथासम्भवं मृद्व्यामधिमात्रायां च क्षान्तौ प्रतिलभत इति वर्तते । कथं कृत्वा ? *मृद्व्या* क्षान्त्याम*पायगतीना*मनुत्पत्तिधर्मतां प्रतिलभते । *अधिमात्रायामण्डजसंस्वेदज-*

---

१. पापादा०—का० । २. षण्ढ०—का० ।

क्षान्तौ तु लब्धायां नास्त्येव सम्भवः। किं कारणम्? अपायानां किल व्यावृत्तत्वात्। बोधिसत्त्वाश्च परहितक्रियापारतन्त्र्यादपायानप्यवगाहन्त इति। तस्यैव तु गोत्रस्याविवर्त्यत्वादसम्भवः।

त्रीण्यपीतरः ॥ २३ ॥

विवर्त्य स्यादिति वर्तते। त्रीण्यपि निर्वेधभागीयानि श्रावकगोत्राद्व्यावर्त्य बुद्धादिभवः स्यात्। प्रत्येकबुद्ध इत्यर्थः। प्रत्येकबुद्धगोत्राणि तु व्यावर्तयितुमशक्यानि ॥ २३ ॥

आबोधेः सर्वमेकत्र ध्यानान्त्ये शास्तृखड्गयोः।

शास्ता बुद्धः, खड्गविषाणकल्पः प्रत्येकबुद्धः। तयोरेकत्रैवासने चतुर्थमेव ध्यानं निश्रित्यानिञ्ज्यपटुसमाधित्वान्निर्वेधभागीयान्यारभ्य यावद् बोधिरुत्पद्यते। क्षयानुत्पादज्ञाने हि बोधिरिति पश्चादुपपादयिष्यामः।

अशुभामारभ्य यावद् बोधिरित्यपरे।

येषां तु खड्गादन्योऽपि प्रत्येकबुद्धोऽस्ति, तेषां[1] तद्गोत्राणां व्यावर्तनस्याप्रतिषेधः[2]।

योन्योः। मृद्व्यामसंज्ञिसत्त्वोत्तरकुरुमहाब्रह्मोपपत्तीनाम्। अधिमात्रायां षण्ढपण्ढकोभयव्यञ्जनाश्रयाणाम्। अधिमात्रायामष्टमादिभवानाम्। अष्टमादिनवमादिभवानाम्। दर्शनहेयक्लेशानां चानुत्पत्तिधर्मतामेवेति।

तस्यैव तु गोत्रस्येति। क्षान्तिपरिभावितस्य श्रावकगोत्रस्येति। *आचार्यमतम्।* तस्य क्षान्तिपरिभावितत्वेनाविवर्त्यत्वादित्यभिप्रायः।

"*त्रीण्यपीतर*" इति। प्रत्येकबुद्धः क्षान्तिमपि श्रावकगोत्राद्विवर्त्य स्यात्। न हि ते परार्थमपायानवगाहन्त इत्यभिप्रायः ॥ २३ ॥

आनिञ्ज्यपटुसमाधित्वादिति। अष्टापक्षालमुक्तत्वादानिञ्ज्यः समाधिः। अत एव पटुः, उत्तमतीक्ष्णेन्द्रियत्वाद्वा।

येषां तु खड्गादन्योऽपीति। येषाम् आभिधार्मिकाणां मतेन खड्गादन्योऽपि प्रत्येकबुद्धोऽस्ति। उत्पादितनिर्वेधभागीयमात्रोऽपि वर्गचारी प्रत्येकबुद्ध इत्यभि-

---

१. का० पुस्तके नास्ति। २. ०र्तनाप्रतिषेधः—का०।

किं पुनः प्रथम एव जन्मनि कृतयोगो निर्वेधभागीयान्युत्पादयेत् ? नैतदस्ति । अवश्यं हि

प्राक्तेभ्यो मोक्षभागीयम्

उत्पादयितव्यम् । सर्वस्वल्पं हि

क्षिप्रं मोक्षस्त्रिभिर्भवैः ॥ २४ ॥

एकस्मिन् जन्मनि मोक्षभागीयं कुशलमूलमुत्पादयेत् । द्वितीये निर्वेधभागीयानि । तृतीये आर्यमार्गम् । बीजावरोपणशस्याभिवृद्धिफलोत्पत्तिक्रमवत्[1] । क्रमेण हि सन्तानस्यास्यां धर्मतायामवतारपरिपाकविमुक्तयो भवन्तीति ॥ २४ ॥

तच्च पुनर्मोक्षभागीयं वर्णयन्ति—

श्रुतचिन्तामयम्,

न भावनामयम् ।

कति कर्माणि ?

त्रीणि कर्माणि,

प्राधान्येन तु मनस्कर्म । तत्प्रणिधानपरिग्रहणाच्च[2] कायवाक्कर्मापि मोक्ष-

---

प्रायः । *तेषामूष्मगतमूर्धभ्यां तद्गोत्राणां व्यावर्तनस्याप्रतिषेधः ।* खड्गविषाणकल्पस्यैवावधारणात् ।

"क्षिप्रं मोक्षस्त्रिभिर्भवैः" इति । यः क्षिप्रं मोक्षं प्राप्नोति, स एकस्मिन् *जन्मनि मोक्षभागीयमुत्पादयेत् । द्वितीये निर्वेधभागीयानि । तृतीये आर्यमार्गम्* इति । यस्तु पूर्वस्मिन् जन्मनि सम्भृतमोक्षभागीयो भवति, स एकस्मिन्नपि जन्मनि निर्वेधभागीयान्यार्यमार्गं चोत्पादयतीत्यवगन्तव्यम् । *बीजावरोपणे*-त्यादि । बीजावरोपणं मोक्षभागीयोत्पादनम् । *शस्याभिवृद्धिर्नि*र्वेधभागीयोत्पत्तिः । *फलोत्पत्ति*रार्यमार्गः । *अस्यां धर्मतायामिति* । प्रवचनधर्मतायाम् । *अवतारपरिपाकविमुक्तयो भवन्तीति* । *अवतारो* मोक्षभागीयेन । *परिपाको* निर्वेधभागीयैः । *विमुक्तिरार्यमार्गेणेति* ॥ २४ ॥

तत्प्रणिधानपरिग्रहणादिति । मनःप्रणिधानपरिग्रहात् । प्रणिधानं

---

१. बीजविरोपण०—का० ।　　२. ०परिग्रहात्तु—का० ।

भागीयं भवति । कश्चिदेकभिक्षामपि दत्त्वा, एकशिक्षामपि चादाय मोक्षाभिलाषबलाधानान्मोक्षभागीयान्याक्षिपति ।

तत्त्वेतत्

आक्षिप्यते नृषु ।

मनुष्येष्वेव त्रिषु द्वीपेषु, नान्यत्र । प्रज्ञानिर्वेदयोरभावाद्यथायोगम् ।

उक्तं प्रसङ्गेन मोक्षभागीयम् ॥

अभिसमयक्रमस्तु वक्तुमारब्धः । तत्र च यावदग्रधर्मा उक्ताः । शेषं वक्तव्यम् । अत इदमुच्यते—

लौकिकेभ्योऽग्रधर्मेभ्यो धर्मक्षान्तिरनास्रवा ॥ २५ ॥

लौकिकाग्रधर्मानन्तरमनास्रवधर्मज्ञानक्षान्तिरुत्पद्यते ॥ २५ ॥

कस्मिन्नालम्बने ?

कामदुःखे,

कामावचरदुःखमस्या आलम्बनम् । सेयं दुःखे धर्मज्ञानक्षान्तिरित्युच्यते । अनास्रवज्ञानार्थं निःष्यन्देन विशेषणम् । धर्मज्ञानार्थं[1] क्षान्तिः । पुष्पफलवृक्षवत् ।

पुनश्चेतनाविशेषः । *एकभिक्षामपि* दत्त्वेति । कायकर्म । *एकशिक्षामपि चादायेति*। वाक्कर्म । तच्च मनस्कर्मोत्थानमिति । त्रिकर्मस्वभावमल्पकमप्येतत् *मोक्षाभिलाषबलाधानान्मोक्षभागीयमाक्षिपति* । मोक्षस्य भागः प्राप्तिर्मोक्षभागः, तस्मै हितं *मोक्षभागीयमिति* ।

नान्यत्र प्रज्ञानिर्वेदयोरभावाद्यथायोगमिति । कुरुषु तावदुभयं नास्ति । अपायेषु निर्वेदोऽस्ति, प्रज्ञा नास्ति । देवेषु प्रज्ञास्ति, निर्वेदो नास्तीति । अतो *मनुष्येष्वेव त्रिषु द्वीपेष्वाक्षिप्यते, नान्यत्र* ।

अभिसमयक्रमस्तु वक्तुमारब्ध इति । "वृत्तस्थः श्रुतचिन्तावान् भावनायां प्रयुज्यते" (अभि० को० ६ ५) इत्यारभ्य निर्वेधभागीयानुक्रमः । तत्प्रसङ्गेन मोक्षभागीयोपन्यास इति ।

"*धर्मक्षान्तिरनास्रवा*" इति । निर्वेधभागीयैरपि धर्मक्षमणम् । अतो *निष्यन्देन विशेषणम्* । यस्या धर्मज्ञानं निष्यन्दः, सा धर्मज्ञानक्षान्तिः । धर्मज्ञानार्थं क्षान्ति-

१. कर्मज्ञाना०—का० ।

सैव च नियामावक्रान्तिरित्युच्यते; सम्यक्त्वनियामावक्रमणात् । "सम्यक्त्वं निर्वाणम्" इत्युक्तं सूत्रे । तत्र नियमो नियाम एकान्तीभावः, तस्याभिगमनमवक्रमणम् । तस्यां चोत्पन्नायामार्यपुद्गल उच्यते । अनागतया पृथग्जनत्वं व्यावर्त्यते । एतदेव तस्याः कारित्रमनागतायामभ्युपगम्यते नान्यत्, प्रदीपजातिवत् ।

लौकिकैरग्रधर्मैरित्यपरे[2] । न; तद्धर्मत्वात्,तद्विरोधित्वाददोषः, शत्रुस्कन्धारूढतद्घातनवत् ।

उभयैरित्यपरे । आनन्तर्यमुक्तिमार्गसाधर्म्यादिति ।

धर्मज्ञानक्षान्तिः । पुष्पफलवृक्षवत् । यथा—पुष्पार्थं वृक्षः पुष्पवृक्षः । फलार्थं वृक्षः फलवृक्षः । कारिकायां तु धर्मक्षान्तिरिति वचनमेकदेशग्रहणात:, देवदत्तो दत्त इति यथा । *सम्यक्त्वं निर्वाणमित्युक्तमि*ति । सम्यक्त्वं कतमत्? यत्तत्पर्यादाय रागप्रहाणमिति विस्तरः । *तत्र नियमो नियाम* इति । तत्र सम्यक्त्वे नियम *एकान्तीभावो नियाम* इति घञि रूपम् । अपि तु नियम इति; "यमः समुपनिविषु च" (पा० सू० ३.३.६३) इत्यप्प्रत्ययस्य विभाषितत्वात् । *तस्याभिगमनमवक्रमणमि*ति । तस्यैकान्तीभावस्याभिगमनं प्राप्तिः । तदेव विपर्यासस्यापक्रमान्नियामावक्रान्तिरित्युच्यते । *तस्यां चे*ति । धर्मज्ञानक्षान्तौ । *प्रदीपजातिवदि*ति । प्रदीपस्येव जातेरिव चेत्यर्थः । यथा प्रदीपस्यानागतस्य तमोविनाशने सामर्थ्यम्, जातेश्चानागताया जन्यजनने, तथा पृथग्जनत्वव्यावर्तने सामर्थ्यमनागताया धर्मज्ञानक्षान्तेरभ्युपगम्यते । *नान्यदि*ति । क्लेशप्रहाणं कारित्रम् ।

लौकिकैरग्रधर्मैरित्यपर इति । 'पृथग्जनत्वं व्यावर्तते' इति प्रकृतम् । *न तद्धर्मत्वा*दिति । न युक्तमेतल्लौकिकैरग्रधर्मैस्तद्व्यावर्तेत इति । कस्मात्? तेऽपि हि पृथग्जनधर्माः, कथं पृथग्जनधर्मस्य पृथग्जनधर्मं व्यावर्तिष्यन्त इति । *तद्विरोधित्वाददोष*: अग्रधर्माणां पृथग्जनत्वविरोधित्वाददोष एषः । किं *यथा*? इत्याह—*शत्रुस्कन्धारूढतद्घातनव*दिति यथा शत्रुस्कन्धारूढ एव कश्चिच्छत्रुं घातयेत् । एवं किलाग्रधर्माः । पृथग्जनत्वशत्रुस्कन्धारूढास्तदेव पृथग्जनत्वं घातयेयुरिति ।

*उभयैरि*ति । लौकिकैरग्रधर्मैः क्षान्त्या च पृथग्जनत्वं व्यावर्त्यते । कथम्? इत्याह—*आनन्तर्यविमुक्तिमार्गसाधर्म्या*दिति । लौकिकानामग्रधर्माणामानन्तर्यमार्गेण साधर्म्यम् । क्षान्तेर्विमुक्तिमार्गेण । यथा ह्यानन्तर्यमार्गेण क्लेशाः प्रहीयन्ते

---

१. युक्तं—का० । २. लौकिकाग्र०—का ।

ततोऽत्रैव धर्मज्ञानम्,

ततः पुनर्दुःखे धर्मज्ञानक्षान्तेरनन्तरमत्रैव कामावचरे दुःखे धर्मज्ञानमुत्पद्यते । तद् दुःखे धर्मज्ञानमित्युच्यते । अनास्रवाधिकारः सर्वत्र वेदितव्यः ।

यथा च कामावचरे दुःखे धर्मज्ञानक्षान्तिर्धर्मज्ञानं चोत्पद्यते

तथा पुनः ।

शेषे दुःखेऽन्वयक्षान्तिज्ञाने,

दुःखे धर्मज्ञानानन्तरं रूपारूप्यावचरे दुःखे समस्तालम्बनान्वयज्ञानक्षान्तिरुत्पद्यते । सा दुःखे अन्वयज्ञानक्षान्तिरित्युच्यते । ततः अन्वयज्ञानमुत्पद्यते । तत् दुःखेऽन्वयज्ञानमित्युच्यते । प्रथमतो धर्मतत्त्वज्ञानाद्धर्मज्ञानम्, तदन्वयादूर्ध्वं दुःखालम्बनमन्वयज्ञानम्; तथैवानुगगमात् ।

यथा चैतानि दुःखसत्ये चत्वारि क्षान्तिज्ञानान्युत्पद्यन्ते,

सत्यत्रये तथा ।। २६ ।।

दुःखान्वयज्ञानादनन्तरं कामावचरे समुदये धर्मज्ञानक्षान्तिरुत्पद्यते । ततः समुदये धर्मज्ञानम् ।

एवं समनन्तरोत्पत्तिक्रमेण शेषे समुदयेऽन्वयज्ञानक्षान्तिः समुदयेऽन्वयज्ञानम्, कामावचरदुःखनिरोधे धर्मज्ञानक्षान्तिर्निरोधे धर्मज्ञानम्, शेषे निरोधेऽन्वयज्ञानक्षान्तिर्निरोधेऽन्वयज्ञानम्, कामावचरदुःखप्रतिपक्षमार्गे धर्मज्ञानक्षान्तिर्मार्गे धर्मज्ञानम्, शेषे मार्गेऽन्वयज्ञानक्षान्तिर्मार्गेऽन्वयज्ञानम् ॥ २६ ॥

विमुक्तिमार्गेण प्रहीणः, एवं लौकिकैरग्रधर्मैः पृथग्जनत्वं विहीयते क्षान्त्या विहीनमिति ।

अनास्रवाधिकारः सर्वत्रेति । तेन ततोऽत्रैव धर्मज्ञानमनास्रवमिति गम्यते । *तद् दुःखे धर्मज्ञानमित्युच्यते* इति । शास्त्रे तेन नाम्ना व्यवहार इति दर्शयति ।

समस्तालम्बना रूपारूप्यावचरदुःखालम्बनत्वात् । *प्रथमतो धर्मतत्त्वज्ञानादिति*। आदितो दुःखादिधर्मतत्त्वज्ञानादित्यर्थः । *तदन्वयत्वादिति* । तद्धेतुकत्वादित्यर्थः । *तथैवानुगमादिति* । यथैव धर्मज्ञानेनानुगतं परिज्ञातं दुःखादिसत्यं दुःखादिभिराकारैः, तथैव रूपारूप्यावचरदुःखाद्यनुगमादन्वयज्ञानमेतदिति विस्तरः ।

एवं समनन्तरोत्पत्तिक्रमेण शेषे समुदये रूपारूप्यावचरेऽन्वयज्ञानक्षान्तिरिति विस्तरेण योज्यम् ॥ २६ ॥

इति षोडशचित्तोऽयं सत्याभिसमयः,

इत्यनेन क्रमेणायं सत्यानामभिसमयः षोडशचित्तको भवति ।

ये तर्हि निकायान्तरीयाः सत्यानामेकाभिसमयं वर्णयन्ति । अभिप्राय एष द्रष्टव्यः—अभेदेन ह्यभिसमय उच्यते सत्येषु ।

त्रिधा ।

दर्शनालम्बकार्याख्यः,

दर्शनाभिसमयोऽनास्रवया प्रज्ञया सत्यानाम् । आलम्बनाभिसमयस्तत्सम्प्रयुक्तैर्वेदनादिभिरपि । कार्याभिसमयो विप्रयुक्तैरपि शीलजात्यादिभिः । दुःखे हि दृश्यमाने तस्य त्रिविधोऽभिसमयः समुदयादीनां कार्याभिसमयः ; प्रहाण-साक्षात्करण-भावनात् ।

तद्यदि सत्यानां दर्शनाभिसमयं प्रत्येकाभिसमयं ब्रूयात् ? अयुक्तं ब्रूयाद् ; आकारभेदात् ।

निकायान्तरीयाः । आर्यधर्मगुप्तप्रभृतयः । *अभेदेन ह्यभिसमय उच्यत* इति । षोडशचित्तोऽयं सत्याभिसमय इति । दर्शनाभिसमयः, आलम्बनाभिसमयः, कार्याभिसमयश्च—एवं षोडशचित्तक इत्यभेदः ।

दर्शनाभिसमय इति । दर्शनमेवाभिसमयः । एवमालम्बनाभिसमयः, कार्याभिसमयश्च । *दर्शनाभिसमयोऽनास्रवया प्रज्ञया* । "तद्धि भिक्षवो दृष्टम्, यदनास्रवया प्रज्ञया दृष्टम्" इति वचनात् । प्रज्ञैव दर्शनमिति व्यवस्थाप्यते । *आलम्बनं* ग्रहणं *तत्सम्प्रयुक्तैरपि वेदनादिभिर्भवति* । *अपि*शब्दात् प्रज्ञयापि । यस्माच्चित्तचैत्तैः सत्यान्यालम्बन्ते । *कार्यं* यस्य सत्यस्य यत्कर्तव्यम् । तद्यथा—दुःखस्य परिज्ञानम्, समुदयस्य प्रहाणम्, निरोधस्य साक्षात्करणम्, मार्गस्य भावनम् । तद् *विप्रयुक्तैरपि शीलजात्यादिभिर्भवति* । *अपि*शब्दात् प्रज्ञातत्सम्प्रयुक्तैरपि । प्रज्ञासम्प्रयुक्तविप्रयुक्तैर्हि तत्कार्यचतुष्टयं क्रियते । *जात्यादिभिरिति* । *आदि*शब्दाल्लक्षणान्तराणि प्राप्तयश्च गृह्यन्ते । दुःखे हीति विस्तरः । दुःखे हि दृश्यमाने प्रज्ञया । *तस्याभिसमयितुर्दुःखस्य* वा *त्रिविधोऽभिसमयो* यथोक्तः । कथम् ? इत्याह—*समुदयादीनां* समुदयनिरोधमार्गाणा*मभिसमयः प्रहाणसाक्षात्करणभावनाद्* । यथाक्रमम्–प्रहाणं समुदयस्य क्लेशप्राप्तिच्छेदात्,

अथाप्यनात्माकारेण सर्वेषां सत्यानां दर्शनमिति ब्रूयात् ? न तर्हि सत्यानां दुःखादितो दर्शनं स्यात् । तथा[2] च सति[2] सूत्रविरोधः—"इहार्यश्रावकस्य दुःखं वा दुःखतो मनसिकुर्वतः समुदयं वा समुदयतो यावत् मार्गं वा मार्गतो मनसि कुर्वतोऽनास्रवेण मनसिकारेण सम्प्रयुक्तो यो धर्माणां विचयः[3]" ( ) इति ।

भावनामार्ग एवमिति चेत् ? न ; यथादर्शनं भावनात् ।

अथाप्येकस्य दर्शनाच्छेषेषु वशित्वलाभादेकाभिसमयं ब्रूयान्न दोषः स्यात् । अन्तरा तु व्युत्थानमस्ति, नास्तीति विचार्यं स्यात् ।

साक्षात्करणं निरोधस्य तत्प्राप्त्युत्पादात् , भावनं मार्गस्य सम्मुखीभावात् । *आकारभेदादिति।* प्रत्येकमेषां दुःखादीनामाकारभेदात् । न च दुःखाकारेण समुदयादीनां दर्शनं युज्यते; तदाकारार्थभेदतः ।

अथाप्यनात्माकारेण सर्वेषां सत्यानां दर्शनमिति ब्रूयात् निकायान्तरीयः, शून्यतानात्मते सर्वसत्यानां सामान्यं लक्षणमिति कृत्वा । *न तर्हि सत्यानां दुःखादितो दर्शनं स्यात् ।* दुःखतः समुदयतो निरोधतो मार्गत इति । *तथा च* सत्यनात्माकारेण सर्वेषां दर्शनमिति ब्रुवन् *सूत्रविरोधः* । यस्मात् *सूत्र एवमुक्तम् आर्यश्रावकस्येति* विस्तरः ।

अथ मन्यसे—नास्ति सूत्रविरोधो यस्मादभिसमयावस्थायाः पूर्वं प्रयोगावस्थायामार्यश्रावकस्य *दुःखं वा दुःखतो मनसिकुर्वत* इत्येवमादि, अतोऽनात्माकारेण सर्वेषां दर्शनादेकाभिसमय एवेति " तच्चायुक्तम् ; *अनास्रवेण मनसिकारेण सम्प्रयुक्तो धर्माणां विचय* इति वचनात् । न हि प्रयोगावस्थायामनास्रवमनसिकारः सम्भवति ।

भावनामार्ग एवमिति चेत् । य आर्यश्रावकस्य दुःखं वा दुःखतो मनसिकुर्वत इति विस्तरेण । *न, यथादर्शनं भावनात् ।* नैतदेवम् ; यथैव हि पूर्वं सत्यानां दर्शनम् , तथैव तेषां पश्चाद्भावनम् । भावनामार्गो भवतीत्यर्थः ।

शेषेषु वशित्वलाभादिति । अन्तरेण प्रयोगं समुदयादिदर्शनसम्मुखीभावशक्तिलाभो वशित्वलाभः, तस्मादिति । *अन्तरा तु व्युत्थानमस्ति नास्तीति विचार्यं स्यादिति ।* शेषेषु वशित्वलाभादन्तरा व्युत्थानं प्राप्नोतीति दोषः स्यादित्य-

---

१. का० पुस्तके नास्ति । २-२. एवं च—का० । ३. प्रविचय—का० ।

अथ पुनर्ब्रूयात्—दुःखमेव परिजानन् समुदयं प्रजहाति, निरोधं साक्षात् करोति, मार्गं भावयति, अत एकाभिसमय इति ? एवमपि न दोषः स्याद्; एकस्य दर्शने शेषाणां कार्याभिसमयवचनात्। दर्शनाभिसमयं तु प्रति सूत्रे सत्यानां क्रमेणाभिसमय उक्तो लक्ष्यते।

"न हैव गृहपते सत्यानामेकाभिसमयोऽनुपूर्वाभिसमयः[1]" इति विस्तरेण सदृष्टान्तानि त्रीणि सूत्राणि।

भिप्रायः। उभयथापि च विचार्यमाणे बहूनां सूत्राणां विरोधः। यथा च तेषां विरोधः, तथा आगमेषु श्रोतव्यः।

एकस्य दर्शने शेषाणां कार्याभिसमयवचनादिति। यस्मादस्येतद् वचनम्—"दुःखे हि दृश्यमाने तस्य त्रिविधोऽभिसमयः। समुदयादीनां कार्याभिसमयः। प्रहाणसाक्षात्करणभावनात्" इत्यतोऽस्माभिरप्येवमभ्युपगमान्नास्ति दोषः। आह—यद्यप्यभ्युपगम्यत इत्यभिसमयः। *सूत्रे सत्यानां क्रमेणाभिसमयो* विरुध्यते। अत उच्यते *दर्शनाभिसमयं तु प्रतीति* विस्तरः।

सदृष्टान्तानि त्रीणि सूत्राणीति। संयुक्तागमे पठ्यन्ते। कथम् ?

१ "अनाथपिण्डद आह—'किं नु भदन्त चतुर्णामार्यसत्यानामनुपूर्वाभिसमयः, आहोस्विदेकाभिसमयः' इति ? 'चतुर्णां गृहपते आर्यसत्यानामनुपूर्वाभिसमयः, न त्वेकाभिसमयः। यो गृहपते एवं वदेत्—अहं दुःखमार्यसत्यमनभिसमेत्य, समुदयमार्यसत्यमभिसमेष्यामीति, विस्तरेण यावद् दुःखनिरोधगामिनीं प्रतिपदमार्यसत्यमभिसमयेष्यामीति। मैवं वोच इति स्याद् वचनीयः। तत् कस्य हेतोः ? अस्थानमनवकाशो यद् दुःखमार्यसत्यमनभिसमेत्य समुदयमार्यसत्यमभिसमेष्यति पूर्ववत्। यावन्नेदं स्थानं विद्यते। स्थानमेतदिति पूर्ववत्। तद्यथा गृहपते य एवं वदेद्—अहं कूटागारस्य वा कूटागारशालाया वा मूलपादमप्रतिष्ठाप्य भित्तिं प्रतिष्ठापयिष्यामि, भित्तिमप्रतिष्ठाप्य तलकम्, तलकमप्रतिष्ठाप्य च्छदनं प्रतिष्ठापयिष्यामीति। मैवं वोच इति स्याद्वचनीयः। तत् कस्य हेतोः ? अस्थानमनवकाशो यत् कूटागारस्येति पूर्ववत्। यावत् स्थानमेतद्विद्यते यन्मूलपादं प्रतिष्ठाप्य भित्तिं प्रतिष्ठापयिष्यामीति पूर्ववत्। यावदेवमेव गृहपते नेदं स्थानं विद्यते यद् दुःखसत्यमदृष्ट्वा समुदयसत्यं द्रक्ष्यति" इति विस्तरः।

१. ०मेकाभिसमयोऽपि पूर्वा०—का०।

"यो दुःखे निष्काङ्क्षो निर्विचिकित्सो बुद्धेऽपि स" इति सूत्रादेकाभिसमय इति चेत् ? न; असमुदाचारावश्यम्प्रहाणाभिसन्धिवचनात् ।

य एष उक्तः षोडशचित्तकोऽभिसमयः,

सोऽग्रधर्मैकभूमिकः ॥ २७ ॥

यद्भूमिकोऽग्रधर्मस्तद्भूमिकान्येतानि षोडश चित्तानि । ते पुनः षड्भूमिका इत्युक्तं प्राक् ॥ २७ ॥

---

२. "अथान्यतरो भिक्षुराह—'किं नु भदन्त चतुर्णामार्यसत्यानामनुपूर्वाभिसमयः, आहोस्विदेकाभिसमय ?' इति ? भगवानाह - 'चतुर्णां भिक्षो सत्यानामिति । पूर्ववद्यावत् तद्यथा भिक्षो य एवं वदेदहं चतुष्कलवरस्य सोपानस्य प्रथमसोपानकलेवरमनभिरुह्य द्वितीयमभिरोक्ष्यामीति । द्वितीयमनभिरुह्य तृतीयम् । तृतीयमनभिरुह्य चतुर्थमभिरोक्ष्यामीति । मैवं वोच इति स्याद् वचनीयः । तत्कस्य हेतोः ? अस्थानमनवकाशो यच्चतुष्कलेवरस्य सोपानस्य प्रथमसोपानकलेवरमनभिरुह्य द्वितीयकलेवरमभिरोक्ष्यति । एवं यावत् तृतीयमभिरुह्य चतुर्थमभिरोक्ष्यति । एवमिहापि नेदं स्थानं विद्यते यद् दुःखसत्यमदृष्ट्वा समुदयसत्यं द्रक्ष्यति'" इत्यादि ।

३. तथा—"आर्यानन्द आह—'किं नु भदन्त चतुर्णामार्यसत्यानामनुपूर्वाभिसमयः, उताहो एकाभिसमयः' इति ? पूर्वसूत्रवत् । यावत् तद्यथानन्द य एवं वदेदहं चतुष्पदिकाया निःश्रेण्याः प्रथमं निःश्रेणीपदमनभिरुह्य प्रासादमभिरोक्ष्यामीति । मैवं वोच इति स्याद्वचनीयः । विस्तरेण यावदेवमेवानन्द य एवं वदेदहं दुःखमार्यसत्यमनभिसमेत्य समुदयसत्यमभिसमेष्यामीति विस्तरेण यावन्नेदं स्थानं विद्यते'" इति । एतानि त्रीणि सूत्राणि ।

यो दुःख इति विस्तरः । अथ मतं स्याद्—*यो दुःखे निष्कांक्षो निर्विचिकित्सो बुद्धेऽपि स इति सूत्रादेकाभिसमय* इति । कथम् ? अशैक्षा हि धर्मा बुद्धः । स एवाशैक्षा धर्मा मार्गः । तस्माद् दुःखाभिसमयान्मार्गोऽपि तेनाभिसमितः, यस्माद् दुःखवद्बुद्धेऽपि निष्कांक्षो निर्विचिकित्स इति । कांक्षा विचिकित्सेत्यनर्थान्तरम् । अथ वा निश्चयाभिलाषः कांक्षा, विमतिर्विचिकित्सा यथोक्तलक्षणा । *नासमुदाचारावश्यम्प्रहाणाभिसन्धिवचनादिति* । नैतदेवं सूत्रादेकाभिसमय इति; असमुदाचारस्यावश्यम्प्रहाणस्य चाभिसन्धिवचनात् । दुःखेऽभिसमिते बुद्धविषये विचिकित्साया असमुदाचारोऽवश्यं प्रहाणं च भवति । अतो यो दुःखे निष्कांक्षो निर्विचिकित्सो बुद्धेऽपि स इत्युक्तमभिसन्धिः ।

कस्मात् पुनः क्षान्तयो ज्ञानानि चावश्यं भवन्ति ? यस्मात्

क्षान्तिज्ञानान्यनन्तर्यमुक्तिमार्गा यथाक्रमम् ।

अनन्तर्यमार्गाः क्षान्तयः क्लेशप्राप्तिविच्छेदं प्रत्यनन्तर्यशक्यत्वात्[1] । विमुक्तिमार्गास्तु ज्ञानानि; क्लेशप्राप्तिविमुक्तानां विसंयोगप्राप्तिसहोत्पादात् । अत उभयैरवश्यं भवितव्यम् । द्वाभ्यां चौरनिष्कासनकपाटपिधानवत् ।

यदि पुनर्द्वितीयेनानन्तर्यमार्गेणैव सह विसंयोगप्राप्तिरुत्पद्येत, किं स्यात् ? प्रहीणविचिकित्सं ज्ञानं तत्रैवालम्बने नोत्पन्नं स्यात् ।

क्षान्तिभिः क्लेशप्रहाणान्नव संयोजननिकाया ज्ञानवध्या इति शास्त्रविरोध

ते पुनः षड्भूमिका इत्युक्तम् प्रागिति । "अनागम्यान्तरध्यानभूमिकम्" (अभि० को० ६. २०) इति वचनात् ।। २७।।

अनन्तर्यशक्यत्वादिति । "कृत्याश्च", "शकि लिङ् च" (पा०सू० ३.३.१७२) इति शक्यार्थे कृत्यप्रत्ययः। अन्तरयितुं शक्या अन्तर्याः, नान्तर्याः अनान्तर्याः । क्लेशप्राप्ति ते विच्छन्दन्ति । विप्रकृतावस्था सा तेषामिष्यते । अनन्तर्यमार्गेणेति भावे स्वार्थे वृद्धिविधानम् । अनन्तरभावो अनन्तरमार्गो वा आनन्तर्यम्, तस्य मार्गा आनन्तर्यमार्गाः । *विमुक्तिमार्गा* इति । विमुक्तौ मार्गा विमुक्तिमार्गाः । क्लेशविमुक्त्यवस्थामार्गा इत्यर्थः । *द्वाभ्यां चौरनिष्कासनकपाटपिधानवदिति ।* यथा द्वाभ्यामेकेन चौरो निष्कास्यते । द्वितीयेन तद्प्रवेशाय कपाटः पिधीयते । एवमानन्तर्यमार्गेण क्लेशचौरो निष्कास्यते; तत्प्राप्तिच्छेदतः । विमुक्तिमार्गेण च विसंयोगप्राप्तिकपाटं पिधीयते; वर्तमानीकरणतः ।

यदि पुनरिति विस्तरः । यदि पुनर्द्वितीयेनान्तर्यमार्गेणैव दुःखेऽन्वयज्ञानक्षान्त्या सह *विसंयोगप्राप्तिरुत्पद्यते ।* नैव दुःखे धर्मज्ञानमुत्पद्यते, यदनेन कर्तव्यम् । तद् दुःखेऽन्वयज्ञानक्षान्त्यैव क्रियेतेत्यभिप्रायः । *प्रहीणविचिकित्सं ज्ञानं तत्रैवालम्बने* कामावचरदुःखे प्रहीणविचिकित्सं ज्ञानं *नोत्पन्नं स्यात् ।* तत्र हि दुःखे धर्मज्ञानक्षान्तिः सविचिकित्सैव वर्तते; विचिकित्साया अप्रहीणत्वात् । न च तत्र दुःखेऽन्वयज्ञानक्षान्तिः प्रहीणविचिकित्सेति शक्यते व्यवस्थापयितुम्; तद्विषयत्वात् ।

क्षान्तिभिरिति विस्तरः । *क्षान्तिभिः क्लेशप्रहाणाद् योऽयं शास्त्रपाठः ।*

---

[1]. प्रत्यन्तरयितुमशक्य०—का० ।

इति चेत् ? न; क्षान्तीनां ज्ञानपरिवारत्वात् । राजपरिवारकृतस्य राजकृत-व्यपदेशवत् ।

किं पुनः सर्वाणि षोडशचित्तानि सत्यदर्शनाद् दर्शनमार्गः ? नेत्याह । किं तर्हि ?

अदृष्टदृष्टेर्दृङ्मार्गस्तत्र पञ्चदश क्षणाः ।। २८ ।।

दुःखधर्मज्ञानक्षान्तिमारभ्य यावत् मार्गेऽन्वयज्ञानक्षान्तिरेते पञ्चदश क्षणा दर्शनमार्गः । किं कारणम् ? अदृष्टसत्यदर्शनात् । षोडशे तु नास्त्यपूर्वं द्रष्टव्यमिति यथादृष्टाभ्यसनाद् भावनामार्ग एव ।

ननु च तेनाप्यदृष्टं पश्यति मार्गान्वयज्ञानक्षान्तिम्[1] । सत्यं प्रति चिन्ता,

---

नवसंयोजननिकायाः । दुःखधर्मज्ञानप्रहातव्यः संयोजननिकायः, समुदयधर्म-ज्ञानप्रहातव्यः, निरोधधर्मज्ञानप्रहातव्यः, मार्गधर्मज्ञानप्रहातव्यः, दुःखान्वय-ज्ञानप्रहातव्यः, समुदयान्वयज्ञानप्रहातव्यः, निरोधान्वयज्ञानप्रहातव्यः, मार्गान्वयज्ञानप्रहातव्यः, भावनाप्रहातव्यश्च संयोजननिकाय इति । सूत्रेऽप्युक्तम्—"इति हि भिक्षवो ज्ञानवध्याः क्लेशाः । विद्युदुपमं चित्तम्" इति । तस्य *विरोधः* । न हि तत्र क्षान्तिप्रहातव्यः संयोजननिकाय इत्युक्तम् । न ; *क्षान्तीनामिति* विस्तरः । नैतदेवम् । कस्मात् ? *क्षान्तीनां ज्ञानपरिवारत्वात्* । क्षान्तयो ज्ञानस्य परिवारा इत्यर्थः । क्षान्तिप्रहातव्यः संयोजननिकायो ज्ञानप्रहातव्य उच्यते । *राजपरिवारकृतस्य राजकृतव्यपदेशवत्* । यथा राजपरिवारकृतस्य कस्यचिदर्थस्य राजकृत इति व्यपदेशो भवति, तद्वद् भावनाप्रहातव्यस्तु संयोजननिकायो ज्ञानप्रहातव्य एव । तत्र आनन्तर्य-मार्गोऽपि ज्ञानस्वभाव इति । क्लेशप्रहाणे ह्यानन्तर्यमार्ग एव विशेषेणाधिक्रियते ।

अदृष्टसत्यदर्शनादिति । ज्ञानेन कथमदृष्टसत्यदर्शनं भवति ? तदप्यदृष्टे सत्यान्तरे सति भवतीति दर्शनमार्गान्तरालवर्ति ज्ञानं दर्शनमार्गः पारम्पर्यमभि-सन्धाय । तेनाप्यदृष्टमिव पश्यतीति । अथ वा—अदृष्टदृष्टेरदृष्टदर्शनात् । पञ्चदशक्षणा दर्शनमार्गो यावदस्य पुद्गलस्यादृष्टदर्शनं प्रवर्तते, तावदस्य क्षणा दर्शनमार्गः । तस्य दृष्टेऽपि दुःखे अदृष्टदर्शनमस्य समुदये प्रवर्तत एवेत्याह—*भावनामार्ग एव* । षोडशक्षण इति वाक्याध्याहारः ।

---

1. मार्गाऽन्वय०—का० ।

न तु क्षणं प्रति। न हि क्षणेनादृष्टेन सत्यमदृष्टं भवति। यथा नैकेलुञ्जेनालूनेन[1] केदारमलूनं भवति। फलत्वादष्टज्ञानषोडशाकारभावनात् पूर्वमार्गविहानेः प्राबन्धिकत्वाच्च मार्गान्वयज्ञानं भावनामार्गः।

ननु च तेनाप्यदृष्टं पश्यति, किं तददृष्टम्? इत्याह—*मार्गान्वयज्ञान-क्षान्तिमिति*। मार्गान्वयज्ञानक्षान्तिरात्मानं विरहय्य शेषमन्वयज्ञानपक्ष्यं मार्गमालम्बते; स्वात्मनि वृत्तिविरोधात्। तेनोच्यते—*मार्गान्वयज्ञानक्षान्तिम-दृष्टां पश्यतीति*। *सत्यं प्रति चिन्तेति* विस्तरः। सत्यं प्रति चिन्ता—दृष्टं न द्रष्टव्यमिति। *न तु क्षणं प्रति*। दृष्टः क्षणो न वेति। कस्मात्? पञ्चदशेन क्षणेन यदन्वयज्ञानपक्षलक्षणं सत्यं दृष्टम्, तदेव षोडशेनापीति। *नास्त्यपूर्व-दृष्टसत्यदर्शनमिति*। न षोडशक्षणो दर्शनमार्ग इति व्यवस्थाप्यते। न ह्येक-क्षणेनादृष्टेन मार्गान्वयज्ञानक्षान्तिलक्षणेन सत्यं तन्मार्गसत्यमदृष्टं भवति। लौकिकं दृष्टान्तमाह—*यथा नैकलुञ्जेन* एकसस्यशलाकया दात्रेणालूनेनाच्छिन्नेन *केदारमलूनं भवति*। किं तर्हि? लूनमेवेत्यर्थः। तथा हि—केचित् प्रमादाद-लूनेऽपि एकलुञ्जे वक्तारो भवन्ति—लूनमस्माभिः केदारमिति। *फलत्वादिति* विस्तरः। फलत्वादित्यादिहेतुभिर्भावनामार्गमेव षोडशक्षणं साधयति। भावना-मार्गः षोडशः क्षणः; संस्कृतश्रामण्यफलत्वात्, सकृदागामिफलवत् यावदर्हत्त्व-फलवद्वा। तथा भाविताष्टज्ञानषोडशाकारत्वाद् *विहीनाप्रतिपन्नमार्गत्वात्* *प्राबन्धिकत्वाच्च*। फलान्तरवदेव भावनामार्गः। षोडशे हि क्षणेऽष्टौ ज्ञानानि भाव्यन्ते—दुःखे धर्मज्ञानम्, दुःखेऽन्वयज्ञानम्, यावन्मार्गेऽन्वयज्ञानमिति। आकारा अपि षोडशानित्याद्या भाव्यन्ते। तद्वदेव च दर्शनमार्गेऽष्टज्ञानषोडशा-कारभावना नास्ति। तत्र हि सभागज्ञानाकारभावनैव। "यथोत्पन्नानि भाव्यन्ते क्षान्तिज्ञानानि दर्शने" (अभि० को० ७.२०) इति वचनात्। मार्गान्वयज्ञाने च पूर्वमार्गस्य प्रतिपन्नकमार्गस्य विहानिः। न च दर्शनमार्गे पूर्वमार्गविहानिरिति। प्राबन्धिकं चेदं मार्गान्वयज्ञानम्। न च दर्शनमार्गे क्षान्तिर्ज्ञानं वा किञ्चित् प्राबन्धिकमस्तीत्यतोऽपि मार्गान्वयज्ञानं भावनामार्ग इति।

इतरः प्रत्यवस्थानं करोति—दर्शनमार्गः षोडशः क्षणः; आवश्यकापरिहा-णित्वात्, दुःखधर्मज्ञानक्षान्त्यादिवदिति। पूर्वपक्षं वा दूषयति—अनुमान-पतितधर्मस्वरूपविपर्ययापक्षालोऽयं पक्ष इति। भावनामार्गत्वेऽपि साध्यमाने तदपरिहाणित्वमनेनानुमानेनापततीति। तदिदमन्तर्नीतमभिसमीक्ष्य पुनराह—

---

१. नैकेन०—का०।

अपरिहाणिस्तु दर्शनहेयक्लेशप्रहाणसन्धारणात् ।

अत एव दर्शनमार्ग इति चेत् ? न; अतिप्रसङ्गात् । सप्त ज्ञानानि कस्माद्दर्शनमार्गः ? दर्शनस्यासमाप्तत्वात् । न हि सर्वं सत्यदर्शनं समाप्तमिति तदन्तरालत्वात्तान्यपि दर्शनमार्गः ॥२८॥

उक्तं यथा दर्शनमार्गो भावनामार्गश्चोत्पद्यते ॥

अथेदानीमुत्पन्नार्यमार्गाणां[1] पुद्गलानां व्यवस्थानं तथा वक्ष्यामः—

य एते दर्शनमार्गस्वभावाः पञ्चदशक्षणा[2] उक्ताः, वेदितव्यौ

अपरिहाणिस्त्वति विस्तरः । *यस्माद् दर्शनहेयानां क्लेशानां प्रहाणं* मार्गान्वयज्ञानेनाधारप्रतिपक्षेण *सन्धार्यते* । यदि च तस्मात् फलमार्गात् षोडशात् क्षणात् परिहाणिः स्यात्, स्रोतआपत्तिफलात् परिहाणिः स्यात् । न च स्रोतआपत्तिफलात् परिहाणिरित्यतो न तस्मात् परिहीयते ।

इतर आह—*अत एवेति* । किमयम् अपरिहाणिहेतुरेवोच्यते ? वयमप्येतमर्थमभिदध्महे, किमयमुपलब्धसमर्मिति चोत्तरमुद्ग्राह्यते । *आचार्य* आह—*अत एव दर्शनमार्ग इति चेत्* । यदि मन्यसे—यत एव दर्शनहेयप्रहाणसन्धारणं मार्गान्वयज्ञानेन, अत एव दर्शनमार्ग इति । *तन्न । अतिप्रसङ्गात् ।* यदि मार्गान्वयज्ञानेन दर्शनहेयप्रहाणसन्धारणमित्यतो दर्शनमार्गः स्यात्, एवं सत्यतिप्रसङ्गः स्यात् । तस्मान्मार्गान्वयज्ञानात् परेण सर्वेण भावनामार्गेण दर्शनहेयप्रहाणसन्धारणमिति सर्व एव दर्शनमार्गः स्यात् । अनिष्टं चैतत् । षोडश एव हि क्षणो दर्शनमार्गो भवद्भिरिष्यते, न सप्तदशाष्टदश इत्यादिकः क्षणः प्रवाहन्यायेनोत्पद्यते । द्वितीये तृतीये वा दिवसे य उत्पाद्यते तज्जातीयो विशेषमार्गसंगृहीतः । तन्नास्ति । ततोऽपि हि नास्ति परिहाणिः । तदेवं सत्यावश्यकापरिहाणित्वं यो हेतुरुक्तः, सोऽनैकान्तिक इति दर्शितं भवति । तदनैकान्तिकत्वाच्चाप्रतिसाधनं तत् । न पूर्वपक्षदूषणं चेति । आह—*सप्त ज्ञानानि* दुःखे धर्मज्ञानं यावन्मार्गे धर्मज्ञानं *कस्माद् दर्शनमार्गो* न पुनरष्टमं मार्गेऽन्वयज्ञानमित्यभिप्रायः । *दर्शनस्यासमाप्तत्वादिति* । मार्गान्वयज्ञानक्षान्तौ दर्शनं समाप्तम; सर्वेषां सत्यानां तदानीं दृष्टत्वात् । दुःखे धर्मज्ञान उत्पन्ने यद्यपि कामावचरं दुःखं दृष्टम्, रूपारूप्यावचरदुःखादि तु न तावद् दृष्टम् । एवं यावत् मार्गे धर्मज्ञान उत्पन्ने रूपारूप्यप्रतिपक्षो न तावद् दृष्ट इति ।

---

१. यथेदानी०—का० । २. पञ्चादश०—का० ।

मृदुतीक्ष्णेन्द्रियौ तेषु श्रद्धाधर्मानुसारिणौ ।

मृद्विन्द्रियस्तेषु वर्तमानः श्रद्धानुसारीत्युच्यते, तीक्ष्णेन्द्रियो धर्मानुसारीति । श्रद्धयानुसारः श्रद्धानुसारः, सोऽस्यास्तीति श्रद्धानुसारी । श्रद्धयानुसर्तुं शीलमस्येति वा । पूर्वं परप्रत्ययेनार्थानुसरणात्[1] ।

एवं धर्मानुसारी । पूर्वं स्वयमेव सूत्रादिभिर्धर्मैरर्थानुसरणा_ ।

तौ पुनः—

अहीनभावनाहेयौ फलाद्यप्रतिपन्नकौ ।। २९ ।।

फलानामाद्यं स्रोतआपत्तिफलम्; सर्वफलप्राप्तौ तस्य प्रथमत्वात् । तावेव श्रद्धाधर्मानुसारिणौ, यदि पूर्वं लौकिकेन मार्गेणाप्रहीणभावनाहेयौ भवतः, सकलबन्धनौ तौ स्रोतआपत्तिफलप्रतिपन्नकावुच्येते ।।२९।।

यावत् पञ्चप्रकारघ्नौ,

यदि पूर्वं लौकिकेन मार्गेण कामावचराणां भावनाहेयानां यावत् पञ्च प्रकाराः प्रहीणा भवन्ति, तथैव प्रथमफलप्रतिपन्नकावुच्येते ।

सावशेषं दर्शनं न समाप्तमिति । *तदन्तरालत्वादिति* । दर्शनमार्गान्तरालत्वात् । तयोर्वा द्वयोः क्षान्त्योरन्तरालत्वात् । तान्यपि सप्त ज्ञानानि दर्शनमार्गः । शेषद्रष्टव्यसाकांक्षत्वात् तस्य योगिन इत्यभिप्रायः ।। २८ ।।

पूर्वं परप्रत्ययेन परोदितेन *अर्थानुसरणाद्* दुःखादिसत्यप्रतिपत्तेरित्यर्थः । *पूर्वमिति* विशेषणेन भावनाकाले परोपदेशनिरपेक्षमर्थानुसरणमिति कथितं भवति । *एवं धर्मानुसारीति* । धर्मैरनुसारो धर्मानुसारः, सोऽस्यास्तीति धर्मानुसारी । धर्मैरनुसर्तुं शीलमस्येति वा । *पूर्वं स्वयमेव सूत्रादिभिर्धर्मैर्* द्वादशाङ्गैः प्रवचनै*रर्थानुसरणात्* । पूर्ववद् व्याख्यानम् ।। २९ ।।

यावत्पञ्च प्रकाराः प्रहीणा भवन्तीति । यावच्छब्देन यद्येको द्वौ त्रयश्चत्वारः पञ्च प्रहीणाः प्रकारा भवन्ति । *तथैव प्रथमफलप्रतिपन्नकावुच्येते* । यथा सकलबन्धनौ ।

---

१. परसंप्रत्यये०—का० ।

अभि० को० ३ : १२

द्वितीयेऽर्वाङ्नवक्षयात् ।

द्वितीयनिमित्तं द्वितीये । यदि तयोस्तस्मात् परेण षट् सप्ताष्टौ वा प्रकाराः पूर्वं प्रहीणा भवन्ति, तौ[1] द्वितीयफलप्रतिपन्नकावुच्येते ।

कतमच्च द्वितीयम् ? सकृदागामिफलम् ।

कामाद् विरक्तावूर्ध्वं वा तृतीयप्रतिपन्नकौ ।। ३० ।।

यदि पुनर्नवमस्यापि प्रकारस्य प्रहाणात् कामधातोर्वीतरागौ भवत ऊर्ध्वं च[2] यावदाकिञ्चन्यायतनात्, तौ तृतीयप्रतिपन्नकावुच्येते ।

कतमच्च तृतीयम् ? अनागामिफलम् ॥ ३० ॥

षोडशे तु फलस्थौ तौ यत्र यः प्रतिपन्नकः ।

षोडशे तु चित्त उत्पन्ने तौ न पुनः *श्रद्धाधर्मानुसारिणावुच्येते । नापि* प्रतिपन्नकौ । किं तर्हि ? फलस्थौ । यत्र फले यः प्रतिपन्नको भूतः स तदानीं तत्र फलस्थितो भवति । स्रोतआपत्तिफले, सकृदागामिफले वा, अनागामिफले वा । अर्हत्त्वं तु न शक्यमादितः प्राप्तुम् ; दर्शनमार्गेण भावनाहेयाप्रहाणात्[3] । पूर्वं च भवाग्रवैराग्यासम्भवात् ।

"*द्वितीयेऽर्वाङ् नवक्षयाद्*" इति । *द्वितीये* इति । द्वितीयनिमित्तमित्यर्थः । 'चर्मणि द्वीपिनं हन्ति' इति यथा । अर्वाङ् नवक्षयात् नवप्रकारप्रहाणादधरतः नवप्रकारप्रहाणपरिहारेणार्थादुक्तं भवति ।

यदि तयोः पुद्गलयोस्तस्मात् पञ्चप्रकारप्रहाणात् *परेण षट् सप्ताष्टौ वा प्रकाराः पूर्वं* लौकिकेन मार्गेण *प्रहीणा भवन्ति । तौ द्वितीयफलप्रतिपन्नकाविति ।* द्वितीय इति वचनात्, प्रतिपन्नकाविति चाधिकारादे[ ] पदार्थव्यवस्था लभ्यते ।

ऊर्ध्वं चेति । प्रथमध्यानवीतरागौ । *यावदाकिञ्चन्यायतनाद्वी*तरागौ ॥ ३० ॥

अर्हत्त्वं तु न शक्यमादितः प्राप्तुमिति । अनागामिफलमप्राप्याचित एवार्हत्त्वं प्राप्तुं न शक्यते । कस्मादित्याह – *भावनाहेयाप्रहाणात्* । न हि दर्शन-

१. श्री तौ—का० । २. वा—का० । ३. °हेयानामप्रहाणात्—का० ।

श्रद्धाधिमुक्तदृष्टप्राप्तौ मृदुतीक्ष्णेन्द्रियौ तदा ।। ३१ ।।

तस्मिन् काले यो मृद्विन्द्रियः श्रद्धानुसारिपूर्वी स श्रद्धाधिमुक्त इत्युच्यते । यस्तीक्ष्णेन्द्रियो धर्मानुसारिपूर्वी स दृष्टिप्राप्त इत्युच्यते; श्रद्धाप्रज्ञाधिकत्वेनाधिमोक्षदृष्टिप्रभावितत्वात् ॥ ३१ ॥

किं पुनः कारणं प्रहीणपञ्चप्रकारोऽपि षोडशे चित्ते स्रोतआपन्न एवोच्यते, न सकृदागामिफलप्रतिपन्नकः ? यस्मात्

फले फलविशिष्टस्य लाभो मार्गस्य नास्त्यतः ।

नाप्रयुक्तो विशेषाय फलस्थः प्रतिपन्नकः ।। ३२ ।।

फले हि लभ्यमाने फलविशिष्टो मार्गो न लभ्यत इत्येष नियमः । अतः

मार्गेण भावाग्रिकाणां भावनाहेयानां प्रहाणमस्तीति । यथा दर्शनमार्गस्वभावेषु पञ्चदशसु क्षणेषु वर्तमानः आदितस्तृतीयफलप्रतिपन्नकादर्हत्त्वफलसाक्षात्क्रियायै प्रतिपन्नकः स्यात् । षोडशे तु चित्त उत्पन्ने आदितोऽनागामिनोऽर्हन् स्यात् । भावाग्रिकभावनाहेयप्रहाणाद्ध्यर्हत्त्वं प्रतिप्राप्यते । आह—यदि दर्शनमार्गेण भावाग्रिकाणां भावनाहेयानां प्रहाणं नास्तीत्यतोऽर्हत्त्वं प्राप्तुमशक्यम् , पूर्वमेव तर्हि पृथग्जनावस्थायामेव भावनामार्गेण भावनावैराग्यात् तत्फलप्रतिपन्नकः । तेषु वर्तमानोऽर्हत्त्वफलसाक्षात्क्रियायै प्रतिपन्नको भविष्यति । षोडशे तु चित्तक्षण आदितोऽर्हन्निति । अत उच्यते—पूर्वं च भवाग्रवैराग्यासम्भवादिति । न हि पूर्वं पृथग्जनावस्थायां लौकिकेन मार्गेण भवाग्रवैराग्यसम्भवः; उपरिभूम्यभावात् । तस्मादादितः प्रतिपन्नकोऽर्हंश्च न स्यादिति ।

श्रद्धाप्रज्ञाधिकत्वेनाधिमोक्षदृष्टिप्रभावितत्वादिति । श्रद्धाधिकत्वेनाधिमोक्षप्रभावितत्वाच्छ्रद्धाधिमुक्तः । श्रद्धाधिको मुक्तः श्रद्धाधिमुक्त इति कृत्वा । न तु तस्य प्रज्ञा नैवास्ति । तया न तु प्रभावित इति न तन्नाम लभते । प्रज्ञाधिकत्वेन दृष्टिप्रभावितत्वात् दृष्टिप्राप्तः । न तु तस्य श्रद्धा नास्तीति पूर्ववद् वाच्यम् । अपरे तु पुनः नैरुक्तविधिमालम्ब्य व्याचक्षते—श्रद्धाधिपत्येन दर्शनहेयेभ्यो मुक्तः श्रद्धाधिमुक्तः । दृष्ट्याधिपत्येन प्राप्तफलो (प्राप्तफला) दृष्टिप्राप्त इति ॥ ३१ ॥

"यावत्पञ्चप्रकारघ्नौ" (अभि० को० ६.३०) इति उक्तम् । अतः पृच्छति—*किं पुनः कारणमिति* विस्तरः ।

फलविशिष्टो मार्गो न लभ्यत इति । फलाद्विशिष्टो मार्गः सकृदागामि-

फलस्थो यावन्न विशेषाय प्रयुज्यते फलान्तरप्राप्तौ, तावत् प्रतिपन्नको नोच्यते ।

एवमन्यत्रापि फले वेदितव्यम् ।

यस्तु तृतीयध्यानवीतरागोऽधरां भूमिं निश्रित्य नियाममवक्रामति, सोऽवश्यं फलविशिष्टं मार्गं सम्मुखीकरोति । अन्यथा हि स तस्मादूर्ध्वोपपन्नः सुखेन्द्रियेणासमन्वागतः स्यात् ।

एवं तावद् भूयः कामवीतरागाणां नियामावक्रान्तौ पुद्गल-व्यवस्थानम् ॥ ३२ ॥

फलप्रतिपन्नकादिः । प्रथमादिप्रकारभावनाहेयप्रतिपक्षमार्गो न भाव्यत इत्यर्थः । *यावन्न विशेषाय प्रयुज्यत* इति । यावन्नाप्रहीणाक्लेशप्रहाणाय फलान्तरप्राप्तिनिमित्तं प्रयोगं करोति, तावत्प्रतिपन्नको नोच्यते । यदा प्रयुज्यते, तदा प्रतिपन्नक इत्यर्थादुक्तं भवति । तदा हि पूर्वप्रहीणक्लेशप्रतिपक्षस्याप्रतिलब्धपूर्वस्य तत्प्रहाणस्य चानास्रवा प्राप्तिरुत्पद्यत इति सिद्धान्तः । *एवमन्यत्रापि फले वेदितव्यमिति* । षोडशे चित्ते स्रोतआपन्न एवोच्यत इति वचनात् । स्रोतआपन्न उक्त इत्यतोऽन्यत्रापि सकृदागामिफले अनागामिफले च वेदितव्यम् । लौकिकेन मार्गेण प्रहीणाष्टप्रकारोऽपि षोडशे चित्ते सकृदागाम्येवोच्यते, नानागामिफलप्रतिपन्नकः; यस्मात् फले फलविशिष्टस्य मार्गस्य लाभो नास्तीति । एवं कामवीतराग ऊर्ध्वं वा षोडशे चित्ते नार्हत्त्वफलप्रतिपन्नक उच्यते; यस्मात् फले फलविशिष्टस्येति पूर्ववत् ।

यस्तु तृतीयध्यानवीतराग इति विस्तरः । तृतीयध्यानवीतरागः *अधरां भूमिं निश्रित्या*नागम्यं ध्यानान्तरं प्रथमं द्वितीयं वा ध्यानं निश्रित्य *नियाममवक्रामती*त्यस्ति सम्भवः । *सोऽवश्यं फलविशिष्टं मार्गं सम्मुखीकरोति* तृतीयध्यानसंगृहीतं वा; यतस्तृतीयध्यानसंगृहीतमनास्रवं सुखेन्द्रियं लभ्यते । अस्ति हि सम्भावना यदसौ फलविशिष्टमार्गं सम्मुखीकुर्यात्; यस्मादस्य तृतीयध्यानभूमिकः क्लेशः प्रहीण इति । तेन सोऽवश्यं फलविशिष्टं मार्गं सम्मुखीकरोतीति नियम्यते । *अन्यथा हि* । यदि न सम्मुखीकरोतीत्यर्थः । *स तस्मादूर्ध्वोपपन्नः* । स आर्यः तस्मात् तृतीयध्यानादूर्ध्वं चतुर्थे ध्याने आरूप्येषु वा *सुखेन्द्रियेणासमन्वागतः स्यात्* । यद्धि सास्रवं सुखेन्द्रियम्, तद् भूमिसञ्चारात् त्यक्तम् । यदपि चानास्रवम् तदपि । यदि न सम्मुखीकृतं स्यादुभयेनापि सुखेन्द्रियेणासमन्वागतं स्याद् । आर्याणां चोर्ध्वोपपन्नानामवश्यं सुखेन्द्रियेणासमन्वागम उक्तः । सुखेन्द्रियेण चतुर्थध्यानारूप्योपपन्नः पृथग्जनो न समन्वागतः; आर्यस्तु

आनुपूर्विकं तु वक्तव्यम्। अत इदं तावद् व्यवस्थाप्यते। यथैते कामघातौ नवप्रकाराः क्लेशा उपदिष्टाः, एवं

नवप्रकारा दोषा हि भूमौ भूमौ,

यावद् भवाग्रे ।

यथा च दोषाः,

समन्वागत इति वचनात्। "यश्चापि सौमनस्येन्द्रियेण समन्वागतः सोऽवश्यं पञ्चभिः उपेक्षा-जीवित-मनः-सुख-सौमनस्येन्द्रियैः" इत्येवमादिवचनाच्च। अत्र ब्रूमः—अस्त्येष *विभाषायां* लिखितपक्षः। स तु न स्थापनापक्षो लक्ष्यते; अपर आहुरिति वचनात्। यो हि चतुर्थध्यानलाभी षण्णां भूमीनामन्यतमां भूमिं निश्रित्य नियाममवक्रामति, स षड्भूमिकेनानागामिफलेनानागम्यभूमिकेन यावच्चतुर्थध्यानभूमिकेन षोडशे चित्ते समन्वागतो भवति; तथा वीतरागत्वात्। यस्तृतीयध्यानलाभी, स पञ्चभूमिकेन; चतुर्थध्यानभूमिकं हित्वा। एवं यो द्वितीयध्यानलाभी, स चतुर्भूमिकेन; तृतीयचतुर्थभूमिके हित्वा। यस्तु वीतरागः प्रथमध्यानलाभी वा द्वितीयालाभी, स यद्यनागामिफलं प्राप्नोति, त्रिभूमिकेनासावनागामिफलेन समन्वागतः अनागम्यध्यानान्तरप्रथमध्यान-भूमिकेन। सर्वजघन्योऽपि ह्यनागाम्यवश्यमेव त्रिभूमिकेनानागामिफलेन समन्वागत इति वर्णयन्ति। तस्मादपरपक्षापेक्षयैवमुक्तमाचार्येणेति युक्तं स्यात्।

एवं तावद् भूयःकामवीतरागाणामिति। भूयोवीतरागाणाम्, कामवीतरागाणां च। तत्र भूयोवीतरागो यस्य सप्ताष्टौ वा प्रकाराः पूर्वं लौकिकेन मार्गेण प्रहीणा भवन्ति। यस्य नव प्रकाराः प्रहीणाः, स कामवीतरागः। भूयोवीतरागाणां पुद्गलव्यवस्था "द्वितीयेऽर्वाङ् नवक्षयाद्" (अभि० को० ६.३०) इति वचनात्, कामवीतरागाणाम् "कामाद्विरक्तावूर्ध्वं च" इति (अभि० को० ६.३०) वचनात्॥ ३२॥

यथैते कामधाताविति।

"यावत् पञ्चप्रकारघ्नौ द्वितीयेऽर्वाङ् नवक्षयात्।
कामाद् विरक्तौ"　　　(अभि० को० ६.३०)

इति वचनात् *कामधातौ नव प्रकाराः क्लेशा उपदिष्टाः*।

तथा गुणाः ।

तत्प्रतिपक्षा अप्यानन्तर्यविमुक्तिमार्गाख्या गुणा भूमौ भूमौ नवप्रकारा एव । कथं कृत्वा ?

मृदुमध्याधिमात्राणां पुनर्मृद्वादिभेदतः ।। ३३ ।।

मृदुमध्याधिमात्रा हि त्रयो मूलप्रकाराः । तेषां पुनः प्रत्येकं मृदुमध्याधिमात्रत्वेन त्रिविधत्वात् नव व्यवस्थाप्यन्ते । तद्यथा—मृदुमृदुः प्रकारः, मृदुमध्यः, मृद्वधिमात्रः; मध्यमृदुमध्यमध्यः, मध्याधिमात्रः; अधिमात्रमृदुः, अधिमात्रमध्यः, अधिमात्राधिमात्रश्चेति । तत्र मृदुमृदुना मार्गेणाधिमात्रस्य क्लेशस्य प्रहाणम् । एवं यावदधिमात्राधिमात्रेण मृदुमृदोः । आदित एवाधिमात्रमार्गासम्भवादुत्पन्नाधिमात्रमार्गस्य चाधिमात्रक्लेशासम्भवात् । औदारिको हि मलश्चेलात् पूर्वं निर्धूयते, पश्चात् सूक्ष्मः । औदारिकं च तमः सूक्ष्मेणालोकेन हन्यते, सूक्ष्मं चाधिमात्रेणेत्येष दृष्टान्तयोगः । शुक्ला हि धर्मा बलवन्तः, दुर्बलास्तु कृष्णाः । क्षणिकमृदुकेनाप्यार्यमार्गेणानादिसंसारपरम्पराध्यापिताधिमात्राणां[1] क्लेशानामुन्मूलनात्[2] । सुबहुकालसंवर्द्धितानां[3] दोषाणां त्रिवृत्कर्षनिष्कर्षणवत्[4], क्षणिकाल्पप्रदीपमहातमोघातवच्च[5] ।।३३।।

एवं नवप्रकारेषु क्लेशेषु सर्वत्र—

चेलादिति वस्त्रात् । *एष दृष्टान्तयोग* इति । दृष्टान्तयुक्तिर्दृष्टान्तयोगः । दृष्टान्तप्रकार इत्यपरे । तदेवमनया युक्त्या, अनेन वा प्रकारेणान्योऽपि दृष्टान्तो वक्तव्य इति सूचयति । अन्यथा ह्येष दृष्टान्त इत्येव ब्रूयात् । *अनादिसंसार* इति । अनादौ संसारे । स्वहेतु*परम्पराध्यापिता* अभिवर्धिताः, ततश्चा*धिमात्रप्रमाण*मेतेषामित्यभिप्रायः । तेषां *क्लेशानामुन्मूलनात्* प्राप्तिच्छेदतः । मूलसधर्मिण्यो हि प्राप्तयस्तत्प्रबन्धत्वात् क्लेशानाम् । *त्रिवृत्कर्षनिष्कर्षणवदिति* । यथा त्रिवृत्कर्षेण धरणेन *सुबहुकाले संवर्धितानां* वातपित्तादीनां *दोषाणां* निष्कर्षणम्, एवं क्षणिकमृदुकेनाप्यार्यमार्गेण क्लेशानाम् । *यथा च क्षणिकेनाल्पेन प्रदीपेन महतस्तमसो घातः*, तद्वत् क्लेशानामिति ।।३३।।

१. °पराध्यायिताधि०—का० । २. °नामुन्मूलत्वात्—का० ।
३. बहु०—का० । ४. त्रिवृत्कर्षवत्—का० । ५. °वातवच्च—का० ।

अक्षीणभावनाहेयः फलस्थः सप्तकृत् परः ।

यस्य हि फलस्थस्यैकोऽपि भावनाहेयः प्रकारोऽप्रहीणः, स स्रोतआपन्नः । सप्तजन्मानि करोति सप्तकृत् । परः सर्वान्त्यः । न हि सर्वसप्तकृदिति ।

सप्तकृत्वःपरम इति सूत्रपाठः । सप्तकृत्वः परमं जन्म अस्येत्यर्थः । प्रकर्षे परमशब्दः । निर्वाणस्रोतो हि मार्गः; तेन तत्र गमनात् । तदभावापन्न आगतः प्राप्त इति स्रोतआपन्नः ।

कथमापन्नः ? आद्यमार्गलाभाच्चेत्, अष्टमकोऽपि स्यात् ; आद्यफललाभाच्चेत्, भूयोवीतरागोऽपि स्यात् । एवं कामवीतरागोऽपि स्यात् । सर्वफलप्राप्तिणमधिकृत्याद्यफललाभात् ।

किं पुनः कारणं स एव, नाष्टमकः ? प्रतिपन्नकफलमार्गलाभात् दर्शन-

---

सप्तकृत्वः परमं जन्मास्येति । सप्तकृत्वो जन्मप्रकर्षेण अस्य । नातः परमित्यर्थः । तेन मार्गेण निर्वाणगमनादित्यर्थः । स्रोतसा हि लोके गम्यते ।

आद्यमार्गलाभाच्चेत् । आद्योऽनास्रवो मार्गो दर्शनमार्गस्तस्य लाभाच्चेत् *स्रोतआपन्न* । *अष्टमकोऽपि स्यात्* । स्रोतआपत्तिफलप्रतिपन्नकोऽपि स्यादित्यर्थः । तथा हि प्रतिलोमक्रमेणार्हन् आरभ्याष्टानां पुरुषपुद्गलानामर्हत्प्रतिपन्नकादीनां स्रोतआपत्तिफलप्रतिपन्नोऽष्टमको भवति श्रद्धानुसारी धर्मानुसारी वा, तस्याप्याद्यमार्गलाभात् सोऽपि स्रोतआपन्नः स्यात् । *आद्यफललाभाच्चेत्* । अथ मतम्—अपूर्वफलस्य लाभात्स्रोतआपन्न इति । *भूयोवीतरागोऽपि स्यात्* । यः प्रहीणषट्क्लेशप्रकारः षोडशे क्षणे सकृदागामी, सोऽपि स्रोतआपन्नः स्यात् । तस्याप्यपूर्वफललाभात् । एवं *कामवीतरागोऽपि स्यात्* । तस्यापि तदाद्यं फलमिति । इदानीं परिहार उच्यते—*सर्वफलप्रापिणमधिकृत्य आद्यफललाभादिति* । सर्वफलमिति स्रोतआपत्तिफलादीनि चत्वारि, तत्प्राप्तुं शीलमस्येति सर्वफलप्रापी । सर्वफलप्राप्तिरस्यास्तीति वा सर्वफलप्रापी । तमधिकृत्य तमभिसन्धायाऽऽद्यफललाभादपूर्वफललाभात् *स्रोतआपन्न* उच्यते ।

किं पुनः कारणमिति विस्तरः । कस्मात् *स एव* स्रोतआपन्न उच्यते, *नाष्टमकः* । स चापि ह्यार्यमार्गस्रोतआपन्न इति । *प्रतिपन्नकफलमार्गलाभादिति*

१-१. कामवीतरागः—का० । २. आशीर्विष०—का० ।

भावनामार्गलाभात् सकलस्रोतोऽभिसमयाच्च मार्गान्वयज्ञाने । स एव तस्मादन्यान् सप्तोपपत्तिभवान् मनुष्येषु प्रतिसन्दधाति सप्तान्तराभवान् । एवं देवेष्वित्यष्टाविंशतिभवान् प्रतिसन्दधाति । सप्तकसामान्यात्तु सप्तकृत्वः परम उक्तः । सप्तस्थानकौशल-सप्तपर्णवदिति वैभाषिकाः ।

यत्तर्हि सूत्र उक्तम्—"अस्थानमनवकाशो यद् दृष्टिसम्पन्नः पुद्गलोऽष्टमं भवमभिनिर्वर्तयिष्यति । नेदं स्थानं विद्यते" इति । एकस्यां गतावित्यभिप्रायः । यथारुतं वा कल्प्यमानेऽन्तराभवोऽपि न स्यात् ।

विस्तरः । यस्मात्तेन सर्वफलप्राप्तिणा प्रतिपन्नकमार्गः पञ्चदशक्षणस्वभावः, भावनामार्गश्च षोडशक्षणो लब्धः । अष्टमकेन तु प्रतिपन्नकः मार्ग एव लब्ध इति । इतश्च *दर्शनभावनामार्गलाभात्*। यस्माच्च तेन दर्शनमार्गश्च स एव भावनामार्गश्च स एव लब्धः, अष्टमकेन तु दर्शनमार्ग एवेति । *सकलस्रोतोऽभिसमयाच्च मार्गान्वयज्ञाने* । यस्माच्चानेन सकलं स्रोतोऽभिसमितं मार्गान्वयज्ञानक्षान्तिक्षणस्यापि दर्शनात्र त्वष्टमकेन । तस्मादेभिः कारणैः *सर्वफलप्राप्त्येव स्रोतआपन्न इत्युच्यते नाष्टमकः* । प्रकर्षगतेर्हि तथा वचनम् । तद्यथा लोके यः प्रकर्षेण भासं करोति स भास्कर उच्यते, न खद्योतकः, तद्वत् । *तस्मादन्यानिति* । तस्मात् साम्प्रतिकाद्भवादन्यान् । *सप्तस्थानकौशलसप्तपर्णवदिति* । यथा सप्तकसामान्यात् सप्तस्थानकुशलो भिक्षुरुक्तः सूत्रे । कथम् ? विस्तरमुक्त्वाह—"कथं च भिक्षवो भिक्षुः सप्तस्थानकुशलो भवति ? रूपं यथाभूतं प्रजानाति, रूपसमुदयं रूपनिरोधं रूपनिरोधगामिनीं प्रतिपदं रूपस्यास्वादमादीनवं निःसरणं यथाभूतं प्रजानाति । एवं वेदनां संज्ञां संस्कारान् विज्ञानं यथाभूतं प्रजानाति । विज्ञानसमुदयं विस्तरेण यावन्निःसरणं यथाभूतं प्रजानाति" इति । एवमनेन न्यायेन पञ्चसप्तकानि पञ्चत्रिंशदिति पञ्चत्रिंशत् कुशलः प्राप्नोति । *सप्तपर्णवच्च* । यथा च पत्रिकायां सप्तपर्णसादृश्यादनेकशतपत्रोऽपि सन् स वृक्षः सप्तपर्ण इत्युच्यते, तद्वत् । प्रथमो दृष्टान्तः प्रवचने सिद्धः, द्वितीयो लोक इति दृष्टान्तद्वयोपन्यासे प्रयोजनम् ।

यदि सप्तकसामान्यात् सप्तकृत्वः परम इति व्याख्यायते, *यत् तर्हि सूत्र उक्तम्*, तद्विरुध्यत इत्यतोऽपव्याख्यानमेतदित्यभिप्रायः । *एकस्यां गतावष्टमं भवं* नाभिनिर्वर्तयतीत्यविरोधः । *यथारुतं वा कल्प्यमान* इति । सप्तकृत्वो देवांश्च मनुष्यांश्च संसृत्य संधाव्य दुःखस्यान्तं करोतीति देवमनुष्यवचनादन्त*राभवोऽपि न स्यात्* । इष्यते च देवमनुष्यगत्योः सप्त-

एवमप्यूर्ध्वस्रोतसो भवाग्रपरमस्यैकस्यां गतावष्टम उपपत्तिभवो न प्राप्नोति ? कामधात्वभिसन्धिवचनाददोषः ।

किमत्र ज्ञापकम्—सूत्रम्, युक्तिर्वा ? इह चैव किं ज्ञापकं प्रत्येकं देवमनुष्येषु सप्तकृत्वो न पुनरुभयेष्वेव सप्तकृत्व इति । एवं हि पठ्यते—"सप्तकृत्वो देवाँश्च मनुष्याँश्च" इति ? प्रत्येकमपि तु काश्यपीयाः पठन्ति—"सप्तकृत्वो देवान् सप्तकृत्वो मनुष्यान्" इति । नात्राभिनिवेष्टव्यम् । यश्च मनुष्येषु स्रोतआपन्नो भवति स तानेवागम्य परिनिर्वाति, यो देवेषु स तानेव ।

भवाभिनिर्वर्तनम् । अन्तराभवास्तु न गण्यन्त इति । यदि अन्तराभवैः सह सप्तभवा गण्येरन्, जन्मचतुष्टयमेवास्य स्यात् । तदेवानेनानिष्टापत्तिवचनेन तदात्मीयं व्याख्यानमेकस्यां *गतावि*ति समर्थयति ।

इतर आह—*एवमप्यूर्ध्वस्रोतस* इति विस्तरः । यद्येकस्यां गतावष्टमं भवं नाभिनिवर्तयतीति व्याख्यापयसि, कथं तर्हि ऊर्ध्वस्रोतसोऽष्टमभवाभिनिर्वृत्तिरे-कस्यां गतौ भवति, *भवाग्रपरमस्येति* विशेषणं किमर्थम् ? अकनिष्ठपरमस्यापि अष्टमभवाभिनिर्वृत्तिः सम्भवति । "स प्लुतोऽर्धप्लुतः सर्वच्युतश्चान्यो भवाग्रगः" (अभि० ६.३८) इति वचनात् । स चापि वक्तव्यः, भवप्रकर्षविव-क्षायां तु भवाग्रपरमग्रहणमित्यभिप्रायं लक्षयामः । *कामधात्वभिसन्धिवचनादि*ति । कामधातौ चैका गतिर्मनुष्यगतिः, देवगतिर्वा । तस्यामष्टमभवं नाभिनिर्वर्तयति, न तु रूपारूप्यधात्वोरिति । *किमत्र ज्ञापकम्, सूत्रं युक्तिर्वा* । कामधातुमधि-कृत्येदमुक्तमिति । सूत्रमागमः, युक्तिरत्रानुमानम् । येन चोदकेनैवं चोदितम्—किमत्र ज्ञापकं सूत्रं युक्तिर्वेति, स एव पुनराह—*इह चैव किं ज्ञापकं प्रत्येकं देवमनुष्येष्विति* विस्तरः । प्रत्येकं देवमनुष्येषु *सप्तकृत्वः* संसृत्येति । न *पुनरुभयेष्वेव देवमनुष्येषु सप्तकृत्व* इति । तदुक्तं भवति—यो मनुष्येषु दृष्टसत्यः, स देवेषु त्रिष्कृत्वः संसृत्य मनुष्येषु च त्रिष्कृत्व एव ततो देवानागम्य परिनि-र्वातीति । यो वा देवेषु दृष्टसत्यः, स तथैव । स मनुष्येषु त्रिष्कृत्वो देवेषु च त्रिष्कृत्व एव संसृत्य ततो मनुष्यानागम्य परिनिर्वातीति । *एवं हि पठ्यते—सप्तकृत्वो देवांश्च देवमनुष्यांश्चेति* । सामान्यरूपेण हि पठ्यते । न प्रत्येकमिति विशिष्य पठ्यत इत्यर्थः । एवं *वैभाषिकपक्षे* संशयावस्थे कृते *आचार्यः* समर्थ-यन्नाह—*प्रत्येकमपि तु काश्यपीया* इति विस्तरः । काश्यपीया निकायान्तरीयाः । त एवं पठन्ति—*सप्तकृत्वो देवान् सप्तकृत्वो मनुष्यानिति* । एवं प्रत्येकमर्थो लभ्यते । तदनेनोभयमपि परिहृतं भवति—'यदुक्तम् किमत्र ज्ञापकं सूत्रं युक्तिर्वा

किं पुनः कारणमष्टमं भवं नाभिनिर्वर्तयति ? तावता कालेनावश्यं सन्तति-परिपाकात् । मार्गो हि स तज्जातीयः ; सप्तपदाशीविषदष्टवत्, चातुर्थक-ज्वरवच्च । सप्तसंयोजनावशेषत्वाच्च । द्वे अवरभागीये, पञ्च चोर्ध्वभागीया-नीति ।

अन्तरेणाप्यार्यमार्गं सम्मुखीकुर्वाणो न परिनिर्वाति; तावद् भववेदनीयस्य कर्मणो बलाधानात् । असति बुद्धोत्पादमर्हस्थ एवार्हत्त्वं प्राप्नोति । अगारं तु पुनर्नाध्यावसति । धर्मता-प्रतिलम्भिकं तु भिक्षुलिङ्गं प्रतिलभते । अन्याश्रमिकं लिङ्गेनेत्यपरे ।

कामधातुमधिकृत्येदमुक्तम्' इति, 'यच्चोक्तम् इव चैव किं ज्ञापकम् - प्रत्येकं देवमनुष्येषु सप्तकृत्वः' इति । प्रत्येकमर्थपरिग्रहेणैव हि कामधात्वभिसन्धिरपि सूचितो भवति । न हि रूपारूप्यधात्वोः सप्तकृत्वो देवमनुष्येषु संसरणं युज्यते; तत्रोपपन्नानामनागामिनां मनुष्यानागमनात् । युक्तिरप्यत एव गम्यते । यत्रैव सप्तकृत्वो भवपरम उक्तः, तत्रैव भूमावष्टमभवप्रतिषेध उपपद्यते, नान्यत्रेति । *नात्राभिनिवेष्टव्यमिति* । इह चैव किं ज्ञापकमिति ।

तज्जातीय इति । तत्प्रकारः । येन *तावता कालेनावश्यं सन्ततिपरिपाकान्नाष्टमं भवमभिनिर्वर्तयति* । *सप्तपदाशीविषदष्टवत्* । सप्तपदाशीविषेण तेन दष्टो यथा सप्तपदानि गत्वा म्रियते, न परेण, नार्वाक् । विषजातिः सा तादृशी । *चातुर्थकज्वरवच्च* । यथा चातुर्थको ज्वरश्चतुर्थ एवाह्नि भवति, न परेण, नार्वाक् । रोगजातिः सा तादृशी । तद्वत् । *द्वे अवरभागीये* इति । कामच्छन्द-व्यापादौ । कामावीतरागत्वादेतौ भवतः । *पञ्चोर्ध्वभागीयानी*ति । 'द्वौ रागौ रूप्यरूपिजौ, औद्धत्यमानमोहाश्च" (अभि० को० ५.४५) इति यतोऽर्वाङ् निर्वाणं च न प्राप्नोति । न चाष्टमं भवमभिनिर्वर्तयतीति ।

सप्तसंयोजनावशेषत्वादिति । अहेतुरेष इत्याचार्यसङ्घभद्रः । न ह्यूर्ध्वभागीयानि कामधातौ जन्माभिनिर्वर्तयितुं समर्थान्यूर्ध्वभूमिकत्वादिति । एतद्धेतुवादिनः पुनराहुः—यद्यपि तान्यूर्ध्वभूमिकानि, तत्प्राप्तिसामर्थ्यात् तु तावतां भवानामभि-निर्वृत्तिर्भवति । न हि तानि ऊर्ध्वमपि विपाकहेतुत्वेन व्यवस्थाप्यन्ते ; अव्याकृतत्वादिति ।

अन्तरेणेति । अन्तरार्वागित्यर्थः । *धर्मताप्रतिलम्भिकमिति* । अशैक्षमार्ग-सामर्थ्यप्रतिलम्भिकमित्यर्थः । स हि तस्य स्वभावो यद् *भिक्षुलिङ्गेन योजयतीति* ।

कस्मादविनिपातधर्मा[1] भवति ? तद्गामिकर्मानुपचयादुपचितविपाकदानवैगुण्याच्च सन्ततेर्बलवत्कुशलमूलाधिवासनात्,[2] प्रयोगाशयशुद्धितः । अपायनिपाते तु कर्मण्यसौ क्षान्तिमपि नोत्पादयेत । आह चात्र—

"कृत्वा बुधोऽल्पमपि पापमधः प्रयाति,
कृत्वा बुधो महदपि प्रजहात्यनर्थम् ।
मज्जत्ययोऽल्पमपि वारिणि संहतं हि,
पात्रीकृतं महदपि प्लवते तदेव" ॥ (   ) इति ।

अविनिपातधर्मेति । सूत्रे पठ्यते—"स्रोतआपन्नो भवत्यविनिपातकधर्मा नियतं सम्बोधिपरायणः सप्तकृत्वःपरमः सप्तकृत्वो देवांश्च मनुष्यांश्च सन्धाव्य संसृत्य दुःखस्यान्तं करोति" इति । कस्मादेवं भवति ? इत्याह– *तद्गामिकर्मानुपचयादिति* । विनिपातः = अपायो नरकादिः, तं गच्छतीति तद्गामि, तद्गाम्येव तद्गामिकम् । किम् ? कर्म । तस्यानागतस्यानुपचयादार्यावस्थायाम् । *उपचितविपाकदानवैगुण्याच्च सन्ततेः* । पृथग्जनावस्थायामुपचितस्यानियतवेदनीयस्य तद्गामिकस्य कर्मणो विपाकदानवैगुण्यात् सन्ततेः । अविनिपातधर्मा भवतीत्युच्यते । ईदृशी तस्य स्कन्धसन्ततिः परावृत्ता, यदसौ तद्गामिकस्य कर्मण उपचितस्य विपाकदानवैगुण्येनावस्थितेति । कस्मात् पुनः सा स्कन्धसन्ततिरुपचिततद्गामिककर्मविपाकदानवैगुण्येनावस्थितेति ? तत उच्यते— *बलवत्कुशलमूलाधिवासनादिति* । यस्मादसौ स्कन्धसन्ततिर्बलवद्भिः कुशलमूलैरधिवासिता परिभाविता । कथं च पुनर्बलवत्कुशलमूलाधिवासिता ? *प्रयोगाशयशुद्धितः* । प्रयोगशुद्धितः, आशयशुद्धितश्च । तत्र प्रयोगशुद्धिरार्यकान्तानि शीलानि । आशयशुद्धिर्बुद्धादिष्ववेत्यप्रसाद इति । *क्षान्तिमपि नोत्पादयेदिति* । क्षमणमपि नोत्पादयेत्, चित्तमपि नोत्पादयेत् । प्रागेव प्रयोगमित्यभिप्रायः । अथ वा—अपायनियते तु कर्मणि सत्यसौ पुद्गलः क्षान्तिमपि निर्वेधभागीयलक्षणां नोत्पादयति, किमङ्गानास्रवं मार्गमिति ।

यथा बलवत्कुशलमूलाधिवासिता उपचिताकुशलविपाकदानविगुणा भवति, तच्छ्लोकेनोपदर्शयति– *कृत्वा बुधोऽल्पमपीति* । सर्वम् । अबुधोऽल्पमपि पापं कृत्वा *अधः प्रयाति* अपायम् । बुधः पुनः *महदपि पापं कृत्वा प्रजहात्यनर्थम्* अपायम् ।

तदर्थद्वयं यथाक्रमं दृष्टान्तद्वयेन साधयति– *लोहमल्पमपि* संहतं पिण्ड-

१. °निपातकधर्मा—का० । २. °कुशलाधि०—का० ।

दुःखस्यान्तं करोतीति। को दुःखस्यान्तः ? यस्मात् परेण दुखं नास्ति। अप्रतिसन्धिकं दुःखं करोतीत्यर्थः।

अथवा—निर्वाणमन्तः। कथं निर्वाणं करोति ? तत्प्राप्तिविबन्धापनयनात्। यथाकाशं कुरु मण्डपं पातयेति भवन्ति वक्तारः। अन्योऽपि वा[1] स्यात् सप्तकृत्वः परमो न तु नियत इति नोच्यते।

एवं तावदक्षीणभावनाहेयः फलस्थः सप्तकृत्वः परमो भवति।

त्रिचतुर्विधमुक्तस्तु द्वित्रिजन्मा कुलंकुलः ॥ ३४ ॥

स एव स्रोतआपन्नस्त्रिभिः कारणैः कुलंकुलो भवति—

१. क्लेशप्रहाणतः, त्रिचतुःप्रकारप्रहीणत्वात्।

२. इन्द्रियतः, तत्प्रतिपक्षानास्रवेन्द्रियलाभात्।

३. जन्मतः, द्वित्रिजन्मावशेषत्वात्।

रूपावस्थितम् उदके *मज्जति*। असंस्कृतत्वात्। *तदेव पुनर्लोहं पात्रीकृतं सत् महज्* जातमुदके *प्लवते* तरति; तदभिसंस्कारगुणात्। एवमबुधो गुणैरपात्रीकृतत्वान्मज्जति, न तु बुधः; गुणैः पात्रीकृतत्वादिति।

यस्मात् परेण दुःखं नास्तीति। यस्माद् दुःखात् परेण दुःखं नास्ति भवान्तरसंगृहीतम्, स दुःखस्यान्तो दुःखावसानमित्यर्थः। अन्यथा हि मरणकाले दुःखस्यान्तो भवति। सप्रतिसन्धिकं तु तद् दुःखम्। अत आह—*अप्रतिसन्धिकं दुःखं करोतीत्यर्थ* इति। *कथं निर्वाणं करोतीति*। नित्यत्वात् करणं न युज्यत इत्यभिप्रायः। *तत्प्राप्तिविबन्धापनयनादिति*। निर्वाणप्राप्तिविबन्धापनयनात्। तत्प्राप्तेर्विबन्धः क्लेशप्राप्तिरुपधिर्वा, तदपनयनान्निर्वाणं करोति। तद्यथा—आकाशं मण्डपावस्थाने न लक्ष्यते, सति तस्य विबन्धे, तदपनयनान्नित्यमप्याकाशं करोतीत्युच्यते। तेनाह—*यथाकाशं कुरु मण्डपं पातयेति भवन्ति वक्तार* इति। *अन्योऽपि वेति*। पृथग्जनः परिपक्वसन्तानः। *न तु नियत* इति। कदाचिदिहैव परिनिर्वायात् अन्तराभावेषु चेत्यतो नोच्यते।

द्वित्रिजन्मेति। द्वे वा त्रीणि वा जन्मान्यस्येति द्वित्रिजन्मा। केचिदेवं पठन्ति—*द्वित्रजन्मेति* द्वे वा त्रीणि वा द्वित्राणि। "संख्ययाव्ययासन्नादूराधिक-

---

१. च—का०।

श्लोके तु द्वयोर्ग्रहणम्, स्रोतआपन्नस्य पश्चात् प्रहीणे सति तत्प्रतिपक्षानास्रवेन्द्रियस्यानुक्तसिद्धत्वात्। जन्म तु कदाचिदल्पीयः स्यात्; परेण भव्यत्वद्। अतोऽस्य ग्रहणम्।

कस्मान्न पञ्चप्रकारप्रहणात्? तत्प्रहाणे षष्ठस्यावश्यं प्रहाणात्। नहि तस्यैकः प्रकारः फलं विघ्नयितुं समर्थः; एकवीचिकस्येव धात्वनतिक्रमात्।

संख्याः संख्येये" (पा० सू० २. २.२५) इति समासः। "बहुव्रीहौ संख्येये डच्" (पा० सू० ५.४.७३) इति समासान्तः। द्वित्राणि जन्मान्यस्येति द्वित्रजन्मेति।

श्लोके तु द्वयोर्ग्रहणमिति। क्लेशप्रहाणजन्मनोः। कस्मात्? इत्याह—*स्रोतआपन्नस्या*नुपूर्वीकस्य दर्शनप्रहातव्येषु प्रहीणेषु। भावनाप्रहातव्यानां क्लेशानामेकस्य प्रकारस्य यावच्चतुर्णां *पश्चात्प्रहाणे सति तत्प्रतिपक्षस्यै*कद्वित्र्यादिक्लेशप्रकारप्रतिपक्षस्या*नास्रवस्येन्द्रियस्य* लाभस्तस्या*नुक्तसिद्धत्वात्*, श्लोकेन तस्याग्रहणम्। न हि विना प्रतिपक्षेण क्लेशप्रकार प्रहाणमस्ति। लौकिकेनापि हि मार्गेण तस्यार्यस्य क्लेशप्रकारप्रहाणेऽनास्रवस्य तत्प्रतिपक्षस्येन्द्रियस्य लाभो भवति। *जन्म तु कदाचिदल्पीयः स्यात्।* यदीहैव परिनिर्वायात् अन्तराभावे उपपद्य वा। किं कारणम्? *परेण भव्यत्वात्।* स्रोतआपत्तिफलात् परेण सकृदागामित्वस्य यावदर्हत्त्वस्य भव्यत्वात्। *अतोऽस्य जन्मनो ग्रहणम्।*

"*द्वित्रिजन्मा कुलंकुलः*" इति नियमार्थमिदमिह विचार्यते—य एकद्विविधमुक्तः स किं भवति? कुलंकुल इत्येके।

त्रिचतुर्विधमुक्त ग्रहणं तु उदाहरणार्थम्। परिमाणार्थं वा—नातः परेणेति। एकद्विविधमुक्तः पञ्चषट्जन्मेत्यपरे। त्रिचतुर्विधमुक्त इति विशेषपरिग्रहात्। नैतद् व्याख्यानकारैर्विचारितमिति विचार्यमेतत्।

कस्मान्न पञ्चप्रकारप्रहाणात्। किम्? कुलंकुलो भवतीत्यधिकारः। *तत्प्रहाण* इति विस्तरः। पञ्चप्रकारप्रहाणे *षष्ठस्यापि प्रकारस्यावश्यं प्रहाणात्।* कस्मात्? इत्याह—*न हि तस्यैकः प्रकारः* षष्ठः फलं सकृदागामिफलं *विघ्नयितुं समर्थ* इति। *एकवीचिकस्येवेति।* विपरीतदृष्टान्त एषः। यथैकवीचिकस्यैकः प्रकारो नवमोऽनागामिफलं विघ्नयितुं समर्थः, नैवमस्य स्रोतआपन्नस्य षष्ठः प्रकारः सकृदागामिफलं विघ्नयितुं समर्थ इति। कस्मात्? इत्याह—*धात्वनतिक्रमादिति।* एकवीचिको हि कामधातुमतिक्रामति। अतोऽस्यैकोऽपि प्रकारो नवमः फलं

---

१. संश्रित्य—का०।

स एव कुलंकुलो द्विविधः— १. देवकुलंकुलः, यो देवेषु द्वे त्रीणि वा कुलानि संसृत्य परिनिर्वाति तत्र वाऽन्यत्र वा देवनिकाये । २. मनुष्यकुलंकुलः, यो मनुष्येषु तत्र वाऽन्यत्र वा द्वीपे परिनिर्वाति ॥ ३४ ॥

स एव पुनः फलस्थः—

आपञ्चमप्रकारघ्नो द्वितीयप्रतिपन्नकः ।

यस्य फलस्थस्यैकप्रकारो यावत्पञ्चमः प्रहीणो भवति, असौ द्वितीयफलप्रतिपन्नको वेदितव्यः ।

क्षीणषष्ठप्रकारस्तु सकृदागाम्यसौ पुनः ॥ ३५ ॥

द्वितीयफलप्राप्तो भवति । देवान् गत्वा सकृन्मनुष्यलोकागमनात् सकृदागामी; परेण जन्माभावात् । रागद्वेषमोहानां च तनुत्वादित्युच्यते; मृदुप्रकारावशेषत्वात् ॥ ३५ ॥

स एव पुनः फलस्थः—

क्षीणसप्ताष्टदोषांश एकजन्मैकवीचिकः ।

तृतीयप्रतिपन्नश्च,

त्रिभिः कारणैः स एव सकृदागाम्येकवीचिको वेदितव्यः सप्ताष्टप्रकारप्रहाणात्, तत्प्रतिपक्षानास्रवेन्द्रियलाभात्, एकजन्मावशेषत्वात् ।

विघ्नयितुं समर्थः; धात्वतिक्रमस्य दुष्करत्वात् । सकृदागामी तु धातुं नातिक्रामतीति न तस्यैकः क्लेशः प्रकारः षष्ठः फलं विघ्नयितुं समर्थ इति ।

तत्र वान्यत्र वा देवनिकाय इति । तद्यथा—त्रायस्त्रिंशेषु सत्यानि दृष्ट्वा *द्वे त्रीणि वा कुलानि संसृत्य* । तत्रैव त्रायस्त्रिंशेषु *परिनिर्वाति* । अन्यत्र वा चातुर्महाराजकायिकेषु यामेषु वा परिनिर्वाति । एवमन्यत्रापि योज्यम् ॥ ३४ ॥

रागद्वेषमोहानां तनुत्वादित्युच्यत इति । सूत्रे । कथम् ? 'त्रयाणां संयोजनानां प्रहाणात् रागद्वेषमोहानां च तनुत्वात् सकृदागामी भवति" इति । *मृदुप्रकारावशेषत्वाद्* इति । मृद्वधिमात्रो मृदुमध्यो मृदुमृदुरित्येतन्मात्रावशेषत्वात् ॥ ३५ ॥

"*क्षीणसप्ताष्टदोषांशः*" इति । दोषांशो दोषावयवः सप्ताष्टप्रकारलक्षणः । इन्द्रियत इति चात्र तृतीयं कारणं न सूत्रितं तथैव व्याख्येयम् । कथमस्येति

कथमस्यैकः प्रकारः फलं विघ्नयितुं शक्नोति ? धात्वतिक्रमात् ।

'अवस्थात्रये हि कर्माणि विघ्नायोपतिष्ठन्ते" इत्युक्तं प्राक् । यथा कर्माणि, एवं क्लेशा अपि वेदितव्या इति । विपाकनिःष्यन्दफलभूम्यतिक्रमात् । बीचिर्निमान्तरम्, तस्य वैकजन्मव्यवहितत्वात्[1], निर्वाणस्य एकक्लेशप्रकारव्यवहितत्वाद्वा अनागामिफलस्य । एको बीचिरस्येत्येकवीचिकः । तृतीयफलप्रतिपन्नकश्चैकवीचिको[2] वेदितव्यः प्रहीणसप्ताष्टप्रकारः । पूर्वप्रहीणप्रकारस्तु फलप्राप्तौ न तावत् कुलंकुलो भवत्येकवीचिको वा यावत्फलविशिष्टो मार्गो न सम्मुखीकृतः ।

सोऽनागामी नवक्षयात् ।। ३६ ।।

स एव पुनः फलस्थो नवप्रकारप्रहाणादनागामी उपदिष्टः; कामधात्वनागमनात् । "पञ्चानामवरभागीयानां संयोजनानां प्रहाणात्"इत्युच्यते; प्रहाणसंकलनात्[2] । अवश्यं द्वे त्रीणि वा पूर्वं प्रहीणानि भवन्ति ।। ३६ ।।

विस्तरः । कथमस्यैकवीचिकस्यैकप्रकारो नवमः फलं विघ्नयितुं समर्थः, न हि कुलंकुलस्यैकः प्रकारः फलं विघ्नयितुं समर्थ इति ? उच्यते; *धात्वतिक्रमात् ।* यस्मादसौ नवमे प्रकारे प्रहीणे कामधातुसमतिक्रान्तो भवति, न पुनस्तत्रोपपद्यते ।

स च नवमः प्रकारः कर्मणा सह तत्रोपपद्यवेदनीय इत्यतस्त*द्विपाकनिष्यन्दफलभूम्यतिक्रमात् ।* फलं विघ्नयितुं समर्थो भवति ।

अवस्थात्रये हि कर्माणि विघ्नायोपतिष्ठन्त इत्युक्तं प्राक् ।

"क्षान्त्यनागामिनार्हत्त्वप्राप्तौ कर्मातिविघ्नकृद्" (अभि० को० ४,१०७)

इति । इह तु क्लेशेषु योजयितव्यम् । अत एवाह—*यथा कर्माणि एवं क्लेशा* इत्यादि । *तस्य वैकजन्मव्यवहितत्वा*दिति । तस्य क्षीणसप्ताष्टप्रकारस्य सकृदागामिनः । एकेन जन्मना वावहितत्वा*न्निर्वाणस्य एकेन वा क्लेशप्रकारेण व्यवहितमस्यानागामिफलमित्येकवीचिकः । न तावत्कुलंकुलो भवत्येकवीचिको वेति ।* लौकिकेन मार्गेण पूर्वं *त्रिचतुर्विधमुक्तोऽपि* न तावत् कुलंकुलो भवति । *क्षीणसप्ताष्टप्रकारोऽपि* न तावदेकवीचिको भवति । तत्प्रतिपक्षानास्रवेन्द्रियलाभस्याभावात् । अत एवाह—*यावत्फलविशिष्टो मार्गो न सम्मुखीकृत* इति । फलविशिष्टे तु तत्प्रतिपक्षे तदूर्ध्वप्रकारप्रतिपक्षे वा सम्मुखीकृते तदानास्रवेन्द्रियलाभात् । कुलंकुलो भवति, एकवीचिको वेत्यर्थादुक्तं भवति ।

---

१. चैक०—का० ।　　　　२. ०संकुलनात्—का० ।

सोऽन्तरोत्पन्नसंस्कारासंस्कारपरिनिर्वृतिः ।
ऊर्ध्वस्रोताश्च,

अन्तरा परिनिर्वृतिरस्येत्यन्तरापरिनिर्वृतिः । एवमुत्पन्नेऽस्य संस्कारेणा-संस्कारेणेति योज्यम् । स एवानागामी पुनः पञ्चधा भवति—

१. अन्तरापरिनिर्वायी, योऽन्तराभवे परिनिर्वाति ।

२. उपपद्यपरिनिर्वायी, य उपपन्नमात्रो न चिरात् परिनिर्वात्यभियुक्त-

---

पञ्चानामिति विस्तरः । *पञ्चानामवरभागीयानां संयोजनानां प्रहाणाद-नागामीत्युच्यते सूत्रे । प्रहाणसङ्कलनात् ।* सत्कायदृष्ट्यादीनां प्रहाणैकत्व-व्यवस्थापनात् । *द्वे त्रीणि वा पूर्वं प्रहीणानीति* । यदि तावत् कामवीतरागो नियाममवक्रामति, द्वे पूर्वं प्रहीणे लौकिकेन मार्गेण—कामच्छन्दः, व्यापादश्च । सत्कायदृष्ट्यादीनामपर्यादाय प्रहाणात् । अथानुपूर्विकः, त्रीणि पूर्वं प्रहीणानि । केन ? दर्शनमार्गेण । सत्कायदृष्टिः, शीलव्रतपरामर्शः, विचिकित्सा च । तस्मात् साकल्येन पञ्चानां प्रहाणादित्युच्यते ॥ ३६ ॥

"*सोऽन्तरोत्पन्नसंस्कारासंस्कारपरिनिर्वृत्तिः*" इति । सोऽनागामी अन्तरा उत्पन्ने संस्कारेणासंस्कारेण परिनिर्वृतिरस्येति अन्तरोत्पन्नसंस्कारासंस्कार-परिनिर्वृतिः । यत्तूक्तम्—*एवमुत्पन्नस्येति*, तन्न बुध्यामहे । कथमुत्पन्नस्यानागामिनः परिनिर्वृतिरस्येति बहुव्रीहि समासो भवति; अन्यपदार्थे हि बहुव्रीहिरुच्यते, न स्वपदार्थे ? तेनैवमिह पाठं पश्यामः—*एवमुत्पन्नेऽस्येति* । लेखकेनैकारोऽत्र विनाशित इति । तथापाठे अयमर्थः सम्भवति—उत्पन्ने जन्मनि परिनिर्वृति-रस्येति उत्पन्नपरिनिर्वृतिः । अथैवमेव पाठः स्यात्, एवं व्याख्यायेत—अनादरे षष्ठी, तयैवं समासः क्रियेत—उत्पन्नस्य जन्मनः परिनिर्वृतिरस्यानागा-गामिन इत्युत्पन्नपरिनिर्वृतिरनागामीति । अथ वा—उत्पन्नस्येत्युत्पन्नजाति-रुच्यते । उत्पन्नानामिति योऽर्थ उत्पन्नस्येति । तेनोत्पन्नानां या परिनिर्वृतिः सा अस्येत्युत्पन्नपरिनिर्वृतिः । अथ परिनिर्वृत्यर्थादेव केवलादनागाम्यर्थस्या-न्यत्वात् । पूर्वपदार्थानन्यत्वेऽप्यनागामिसमानाधिकरणस्योत्पन्नशब्दस्य परिनिर्वृतिशब्देन सह बहुव्रीहिः समास इतीच्छेयुः, सुभणितमेतत् स्यात् । *स एवानागामी पुनः पञ्चधा भवतीति* । अन्तरापरिनिर्वायी, उपपद्यपरिनिर्वायी, साभिसंस्कारपरिनिर्वायी, अनभिसंस्कारपरिनिर्वायी, ऊर्ध्वस्रोताश्चेति निगमयति ।

अभियुक्तवाहिमार्गत्वादिति । अभियुक्तो वीर्यवानारब्धवीर्य इत्यर्थः । वाही

वाहिमार्गत्वात्। सोपधिशेषनिर्वाणेन। सोऽपि निरुपधिशेषनिर्वाणेनेत्यपरे[1]। न, आयुरुत्सर्गावशित्वात्।

३. साभिसंस्कारपरिनिर्वायी किल उपपद्याप्रतिप्रस्रब्धप्रयोगः साभिसंस्कारं परिनिर्वाति; अभियुक्तावाहिमार्गत्वात्।

४. अनभिसंस्कारपरिनिर्वायी त्वनभिसंस्कारेण; अभियोगवाहिमार्गाभावात्।

मार्गो अस्येति वाहिमार्गः। कथं मार्गो वाही? विनाभिसंस्कारेण सम्मुखीभावात्। अभियुक्तश्चासौ वाहिमार्गश्चाभियुक्तवाहिमार्गः, तद्भावः, तस्मात्। *उत्पन्नमात्रो न चिरात् परिनिर्वाति। सोपधिशेषेण निर्वाणेनेति।* निर्वाणद्वैविध्याद् विशिनष्टि—सोपधिशेषनिर्वाणेन परिनिर्वाति। सर्वास्रवक्षयं करतीत्यर्थः।

सोऽपि निरुपधिशेषनिर्वाणेनेति। न केवलमन्तरापरिनिर्वायी निरुपधिशेषपरिनिर्वाणेन परिनिर्वात्यर्हत्त्वं प्राप्यायुरपरिसमाप्य, उपपद्यपरिनिर्वाय्यपि तत्सदृश *इत्यपरे। न। आयुरुत्सर्गावशित्वात्।* नैतदेवम्, सोऽपि निरुपधिशेषपरिनिर्वाणेनेति। कस्मात्? आयुरुत्सर्गावशित्वात्। आयुष उत्सर्गे तस्यावशित्वात्। कस्मात् पुनरस्यात्रावशित्वम्? यत्प्रान्तकोटिकचतुर्थध्यानलाभिन आयुरुत्सर्गवशित्वम्, तच्च प्रान्तकोटिकं ध्यानं मनुष्येष्वेव त्रिषु द्वीपेषूत्पाद्यते। स च रूपधातूपपन्न इति। किमन्तरापरिनिर्वायिणोऽस्यायुरुत्सर्गवशित्वम्? यत एवमसौ निरुपधिशेषपरिनिर्वाणेन परिनिर्वाति, तस्यापि वशित्वं नास्ति। अन्तराभवावस्थानाय तु तादृशं कर्म नास्ति, यादृशमुपपद्यपरिनिर्वायिण इति अतोऽन्तरापरिनिर्वायी शीघ्रं परिनिर्वाति। उपपद्यपरिनिर्वायी तु यावदायुः स्थित्वा परिनिर्वातीत्युपपद्यपरिनिर्वाय्येव सोपधिशेषनिर्वाणेन परिनिर्वातीत्युच्यते।

साभिसंस्कारपरिर्वायी किलेति। किलशब्दो वैभाषिकमतद्योतकः। स्वमतं हि सूत्रानुसारेण पश्चाद् वक्ष्यते। *अप्रतिप्रस्रब्धप्रयोग* इति। पूर्वप्रयोगवेगेनानिराकृतप्रयोग इत्यर्थः। *साभिसंस्कारम्* सप्रयत्नम्। *अभियुक्तावाहिमार्गत्वादिति।* अभियुक्तत्वात्, अवाहिमार्गत्वाच्च तस्य योगिनः। अत एवासौ साभिसंस्कारपरिनिर्वायी सिध्यति।

अनभिसंस्कारेणेति। पूर्वविपर्ययेण। प्रयोगस्य प्रतिप्रस्रब्धत्वात्। *अभियोगवाहिमार्गाभावादिति।* अभियोगस्य वीर्यस्याभावात्, वाहिमार्गस्य

---

१. निरुपधिशेषेणेत्य०—का०।

संस्कृतासंस्कृतालम्बनमार्गनिर्वाणादित्यपरे । तत्तु न; अतिप्रसङ्गात् ।

सूत्रे त्वनभिसंस्कारपरिनिर्वायी पूर्वं पठ्यते । तथैव[1] युज्यते; वाह्यवाहि-मार्गयोरनभिसंस्काराभिसंस्कारसाध्यत्वादयत्नयत्नप्रापितः । उपपद्यपरिनिर्वायिणस्तु वाहितरोऽधिमात्रतरश्च मार्गः, मृदुतराश्चानुशया इति ।

चाभावादित्यर्थः । तदेवमभियोगादिनानात्वात् परिनिर्वाणविशेष उक्तो भवति । उपपद्यपरिनिर्वायिणो ह्युभयमस्ति—अभियोगश्च, वाही च मार्ग इति । साभिसंस्कारपरिनिर्वायिणोऽभियोगोऽस्ति, न त्वस्य वाही मार्गः । अनभि-संस्कारपरिनिर्वायिणस्तूभयमपि नास्ति—नाभियोगः, न च वाही मार्ग इति ।

*संस्कृतासंस्कृतालम्बनमार्गपरिनिर्वाणादि*ति । संस्कृतं संस्कार इत्येकोऽर्थः । एवमसंस्कृतम् असंस्कार इति । संस्कारालम्बनेन मार्गेण दुःखसमुदयमार्गा-लम्बनेन मार्गेण यः क्लेशान् प्रजहाति, स साभिसंस्कारपरिनिर्वायी । योऽसंस्कारालम्बनेन निरोधालम्बनेन, सोऽनभिसंस्कारपरिनिर्वायीति ।

*तत्तु न; अतिप्रसङ्गा*दिति । तत्तु नैवम् । कस्मात् ? अतिप्रसङ्गात् । अन्तरोपपद्यपरिनिर्वायिणोरपि संस्कृतासंस्कृतालम्बनमार्गपरिनिर्वाणात् प्रत्येकं साभिसंस्काराभिसंस्कारपरिनिर्वायित्वप्रसङ्गः । तत्रस्थौ द्वावेव पुद्गलौ स्याताम्, न पञ्चेति ।

अनभिसंस्कारपरिनिर्वायी पूर्वं पठ्यत इति । साभिसंस्कारपरिनिर्वायिणः पूर्वमयं पठ्यते—अनभिसंस्कारपरिनिर्वायी, साभिसंस्कारपरिनिर्वायीति । *तथैव युज्यत* इति विस्तरः । अनभिसंस्कार-साभिसंस्कारपरिनिर्वायिणोर्यथा-क्रमम् । *वाह्यवाहिमार्गयोः* पुद्गलयोः परिनिर्वाणस्या*नभिसंस्कारसाध्यत्वात्* पूर्वस्य, *अभिसंस्कारसाध्यत्वा*च्चेतरस्य । कथं तथा साध्यत्वम् ? इत्याह—*अयत्न-यत्नप्रापितत*स्तत्परिनिर्वाणस्य यथाक्रममित्येव ।

अथ वाह्यवाहिमार्गयोरिति मार्गयोरेव ग्रहणम्, न पुद्गलयोरभिसम्बन्धः ? वाहिनो मार्गस्यानभिसंस्कारसाध्यत्वादवाहिनश्चाभिसंस्कारसाध्यत्वात्, अयत्न-यत्नप्रापितः, अयत्नसम्मुखीभावतः पूर्वमार्गस्य, यत्नप्रापित इतरस्येति तदेवमनभिसंस्कारपरिनिर्वायी पूर्वं युज्यते । आह—यद्यनभिसंस्कारपरि-निर्वायिणो वाही मार्गः, अनभिसंस्कारसाध्यत्वादुपपद्यपरिनिर्वायिणोऽपि वाही मार्ग इति कस्तयोर्विशेष इति ? अत उच्यते—*उपपद्यपरिनिर्वायिणस्तु मार्गो*

---

१. तथैव च—का० ।

५. ऊर्ध्वस्रोता यस्योर्ध्वं गतिर्न तत्रैव परिनिर्वाणं यत्रोपपन्नः । स्रोतो गतिरित्येकोऽर्थः ।

सध्याने व्यवकीर्णोऽकनिष्ठगः ।। ३७ ।।

ऊर्ध्वस्रोता द्विविधः—हेतुतः, फलतश्च । हेतुतो व्यवकीर्णाव्यवकीर्णध्यानत्वात् । फलतोऽकनिष्ठभवाग्रपरमत्वात् । तत्र येन ध्यानं व्यवकीर्णं सोऽकनिष्ठान् गत्वा परिनिर्वाति ।। ३७ ।।

स प्लुतोऽर्धप्लुतः सर्वच्युतश्च,

स पुनरेषोऽकनिष्ठपरम ऊर्ध्वस्रोतास्त्रिविधः, प्लुतादिभेदात् ।

१. तत्र प्लुतो नाम य इह ध्यानानि व्यवकीर्य ध्यानत्रयात्[1] परिहीणः प्रथमं ध्यानमास्वाद्य ब्रह्मकायिकेषूपपन्नः पूर्वाभ्यासवशाच्चतुर्थं ध्यानं व्यवकीर्य तस्मात् प्रच्युतोऽकनिष्ठेषूपपद्यते । एष हि मध्यानिमज्जनात् प्लुतः ।

वाहितरो जिततरः । नानभिसंस्कारपरिनिर्वायिणः । *एवमधिमात्रतरो हेतूपचयतः । मृदुतराश्चानुशयाः* मार्गाधिमात्रतरत्वेन क्षपितत्वात् ।

ऊर्ध्वस्रोता इति । ऊर्ध्वस्रोतो गतिरस्येति ऊर्ध्वस्रोताः । यत्र ऊर्ध्वमिति पठ्यते—"ऊर्ध्वं दमाच्च देहाच्च" इति, ऊर्ध्वदमिकः ऊर्ध्वदेहिक इति । तत्प्रत्ययसन्नियोगेनोर्ध्वशब्दस्य मान्ततोऽपि निपात्यत इति वेदितव्यम् । यथा चिरशब्दस्य चिरन्तनमित्यूर्ध्वमिति निपातोऽस्तीत्यपरे । अकारान्तोऽपि तूर्ध्वशब्दोऽस्त्येवेति न वार्यते ।

व्यवकीर्णाव्यवकीर्णध्यानत्वादिति । मिश्रितामिश्रितध्यानत्वादित्यर्थः । अनास्रवेण सास्रवस्य ध्यानस्य मिश्रितत्वात् ।। ३७ ।।

इह ध्यानानि व्यवकीर्य ध्यानत्रयात् परिहीयत इति । ध्यानव्यवकीर्णं चतुर्थध्यानव्यवकिरणपूर्वकम् । "आकीर्यते चतुर्थं प्राग्" (अभि० को० ६.४२) इति वचनात् । चतुर्थमेव हि ध्यानमादितो व्यवकिरणे समर्थम्, नान्यत् । चतुर्थाच्च ध्यानादपरिहीणस्य प्रथमादिषु ध्यानेषूपपत्तिर्नास्तीत्यत उच्यते—*ध्यानत्रयात् परिहीण* इति । कथं च परिहीणः ? इत्याह—*प्रथमं ध्यानमास्वाद्येति । मध्यानिमज्जनात् ।* मध्येऽनिमज्जनात् ।

---

१. ध्यानचयात्—का० ।

२. अर्धप्लुतो नाम यस्ततः शुद्धावासेषूपपद्य मध्यादेकमपि स्थानान्तरं विलङ्घ्याकनिष्ठान् प्रविशति। महाब्रह्मस्वार्यो नोपपद्यते; दृष्टिस्थानत्वाद्, एकनायकत्वाच्चेति[१]।

३. सर्वच्युतो नाम यः सर्वाणि स्थानान्तराणि संचर्याकनिष्ठान् प्रविशति। न च कदाचिदनागामी। तत्रैवोत्पत्त्यायतने द्वितीयं जन्माभिनिर्वर्तयति, विशेषगामित्वात्। एवं चास्य परिपूर्णमनागामित्वं भवति। यत्रोपपन्नस्ततस्तत्र[२] चात्यन्तमनागमनात्।

एवं तावद्ध्याने व्यवकीर्णेऽकनिष्ठगो वेदितव्यः। ततः—

अन्यो भवाग्रगः।

अव्यवकीर्णध्यान ऊर्ध्वस्रोता भवाग्रनिष्ठो भवति। स हि समापत्त्यन्तराण्यास्वादयन् सर्वस्थानान्तरेषूपपद्याप्रविश्यैव शुद्धावासानारूप्यकमोत्पत्तितो भवाग्रं गत्वा परिनिर्वाति। शमथचरितो ह्येषः। पूर्वकस्तु विपश्यनाचरितः।

अर्धप्लुतो नामेति विस्तरः। य *एकमपि स्थानान्तरं विलंघ्य शुद्धावासेषूपपद्याकनिष्ठान् प्रविशतीत्येवं* वाक्याभिसम्बन्धः। *दृष्टिस्थानत्वादिति*। महाब्रह्मणां प्रथमोपपन्नानां च महाब्रह्माणि निर्मायकायाभिमानतः। *एकनायकत्वाच्चेति*। किम्? *महाब्रह्मस्वार्यो नोपपद्यते*। आर्यस्य हि प्रभाववतस्तत्रोत्पादे सत्युभयनायकत्वं स्यात्। निःसपत्नेन च कर्मणा तत्राधिपत्यम्। अतः सपत्नं न भवतीति।

सर्वाणि स्थानान्तराणीति। ब्रह्मकायिकेभ्यश्च्युत्वा ब्रह्मपुरोहितादीनि सुदर्शनान्तानि चतुर्दशस्थानान्तराणि सञ्चर्या*कनिष्ठान् प्रविशति*। *यत्रोपपन्नस्ततस्तत्र चात्यन्तमनागमनादिति*। यत्रोपपन्नस्तद्यथा—प्रथमध्याने, ततोऽत्यन्तमनागमनात् कामधातौ। तथा यत्रोपपन्नस्तत्र चात्यन्तमनागमनात्। तत्र च पुनः प्रथमे ध्यानेऽत्यन्तमनागमनात्। *परिपूर्णमनागामित्वम्*, पुनस्तत्र द्वितीयजन्माकरणात्।

शमथचरितो ह्येष इति। य एष भवाग्रपरमः, स समाधिप्रियः। आरूप्येषु च समाधिरतिप्रशान्तः। तस्मादयमारूप्यान् प्रविशति। *पूर्वकस्तु विपश्यनाचरित* इति। योऽसावकनिष्ठपरम उक्तः, स प्रज्ञाप्रियः शुद्धावासान्

---

१. ०नामकत्वा०—का०। २. ०न्नस्तस्याधस्तत्र—का०।

अन्तरा[1] परिनिर्वाणमूर्ध्वस्रोतसो युज्यमानं पश्यामः। अकनिष्ठभवाग्रपरमत्वं तु परेण गत्यभावाद्। यथा सप्तकृत्वःपरमत्वं स्रोतआपन्नस्येति।

इमे तावत् पञ्च रूपोपगा अनागामिनः।

आरूप्यगश्चतुर्धाऽन्यः,

अन्य आरूप्यगोऽनागामी, यो रूपवीतराग इतश्च्युत्वारूप्येषूपपद्यते। स पुनश्चतुर्विधः, उपपद्यादिपरिनिर्वायिभेदात्।

त एते षडनागामिनो भवन्ति।

ततः—

इह निर्वायकोऽपरः ॥ ३८ ॥

इहैव जन्मन्यपरः परिनिर्वाति। स दृष्टधर्मपरिनिर्वायी सप्तमः ॥ ३८ ॥

पुनस्त्रीं स्त्रिविधान् कृत्वा नव रूपोपगाः स्मृताः।

पुनस्त्रयाणामनागामिनां त्रिधा भेदाद् रूपोपगा नवानागामिनो भवन्ति। कतमेषां त्रयाणाम्? अन्तरोपपद्यपरिनिर्वायिणोरूर्ध्वस्रोतसश्च।

प्रविशति। *अन्तरापरिनिर्वाणमिति* विस्तरः। नैतत् प्रति शास्त्रकारैर्निश्चितम्, न च प्रतिषिद्धम्, अतोऽप्रतिषेधादूर्ध्वस्रोतसोऽकनिष्ठपरमस्य भवाग्रपरमस्य चान्तरा अकनिष्ठं भवाग्रं च प्रविश्य परिनिर्वाणं *युज्यमानं पश्यामः*। सम्भवं तु पश्याम इत्यर्थः। ननु चाकनिष्ठपरमो भवाग्रपरम इति चोक्तम्? अत आह— *अकनिष्ठभवाग्रपरमत्वं तु परेण गत्यभावाद्*। अकनिष्ठेभ्यो भवाग्राच्चोर्ध्वं गत्यभावात्। *तद्यथा स्रोतआपन्नस्य सप्तकृत्वः परमत्वम्*। न हि तस्य द्वौ त्रीन् वा भवानभिनिर्वर्त्य परिनिर्वाणं न सम्भवतीति। ततः परेण त्वष्टमं भवं नाभिनिर्वर्तयतीति सप्तकृत्वः परम उक्त इति।

स पुनश्चतुर्विध इति। अन्तरापरिनिर्वाय्यभावान्न पञ्चविधः। *एते षडनागामिनो भवन्तीति*। अन्तरापरिनिर्वायी, उपपद्यपरिनिर्वायी, साभिसंस्कारपरिनिर्वायी, अनभिसंस्कारपरिनिर्वायी, ऊर्ध्वस्रोतः, आरूप्यगश्च। षष्ठश्चतुर्थाभेदमविगणय्येति।

दृष्टधर्मपरिनिर्वायी। दृष्टजन्मपरिनिर्वायीत्यर्थः ॥ ३८ ॥

कतमेषां[2] त्रयाणामिति विस्तरः। त्रयोऽनागामिन इति निर्भिद्य नोक्ता

---

१. अन्तरापि तु—का०।   २. कथमेषां—जा०।

कथं त्रिधा भेदात्? अन्तरापरिनिर्वायिणस्तावदाश्वनाशुचिरपरिनिर्वाणात् दृष्टान्तत्रयेण। उपपद्यपरिनिर्वायिण उपपद्याभिसंस्कारानभिसंस्कारपरिनिर्वाणात्। सर्वे ह्येते उपपद्यपरिनिर्वाणादुपपद्यपरिनिर्वायिणः[1]। ऊर्ध्वस्रोतसः प्लुतादिभेदात्। सर्वेषां वा त्रयाणामाश्वनाशुचिरपरिनिर्वाणादिति त्रित्वम्।

इत्यनवबुध्यमान इतरः पृच्छति। *आचार्योऽपि* अर्थापत्त्या उक्ता एत इति पश्यन् विवृणोति–*अन्तरोपपद्यपरिनिर्वायिणो*ः। अन्तरापरिनिर्वायिणः उपपद्यपरिनिर्वायिणश्चेत्यर्थः। *ऊर्ध्वस्रोतसश्च तृतीयस्येति*। *आश्वनाशुचिरपरिनिर्वाणात् दृष्टान्तत्रयेणेति*। आशुपरिनिर्वायी अनाशुपरिनिर्वायी, चिरपरिनिर्वायी च दृष्टान्तत्रयेण योजयितव्याः। तद्यथा परोत्तः शकलिकाग्निरभिनिर्वर्तमान एव निर्वायात्, एवं प्रथमो य आशुपरिनिर्वायी। तद्यथाऽयोगुडानां वायस्फालानां वा दीप्ताग्निसम्प्रतप्तानां अयोघनेन हन्यमानानां अयःप्रपाटिकोत्पतत्येव निर्वायात्, एवं द्वितीयोऽनाशु परिनिर्वायी। तद्यथाऽयोगुडानामिति पूर्ववद्यावदयःप्रपाटिकोत्प्लुत्य पृथिव्यामपतितैव निर्वायात्, एवं तृतीयो यश्चिरपरिनिर्वायी। एतच्च सूत्रं विस्तरेण पुरस्तात्लिखितमिति[2] न पुनर्लिख्यते। *उपपद्याभिसंस्कारानभिसंस्कारपरिनिर्वाणा*दिति। उपपद्य परिनिर्वाणाद्, अभिसंस्कारेण, अनभिसंस्कारेण परिनिर्वाणात् त्रिधाभेदान्नवानागामिनो भवन्तीति सम्बन्धः। उपपद्यपरिनिर्वायी य उपपन्नमात्रः परिनिर्वाति, न स्वभिसंस्कारेणानभिसंस्कारेण वा परिनिर्वाति। साभिसंस्कारपरिनिर्वायी तु नोपपद्यैव परिनिर्वाति, किं तर्हि? अभिसंस्कारेणाप्रतिप्रस्रब्धस्य पूर्वाभिसंस्कारस्य सामर्थ्यतः परिनिर्वाति। अस्य हि यद्यपि वाही मार्गोऽस्ति, अभियोगेन तु परिनिर्वाति; उपपद्यपरिनिर्वायी तु नाभियोगेनेति विशेषः। अनभिसस्कारपरिनिर्वायी पुनः प्रतिप्रस्रब्धपूर्वाभिसंस्कारोऽभिसंस्कारमनन्तरेण परिनिर्वातीत्ययमेव एषां विशेषोऽवगन्तव्यः।

यथा तु साभिसंस्कारानभिसंस्कारपरिनिर्वायिणावप्युपपद्यपरिनिर्वाय्याख्यां लभेते, तथा दर्शयन्नाह--*सर्वे ह्येत उपपद्यपरिनिर्वाणादुपपद्यपरिनिर्वायिण* इति। *प्लुतादिभेदादिति*। प्लुतार्धप्लुतसर्वच्युतभेदादित्यर्थः। *सर्वेषां वा त्रयाणा*मिति। अन्तरोपपद्यपरिनिर्वाय्यूर्ध्वस्रोतसा*माश्वनाशुचिरपरिनिर्वाणात्* त्रिधा भेदः। कश्चिदन्तरापरिनिर्वायी आशुपरिनिर्वायी भवति। एवमुपपद्यपरिनिर्वायी, ऊर्ध्वस्रोताश्चेति। अस्माच्च *त्रिधाभेदान्नवानागामिनो भवन्तीति* स एव सम्बन्धो वाच्यः।

---

१. त्रयोऽप्युपपन्न०—व्या०। २. द्र०—अस्यैव ग्रन्थस्य ४११-४१३ पृ०।

तद्विशेषः पुनः कर्मक्लेशेन्द्रियविशेषतः ।। ३९ ।।

तेषां पुनस्त्रयाणां नवानां चानागामिनां कर्मक्लेशेन्द्रियविशेषाद् विशेषः । त्रयाणां तावदभिनिर्वृत्त्युपपद्यापरपर्यायवेदनीयकर्मोपचितत्वाद्यथाक्रमं मृदुमध्याधिमात्रक्लेशसमुदाचारत्वाद् अधिमात्रमध्यमृद्विन्द्रियत्वाच्च ।

तेषामपि[1] प्रत्येकमत एव यथायोगं विशेषः । प्रथमयोस्त्रिकयोः क्लेशेन्द्रियविशेषात् पूर्ववत् । पश्चिमस्य त्रिकस्यापरपर्यविदनीयकर्मविशेषाच्चेति ।

त एते नवप्रकारक्लेशेन्द्रियत्वान्नवानगामिनो भवन्ति ।। ३९ ।।

"*तद्विशेषः पुनः*" इति विस्तरः । *तेषां पुनस्त्रयाणा*मन्तरोपपद्यपरिनिर्वायिणोः, ऊर्ध्वस्रोतसश्च । *नवानां* चैषामेव प्रत्येकं त्रिधाभेदाद् यथावर्णिताद् विशेषः । *कर्मक्लेशेन्द्रियविशेषात्* । कर्मणः क्लेशस्येन्द्रियस्य च विशेषाद् भवति । कथम्" इत्याह *त्रयाणामि*ति विस्तरः । *अभिनिर्वृत्तिः* । अन्तराभावः । *अभिनिर्वृत्तिवेदनीयस्य कर्मणा* उपचितत्वादन्तरापरिनिर्वायी, *उपपद्यवेदनीयस्य कर्मणा* उपचितत्वादुपपद्यपरिनिर्वायी, *अपरपर्यायवेदनीयस्य कर्मणः उपचितत्वा*दूर्ध्वस्रोता इत्येवं तावत्तेषां त्रयाणां कर्मविशेषाद् विशेषः । *मृदुमध्याधिमात्रक्लेशसमुदाचारत्वाद्* यथाक्रममेषामेव *क्लेशविशेषाद् विशेषः* । *अधिमात्रमध्यमृद्विन्द्रियत्वाच्च* । यथाक्रममेषामेवेन्द्रियविशेषाद्विशेष इति ।

तेषामपि प्रत्येकमत एव यथायोगं विशेष इति । तेषामपि प्रत्येकं भिन्नानां नवानामित्यर्थः । अत एव कर्मादिविशेषात् यथायोगं न यथाक्रमम्, विशेषोऽवगन्तव्यः । कथमित्याह—*प्रथमयोस्त्रिकयोरि*ति विस्तरः । यच्चान्तरापरिनिर्वायिणां त्रिकम्, यच्चोपपद्यपरिनिर्वायिणाम्, तयोस्त्रिकयोः *क्लेशेन्द्रियविशेषात्*, मृदुमध्याधिमात्रक्लेशसमुदाचारत्वात्, अधिमात्रमध्यमृद्विन्द्रियत्वाच्च यथाक्रमं विशेषः; न तु कर्मविशेषात् । यस्मात् प्रथमस्य त्रिकस्याभिनिर्वृत्तिवेदनीयं कर्म तुल्यम्, द्वितीयस्य चोपपद्यवेदनीयं कर्म तुल्यमिति । *पश्चिमस्य त्रिकस्यापरपर्यायवेदनीयकर्मविशेषाच्च विशेषः* । प्लुतादीनां ह्यपरपर्यायवेदनीयं कर्म भिन्नमित्यतोऽपरपर्यायवेदनीयकर्मविशेषात्, क्लेशेन्द्रियविशेषाच्च । चकारानुकृष्टत्वात् विशेषो मृदुमध्याधिमात्रक्लेशसमुदाचारत्वात्, अधिमात्रमध्यमृद्विन्द्रियत्वाच्च । यथाक्रममित्यर्थः । *त एते नवप्रकारक्लेशेन्द्रियत्वादि*ति । त

१. तेषामपि नवानां—का० ।

कथं तर्हि सूत्रे सप्त सत्पुरुषगतयो देशिताः ?

ऊर्ध्वस्त्रोतुरभेदेन सप्त सद्गतयो मताः ।

ऊर्ध्वं स्रवणधर्मा ऊर्ध्वस्रोताः। तस्याभेदनिर्देशात् सप्त सत्पुरुषगतयः सूत्रेऽभिहिताः।

एते नवानागामिनो नवप्रकारक्लेशत्वात्, नवप्रकारेन्द्रियत्वाच्च *नवानागामिनो भवन्ति ।* कर्मणोऽग्रहणमव्यापित्वात् । न हि प्रथमयोस्त्रिकयोः कर्मविशेषाद् विशेषोऽस्तीति कथं पुनरेते नवप्रकारक्लेशा भवन्ति ? इह क्लेशस्त्रिप्रकारः— मृदुमध्याधिमात्र इति । मृदुरन्तरापरिनिर्वायिणाम्, मध्य उपपद्यपरिनिर्वायिणाम्, अधिमात्र ऊर्ध्वस्रोतसाम् । तत्र प्रथमोऽन्तरापरिनिर्वायी मृदुमृदुक्लेशः, द्वितीयो मृदुमध्यक्लेशः, तृतीयो मृद्वधिमात्रक्लेशः । उपपद्यपरिनिर्वायिणां प्रथम उपपद्यपरिनिर्वायी मध्यमृदुक्लेशः, द्वितीयः साभिसंस्कारपरिनिर्वायी मध्यमध्यक्लेशः, तृतीयोऽनभिसंस्कारपरिनिर्वायी मध्याधिमात्रक्लेशः । ऊर्ध्वस्रोतसामपि प्लुतोऽधिमात्रमृदुक्लेशः, अर्धप्लुतोऽधिमात्रमध्यक्लेशः, सर्वस्थानच्युतोऽधिमात्राधिमात्रक्लेश इति । कथं नवप्रकारेन्द्रिया भवन्ति ? तथैवेन्द्रियमपि त्रिप्रकारम्—अधिमात्रं मध्यं मृदु चेति । अधिमात्रमन्तरापरिनिर्वायिणाम्, मध्यमुपपद्यपरिनिर्वायिणाम्, मृदूर्ध्वस्रोतसाम् । तत्र प्रथमोऽन्तरापरिनिर्वायी अधिमात्राधिमात्रेन्द्रियः, द्वितीयोऽधिमात्रमध्येन्द्रियः, तृतीयोऽधिमात्रमृद्विन्द्रियः । उपपद्यपरिनिर्वायिणां प्रथममुपपद्यपरिनिर्वायी मध्याधिमात्रेन्द्रियः, साभिसंस्कारपरिनिर्वायी मध्यमध्येन्द्रियः, अनभिसंस्कारपरिनिर्वायी मध्यमृद्विन्द्रियः । ऊर्ध्वस्रोतसामपि प्लुतो मृद्वधिमात्रेन्द्रियः, अर्धप्लुतो मृदुमध्येन्द्रियः, सर्वस्थानच्युतो मृदुमृद्विन्द्रिय इति ।। ३९ ।।

कथं तर्हि सूत्रे सप्त सत्पुरुषगतयो देशिता इति । 'सप्त वोऽहं भिक्षवः सत्पुरुषगतीर्देशयिष्यामि । अनुपादाय च परिनिर्वाणम्"—इत्येतत् सर्वं सूत्रं "गतिसूत्रतः[1]" इत्यत्र प्रदेशे लिखितमिति न पुनर्लिख्यते । अत्र च सूत्रे सप्त सत्पुरुषगतयो देशिताः—त्रयोऽन्तरापरिनिर्वायिणः, त्रय उपपद्यपरिनिर्वायिण इति षट् गतयः, ऊर्ध्वस्रोतोगतिश्च सप्तमी इति ।

ऊर्ध्वं स्रवणधर्मेति । कृदन्तमेतच्छब्दरूपमिति । विधार्थमेतच्छब्दरूपमिति दर्शयति । ऊर्ध्वमिति च क्रियाविशेषणमिति । *तस्याभेदनिर्देशादिति* । तस्योर्ध्वस्रोतसः प्लुतादिभेदानिर्देशादित्यर्थः । विनेयाशयापेक्षो हि सूत्रनिर्देशः ।

१. द्र०–पृ० ४११-४१३.

कस्मात् पुनरेता एव सत्पुरुषगतयः, नान्याः शैक्षगतयः ? एता हि गतयो येषाम्, तेषां सति[1] च[1] कर्मणि वृत्तिः कुशले, असत्यवृत्तिरकुशले। एताश्च गतीर्गतानां न पुनः प्रत्यागतिरस्ति। न त्वेतद्यथोक्तमन्यत्रास्ति। अतः—

सदसद्वृत्त्यवृत्तिभ्यां गताप्रत्यागतेश्च ताः ॥ ४० ॥

सप्त सत्पुरुषगतयो नान्या इति। यत्तर्हि सूत्र एवोक्तम्—"स कतमः ? शैक्ष्यः सम्यग्दृष्ट्या समन्वागतः" इति विस्तरः।

अन्येषामप्यस्ति पार्यायिकं सत्पुरुषत्वम्। पञ्चविधस्य पापस्यात्यन्तमकरणसंवरप्रतिलम्भात्, प्रायेणाकुशलप्रहाणाच्च। येषां तु निष्पर्यायेण तेषामिहाधिकारः ॥ ४० ॥

नान्याः शैक्षा गतय इति। न स्रोतआपन्नसकृदागामिगतय इत्यर्थः। गतिः, उपपत्तिः, सम्परायः—इत्येते सूत्रे पर्याया उच्यन्ते। *तेषामित्य*नागामिनाम्। *सति च कर्मणि वृत्तिः*। प्राणातिपाताद्यकरणात्। *असति चावृत्तिः*। अब्रह्मचर्याद्यकरणात्। अकुशलेन हि चित्तेनाब्रह्मचर्यादिकरणमिति। तेषां तु वीतरागाणां सत्येव कर्मणि वृत्तिः, नासति; प्रहीणाकुशलत्वात्। *न पुनः प्रत्यागतिरि*ति। यासु गतिषूपपन्नाः तत्रतत्र चैषामत्यन्तमनागमनमित्यर्थः। *न त्वेतद्यथोक्तमन्यत्रास्तीति*। यदेतत् सत्येव वृत्तिरसति चावृत्तिरेवापुनःप्रत्यागमनं च, तदेतत् स्रोतआपन्ने सकृदागामिनि च नास्तीति।

अन्येषामपीति। स्रोतआपन्नसकृदागामिनामपीत्यर्थः। *पार्यायिकमिति*। पर्याये भवं पार्यायिकम्। केनचित् प्रकारेण भवतीत्यर्थः। कथम् ? इत्याह—*पञ्चविधस्य पापस्यान्तमकरणसंवरप्रतिलम्भादि*ति। पञ्चविधस्य पापस्य प्राणातिपातादत्तादानकामिमिथ्याचारमृषावादमद्यपानलक्षणस्याकरणेनाक्रियया संवरः संवरणम्; तस्य प्रतिलम्भात्। न ह्यार्या जन्मान्तरेऽप्येतत् पञ्चविधं पापमध्याचरन्ति। अकरणसंवरवचनम्; समादानसंवरस्यानावश्यकत्वात्। *प्रायेणे*ति। दर्शनप्रहातव्यानाम*कुशलानां* सर्वेषामत्यन्त*प्रहाणात्*। भावनाप्रहातव्यानां च कामावचराणां केषांचित् सम्भवतः। *येषामिति* विस्तरः। येषां तु निःपर्यायेण न प्रकारान्तरेण स्रोतआपन्नसकृदागामिवत् *सत्पुरुषत्वम्*। किं तर्हि ? सर्वस्य पापस्यात्यन्तमकरणसंवरप्रतिलम्भात्। सर्वेषां चाकुशलानां दर्शनप्रहातव्यानां क्लेशानां प्रहाणात्। भावनाप्रहातव्यानां च कामावचराणां सर्वेषां नवप्रकाराणा-

१–१. सत्येव—का०।

किं पुन परिवृत्तजन्मनोऽप्यनागामिन एष भेदोऽस्ति ? यस्मात्

न परावृत्तजन्मार्यः कामे धात्वन्तरोपगः ।

कामधातौ परावृत्तजन्मान्तर आर्यो न धात्वन्तरं गच्छति । अनागामिफलं प्राप्य तत्रैव जन्मनि परिनिर्वाणात् । रूपधातौ तु परावृत्तजन्मा[१] कदाचिदारूप्यान् प्रविशति । य ऊर्ध्वस्रोता भवाग्रपरमः ।

यत्तर्हि शक्रेणोक्तम्—"ये ते देवा अकनिष्ठा इति विश्रुताः, अन्ते मे हीयमानस्य तत्रोपपत्तिर्भविष्यति" ? अभिधर्मलक्षणानभिज्ञत्वादिति[२] वैभाषिकाः । भगवतापि अनिवारणम् , संहर्षणीयत्वात् इति ।

मपि प्रहाणात् । *तेषां सत्पुरुषाणामनागामिनामिह सूत्रेऽधिकारः ।* सप्त सत्पुरुषगतय इत्यतोऽन्येषां पार्यायिकं सत्पुरुषत्वं न प्रतिषिध्यते ॥ ४० ॥

किं पुनः परिवृत्तजन्मनोऽप्यनागामिन एष भेदोऽस्ति । अन्तरापरिनिर्वाय्यीत्येवमादिकः । परिवृत्तजन्मानागामीयः प्रथमे जन्मनि स्रोतआपत्तिफलं सकृदागामिफलं वा प्राप्य द्वितीये जन्मन्यनागामी भवति । *काम* इति विशेषणम् । यस्माद् *रूपधातौ परिवृत्तजन्मा कदाचिदारूप्यान् प्रविशतीति ।* *तत्रैव जन्मनि परिनिर्वाणादिति ।* कामधातौ दुःखबहुलत्वेनास्य तीव्रसंवेगत्वात् ।

यत्तर्हीति विस्तरः । *शक्रेणोक्तम्*—'इतश्च्युतोऽहं मनुष्येषूपपन्नो यद्यर्हत्त्वं प्राप्य न परिनिर्वामि । *ये ते देवा अकनिष्ठा इति विश्रुताः, अन्ते मे हीयमानस्य तत्रोपपत्तिर्भविष्यति*' इति । स हि देवेष्वेव स्रोतआपन्नो मनुष्यांश्चागत्य परिनिर्वास्यामीति वचनात् परिवृत्तजन्मा भवेत् । अन्ते निकायसभागावसाने मम हीयमानस्यार्हत्त्वादप्राप्तिपरिहाण्या परिहीयमाणस्य, तत्राकनिष्ठेषूपपत्तिर्भविष्यतीति प्रार्थनावचनाद् धात्वन्तरगमनमस्तीति गम्यते, तत् कथं कामधातौ परिवृत्तजन्मान्तर आर्यो धात्वन्तरं न गच्छतीत्युच्यत इति ? सूत्रार्थो दृश्यते । भूयास्तम् । *धर्मलक्षणानभिज्ञत्वाच्छक्रेणैवमुक्तम्* , तस्माददोष इति । भगवता तर्ह्येवं शृण्वता कस्मादसौ न निवारितः—मा त्वमेव वोच इति ? अत उच्यते—*भगवताप्यनिवारणम् , संहर्षणीयत्वादिति ।* कामदुःखपरित्यागाभिलाषेण संहर्षणीयमित्यभिप्रायः ।

च्युतिनिमित्तोपपत्तिदुःखोद्विग्नस्य संहर्षणीयत्वादित्याचार्यसङ्घभद्रः ।

---

१. परिवृत्त०—जा० । २. अभिधर्मानभि०—का० ।

स चोर्ध्वजश्च नैवाक्षसञ्चारपरिहाणिभाक् ।। ४१ ।।

स च कामधातौ परिवृत्तजन्मा ऊर्ध्वधातूपपन्नश्चार्यो नैवेन्द्रियाणि सञ्चरति, नापि कथञ्चित् परिहीयते ।

किं पुनः कारणं परिवृत्तजन्मान्तरस्यार्यस्य रूपारूप्यप्रवेशेन्द्रियसञ्चारपरिहाणयो नेष्यन्ते ? यस्मान्न सन्ति ।

कस्मान्न सन्ति ? जन्मान्तरपरिवासेनेन्द्रियाणां परिपक्वतरत्वाद्, आश्रयविशेषलाभाच्च ।

अथ कस्मादवीतरागः शैक्षो नान्तराये परिनिर्वायी भवति ? मार्गस्याजितत्वादसम्मुखीभावतः, अनुशयानां च नातिमन्दत्वात् । दुःसमतिक्रमत्वात् कामधातोरिति **वैभाषिकाः** । बहु ह्यनेन कर्तव्यं भवति—अकुशलाव्याकृतक्लेशप्रहाणम्, द्वित्रिश्रामण्यफलप्राप्तिः, त्रिधातुसमतिक्रमश्च । तच्चान्तराभवस्थो न शक्तः कर्तुमिति ।। ४१ ।।

इन्द्रियाणां परिपक्वतरत्वादिति । प्रज्ञादीनामिन्द्रियाणां निष्यन्दफलपुष्टिविशेषादित्यर्थः । *आश्रयविशेषलाभाच्च* । यस्माच्चाश्रयविशेषमनुपहतं मार्गसम्मुखीभावानुकूलं प्रतिलभते । दृश्यन्ते हि तीक्ष्णेन्द्रिया अपि सन्त आश्रयवैगुण्याद् गुणेभ्यः परिहीयमाणा इत्यतो *जन्मान्तरपरिवासेनेन्द्रियाणां* परिपक्वतरत्वादिन्द्रियसञ्चारो नास्ति । आश्रयविशेषलाभाच्च परिहाणिर्नास्ति । अनेनैव जन्मान्तरपरिवासेन धात्वन्तरगमनं न भवतीति ।

मार्गस्याजितत्वादसम्मुखीभावत इति । यस्मान् मार्गस्याजितत्वादसम्मुखीभावः, तस्मात् कारणादवीतरागतः शैक्षः स्रोतआपन्नः सकृदागामी च नान्तरापरिनिर्वायी भवति । *अनुशयानां च नातिमन्दत्वात्* । यस्माच्चानुशयास्तस्य नातिमन्दाः, अतो नान्तरापरिनिर्वायी भवतीत्ययमाचार्यस्य परिहारः ।

वैभाषिकाणां कः परिहारः ? इत्याह—*दुस्समतिक्रमत्वात् कामधातोरिति वैभाषिका* इति । कथम् ? इत्युच्यते—*बहु ह्यनेन कर्तव्यं भवति अकुशलाव्याकृतक्लेशप्रहाणम्* । अकुशलानां कामावचराणामव्याकृतानां च रूपारूप्यावचराणां क्लेशानां प्रहाणमनेन कर्तव्यम् । वीतरागेण पुनः शैक्षेणाव्याकृतानामेव प्रहाणमिति । *द्वित्रिश्रामण्यफलप्राप्तिरिति* । द्वे वा त्रीणि वा श्रामण्यानि

यदुक्तम्—"स ध्याने व्यवकीर्णेऽकनिष्ठगः" इति, अथ कतमद्ध्यानं प्रथमतो व्यवकीर्यते ?

आकीर्यते चतुर्थं प्राक्,

स हि सर्वकर्मण्यः समाधिः ; सुखप्रतिपदामग्रत्वात्[१]। एवं च पुनः व्यवकीर्यते—अर्हन्ननागामी वा प्रवाहयुक्तमनास्रवं चतुर्थं ध्यानं समापद्यते। तस्माद्व्युत्थाय प्रवाहयुक्तं तदेव सास्रवं समापद्यते, पुनश्चानास्रवम्।

एवं प्रवाहाप्रहाणेन[२] यदा किल द्वौ क्षणावनास्रवौ समापद्यते, द्वौ सास्रवौ, पुनश्चानास्रवौ—अयं व्यवकिरणस्य प्रयोगः।

निष्पत्तिक्षणमिश्रणात्।

यदा त्वनास्रवस्य क्षणस्यानन्तरं सास्रवं सम्मुखीकरोति सास्रवस्यानास्रवम्। एवं सास्रवस्य क्षणस्यानास्रवाभ्यां मिश्रणात् व्यवकिरणं निष्पन्नं भवतीति **वैभाषिकाः।**

द्वौ हि क्षणावानन्तर्यमार्गसदृशौ, तृतीयो विमुक्तिमार्गसदृश इति एवं

फलानि प्राप्तव्यानि। सकृदागामिना द्वे श्रामण्यफले प्राप्तव्ये—अनागामिफलम्, अर्हत्त्वफलं च। स्रोतआपन्ने त्रीणि सकृदागामिफलम्, अनागामिफलम्, अर्हत्त्वफलं च। वीतरागेण पुनरेकमेवार्हत्त्वफलं प्राप्तव्यमिति। *त्रिधातुसमतिक्रमश्चावीतरागेण* कर्तव्यः। वीतरागेण तु रूपावीतरागेणान्तरापरिनिर्वायिणा भवता द्विधातुसमतिक्रमः कर्तव्य इति॥ ४१॥

"*आकीर्यते*" इति। व्यवकीर्यते व्यतिभिद्यते। अनास्रवाभ्यां सास्रवं *चतुर्थं ध्यानं* मिश्रीक्रियत इत्यर्थः। *सुखप्रतिपदामग्रत्वादिति*। सुखा प्रतिपदश्चत्वारि मौलानि ध्यानानि, "ध्यानेषु मार्गः प्रतिपत् सुखा" (अभि० को० ६.६६) इति वचनात्। तासां चतुर्थं ध्यानमग्रम्, अष्टापक्षालमुक्तत्वात्।

यदा *किलेति*। किलशब्दो वैभाषिकमतद्योतकः। स्वमतं तु पश्चाद् दर्शयिष्यति—*अशक्यं तु क्षणव्यवकिरणमिति* विस्तरेण।

द्वौ हि क्षणावानन्तर्यमार्गसदृशाविति। अनास्रवसास्रवौ। *तृतीयो विमुक्तिमार्गसदृश* इत्यनास्रवः।

१. ०मग्रधत्वात्—का०। २. ०प्रहासेन—का०।

चतुर्थं ध्यानं व्यवकीर्य तद्बलेनान्यान्यपि व्यवकीर्यन्ते । कामधातौ त्रिषु द्वीपेषु प्रथमं व्यवकीर्यते । पश्चात् परिहीणेन रूपधातौ ।

अशक्यं तु क्षणव्यवकिरणमन्यत्र बुद्धात् । अत इच्छातः प्रवाहत्रयसमापत्तितो निष्पन्नं भवतीति पश्यामः ।

किमर्थं पुनर्ध्यानं व्यवकीर्यते ?

उपपत्तिविहारार्थं क्लेशभीरुतयापि च ।। ४२ ।।

त्रिभिः कारणैर्ध्यानं व्यवकिरन्ति—तीक्ष्णेन्द्रिया अनागामिनः शुद्धावासोपपत्त्यर्थं दृष्टधर्मसुखविहारार्थं च, मृद्विन्द्रियाः क्लेशभीरुतया चास्वादनासम्प्रयुक्तसमाधिदूरीकरणादपरिहाण्यर्थम्[1], अर्हन्तस्तु तीक्ष्णेन्द्रिया दृष्टधर्मसुखविहारार्थम्, मृद्विन्द्रियाः क्लेशभीरुत्वाच्चापरिहाण्यर्थम् ॥ ४२ ॥

अथ कस्मात् पञ्चैव शुद्धावासोपपत्तयः ? यदेतद् व्यवकीर्णभावितं चतुर्थं ध्यानमुक्तम्,

तत्पाञ्चविध्यात् पञ्चैव शुद्धावासोपपत्तयः ।

सा हि व्यवकीर्णभावना पञ्चप्रकारा; मृदुमध्याधिमात्रतरतमभेदात् । प्रथमायां त्रीणि चित्तानि सम्मुखीक्रियन्ते—अनास्रवम्, सास्रवम्, अनास्रवं च । द्वितीयायां षट् । तृतीयायां नव । चतुर्थ्यां द्वादश । पञ्चम्यां पञ्चदश ।

मृद्विन्द्रियाः क्लेशभीरुतया च व्यवकिरन्ति । चशब्दाच्छुद्धावासोपपत्त्यर्थं दृष्टधर्मसुखविहारार्थं च व्यवकिरन्ति । *तीक्ष्णेन्द्रियास्तु शुद्धावासोपपत्त्यर्थं दृष्टधर्मसुखविहारार्थं* च व्यवकिरन्ति, न क्लेशभीरुतया; तेषां परिहाण्यसम्भवात् । कथं पुनः क्लेशभीरुतया अपरिहाण्यर्थं व्यवकिरन्ति ? इत्याह—*आस्वादनासम्प्रयुक्तसमाधिदूरीकरणात् । अपरिहाण्यर्थमिति ।* फलान्न परिहीयेमिति ॥ ४२ ॥

*पञ्चप्रकारे*ति विस्तरः । *मृद्वी मध्या अधिमात्रा अधिमात्रतरा अधिमात्रतमे*ति । *प्रथमायां त्रीणि चित्तानी*ति । तस्य पुद्गलस्य तावती शक्तिरित्येवमुपरिष्टादपि वक्तव्यम् । *द्वितीयायां षडि*ति । अनास्रवं सास्रवमनास्रवमिति त्रीणि,

१. ०परिहीणार्थम्—का० ।

तासां यथासंख्यं पञ्च शुद्धावासाः फलम्। यत्तत्र सास्रवं तद्वशात् तेषूपपत्तिः।

श्रद्धादीन्द्रियाधिक्यात् पञ्चेत्यपरे।

निरोधलाभ्यनागामी कायसाक्षी पुनर्मतः ।। ४३ ।।

निरोधलाभोऽस्यास्तीति निरोधलाभी। यो हि कश्चिदनागामी निरोधसमापत्तिलाभी स कायसाक्षीत्युच्यते; निर्वाणसदृशस्य धर्मस्य कायेन साक्षात् करणात्।

कथं पुनः कायेन साक्षात्करोति ? चित्ताभावात् कायाश्रयोत्पत्तेः।

एवं तु भवितव्यम्—स हि तस्माद् व्युत्थायाप्रतिलब्धपूर्वां सविज्ञानकां कायशान्तिं प्रतिलभते। यतोऽस्यैवं भवति—शान्ता बत निरोधसमापत्तिः, निर्वाणसदृशी बत निरोधसमापत्तिरिति। एवमनेन तस्याः शान्तत्वं कायेन साक्षात्कृतं भवति। प्राप्तिज्ञानसाक्षात्क्रियाभ्यां प्रत्यक्षीकारो हि साक्षात्क्रिया।

पुनरनास्रवं सास्रवमनास्रवमित्यपराणि त्रीणीति षड् भवन्ति। एवमेव च *तृतीयायां नव, चतुर्थ्यां द्वादश, पञ्चम्यां पञ्चदशेति* योज्यम्।

तासां यथासंख्यमिति। तासां व्यवकीर्णभावनानां यथाक्रमं *पञ्च शुद्धावासाः फलम्*। मृद्व्या भावनाया अवृहाः फलम्, एवं यावदधिमात्रतमाया भावनाया अकनिष्ठाः फलमिति।

श्रद्धादीन्द्रियाधिक्यादिति। *भदन्तश्रीलातमतम्*। श्रद्धाधिकाया भावनाया अवृहाः फलम्, एवं यावत् प्रज्ञाधिकाया भावनाया अकनिष्ठाः फलमिति।

यो हि कश्चिदनागामीति। श्रद्धाधिमुक्तो वा, दृष्टिप्राप्तो वा। *कायेन साक्षात्करणमिति*। *चित्ताभावात्* कायेनैव साक्षात्करोति।

कथं कायेनैव ? इत्याह—कायाश्रयोत्पत्तेः।

एवं तु भवितव्यमिति। स्वमतमाचार्यस्य। *प्राप्तिज्ञानसाक्षात्क्रियाभ्यामिति*। समाधिकाले तदनुकूलाश्रयप्राप्तिसाक्षात्करणात्। व्युत्थानकाले च तत्प्रतिसंवेदनाज्ञानसाक्षात्करणात्। *प्रत्यक्षीकारो हि साक्षात्क्रियेति*। सविज्ञानकायशान्तिप्रतिलम्भावस्थायां साक्षात्क्रिया युज्यत इत्यभिप्रायः। सविज्ञानककायशान्तिप्रतिलम्भेन वा अविज्ञानककायशान्त्यवस्थायां तत्प्राप्तिर्गम्यत इति।

"अष्टादश शैक्षाः" इत्यत्र सूत्रे किं कारणं कायसाक्षी नोक्तः ? कारणाभावात् । किं पुनः कारणम् ? अनास्रवास्तिस्रः शिक्षाः[1], तत्फलं च । तद्विशेषेण हि शैक्षाणां व्यवस्थानम् । निरोधसमापत्तिश्च नैवशैक्षानशिक्षा[2] फलम् । अतो न तद्योगाच्छैक्षविशेष उक्तः । एष तावदनागामिनां यथास्थूलं भेदः ।

सूक्ष्मं तु भिद्यमानाः सहस्रशो भिद्यन्ते ।

अष्टादश शैक्षा इत्यत्र सूत्र इति । "अनाथपिण्डदो गृहपतिर्भगवन्तमपृच्छत्—'कति भदन्त दक्षिणीयाः' इति ? भगवानाह—'अष्टादश गृहपते शैक्षा नैवाशैक्षा दक्षिणीया इति । अष्टादश शैक्षाः कतमे ? स्रोतआपत्तिफलसाक्षात्क्रियायै प्रतिपन्नकः, स्रोतआपन्नः, सकृदागामिफलसाक्षात्क्रियायै प्रतिपन्नकः, सकृदागामी, अनागामिफलसाक्षात्क्रियायै प्रतिपन्नकः, अनागामी, अर्हत्त्वफलसाक्षात्क्रियायै प्रतिपन्नक, श्रद्धानुसारी, श्रद्धाधिमुक्तः, दृष्टिप्राप्तः, कुलंकुलः, एकवीचिकः, अन्तरापरिनिर्वायी, उपपद्यपरिनिर्वायी, साभिसंस्कारपरिनिर्वायी, अनभिसंकारपरिनिर्वायी, ऊर्ध्वस्रोताः—इतीमे गृहपतेऽष्टादश शैक्षाः । नवाशैक्षाः कतमे ? परिहाणधर्मा, चेतनाधर्मा, अनुरक्षणाधर्मा, स्थिताकम्प्यः, प्रतिवेधनाभव्यः, अकोप्यधर्मा, चेतोविमुक्तः, प्रज्ञाविमुक्तः, उभयतोभागविमुक्तः—इतीमे गृहपते नवाशैक्षाः" इति । *तिस्रः शिक्षाः, तत्फलं चेति* । अधिशीलमधिचित्तमधिप्रज्ञमिति तिस्रः शिक्षा आर्यमार्गलक्षणाः । तेषां फलं विसंयोगः । *तद्विशेषेण हि शैक्षाणां व्यवस्थानमिति* । शिक्षाविशेषेण, तत्फलविशेषेण चेत्यर्थः । कथं पुनस्तद्विशेषः ? अन्यादृश्योऽष्टादशानां शिक्षाः, विसंयोगफलं चेति । *निरोधसमापत्तिश्च न शैक्षा* । अप्रहाणमार्गस्वाभाव्यात् । *न शिक्षा फलम*विसंयोगफलस्वाभाव्यात् । *अतो न तद्योगात्* निरोधसमापत्तियोगात् *शैक्षविशेष उक्तः* । यथैतेऽष्टादश शैक्षाः, न पुनरसौ न शैक्षः । तत्र यदिदमुच्यते—अष्टादश शैक्षा इत्यत्र सूत्रे कि कारणं कायसाक्षी नोक्तः, शैक्ष इत्येवं नोक्तः ।

यथास्थूलं भेद इति । "रूपोपगा पञ्च, आरूप्यगाश्चतुर्धान्यः इह निर्वायकोऽपरः" (अभि० को० ६.३८) इत्येवमादि ।

सूक्ष्मं तु भिद्यमाना इति विस्तरः । अत्राचार्यो गणनोपायप्रदर्शनार्थं प्रथममन्तरापरिनिर्वायिण इन्द्रियभूमिगोत्रादिभेदं व्युत्पादयति । किं कारणम् ?

---

१. शैक्षाः—का० । २. °नाशिक्षा—का० ।

अन्तरापरिनिर्वायिणस्त्रयो मृदुमध्याधिमात्रेन्द्रियभेदात् ।

भूमिभेदाच्चत्वारः ।

परिहाणधर्मादिगोत्रभेदात् षट् ।

स्थानान्तरभेदात् षोडश ।

भूमिवैराग्यभेदात् षट्त्रिंशत् । रूपधातौ सकलबन्धनो यावच्चतुर्थ-ध्यानाष्टप्रकारवीतरागः ।

स्थानान्तरगोत्रवैराग्येन्द्रियभेदाद् द्वानवतीनि पञ्चविंशतिः शतानि । कथं

तद्भेदे हि गणिते यथान्तरापरिनिर्वायिण इन्द्रियादिभेदाद् भेदः, एवं यावदूर्ध्व-स्रोतस इति सुखमतिदेशं करिष्यामीति ।

भूमिभेदाच्चत्वार इति । त एवान्तरापरिनिर्वायिणः । भूमयश्चत्वारि ध्यानानि; रूपोपगानामनागामिनां विवक्षितत्वात् । तत्र प्रथमे ध्यानेऽन्तरा-परिनिर्वायी यावच्चतुर्थ इति चत्वारः ।

परिहाणधर्मादिगोत्रभेदात् षडिति । त एव परिहाणधर्मा, चेतनाधर्मा, अनुरक्षणाधर्मा, स्थिताकम्प्यः, प्रतिवेधनाभव्यः, अकोप्यधर्मा चेति ।

स्थानान्तरभेदात् षोडशेति । ब्रह्मकायिकादीन्यकनिष्ठान्तानि । महाब्रह्मणो वैभाषिकनीत्याऽस्थानान्तरः । बहिर्देशकनयेनापि स्थानान्तरत्वे तत्रार्यो नोत्पद्यत इत्यगणनम् । तदेवं स्थानान्तरभेदात् षोडशान्तरापरिनिर्वायिणः ।

भूमिवैराग्यभेदात् षट्त्रिंशदिति । भूमिभेदात् तद्वैराग्यभेदाच्च षट्त्रिंश-दन्तरापरिनिर्वायिणः । कथम् ? इति प्रतिपादयति—*रूपधातौ सकलबन्धन* इति विस्तरः । रूपधातौ प्रथमे ध्याने सकलबन्धन एकप्रकारवीतरागो यावदष्ट-प्रकारवीतराग इति नव; द्वितीयेऽपि नव सकलबन्धनो यावदष्टप्रकारवीतराग इति, तथा तृतीये नव, तथा चतुर्थे नवेति—चत्वारो नवकाः षट्त्रिंशद् भवन्ति । *यावच्चतुर्थध्यानाष्टप्रकारवीतराग* इति । यावच्छब्देनायमर्थविस्तरो लभ्यते । चतुर्थध्याननवमप्रकारवीतरागो नोच्यते । यस्मादसावारूप्ये सकलबन्धनो भवति । न चेहारूप्यगोऽधिक्रियते; रूपोपगानामिह विवक्षितत्वात् । अन्तरा-भवसम्बन्धादिति ।

तथा च सति *स्थानान्तरगोत्रवैराग्येन्द्रियभेदादिति* विस्तरः । स्थानान्तराणां गोत्राणां वैराग्याणामिन्द्रियाणां च भेदात् *द्वानवतीनि* द्वानवत्यधिकानि

कृत्वा ? एकस्मिन् स्थाने षट् गोत्राणि, गोत्रे गोत्रे नव पुद्गलाः, सकलबन्धनो यावदष्टप्रकारवीतरागः स्वस्मात् स्थानात् षण्णवकानि चतुष्पञ्चाशत् षोडश चतुष्पञ्चाशत्कानि चतुःषष्टान्यष्टौ शतानि । इन्द्रियभेदात् पुनस्त्रिगुणा इत्येवं कृत्वा यो ह्यधरे[1] ध्याने[1] नवप्रकारवीतरागः स उत्तरे सकलबन्धन उक्तः, समगणनार्थम् ।

यथान्तरापरिनिर्वायिण एवं यावदूर्ध्वस्रोतस इत्यभिसमस्य सर्वे चत्वारिंशदूनानि त्रयोदशसहस्राण्यनागामिनां भवन्ति ॥ ४३ ॥

पञ्चविंशतिशतानि भवन्ति; तेषामन्तरापरिनिर्वायिणाम् । *कथं कृत्वा तथा भवन्ति* ? इत्याह—*एकस्मि स्थाने* । तद्यथा—ब्रह्मपुरोहिते *षट्गोत्राणि* परिहाणधर्मादिभेदात् । *गोत्रगोत्र* इति वीप्सा । *नव पुद्गलाः* । *सकलबन्धनो यावदष्टप्रकारवीतरागः* । *स्वस्मात् स्थानात्* । तद्यथा ब्रह्मपुरोहितात् । *षण्णवकानि* गोत्रषट् पुद्गलनवकग्रहणाच्चतुःपञ्चाशत् । *षोडश चतुःपञ्चाशत्कानि* । षोडशस्थानान्तरग्रहणात् । *चतुःषष्टानि* । *चतुःषष्ट्यधिकानि अष्टौ शतानि* । *इन्द्रियभेदात्* तु *त्रिगुणा* मृदुमध्याधिमात्रभेदात् । *इत्येवं कृत्वा* । किम् ? द्वानवतीनि पञ्चविंशतिशतानि भवन्ति । येन न्यायेन सकलबन्धनो यावदष्टप्रकारवीतराग इति नव पुद्गला व्यवस्थापिताः, तं न्यायं दर्शयन्नाह—यो ह्यधरे *ध्यान* इति विस्तरः । यो ह्यधरे ध्याने प्रथमे यावत् तृतीये *नवप्रकारवीतरागः* । *स उत्तरे ध्याने* द्वितीये यावच्चतुर्थे *सकलबन्धन इत्युक्तः* । कस्माद् ? इत्याह—*समगणनार्थमिति* । चतुर्षु ध्यानेषु नवनव यथा स्युरिति । अन्यथा हि विषमा गणना स्यात् । प्रथमे ध्याने दश स्युः सकलबन्धनो यावन्नवप्रकारवीतराग इति । द्वितीये नव एकप्रकारवीतरागो यावन्नवप्रकारवीतराग इति । एवं तृतीये नव । चतुर्थे त्वष्टौ स्युः—एकप्रकारवीतरागो यावदष्टप्रकारवीतराग इति । नवप्रकारवीतरागस्यारूप्यसकलबन्धनत्वादित्युक्तम् । *एवं यावदूर्ध्वस्रोतस* इति । एवमुपपद्यसाभिसंस्कारोर्ध्वस्रोतसामपि । स्थानान्तरगोत्रवैराग्येन्द्रियभेदात् प्रत्येकं द्वानवतीनि पञ्चविंशतिशतानि भवन्तीत्य*भिसमस्य* पुनः पञ्चभेदाँश्चत्वारिंश*दूनानि त्रयोदशसहस्राण्यनागामिनां भवन्ति* । आरूप्यगैस्तु सहोपपद्यादिचतुर्भेदभिन्नैरतितरां बह्वो भवन्ति । अनया तु वर्तन्या गम्यत एवेति न लिख्यते ॥ ४३ ॥

१–१. योऽपरध्याने–का० ।

अभि० को० ३ : १४

आभवाग्राष्टभागक्षिदर्हत्त्वे प्रतिपन्नकः ।

'अनागामी' इत्यधिकृतम् । स खल्वयमनागामी प्रथमध्यानैकप्रकारवैराग्यात् प्रभृति यावत् भवाग्राष्टप्रकारप्रहाणादर्हत्त्वप्रतिपन्नको भवति[1] ।

नवमस्याप्यानन्तर्यपथे,

नवमस्यापि भावाग्रिकस्य प्रकारस्य प्रहाणायानन्तर्यमार्गे सोऽर्हत्त्वप्रतिपन्नक एव ।

वज्रोपमश्च सः ।। ४४ ।।

स चानन्तर्यमार्गः 'वज्रोपमः समाधिः' इत्युच्येत; सर्वानुशयभेदित्वात् । भिन्नत्वादसौ न[2] सर्वान् भिनत्ति । सर्वांस्तु भेत्तुं समर्थः; सर्वानन्तर्यमार्गाणामधिमात्रतमत्वात् ।

वज्रोपमानां तु बहुभेदं वर्णयन्ति—अनागम्यसंगृहीता भावाग्रिकदुःखसमुदयालम्बनैर्दुःखसमुदयान्वयज्ञानाकारैः सम्प्रयुक्ता अष्टौ । निरोधमार्गधर्म-

---

"आभवाग्राष्टभागक्षिद्" इति । आभवाग्रादष्टौ प्रकारान् क्षिणोतीत्याभवाग्राष्टभागक्षिद् । आभवाग्राष्टप्रकारक्षयकृदित्यर्थः ।

अयमनागामी प्रथमध्यानैकप्रकारवैराग्यात् प्रभृतीति । यस्मात् कामवैराग्यादनागामी व्यवस्थाप्यते, तस्मात्तः परेणार्हत्त्वफलप्रतिपन्नको भवति ।

यथा वज्रः सर्वं भिनत्ति, एवमयं समाधिः *सर्वमनुशयं भिनत्तीति* सामर्थ्यात् वज्र उपमा अस्येति *वज्रोपमः* । *भिन्नत्वादसौ न सर्वान् भिनत्तीति* । त्रैधातुकान् दर्शनप्रहातव्यान् भावनाप्रहातव्यांश्च कामावचरान् यावत् भावाग्रिकानष्टौ प्रकारान् । यदि सर्वान्न भिनत्ति, कस्मात् सर्वानुशयभेदीत्युच्यते ? इत्याह—*सर्वांस्तु भेत्तुं समर्थ* इति । सम्भवमधिकृत्योक्तमित्यभिप्रायः ।

अनागम्यसंगृहीता इति विस्तरः । नव भूमीः अनागम्यं ध्यानान्तरं चत्वारि ध्यानानि त्रींश्चारूप्यान् भवाग्रवर्ज्यान्निश्रित्यार्हत्त्वप्राप्तिरित्यत एवं प्रतन्यते । *दुःखसमुदयान्वयज्ञानाकारैः सम्प्रयुक्ता अष्टाविति* । भावाग्रिकदुःखालम्बनान्वयज्ञानाकारैश्चतुर्भिः सम्प्रयुक्ताश्चत्वारो भावाग्रिकसमुदयालम्बनान्वयज्ञानाकारैः चतुर्भिरपरैः सम्प्रयुक्ताश्चत्वार इत्यष्टौ । एवमेव *निरोधमार्गधर्मज्ञानाकारैः सम्प्रयुक्ता अष्टाविति* वक्तव्यम् ।

---

१. भवन्ति–का० । २. न पुनः—का० ।

ज्ञानाकारैः सम्प्रयुक्ता अष्टौ । निरोधान्वयज्ञानाकारैः सम्प्रयुक्ताः प्रथमध्याननिरोधालम्बनाश्चत्वारः । एवं यावद् भवाग्रनिरोधालम्बनाश्चत्वारः । मार्गान्वयज्ञानाकारैः सम्प्रयुक्ताश्चत्वारः; कृत्स्नस्यान्वयज्ञानपक्षस्यालम्बनात् । त इमे ज्ञानाकारालम्बनभेदभिन्ना द्वापञ्चाशद् वज्रोपमा भवन्ति ।

यथाऽनागम्यसंगृहीताः[1], एवं यावच्चतुर्थध्यानसंगृहीताः ।

"धर्मज्ञानं निरोधे यन्मार्गे वा भावनापथे ।
त्रिधातुप्रतिपक्षस्तद्" (अभि० को० ७. ९)

इति सिद्धान्तात् तयोरेवेहोपन्यास, न दुःखसमुदयधर्मज्ञानयोर्ग्रहणम् । *एवं यावदि*ति । यावच्छब्देन यथा प्रथमध्याननिरोधालम्बनाकारैः सम्प्रयुक्ताश्चत्वारः । एवं द्वितीयतृतीयचतुर्थध्यानाकाशविज्ञानाकिञ्चन्यायतनभवाग्रनिरोधालम्बनाः प्रत्येकं चत्वारश्चत्वारो वक्तव्याः । *मार्गान्वयज्ञानाकारैः सम्प्रयुक्ताश्चत्वार* इति । अत्र प्रतिभूमिमार्गालम्बनान्वयज्ञानाकारैः सम्प्रयुक्ताश्चत्वारः चत्वार इति नोच्यते । कस्माद् ? इत्याह-*कृत्स्नस्यान्वयज्ञानपक्षस्यालम्बनादि*ति । अविशिष्टो ह्यन्वयज्ञानपक्षो मार्गः प्रतिपक्षभावेनान्योन्यहेतुकश्च मार्ग इति समस्तमेवालम्ब्यते । न निरोधवदित्यतश्चत्वार एव मार्गान्वयज्ञानाकारभेदेनान्वयज्ञानाकारैः सम्प्रयुक्ता इति । *त इमे ज्ञानाकारालम्बनभेदभिन्ना* इति । ज्ञानाकारभेदेन, आलम्बनभेदेन च भिन्नाः । अथ वा ज्ञानानामाकाराणामालम्बनानां च त्रिभेदेन भिन्नाः । ज्ञानाकारभेदभिन्नास्तावत्—दुःखसमुदयान्वयज्ञानाकारैरित्येवमादिवचनात् । आलम्बनभेदभिन्ना अपि *भावाग्रिक*दुःखसमुदयालम्बनैरित्येवमादिवचनात् । *द्वापञ्चाशदि*ति । आदितो द्वयष्टाविति षोडश । प्रथमध्याननिरोधालम्बनाश्चत्वारो यावन्मार्गान्वयज्ञानाकारैः सम्प्रयुक्ताश्चत्वार इति नवचतुष्काणि षट्त्रिंशत् । षोडश च षट् त्रिंशच्च द्वापञ्चाशद्भवन्ति ।

यथानागम्यसंगृहीता इति विस्तरः । मौलं ध्यानमनागम्याप्रविश्योत्पद्यत इत्यनागम्यम् । येन प्रकारेणानन्तरोक्तेनानागम्यसंगृहीता द्वापञ्चाशद् वज्रोपमा भवन्ति, तेनैव प्रकारेण ध्यानान्तरसंगृहीता द्वापञ्चाशद् भवन्ति । कथं कृत्वा ? ध्यानान्तरसंगृहीता भावाग्रिकदुःखसमुदयान्वयज्ञानाकारैः सम्प्रयुक्ता अष्टौ, निरोधमार्गधर्मज्ञानाकारैः सम्प्रयुक्ता अष्टौ, निरोधान्वयज्ञानाकारैः सम्प्रयुक्ताः प्रथमध्याननिरोधालम्बनाश्चत्वारः, एवं यावद् भवाग्रनिरोधालम्बनाश्चत्वारः, मार्गान्वयज्ञानाकारैः सम्प्रयुक्ताश्चत्वारः; कृत्स्नस्यान्वयज्ञानपक्षस्यालम्बनात् । त इमे ज्ञानाकारालम्बनभेदभिन्ना द्वापञ्चाशद् भवन्ति । यथा ध्यानान्तर-

---

१. ०नागाम्य०–का० ।

आकाशविज्ञानानन्त्याकिञ्चन्यायतनसंगृहीता यथासंख्यमष्टाविंशतिश्चतुर्विंशतिर्विंशतिश्च भवन्ति; तेषु धर्मज्ञानस्याधोभूमिनिरोधालम्बनस्य चान्वयज्ञानस्याभावात्। अधोभूमिप्रतिपक्षालम्बनं तु भवति, तस्यान्योन्यहेतुत्वादिति।

येषां तु मार्गान्वयज्ञानमप्येकैकभूमिप्रतिपक्षालम्बनमिष्टम्, तेषामाष्टविंशति-

---

संगृहीता एवं प्रथमध्यानसंगृहीता द्वापञ्चाशत्। *यावच्चतुर्थध्यानसंगृहीता* द्वापञ्चाशदिति। *यथासंख्यमिति* विस्तरः।

आकाशानन्त्यायतनसंगृहीता अष्टाविंशतिः। *विज्ञानानन्त्यायतनसंगृहीताश्चतुर्विंशतिः*। *आकिञ्चन्यायतनसंगृहीता विंशतिः*। भवाग्र आर्यमार्गो नास्तीति तत्संगृहीता न सन्तीति न चिन्त्यन्ते। *तेषु धर्मज्ञानस्याभावादिति*। तेष्वाकाशानन्त्यायतनादिषु धर्मज्ञानस्याभावात्। धर्मज्ञानस्य षड्भूमिकत्वात्। तस्मान्निरोधमार्गधर्मज्ञानाकारैः सम्प्रयुक्ता अष्टौ न भवन्ति। *अधोभूमिनिरोधालम्बनस्य चान्वयज्ञानस्याभावात्*। निरोधान्वयज्ञानाकारैः सम्प्रयुक्ताश्चतुर्ध्याननिरोधालम्बनाः षोडश पुनर्न भवन्तीत्यष्टाविंशतिर्भवन्ति। द्वापञ्चाशतोऽष्टौ षोडश चैवापनीयेति कृत्वा। कथम्? आकाशानन्त्यायतनसंगृहीता भावाग्रिकदुःखसमुदयान्वयज्ञानाकारैः सम्प्रयुक्ता अष्टौ, निरोधान्वयज्ञानाकारैः सम्प्रयुक्ता आकाशानन्त्यायतनादिनिरोधालम्बनाः षोडश, मार्गान्वयज्ञानाकारैः सम्प्रयुक्ताश्चत्वार इति त इमे ज्ञानाकारालम्बनभेदभिन्ना अष्टाविंशतिर्भवन्ति। एवं विज्ञानानन्त्यायतननिरोधालम्बनाश्चतुरोऽपनीय चतुर्विंशतिर्योज्याः। आकिञ्चन्यायतनसंगृहीता विज्ञानानन्त्यायतननिरोधालम्बनानप्यपरानपीय विंशतिरिति। किं पुनः कारणं स्वभूम्यूर्ध्वभूमिकनिरोधमेवालम्बन्त आरूप्याः; नाधोभूमिकं ध्यानवत्? न ह्यधोभूमिकं दुःखमनालम्ब्य तन्निरोधः शक्यमालम्बितुम्। दुःखं च सर्वं सास्रवमेव। एष च नियमः। "न मौलाः कुशलारूप्याः सास्रवाधरगोचराः" (अभि० को० ८.२१) इत्येतत्कारणम्। ध्यानानां तु समस्तालोचनत्वान्न प्रतिषेधः। वक्ष्यति हि "ध्यानं सद्विषयं शुभम्" (अभि० को० ८.२०) इति। अथ कस्मान्निरोधमेवालम्बन्ते, न पुनर्दुःखं समुदयं वा? भवाग्रादधोभूमेर्वीतरागत्वात्। तस्य हि भावाग्रिक एव नवमः प्रकारो वज्रोपमवध्योऽवशिष्ट इति। *अधोभूमिप्रतिपक्षालम्बनं तु भवतीति*। अन्वयज्ञानमधिकृतम्। तच्च वज्रोपमसमाधिसम्प्रयुक्तं वेदितव्यम्। *तस्य प्रतिपक्षस्य अन्योन्यहेतुत्वादिति*। "अन्योन्यं नवभूमिस्तु मार्गः समविशिष्टयोः" (अभि० को० २.५३) इति वचनात्। सर्वं हि मार्गान्वयज्ञानं नवभूमिकान्वयज्ञानपक्षालम्बनमिति।

मधिकान् प्रक्षिप्यानागम्यसंगृहीता अशीतिर्वज्रोपमा भवन्ति । एवं यावच्चतुर्थध्यान-संगृहीताः ।

आकाशानन्त्यायतनादिषु यथाक्रमं चत्वारिंशत्, द्वात्रिंशत्, चतुर्विंशतिश्च भवन्ति ।

येषां त्विति विस्तरः । येषामाभिधार्मिकाणां *मार्गान्वयज्ञानमपि न केवलनिरोधान्वयज्ञानमेकैकभूमिप्रतिपक्षालम्बनमिष्टम्, तेषामष्टाविंशतिमधिकान् प्रक्षिप्य अनागम्यसंगृहीता अशीतिर्वज्रोपमा भवन्ति* । कथं कृत्वा ? पूर्वकाः कृत्स्नस्यान्वयज्ञानपक्षस्यालम्बना मार्गान्वयज्ञानाकारैः सम्प्रयुक्ताश्चत्वारः ।

इदानीमेकी*यमते*नैकैकभूमिप्रतिपक्षालम्बना अपि व्यवस्थाप्यन्ते— अनागम्य-संगृहीता प्रथमध्यानप्रतिपक्षालम्बना मार्गान्वयज्ञानाकारैः सम्प्रयुक्ताश्चत्वारः । एवं यावदाकिञ्चन्यायतनप्रतिपक्षालम्बना मार्गान्वयज्ञानाकारैः सम्प्रयुक्ता-श्चत्वार इत्येवमष्टाविंशतिरधिका भवन्ति । एवमष्टाविंशतिमधिकान् प्रक्षिप्य द्वापञ्चाशदशीतिर्भवन्ति । किं पुनः कारणं भवाग्रप्रतिपक्षालम्बना मार्गान्वय-ज्ञानाकारैः सम्प्रयुक्ताश्चत्वारो न गण्यन्ते ? आह—न भवाग्रसंगृहीतोऽनास्रवो मार्गो भवाग्रप्रतिपक्षोऽस्ति, प्रथमध्यानभूमिकस्त्वस्ति, यावदाकिञ्चन्या-यतनभूमिक इति । तस्मात् तद्भूमिप्रतिपक्षालम्बना एवोक्ताः, न भवाग्रप्रतिपक्षा-लम्बना इति ।

अपरे पुनर्व्याचक्षते—*येषां तु मार्गान्वयज्ञानमप्येकैकभूमिप्रतिपक्षालम्बन-मिष्टम् ।* यथा निरोधान्वयज्ञानमिष्टमित्यभिप्रायः । तेषां भावाग्रिकदुःख-समुदयान्वयज्ञानाकारैः सम्प्रयुक्ता अष्टौ । निरोधमार्गधर्मज्ञानाकारैः सम्प्रयुक्ता अष्टौ । निरोधान्वयज्ञानाकारैः सम्प्रयुक्ताः प्रथमध्याननिरोधा-लम्बनाश्चत्वारः । एवं यावद् भवाग्रनिरोधालम्बनाश्चत्वार इति द्वात्रिंशद्भवन्ति । एवं मार्गान्वयज्ञानाकारैरपि सम्प्रयुक्तास्तथैव द्वात्रिंशदिति कृत्वा । *अष्टाविंशति-मधिकान् प्रक्षिप्यानागम्यसंगृहीता अशीतिर्वज्रोपमा भवन्तीति* । तेषां हि ये हि कृत्स्नस्यान्वयज्ञानपक्षस्यालम्बनान्मार्गान्वयज्ञानाकारैः सम्प्रयुक्ताश्चत्वारस्ते न सन्ति । भवाग्रप्रतिपक्षालम्बनास्तु तत्स्थाने भवन्तीत्यतो अशीतिर्वज्रोपमा भवन्तीति ।

एवं यावच्चतुर्थध्यानसंगृहीताः । कथम् ? अष्टाविंशतिमधिकान् प्रक्षिप्य ध्यानान्तरसंगृहीता अशीतिर्वज्रोपमा भवन्ति । यथा ध्यानान्तरसंगृहीताः, एवं प्रथमद्वितीयतृतीयचतुर्थध्यानसंगृहीताः प्रतिध्यानमशीतिर्वज्रोपमा भवन्ति ।

पुनर्गोत्रेन्द्रियभेदात् भूयांसो भवन्ति ॥ ४४ ॥

आकाशानन्त्यायतनादिष्विति । भवाग्रवर्ज्येषु त्रिष्वारूप्येषु *यथाक्रमं चत्वारिंशत् द्वात्रिंशच्चतुर्विंशतिश्च भवन्ति* । कथं कृत्वा ? आकाशानन्त्यायतने तावदष्टाविंशत्यां वज्रोपमेष्वाकाशानन्त्यायतनप्रतिपक्षालम्बनात् मार्गान्वयज्ञानाकारैः सम्प्रयुक्ताँश्चतुरः प्रक्षिप्य यावदाकिञ्चन्यायतनप्रतिपक्षालम्बनाँश्चतुर इति द्वादश प्रक्षिप्य चत्वारिंशद्भवन्ति । एवं चतुर्विंशत्यां विज्ञानानन्त्यायतनप्रतिपक्षालम्बनाँश्चतुरः प्रक्षिप्य, आकिञ्चन्यायतनप्रतिपक्षालम्बनांश्चतुरः प्रक्षिप्य द्वात्रिंशद्भवन्ति । एवं विंशत्यामाकिञ्चन्यायतनप्रतिपक्षालम्बनाँश्चतुरः प्रक्षिप्य चतुर्विंशतिर्भवन्ति ।

आह—नन्वपदिष्टमधोभूमिप्रतिपक्षालम्बनं तु भवति, तस्यान्योन्यहेतुत्वादिति; अथ कस्मात् स्वभूम्यूर्ध्वभूमिप्रतिपक्षालम्बना एवोक्ता आकाशानन्त्यायतनादिसंगृहीताः, नाधोभूमिप्रतिपक्षालम्बना इति ? अत्रोच्यते—अविशेष्य नवभूमिकमन्वयज्ञानपक्षं मार्गमधोभूमिप्रतिपक्षालम्बनं भवतीत्युक्तम् । न पुनराकाशानन्त्यायतनादिसंगृहीतस्याधोभूमिप्रतिपक्षालम्बनम् । किं तर्हि ? स्वभूम्यूर्ध्वभूमिकप्रतिपक्षालम्बनमेव । तत्राविशेषरूपेणाधरालम्बनमन्वयज्ञानं भवति, न विशेषस्वरूपेण । स्वभूम्यूर्ध्वभूम्यालम्बनं तु विशेषरूपेणापि भवतीति ।

एष तु पूर्वको *वैभाषिकाणां* स्थापनापक्षः । सामान्यरूपेणैव सर्वमन्वयज्ञानपक्षमालम्बतेऽन्वयज्ञानमिति । तथा ह्या*चार्यसङ्घभद्रे*णोक्तम्—"सर्वं हि मार्गान्वयज्ञानं नवभूमिकान्वयज्ञानपक्षालम्बनम्" इति ।

अपरे त्वेवं व्याचक्षते—भावाग्रिकदुःखसमुदयान्वयज्ञानाकारैः सम्प्रयुक्ता अष्टौ, निरोधान्वयज्ञानाकारैः सम्प्रयुक्ता आकाशानन्त्यायतननिरोधालम्बनाश्चत्वारः, एवं यावद्भावाग्रिकनिरोधालम्बनाश्चत्वार इति षोडश, मार्गान्वयज्ञानाकारैरपि सम्प्रयुक्ता आकाशानन्त्यायतनप्रतिपक्षालम्बनाश्चत्वारः, एवं यावद्भवाग्रप्रतिपक्षालम्बनश्चत्वार इति षोडश । त एते द्विषोडश, पूर्वोक्ताश्चाष्टाविति चत्वारिंशदाकाशानन्त्यायतनसंगृहीता वज्रोपमा भवन्ति । विज्ञानानन्त्यायतनसंगृहीता द्वात्रिंशत् । आकाशानन्त्यायतननिरोधप्रतिपक्षालम्बनानष्टावपनीयेति आकिञ्चन्यायतनसंगृहीताश्चतुर्विंशतिः । विज्ञानानन्त्यायतननिरोधप्रतिपक्षालम्बनानप्यपरानष्टावपनीयेति । भवाग्रस्यापि हि तेऽधोभूमिकं प्रतिपक्षमार्गमाचक्षत इति ।

पुनर्गोत्रेन्द्रियभेदाद् भूयांसो भवन्तीति । कथम् ? ये यावदष्टौ सर्वप्रथमा उक्ताः, तेषाम् । यो भावाग्रिकदुःखालम्बनोऽनित्याकारसम्प्रयुक्तो वज्रोपमः,

यस्त्वसौ भावाग्रिको नवमः प्रकार उक्तो यस्य वज्रोपमेन प्रहाणम्,

तत्क्षयाप्त्या क्षयज्ञानम्,

तस्य पुनर्नवमस्य प्रकारस्य क्षयप्राप्त्या सह क्षयज्ञानमुत्पद्यते । वज्रोपसमाधेरनन्तरं पश्चिमो विमुक्तिमार्गः । अतएव तत्क्षयज्ञानं सर्वास्रवक्षयप्राप्तिसहजत्वात् प्रथमतः ।

अशैक्षोऽर्हन्नसौ तदा ।

उत्पन्ने च पुनः क्षयज्ञाने सोऽर्हत्त्वप्रतिपन्नकः अशैक्षो भवत्यर्हंश्चार्हत्त्वफलप्राप्तः । फलान्तरं प्रति पुनः शिक्षितव्याभावादशैक्षः । अत एव स परार्थकरणार्थत्वात्[1], सर्वसरागपूजार्हत्वाच्चार्हन्निति सिद्धं भवति ।

अन्ये सप्त पूर्वोक्ताः पुद्गलाः शैक्षा इति ।

तस्य षड्गोत्रभेदात् षोढा भेदः । एवं दुःखाद्याकारसम्प्रयुक्तानां त्रयाणां प्रत्येकं षोढा भेदः । तेषामपि प्रत्येकं मृदुमध्याधिमात्रेन्द्रियभेदाद्भेदः । यथा चैषां प्रत्येकं गोत्रेन्द्रियभेदाः, एवं भावाग्रिकसमुदयालम्बनानां चतुर्णां प्रत्येकं षड्गोत्रभेदात् षोढा भेदः । इन्द्रियभेदाच्च त्रिधा भेदः । यथा चैषामष्टानां गोत्रेन्द्रियभेदात् प्रत्येकं षोढा त्रिधा च भेदः, एवं सर्वेषामनागाम्यसंगृहीतानां ज्ञानाकारालम्बनभेदभिन्नानां यावदाकिञ्चन्यायतनसंगृहीतानां गोत्रेन्द्रियभेदाद् भेदः । अनया वर्तन्या योज्यः ।

एवं वा योज्यः—प्रथमे पक्षे द्वापञ्चाशदनागाम्यसंगृहीताः । यावद्विंशतिराकिञ्चन्यायतनसंगृहीता इत्यभिसमस्य चतुरशीतिरुत्तराणि त्रीणि शतानि वज्रोपमानां भवन्ति, तानि षड्गुणीकृत्य त्रिगुणीकृत्य च षट्सहस्राणि नवशतानि द्वादशोत्तराणि भवन्ति । द्वितीयपक्षे यत्रादितोऽशीतिः, यावदाकिञ्चन्यायतने चतुर्विंशतिरिति एकपिण्डतः षट्सप्तत्युत्तराणि पञ्चशतानि भवन्ति । गोत्रेन्द्रियभेदात् षड्गुणीकृत्य त्रिगुणीकृत्य च दशसहस्राणि अष्टषष्ट्युत्तराणि च त्रीणि शतानि वज्रोपमानां भवन्तीति ॥ ४४ ॥

अत एव तत्क्षयज्ञानमिति । कुतः ? इत्याह—*सर्वास्रवक्षयप्राप्तिसहजत्वात् प्रथमत* इति । यस्मात् सर्वास्रवक्षयप्राप्त्या सह जातं तत्प्रथमतो ज्ञानम् । तस्मात् क्षयज्ञानमित्युच्यते; मध्यपदलोपात् । नैरुक्तिविधानतो वा । सर्वग्रहणं स्रोतआपन्नादिज्ञानविशेषणार्थम् । प्रथमतोग्रहणमनुत्पादज्ञानादिविशेषणार्थम् । सङ्केतापेक्षया हि शब्दप्रवृत्तिः । *अत एव स* इति । स्वार्थपरिसमाप्तेः । स

---

१. परमार्थ०—का० ।

केन ते शैक्षाः ? आस्रवक्षयाय नित्यं शिक्षणशीलत्वाच्छिक्षात्रये । अधिशीलमधिचित्तमधिप्रज्ञं च । ताः पुनः शीलसमाधिप्रज्ञास्वभावाः ।

पृथग्जनोऽपि शैक्षः प्राप्नोति ? न; **यथाभूतं सत्याप्रज्ञानात् पुनश्चाप-शिक्षणात् ।** अत एव द्विरभिधानं सूत्रे—"शिक्षायां शिक्षते, शिक्षायां शिक्षत इति **शिवक** तस्माच्छैक्ष इत्युच्यते" इति । 'यः शिक्षत एव नापशिक्षते स शैक्षः' इत्यवधारणं यथा विज्ञायेत ।

प्रकृतिस्थ आर्यः कथं शिक्षणशीलः ? आशयतः । स्थिताध्वगवत्, प्राप्त्यनु-षङ्गतश्च शिक्षात्रयस्य ।

परार्थकरणार्हत्वादर्हन् । परार्थकरणयोग्यत्वादित्यर्थः । *सर्वसरागपूजार्हत्वाच्चेति* । सरागाः पृथग्जनशैक्षाः, तेषां सर्वेषां पूजामर्हतीत्यर्हन् । *सिद्धं भवतीति* । किं सिद्धं भवति ? इत्याह—*अन्ये सप्त पूर्वोक्ताः पुद्गलाः शैक्षा* इति । त्रयः फलस्थाश्चत्वारश्च प्रतिपन्नका उक्ताः । असावेवाशैक्ष इत्यवधारणादेतदन्ये आर्याः शैक्षा इति सिद्धम् ।

केन ते शैक्षा इति । केन कारणेन ते सप्त पुद्गलाः शैक्षा इत्युच्यन्ते ? इत्याह—*आस्रवक्षयाय नित्यं शिक्षणशीलत्वादिति* । शिक्षा शीलमेषामिति शैक्षाः । "शीलम्" (४.४.६१) "छत्रादिभ्यो णः (पा० सू० ४.४.६२) इति लक्षणात् । क्व शिक्षणशीलाः ? *शिक्षात्रये* । किं शिक्षात्रयम् ? *अधिशीलमधि-चित्तमधिप्रज्ञं च* । किंस्वभावास्ताः ? इत्याह—*ताः पुनः शीलसमाधिप्रज्ञास्वभावा* इति । शीले शिक्षा अधिशीलम्, एवं यावत्प्रज्ञायां शिक्षेत्यधिप्रज्ञमिति । "अव्ययं विभक्ति०" (पा० सू० २.१.६) इत्यव्ययीभावसमासः । शिक्षाक्रियाणां त्वव्यतिरेकाच्छीलादिस्वभावाः शिक्षा इति व्याचष्टे ।

पृथग्जनोऽपि शैक्षः प्राप्नोतीति । पृथग्जनोऽपि विनयोक्तासु शिक्षासु शिक्षत इति ? *न, यथाभूत सत्याप्रज्ञानात्* । नैतदेवम् ? यथाभूतं सत्यानां दुःखादीनां अप्रज्ञानादनवबोधात् । "तद्धि भिक्षवो दृष्टं यदार्यया प्रज्ञया" इति वचनात् । तथा हि सूत्रे अधिशीलमधिचित्तं वा शिक्षां विस्तरेणोक्त्वाह—"अधिप्रज्ञं शिक्षा कतमा ? इदं दुःखमार्यसत्यमिति यथाभूतं प्रजानाति, अयं दुःखसमुदयः, अयं दुःखनिरोधः, इयं दुःखनिरोधगामिनी प्रतिपदार्यसत्यम्" इति, *यथाभूत-सत्याप्रज्ञानात्* । यत्र च शिक्षिताः शीलादिषु, तत्र *पुनरपशिक्षणात्* । प्रातिमोक्षसंवरपरित्यागतः ऊष्मगतादिपरिहाणितश्चार्यः पुनर्यद्यपि किंचित् परित्यजति, न तु सर्वम् । न ह्यार्यस्य कदाचिदपि शिक्षात्रयं नास्तीति ।

अथ शैक्षा धर्माः कतमे ? शैक्षस्यानास्रवाः ।

अशैक्षाः कतमे ? अशैक्षस्यानास्रवाः ।

निर्वाणं कस्मान्न शैक्षम् ? अशैक्षपृथग्जनयोरपि तद्योगात् ।

कस्मान्नाशैक्षम् ? शैक्षपृथग्जनयोरपि तद्योगात् ।

त एते सर्व एवाष्टावार्यपुद्गला भवन्ति । प्रतिपन्नकाश्चत्वारश्च फले स्थिताः । तद्यथा—स्रोतआपत्तिफलसाक्षात्क्रियायै प्रतिपन्नकः स्रोतआपन्नः । एवं यावदर्हत्त्वफलसाक्षात्क्रियायै प्रतिपन्नकोऽर्हन्निति ।

नामत एतेऽष्टौ भवन्ति । द्रव्यतस्तु पञ्च । प्रथमः प्रतिपन्नकः, चत्वारश्च फलस्थाः । शेषाणां प्रतिपन्नकानां त्रिफलस्थाव्यतिरेकात् ।

अनुपूर्वाधिगमं प्रत्येवमुच्यते । भूयःकामवीतरागौ तु स्यातां दर्शनमार्गे सकृदागाम्यनागामिफलप्रतिपन्नकौ, न च स्रोतआपन्न-सकृदागामिनाविति ।

प्रकृतिस्थ आर्य इति । असमाहितावस्था सत्त्वानां प्रकृतिः, तत्रस्थ आर्यः पिण्डपातचारादिगतः । *न शिक्षणशील* इति । न शैक्षः स्यादित्यभिप्रायः । *आशयत* इति । छन्दतः । *स्थिताध्वगवत्* । अध्वग उच्यते योऽध्वानं गच्छति, संस्थितोऽप्यध्वग इत्युच्यते; गमनाशयस्यापरित्यागात् तद्वत् । *प्राप्त्यनुषङ्गतश्च* । शीलसमाधिप्रज्ञानां च प्राप्तयः प्रकृतिस्थस्याप्यनुषज्यन्ते । तस्मात् प्रकृतिस्थोऽपि नाशिक्षणशील एवेति ।

शैक्षाशैक्षनिर्देशप्रसङ्गेनेदमुच्यते—*अथ शैक्षा धर्माः कतमे* इत्यादि । *शैक्षस्यानास्रवा धर्माः* संस्कृतस्वभावाः । एवमशैक्षस्याशैक्षा धर्माः ।

निर्वाणं कस्मान्न शैक्षम् । यच्छैक्षेण प्राप्तमित्यभिप्रायः । *अशैक्षपृथग्जनयोरपि तद्योगादिति* । पृथग्जनोऽपि लौकिकमार्गप्राप्तेन निर्वाणेन युज्यते ।

प्रथमः प्रतिपन्नक इति । दर्शनमार्गस्थः । *शेषाणामिति* विस्तरः । *शेषाणां प्रतिपन्नकानां* सकृदागाम्यनागाम्यर्हत्त्वफलप्रतिपन्नकानां *त्रिफलस्थाव्यतिरेकात्* । स्रोतआपत्तिसकृदागाम्यनागामिफलस्थेभ्योऽव्यतिरेकात् । सकृदागामिप्रतिपन्नकादयः स्रोतआपन्नादिभ्यो नान्य इत्यर्थः ।

अनुपूर्वाधिगमं प्रत्येवमुच्यत इति । अनुपूर्वेण चतुःफलप्राप्तिं प्रत्युच्यते—द्रव्यत पञ्चेति । *भूयःकामवीतरागौ तु स्याताम्* । भूतोवीतरागः क्षीणषट्प्रकारः । कामवीतरागः क्षीणनवप्रकारः । *दर्शनमार्गे* दर्शनमार्गावस्थायां यथाक्रमं

द्विविधो हि भावनामार्ग उक्तः—लौकिकः, लोकोत्तरश्चेति। केनायं शैक्षः ? कुतो वैराग्यं प्राप्नोति ?

लोकोत्तरेण वैराग्यं भवाग्रात्,

न लौकिकेन। किं कारणम् ? तत ऊर्ध्वं लौकिकाभावात्, स्वभूमिकस्य वा प्रतिपक्षत्वात्। कस्मान्न प्रतिपक्षः ? तत्क्लेशानुशयितत्वात्। यो हि क्लेशो यत्र वस्तुन्यनुशेते, न तस्य तद्वस्तु प्रहाणाय संवर्तते। यस्य च यः प्रतिपक्षो न तत्र स क्लेशोऽनुशेत इति।

अन्यतो द्विधा ॥ ४५ ॥

भवाग्रादन्यतः सर्वतो भूमेर्लौकिकेनापि वैराग्यम्, लोकोत्तरेणापि ॥ ४५ ॥

तत्र पुनः—

लौकिकेनार्यवैराग्ये विसंयोगाप्तयो द्विधा।

लौकिकेन मार्गेणार्यवैराग्यं गच्छतो द्विविधा विसंयोगप्राप्तय उत्पद्यन्ते—लौकिक्यः, लोकोत्तराश्च।

लोकोत्तरेण चेत्येके,

सकृदागाम्यनागामिफलप्रतिपन्नक स्याताम्। न च स्रोतआपन्नसकृदागामिनौ। किं तर्हि ? तद्व्यतिरिक्तौ। तथा च सति द्रव्यतः सप्त भवन्ति—स्रोतआपत्तिसकृदागाम्यनागामिफलप्रतिपन्नकास्त्रयश्चत्वारश्च फलस्था इति अर्हत्त्वफलप्रतिपन्नक एकोऽनागामिफलस्थान्न व्यतिरिक्त इत्यवगन्तव्यम्।

द्विविधो हि भावनामार्ग उक्त इति। "द्विविधो भावनामार्गो दर्शनाख्यस्त्वनास्रवः" (अभि० को० ६.१) इति वचनात्।

तत्क्लेशानुशयितत्वादिति। यस्मात् तद्भूमिकः क्लेशस्तत्र लौकिके मार्गे आलम्बनतोऽनुशयितः। *यो हि क्लेश* इति विस्तरेण साधर्म्यवैधर्म्यदृष्टान्तं दर्शयति। यो यद्भूमिको मार्गः न स तद्भूमिकक्लेशप्रतिपक्षः; तत्क्लेशानुशयितत्वात्। असमाहिततद्भूमिकधर्मान्तरवत्। वैधर्म्येण तूपरिसामन्तकमार्गवदनास्रववत् प्रतिपक्षमार्गवद्वा। *लौकिकेनापि वैराग्यमिति*। उपरिभूमिसामन्तकेन। *लोकोत्तरेणापीति*। तत्प्रतिपक्षेण स्वाधरभूमिकेनानास्रवेण मार्गेण ॥ ४५ ॥

"*लौकिकेनार्यवैराग्ये*" इति। तद्यथा स्रोतआपन्नः शमथचरितः लौकिकेन मार्गेण वैराग्यं गच्छतः प्रतिप्रकारं *विसंयोगप्राप्तयः* सास्रवोऽनास्रवश्चोत्पद्यन्ते।

लोकोत्तरेणाप्येवमित्यपरे । किं कारणम् ?

त्यक्ते क्लेशासमन्वयात् ॥ ४६ ॥

यदि ह्यार्यमार्गेण वैराग्यं प्राप्नुवतो लौकिकी विसंयोगप्राप्तिर्नोत्पद्यते, एवं सति य आर्यमार्गेणाकिञ्चन्यायतनाद् वीतरागो ध्यानं निश्रित्येन्द्रियाणि सञ्चरति, स कृत्स्नपूर्वमार्गत्यागात् केवलफलमार्गलाभाच्च ऊर्ध्वभूमिक्लेशविसंयोगेनासमन्वागतः स्यात् । त्यक्ते च तस्मिन् पुनरपि तैः क्लेशैः समन्वागतः स्यादिति ॥ ४६ ॥

भवाग्रार्धविमुक्तोर्ध्वजातवत्[1] त्वसमन्वयः ।

असत्यामपि तु तस्यां[2] लौकिक्यां विसंयोगप्राप्तौ न तैः समन्वागमः स्यात् । तद्यथा भवाग्रादर्धप्रकारविमुक्तस्य असत्यामपि तु लौकिक्यां तद्विसंयोगप्राप्तौ त्यक्तायामपि चेन्द्रियसञ्चारेण लोकोत्तरायां न पुनस्तैः क्लेशैः समन्वागमो भवति ।

ध्यानं निश्रित्येति । यावच्छैक्षः षड्भूमीर्निश्रित्येन्द्रियाणि सञ्चरति, नारूप्यमिति । "अशैक्षो नव निश्रित्य भूमीः शैक्षस्तु षड्" (अभि० को० ६.६१) इति वचनात् । तेनाह—*यो ध्यानं निश्रित्येन्द्रियाणि सञ्चरति । स कृत्स्नपूर्वमार्गत्यागा*दारूप्यमार्गाणां मृद्विन्द्रियसंगृहीतानां पूर्वलब्धानां त्यागात् । *केवलफलमार्गलाभाच्च* केवलस्यानागामिफलस्य तीक्ष्णेन्द्रियस्वभावस्य लाभात् । "स विशेषं फलं त्यक्त्वा फलमाप्नोति वर्धयन्" (अभि० को० ६.६२) इति वचनात् । *ऊर्ध्वभूमिकक्लेशविसंयोगेन* आरूप्यावचरक्लेशविसंयोगेनासमन्वागतः स्यात् । अयं चापरो दोषः—*त्यक्ते च तस्मिन्*नूर्ध्वभूमिक्लेशविसंयोगे *तैः क्लेशै*रूर्ध्वभूमिकैः *समन्वागतः स्यादिति* ॥ ४६ ॥

"*भवाग्रार्धविमुक्तोर्ध्वजातवत् त्वसमन्वयः*" इति । अर्धेन विमुक्तोर्धविमुक्तः, भवाग्रादर्धविमुक्तो भवाग्रार्धविमुक्तः; ऊर्ध्वं जात ऊर्ध्वजातः, भवाग्रार्धविमुक्तश्चोर्ध्वजातश्च भवाग्रार्धविमुक्तोर्ध्वजातौ, तयोरिवेति भवाग्रार्धविमुक्तोर्ध्वजातवत् । समन्वयस्तैस्तस्येति वाक्यशेषः । तुशब्दः पूर्वदोषव्यावर्तनार्थम् ।

तमर्थं विवृण्वन्नाह—*असत्यामिति* विस्तरः । *असत्यामपि तस्य पुद्गलस्य लौकिक्यां विसंयोगप्राप्तौ न तैः क्लेशैः समन्वागमः स्यात् । तद्यथा भवाग्रार्धप्रकारविमुक्तस्येति* विस्तरः । तस्य हि लौकिकी भवाग्रार्धप्रकारविसंयोगप्राप्तिर्नास्ति; तत्प्रतिपक्षलौकिकमार्गाभावात् । *लोकोत्तरा च तद्विसंयोगप्राप्तिर्ध्यानं*

---

१. भवाग्राध०—का० ।

यथा च पृथग्जनस्य प्रथमध्यानभूमेरूर्ध्वं जातस्य कामावचरक्लेशविसंयोगप्राप्तित्यागान्न पुनस्तैः समन्वागमो भवतीत्यज्ञापकमेतत् ।

कतमया पुनर्भूम्या कुतो वैराग्यं भवति ?

अनास्रवेण वैराग्यमनागम्येन[1] सर्वतः ।। ४७ ।।

आभवाग्रात् ॥ ४७ ॥

अथ यः सामन्तकं निश्रित्याधरभूमिवैराग्यं प्राप्नोति, किमस्यानन्तर्यमागवत् सर्वे विमुक्तिमार्गाः सामन्तकाद् भवन्ति ? नेत्याह । किं तर्हि ?

ध्यानात् सामन्तकाद् वान्त्यो मुक्तिमार्गस्त्रिभूजये ।

नव ह्युपपत्तिभूमयः—सर्वकामधातुः, अष्टौ च ध्यानारूप्याः । तत्र यावत् द्वितीयध्यानवैराग्यं त्रिभूमिजयः । तस्मिन् पश्चिमो विमुक्तिमार्गः सामन्तकाद् भवति, ध्यानाद्वा मौलात् ।

नोर्ध्वं सामन्तकात्,

निश्रित्येन्द्रियसञ्चारेण *त्यक्ता स्यात् । न च पुनस्तैर्भावाग्रिकक्लेशप्रकारैः समन्वागमो भवतीत्यभ्युपगम्यते भवाग्र*- । तद्वदस्य स्यात् ।

यथा च पृथग्जनस्य प्रथमध्यानभूमेरूर्ध्वं जातस्य द्वितीयध्यानाद्युपपन्नस्य । *कामावचरक्लेशविसंयोगप्राप्तित्यागात्* । प्रथमध्यानभूमिकाया विसंयोगप्राप्तेः "भूमिसञ्चारहानिभ्यां ध्यानाप्तं त्यज्यते शुभम् । तथारूप्याप्तम्" (अभि० को० ४.४०) इति नियमात् त्यागो भवति । तस्मान्न *पुनस्तैः* कामावचरैः *क्लेशैः समन्वागमो भवतीत्यभ्युपगम्यते । तद्वदस्यापि पुद्गलस्य स्यात्* । पृथग्जनस्येति ग्रहणम्—यस्मादार्यस्य लौकिकेन मार्गेण कामधातोरूर्ध्वं वा वैराग्यं गच्छतः क्लेशविसंयोगप्राप्तिर्लौकिकी लोकोत्तरा च भवति, तत्र या लौकिकी कामावचरक्लेशविसंयोगप्राप्तिः, तस्याः प्रथमध्यानभूमेरूर्ध्वजातस्य भूमिसञ्चारेण त्यागो भवति, न लोकोत्तरायाः; "आर्ये तु फलाप्त्युत्तप्तिहानिभिः" (अभि० को० ४.४०) इति त्यागनियमात् । तस्यां च सत्यां लोकोत्तरायां प्रथमध्यानादूर्ध्वं जातस्याप्यार्यस्य न पुनस्तैः समन्वागमो सम्भवति, न त्वेवं पृथग्जनस्येति पृथग्जनग्रहणम् । *तस्मादज्ञापकमेतत्* । "त्यक्ते क्लेशासमन्वयात्" (अभि० को० ६.५६) इति यदुक्तम् ।

"*सर्वतः*" इति । स्वोर्ध्वाधोभूमितः । तस्य सास्रवानास्रवत्वात् ॥ ४७ ॥

---

1. ०गाम्येन—का० ।

त्रिभूमिजयादूर्ध्वं मौलादेव, न पुनः सामन्तकात्; उपेक्षेन्द्रियसामान्यात्। त्रिषु हि ध्यानेषु सामन्तकमौलयोरिन्द्रियभेदात् कश्चिन्न शक्नोति मौलं ध्यानं प्रवेष्टुम्; इन्द्रियसञ्चारस्य दुष्करत्वात्।

अतस्त्रिभूमिवैराग्ये ध्यानसामन्तकादप्यन्यो विमुक्तिमार्गो भवति।

"अनास्रवेण वैराग्यमनागम्येन सर्वतः" (अभि०को० ६.४७), इत्युक्तम्, अन्यैस्तु नोक्तम्। अत उच्यते—

आर्यैरष्टाभिः स्वोर्ध्वभूजयः ॥ ४८ ॥

अनास्रवैरष्टाभिर्ध्यानध्यानान्तराख्यैः स्वस्या ऊर्ध्वायाश्च भूमेर्वैराग्यं नाधरायाः, वीतरागत्वात्। तत्र लोकोत्तरा आनन्तर्यविमुक्तिमार्गाः सत्यालम्बनत्वात् सत्याकारप्रवृत्ता इति सिद्धम् ॥ ४८ ॥

विमुक्त्यानन्तर्यपथा लौकिकास्तु यथाक्रमम्।
शान्ताद्युदाराद्याकाराः,

विमुक्तिमार्गाः शान्ताद्याकाराः, आनन्तर्यमार्गा औदारिकाद्याकाराः। ते पुनर्यथाक्रमम्—

उत्तराधरगोचराः ॥ ४९ ॥

विमुक्तिमार्गा उत्तरां भूमिं शान्ततः प्रणीततो निःसरणतश्चाकारयन्ति

---

*उपेक्षेन्द्रियसामान्यादि*ति। चतुर्थध्यानादिसमापत्तितत्सामन्तकयोरुपेक्षेन्द्रियं तुल्यमिति। *कश्चिन्न शक्नोती*ति मृद्विन्द्रियः। *इन्द्रियसञ्चारस्य दुष्करत्वा*दिति। उपेक्षेन्द्रियानन्तरं सुखेन्द्रियस्य सौमनस्येन्द्रियस्य वा दुष्करत्वात्।

मौलसामन्तकयोरुपेक्षेन्द्रियसामान्ये सति किमर्थं मौलादेवान्त्यं *विमुक्तिमार्गं सम्मुखीकरोति*। न सामन्तकात् वीतरागभूमिबाहुमान्यात्। *नाधराया वीतरागत्वादि*ति। तत्सामन्तकेन बाधो वैराग्यस्य कृतत्वात्। *सत्याकारप्रवृत्ता* इति। अनित्याद्याकारप्रवृत्ताः ॥ ४८ ॥

सम्भवत इति। यद्यधरां भूमिमौदारिकतः पश्यन्त्यूर्ध्वं तद्विपर्ययेण शान्तत इत्येके। अपरे व्याचक्षते—शान्ताद्याकाराणां कदाचिदेकेनाप्याकारेणाकार-

सम्भवतः । आनन्तर्यमार्गा अधरां भूमिमौदारिकतो दुःखिलतः स्थूलभित्तिकतश्च । अशान्तत्वादौदरिकतः; महाभिसंस्कारतरत्वात् । अप्रणीतत्वात् ; दुःखिलतो बहुदौष्ठुल्यतरत्वेन प्रतिकूलभावात् । स्थूलभित्तिकतः; तयैव तद्भूम्यनिःसरणात् भित्त्यनिःसरणवत् । तेषां[1] विपर्ययेण शान्तप्रणीतनिःसरणाकाराः ॥ ४९ ॥

गतमानुषङ्गिकम् ॥

इदं[2] वक्तव्यम्—अथ क्षयज्ञानादनन्तरं किमुत्पद्यते ?

यद्यकोप्यः क्षयज्ञानादनुत्पादमतिः,

अकोप्यधर्मा चेदर्हन्भवति क्षयज्ञानात् समनन्तरमनुत्पादज्ञानमस्योत्पद्यते ।

न चेत् ।

क्षयज्ञानमशैक्षी वा दृष्टिः,

यन्ति, नावश्यं समस्तैरिति । *औदारिकत* इति । औदारिकमित्यौदारिकतः । *अशान्तत्वादौदारिकतः* । कथमशान्ताधरा भूमिः ? *महाभिसंस्कारतरत्वात्* । इदं महाभिसंस्कारं यत्नसाध्यं मार्गेण सहाधरं स्थानम् , इदमपि महाभिसंस्कारं सह मार्गेणोर्ध्वं स्थानम् , इदमनयोरतिशयेनेति महाभिसंस्कारतरम् , तद्भावः तस्मात् । खिलम् दुर्भेदम् , कुत्सितं खिलं दुःखिलमिति *दुःखिलतः* । कथम-*प्रणीताधरा भूमिः* ? इत्याह— *बहुदौष्ठुल्यतरत्वेन प्रतिकूलभावादिति* । दौष्ठुल्यं कायचित्तयोरकर्मण्यता क्लेशानुकूलतेत्यर्थः । बहुदौष्ठुल्यमस्येति बहुदौष्ठुल्यम् । इदमपि बहुदौष्ठुल्यं समार्गमधरं स्थानम् , इदमपि बहुदौष्ठुल्यं समार्गमूर्ध्वं स्थानम् , इदमनयोरतिशयेनेति बहुदौष्ठुल्यतरम् , तद्भावात् । *स्थूलभित्तिकत* इति । स्थूलभित्तिकभावेन । *तयैव तद्भूम्यनिःसरणात्* । तयैव भूम्या तस्या एव भूमेरनिःसरणात् । *भित्त्यनिःसरणवत्* । यथा यथा तयैव भित्त्या तस्या एव भित्तेरनिःसरणम् , तदवष्टब्धाकाशदेशात् । *तेषां विपर्ययेणेति* । अल्पाभिसंस्कारत्वादल्पदौष्ठुल्यतरत्वेनाप्रतिकूलभावात् तया भूम्या तद्भूमिनिःसरणाद् यथाक्रमं शान्तप्रणीतनिःसरणाकाराः ॥ ४९ ॥

गतमानुषङ्गिकम् । *इदं वक्तव्यमिति* । क्षयज्ञानान्तराभावि वक्तव्यम् । अनुषङ्गेण तु लौकिकानन्तर्यविमुक्तिमार्गलक्षणनिर्देश इति ।

"यद्यकोप्यः क्षयज्ञानादनुत्पादमतिः" इति । अपुनःकर्तव्यताज्ञानम् । तदस्य

---

१. एषां—का० । २. इदं तु—का० ।

न चेदकोप्यधर्मा भवति क्षयज्ञानात् क्षयज्ञानमेवोत्पद्यते, अशैक्षी वा सम्यग्दृष्टिः। न त्वनुत्पादज्ञानम्; परिहाणिसम्भवात्।

किं पुनरकोप्यधर्मणः सा नैवोत्पद्यते ?

सर्वस्य साऽर्हतः ॥ ५० ॥

अकोप्यधर्मणोऽप्यनुत्पादज्ञानात् कदाचिदनुत्पादज्ञानमेवोत्पद्यते, कदाचिद-शैक्षी सम्यग्दृष्टिः ॥ ५० ॥

यान्येतानि चत्वारि फलान्युक्तानि, कस्यैतानि फलानि ? श्रामण्यफलानि।

किमिदं श्रामण्यं नाम ?

श्रामण्यममलो मार्गः,

अनास्रवो मार्गः श्रामण्यम्। तेन हि श्रमणो भवति; क्लेशसंशमनात्। "शमिता अनेन भवन्ति अनेकविधाः पापका अकुशला धर्मा विस्तरेण यावज्जरा-मरणीयाः, स्तस्माच्छ्रमण इत्युच्यते" इति सूत्रे वचनात्। अनत्यन्तशमनान्न पृथग्जनः परमार्थश्रमणः।

तस्य पुनः श्रामण्यस्य ?

संस्कृतासंस्कृतं फलम्।

संस्कृतासंस्कृतानि हि श्रामण्यफलानि पुनश्चत्वार्युक्तानि सूत्रे। अपि तु

एकान्ननवतिस्तानि,

कानि पुनस्तानि ?

मुक्तिमार्गाः सह क्षयैः ॥ ५१ ॥

दर्शनहेयप्रहाणायाष्टावानन्तर्यमार्गाः, अष्टौ विमुक्तिमार्गा भावनाहेयप्रहाणाय। नवसु भूमिषु प्रत्येकं नवप्रकाराणां क्लेशानां प्रहाणाय तावन्त एवानन्तर्यमार्गाः, विमुक्तिमार्गाश्च।

तदानीमुत्पद्यते। *परिहाणिसम्भवादिति*। क्लेशोत्पादावकाशोऽस्तीति नास्या-नुत्पादज्ञानमुत्पद्यते। किं कारणम् ? परिहाणिसम्भवात्। यस्मादस्य परिहाणिः सम्भवति। यस्य पुनरनुत्पादज्ञानम्, न तस्य परिहाणिरिति ॥ ५० ॥

तेन हि श्रमणो भवतीति। श्रामण्ययोगाच्छ्रमणो भवति। यथा शौक्ल्य-योगाच्छुक्लः पट इति। *शमयति क्लेशानिति* श्रमणः।

तत्रानन्तर्यमार्गाः श्रामण्यम्, विमुक्तिमार्गाः संस्कृतानि श्रामण्यफलानि। तन्निष्यन्दपुरुषकारफलत्वात्। तेषां क्लेशानां प्रहाणान्यसंस्कृतानि श्रामण्यफलानि। एवमेकान्ननवतिर्भवन्ति ॥ ५१ ॥

एवं तर्हि बुद्धस्योपसंख्यानं कर्तव्यं जायते? न कर्तव्यम्। यद्यपि भूयांसि फलानि,

चतुष्फलव्यवस्था तु पञ्चकारणसम्भवात्।

यस्यां हि प्रहाणमार्गावस्थायां पञ्च कारणानि सम्भवन्ति, तस्यां किल भगवता फलं व्यवस्थापितम्।

कतमानि पञ्च?

पूर्वत्यागोऽन्यमार्गाप्तिः क्षयसंकलनं फले ॥ ५२ ॥

ज्ञानाष्टकस्य लाभोऽथ षोडशाकारभावना।

१. पूर्वमार्गत्यागः, २. अपूर्वमार्गाप्तिः; प्रतिपन्नकफलमार्गत्यागलाभात्। ३. प्रहाणसंकलनम्; सर्वस्यैकप्राप्तिलाभात् ॥ ५२ ॥

तन्निष्यन्दपुरुषकारफलत्वादिति। तस्य श्रामण्यस्यानन्तर्यमार्गलक्षणस्य यथायोगं विमुक्तिमार्गा असंस्कृतानि च निष्यन्दफलत्वात् पुरुषकारफलत्वाच्च। विमुक्तिमार्गास्तस्य निष्यन्दफलं पुरुषकारफलं च। असंस्कृतानि पुरुषकारफलमेव।

"*यद्बलाज्जायते यत् तत् फलं पुरुषकारजम्*" (अभि० को० २.५८) यद्बलात् प्राप्यते च यत् तच्च पुरुषकारफलमिति कृत्वा ॥ ५१ ॥

एवं तर्हीति विस्तरः। यथा पृथग्जनस्य पाणिनेः प्रवचने उपसंख्यानं क्रियते, एवं सर्वज्ञस्यापि बुद्धस्योपसंख्यानं कर्तव्यमुपजायत इति वाक्यार्थः।

पूर्वमार्गत्याग इति विस्तरः। *पूर्वमार्गत्यागः, प्रतिपन्नकमार्गत्यागात्। अपूर्वमार्गप्राप्तिश्च फलमार्गलाभादिति। सर्वस्यैकप्राप्तिलाभादिति*। सर्वस्य दर्शनहेयप्रहाणस्यैका भावनामार्गसंगृहीता प्राप्तिः स्रोतआपत्तिफलप्राप्तिकाले लभ्यते। तथा सकृदागामिफलप्राप्तिकाले दर्शनहेयप्रहाणस्य षड्विधभावनामार्गहेयप्रहाणस्य च सर्वस्यैका सकृदागामिफलसंगृहीता प्राप्तिर्लभ्यते। एवमनागाम्यर्हत्त्वफलयोरपि योज्यम् ॥ ५२ ॥

४. युगपदष्टज्ञानलाभश्चतुर्विधानां धर्मान्वयज्ञानाम् । ५. षोडशाकार-भावना अनित्याद्याकाराणाम् । इमानि हि पञ्च कारणानि फले फले भवन्ति ।

यद्यनास्रवो मार्गः श्रामण्यम् , कथं लौकिकमार्गप्राप्तं फलद्वयं श्रामण्यफलं युज्यते ?

लौकिकाप्तं तु मिश्रत्वानास्रवाप्तिः धृतेः फलम् ।। ५३ ।।

न हि तत्र लौकिकमार्गफलमेवप्रहाणं सकृदागामिफलं वा भवति, अनागामि-फलं वा । किं तर्हि ? दर्शनमार्गफलमपि प्रहाणं तत्र मिश्रीक्रियते; सर्वस्य तत्फलसंगृहीतैकविसंयोगप्राप्तिलाभात् । अत एव हि सूत्र उक्तम्—"सकृदा-गामिफलं कतमत् ? यत् त्रयाणां संयोजनानां प्रहाणं रागद्वेषमोहानां च तनुत्व-मिति । अनागामिफलं कतमत् ? यदुत पञ्चानामवरभागीयानां संयोजनानां प्रहाणम्" इति । अनास्रवया च विसंयोगप्राप्त्या तत्प्रहाणं सन्धार्यते । तद्-बलेन परिहीणात्[1] । अतोऽप्यस्य मरणं युक्तं श्रामण्यफलम् ॥ ५३ ॥

चतुर्विधानां धर्मान्वयज्ञानामिति । सत्यभेदाच्चतुर्विधानां धर्मज्ञानानामन्वय-ज्ञानानां च तथैव चतुर्विधानामिति । *युगपदष्टज्ञानलाभः* । *लौकिकमार्गप्राप्तं फलद्वयमिति* । सकृदागामिफलमनागामिफलं च । तद्धि लौकिकेनापि मार्गेण प्राप्तं सम्भवति । *तत्कथं श्रामण्यस्यानास्रवमार्गलक्षणस्य फलं युज्यते ?*

दर्शनमार्गफलमपि प्रहाणमिति । अपिशब्दाद् भावनामार्गफलमपि प्रहाणं गृह्यते । तस्य द्विप्रकारस्यापि प्रहाणस्य सकृदागामिफलसंगृहीता अनागामिफल-संगृहीता वा एका प्राप्तिर्लभ्यते । तस्माद्दर्शनमार्गफलप्रहाणयोगादसंस्कृतं सकृदागामिफलमनागामिफलं वा श्रामण्यफलं भवति । *यत् त्रयाणां संयोजनानां प्रहाणमिति* । त्रिसंयोजनप्रहाणं दर्शनमार्गेण । पञ्चावरभागीयैकदेशानां सत्कायदृष्टिशीलव्रतपरामर्शविचिकित्सानां दर्शनमार्गेणैव प्रहाणम् । तस्य प्रहाणस्य सकृदागाम्यनागामिफलत्वे । किम् ? कृतः प्रक्षेपः । तेन ज्ञायते—प्रहाणमिश्रीकरणादेवमुक्तं *भगवतेति* । *तद्बलेन परिहीणादिति* ।

"लौकिकेनार्यवैराग्ये विसंयोगाप्तयो द्विधा" (अभि० को० ६.४६) इति तत्रानास्रवया विसंयोगप्राप्त्या तत्प्रहाणं यल्लौकिकमार्गसम्प्राप्तं सन्धार्यते ।

१. परिहीणामरणात्—का० ।
अभि० को० ३ : १५

यदेव चैतच्छ्रामण्यमुक्तम्,

ब्राह्मण्यम्, ब्रह्मचक्रं च तदेव,

क्लेशानां वाहनाद् ब्राह्मण्यम् । ब्रह्मचक्रं तु

ब्रह्मवर्तनात् ।

अनुत्तरब्राह्मण्ययोगात् भगवान् ब्रह्मा । "एष हि भगवान् ब्रह्मा इत्यपि, शान्तः शीतीभूत इत्यपि" इति सूत्रात् । तस्येदं चक्रमिति ब्राह्मम्; तेन प्रवर्तितत्वात् ।

धर्मचक्रं तु दृङ्मार्गः,

चङ्क्रमणाच्चक्रम्, तत्साधर्म्याद् दर्शनमार्गो धर्मचक्रम् ।

कथमस्य साधर्म्यम् ?

आशुगत्वाद्यरादिभिः ॥ ५४ ॥

आशुगत्वात्, त्यजनक्रमणात्, अजितजयजिताध्यवसनाद्, उत्पतन-

प्राप्तियोगेनावश्यमुपतिष्ठत इत्यर्थं । *म्रियते न फलभ्रष्ट* इति । तदभावे हि लौकिकस्येव परिहीणस्य मरणं स्यात् । तद्बलेनेति । अनास्रवविसंयोगप्राप्तिबलेनेत्यर्थः । सैव च वर्तमानलौकिकमार्गोपजनितानास्रवा प्राप्तिरनागतश्चाष्टाङ्ग आर्यमार्गो लौकिकबलेन प्राप्यमाणः संस्कृतं श्रामण्यफलं व्यवस्थाप्यमानं न विरुध्यते । सूत्रे त्वसंस्कृतं श्रामण्यफलमुद्ग्राह्यते; प्राधान्यात् । संस्कृतमप्यत्रेष्टव्यमिति ॥ ५३ ॥

*क्लेशानां वाहनाद् ब्राह्मण्यमि*ति । वाहिता अनेनानेकविधाः पापका अकुशला धर्मा इति ब्राह्मणः । तद्भावो ब्राह्मण्यम् = अनास्रवो मार्गः । कथं ब्रह्मचक्रम् ? इत्याह—*ब्रह्मचक्रं तु ब्रह्मवर्तनादि*ति । यस्माद् ब्रह्मणा प्रवर्तितम्, तस्मात् ब्रह्मचक्रमिति । *अनुत्तरब्राह्मण्ययोगादि*ति । अनुत्तरानास्रवमार्गयोगादित्यर्थः । *एष हि भगवान् ब्रह्मे*ति एतदुदाहरणम् । जीवकेनोक्तमेतत् ।

"*आशुगत्वाद्यरादिभिः*" इति । आशुगत्वादिभिररादिभिश्चेत्यर्थः । *आशुगत्वादि*ति विस्तरः । इदं मार्गस्य चक्ररत्नेन साधर्म्यमुच्यते । यथा चक्ररत्नमाशुगम्, एवं दर्शनमार्गः । पञ्चदशभिश्चित्तक्षणैः सत्याभिसमयादाशुग इति । *त्यजनक्रमणात्* । यथा तदन्यं देशं त्यजत्यन्यं देशं क्रामति, एवमयमानन्तर्यमार्गं त्यजति विमुक्तिमार्गं क्रामति सम्मुखीभावतः । सत्यान्तरत्यजनक्रमणाद्वा ।

निपतनाच्च । एवमाशुगत्वादिभिः अरादिभिः साधर्म्यादार्याष्टाङ्गो मार्गश्चक्रमिति भदन्तघोषकः ।

सम्यग्दृष्टि-संकल्प-व्यायाम-स्मृतयो ह्यरस्थानीयाः, सम्यग्वाक्कर्मान्ताजीवा नाभिस्थानीयाः, समाधिर्नेमिस्थानीय इति दर्शनमार्गो धर्मचक्रमिति ।

कुत एतत् ? आर्यकौण्डिन्यस्य तदुत्पत्तौ "प्रवर्तितं धर्मचक्रम्" इति वचनात् ।

अजितजयजिताध्यावसनात् । यथा तदजितानि ग्रामनिगमादीनि जयति, जितानि चाध्यावसति, एवमयमानन्तर्यमार्गेणाजितान् सत्कायदृष्ट्यादीन् क्लेशान् जयति; तत्प्राप्तिच्छेदात् । जितांश्चाध्यावसति विमुक्तिमार्गेण; क्लेशविसंयोग-प्राप्तिसहोत्पादात् । *उत्पतननिपतनाच्च* । यथा च तत् क्वचिदुत्पतति क्वचिन्निपतति, एवमयमानन्तर्यविमुक्तिमार्गाणां पुनःपुनः सम्मुखीभावात् । कामादिदुःखादिसत्यालम्बनतो वा यथायोगमुत्पतति, निपतति च । रूपारूप्य-धात्वालम्बनादुत्पतति, कामधात्वालम्बनान्निपततीति ।

सम्यग्दृष्टिरिति विस्तरः । इह शीलं प्रतिष्ठाय समाधिलाभः, समाधि-लाभात् प्रज्ञा यथाभूतं भाव्यत इत्यतः *सम्यग्वाक्कर्मान्ताजीवा नाभिस्थानीयाः ।* सम्यग्दृष्ट्यादीनां तत्प्रतिबद्धवृत्तित्वात् शीलमाधारभूतमिति कृत्वा । *समाधि-र्नेमिस्थानीयः ।* तेनेतरेषामुपग्रहात् । *सम्यग्दृष्ट्यादयोऽरस्थानीयाः ।* अरवद्-तश्चामुतश्च प्रवृत्तत्वात् । *कुत एतदि*ति । किं स्वमतमेतद्वैभाषिकाणां दर्शनमार्गो धर्मचक्रमिति, आहोस्विदागमत इति ? *तदुत्पत्तौ प्रवर्तितमि*ति । दर्शनमार्गोत्पत्तौ प्रवर्तितं धर्मचक्रमिति सूत्रे वचनात् । कथम् ? "भगवान् वाराणस्यां विहरति स्म ऋषिपतने मृगदावे । तत्र भगवान् पञ्चकान् भिक्षूनामन्त्रयते स्म—'इदं दुःखमार्यसत्यमिति भिक्षवः पूर्वमननुश्रुतेषु धर्मेषु योनिशोमनसि-कुर्वतश्चक्षुरुदपादि, ज्ञानम्, विद्या, बुद्धिरुदपादि । अयं दुःखसमुदयः···अयं दुःखनिरोधः···इयं दुःखनिरोधः···इयं दुःखनिरोधगामिनी प्रतिपदार्यसत्यमिति पूर्वमननुश्रुतेषु धर्मेषु योनिशोमनसिकुर्वतश्चक्षुरुदपादि, ज्ञानम्, विद्या, बुद्धिरुदपादि । तत् खलु दुःखमार्यसत्यमभिज्ञया परिज्ञातव्यं मयेति पूर्वमननु-श्रुतेषु धर्मेषु योनिशोमनसिकुर्वतश्चक्षुरुदपादीति पूर्ववत् । तत् खलु दुःखसमुदय आर्यसत्यमभिज्ञया प्रहातव्यं मयेति पूर्वमननुश्रुतेषु धर्मेषु पूर्ववत् । तत् खलु दुःखनिरोध आर्यसत्यमभिज्ञया साक्षात्कर्तव्यं मयेति पूर्वमननुश्रुतेषु धर्मेषु पूर्ववत् । तत् खलु दुःखनिरोधगामिनी प्रतिपदार्यसत्यमभिज्ञया भावयितव्यं

कथं तत् त्रिपरिवर्तं द्वादशाकारं च ? इदं दुःखमार्यसत्यम्, तत् खलु परिज्ञेयम्, तत् खलु परिज्ञातम्—इत्येते त्रयः परिवर्ताः । एकैकस्मिंश्च परिवर्ते चक्षुरुदपादि, ज्ञानम्, विद्या, बुद्धिरुदपादि—इत्येते द्वादशाकाराः । प्रतिसत्यमेवं

मयेति पूर्वमननुश्रुतेषु धर्मेषु पूर्ववत् । तत् खलु दुःखमार्यसत्यमभिज्ञया परिज्ञातं मयेति पूर्वमननुश्रुतेषु धर्मेषु पूर्ववत् । तत् खलु दुःखसमुदय आर्यसत्यमभिज्ञया प्रहीणं मयेति पूर्वमननुश्रुतेषु धर्मेषु पूर्ववत् । तत् खलु दुःखनिरोध आर्यसत्यमभिज्ञया साक्षात्कृतं मयेति पूर्वमननुश्रुतेषु धर्मेषु पूर्ववत् । तत् खलु पुनर्दुःखनिरोधगामिनी प्रतिपदार्यसत्यमभिज्ञया भावितं मयेति पूर्वमननुश्रुतेषु धर्मेषु पूर्ववत् । यावच्च मम भिक्षव एषु चतुर्ष्वार्यसत्येष्वेवं त्रिपरिवर्तं द्वादशाकारं न चक्षुरुदपादि, न ज्ञानम्, न विद्या, न बुद्धिरुदपादि; न तावदहमस्मात् सदेवकाल्लोकात् समारकात् सब्रह्मकात् सश्रमणब्राह्मणिकायाः प्रजायाः सदेवमानुषासुराया मुक्तो निःसृतो विसंयुक्तो विप्रयुक्तो विपर्यासापगतेन चेतसा बहुलं व्यहार्षम् । न तावदहमनुत्तरां सम्यक्सम्बोधिमभिसम्बुद्धोऽस्मीत्यभ्यज्ञासिषम् । यतश्च मम भिक्षव एषु चतुर्ष्वार्यसत्येष्वेवं त्रिपरिवर्तं द्वादशाकारं चक्षुरुदपादि, यावद् बुद्धिरुदपादि । ततोऽहमस्मात् सदेवकाद्यावत् विप्रयुक्तो विपर्यासापगतेन चेतसा बहुलं व्यहार्षम् । ततोऽहमनुत्तरां सम्यक्सम्बोधिमभिसम्बुद्धोऽस्मीति अभ्यज्ञासिषम्' । अस्मिन् खलु पुनर्धर्मपर्याये भाष्यमाणे आयुष्मतः *कौण्डिन्यस्य* विरजो विगतमलं धर्मेषु धर्मचक्षुरुत्पन्नमशीतेश्च देवतासहस्राणाम् । तत्र भगवानायुष्मन्तं कौण्डिन्यमामन्त्रयते स्म—'आज्ञातस्ते कौण्डिन्य धर्मः' ? 'आज्ञातो मे भगवन् !' 'आज्ञातस्ते कौण्डिन्य धर्मः' ? 'आज्ञातो मे सुगत !' 'आज्ञाता आयुष्मता कौण्डिन्येन धर्मः' इति भौमा यक्षाः शब्दमुदीरयन्ति घोषमनुश्रावयन्ति । एतन्मार्षा भगवता वाराणस्यां ऋषिपतने मृगदावे त्रिपरिवर्तद्वादशाकारं धर्मचक्रं प्रवर्तितम् । अप्रवर्तितपूर्वं श्रमणेन वा ब्राह्मणेन वा वा देवेन वा मारेण वा ब्रह्मणा वा केनचित् पुनर्लोके सहधर्मेण बहुजनहिताय" ( ) इति विस्तरः ।

तदेवमार्यस्य *कौण्डिन्यस्य दर्शनमार्गे उत्पन्ने* देवताभिरुक्तं भगवता प्रवर्तितं धर्मचक्रमिति । सूत्रवचनात् दर्शनमार्गो धर्मचक्रमिति गम्यते ।

कथं त्रिपरिवर्तमिति विस्तरः । *इदं दुःखमार्यसत्यमित्येकः* परिवर्तः । *तत् खलु परिज्ञातव्यमिति* द्वितीयः । *तत् खलु परिज्ञातमिति* तृतीयः । इत्येते त्रयः *परिवर्ताः । एकैकस्मिन् परिवर्ते* इदं दुःखमित्यस्मिंश्चक्षुरुदपादि *ज्ञानं विद्या*

भवन्ति। त्रिकद्वादशकसाधर्म्यात्तु त्रिपरिवर्तं द्वादशाकारमुक्तम्। द्वयसप्तस्थान-कौशलदेशनावत्[1]।

एभिश्च परिवर्तैर्दर्शन-भावनाशैक्षमार्गा यथासंख्यं दर्शिता इति वैभाषिकाः।

बुद्धिरुदपादीति चत्वार आकाराः, परिज्ञातव्यमित्यस्मिन् पुनश्चत्वारः, परिज्ञात-मित्यस्मिन् पुनरपि चत्वारः—इत्येते द्वादशाकाराः। तत्र प्रत्यक्षार्थत्वादनास्रवा प्रज्ञा चक्षुः। निःसंशयत्वाज्ज्ञानम्। भूतार्थत्वाद् विद्या। विशुद्धत्वाद् बुद्धिः; विशुद्धा धीर्बुद्धिरिति निरुक्तेः। पुनर्बाह्यकानां सत्येषु दर्शनं कुदृष्टिविचिकित्सा-विद्यानामप्रतिपक्षः सास्रवं चेति ततो विशेषणार्थं चक्षुरादिग्रहणम्, पुनस्त्रिषु परिवर्तेषु प्रथमं दर्शनं चक्षुः। यथादृष्टव्यवचारणं ज्ञानम्। यावद्भाविकता-मुपादाय विद्या; यावद्द्वियमनग्रहणात्। यथावद्भाविकतामुपादाय बुद्धिः; यथाभूतार्थावबोधात्। पुनरननुश्रुतेषु धर्मेष्वानुमानिकज्ञानप्रतिषेधार्थं चक्षु-रित्याह। आधिमोक्षिकज्ञानप्रतिषेधार्थं ज्ञानमिति। आभिमानिकज्ञानप्रतिषेधार्थं विद्येति। सास्रवप्रतिषेधार्थं बुद्धिरिति। *प्रतिसत्यमेव भवन्तीति*। अयं दुःख-समुदय आर्यसत्यम्, तत् खलु प्रहातव्यम्, तत् खलु प्रहीणमित्येते त्रयः परिवर्ताः। एकैकस्मिं परिवर्ते चक्षुरुदपादि, ज्ञानम्, विद्या, बुद्धिरित्येते द्वादशाकाराः। एवं निरोधमार्गसत्ये अपि योज्ये। आह—यदि प्रतिसत्यमेवं भवन्ति, त्रयः परिवर्ता द्वादश चाकारा, द्वादश परिवर्ताः अष्टचत्वारिंशच्चाकाराः प्राप्नुवन्ति, कस्मात् 'त्रिपरिवर्तं द्वादशाकारम्' इत्युक्तम्? अत उच्यते—*त्रिकद्वादशकसाधर्म्यात् तु त्रिपरिवर्तं द्वादशाकारमुक्तमिति*। *द्वयसप्तस्थान-कौशलदेशनावदिति*। द्वयदेशनावत्, सप्तस्थानकौशलदेशनावच्च। तद्यथा विस्तरमुक्त्वा "तेन हि भिक्षो द्वयं ते देशयिष्यामि, तच्छृणु साधु च सुष्ठु च मनसिकुरु भाषिष्ये। द्वयं कतमत्? चक्षूरूपाणि यावत् मनोधर्माश्च" इति। यथेह द्वयसाधर्म्याद् द्वयमित्युक्तम्, एवं त्रिकद्वादशकसाधर्म्यात् त्रिपरिवर्तं द्वादशाकारमुक्तम्। यथा च सप्तस्थानकुशलो भिक्षुः रूपं यथाभूतं प्रजानाति, रूपसमुदयम्, रूपनिरोधम्, रूपनिरोधगामिनीं प्रतिपदम्, रूपस्यास्वादं च, आदीनवं च, निःसरणं च यथाभूतं प्रजानातीति सप्तस्थानकुशलो भिक्षुः त्रिविधार्थोपपरीक्षी क्षिप्रमेवास्मिन् धर्मविनये दुःखस्यान्तं प्रजानातीति; प्रत्येकं स्कन्धेषु सप्तस्थानकुशलसाधर्म्यात्। एवमिहापि त्रिकद्वादशकसाधर्म्यात् त्रिपरिवर्तं द्वादशाकारमुक्तमिति।

---

1. कौशला०—का०।

यद्येवम्, न तर्हि दर्शनमार्ग एव त्रिपरिवर्तो द्वादशाकार इति कथमसौ धर्मचक्रं व्यवस्थाप्यते ? तस्मात् स एव धर्मपर्यायो धर्मचक्रं त्रिपरिवर्तं द्वादशाकारं च युज्यते ।

कथं च पुनस्त्रिपरिवर्तम् ? सत्यानां त्रिःपरिवर्त्तनात् । कथं द्वादशाकारम् ? चतुर्णां सत्यानां त्रिधाकरणात् । दुःखं समुदयो निरोधो मार्ग इति परिज्ञप्तव्यम्[1]; प्रहातव्यम्[2], साक्षात्कर्तव्यम्, भावयितव्यमिति; परिज्ञातम्, प्रहीणम्, साक्षात्कृतम्, भावितमिति ।

तस्य पुनः प्रवर्तनं परसन्ताने गमनम्; अर्थज्ञापनात् ।

एभिश्चेति विस्तरः । *एभिश्च परिवर्तैर्यथासूत्रनिर्दिष्टैर्दर्शनभावनाशैक्षमार्गा यथासंख्य दर्शिताः* । इदं दुःखमार्यसत्यमित्यारभ्य यावदियं दुःखनिरोधगामिनी प्रतिपदार्यसत्यमिति दर्शनमार्गो दर्शितः । तत् खलु दुःखमार्यसत्यमभिज्ञया परिज्ञातव्यमित्यारभ्य यावत् तत् खलु दुःखनिरोधगामिनी प्रतिपदार्यसत्यमभिज्ञया भावयितव्यमिति भावनामार्गो दर्शितः । तत् खलु दुःखमार्यसत्यमभिज्ञया परिज्ञातमित्यारभ्य यावत् तत् खलु दुःखनिरोधगामिनी प्रतिपदार्यसत्यमभिज्ञया भावितमित्यशैक्षमार्गो दर्शित इति ।

अत्राचार्य आह *यद्येवमिति* विस्तरः । यद्येवमेभिः परिवर्तैर्दर्शनादिमार्गा यथासंख्यं दर्शिताः । *न तर्हि दर्शनमार्ग एव त्रिपरिवर्तो द्वादशाकारः* । किं तर्हि ? एकपरिवर्तश्चतुराकार इति । *कथमसौ दर्शनमार्गो* धर्मचक्रं *व्यवस्थाप्यते* । त्रिपरिवर्ताभावे चक्रसाधर्म्याभावान्न चक्रं युज्यत इत्यभिप्रायः । *स एव धर्मपर्यायो धर्मचक्रम्* । तदेवं सूत्रं धर्मचक्रम्, धर्मचक्रप्रकाशनात् । त्रिपरिवर्तं द्वादशाकारं च युज्यते; तदर्थप्रकाशनात् ।

त्रिःपरिवर्तनादिति । दुःखं यावन्मार्ग इत्येकं परिवर्तनम् । परिज्ञातव्यं यावद्भावयितव्यमिति द्वितीयम् । परिज्ञातं यावद्भावितमिति तृतीयम् । *चतुर्णां सत्यानां त्रिधाकरणादिति* । दुःखं *समुदयो निरोधो मार्ग* इति सत्यस्वरूपं प्रथम[3] आकरणप्रकारश्चतुराकारः । *परिज्ञातव्यं प्रहातव्यं साक्षात्कर्तव्यं भावयितव्यं* इति कर्तव्यरूपां परिज्ञानक्रियां प्रति द्वितीय आकरणप्रकारश्चतुराकारः । *परिज्ञातं प्रहीणं साक्षात्कृतं भावितमिति* परिनिष्ठितां परिज्ञानादिक्रियां प्रति तृतीय आकरणप्रकारश्चतुराकार इति । *तस्य पुनरिति* । धर्मपर्यायस्य ।

---

१. परिज्ञेयं–का० । २. प्रहातव्यम्–का० ।

३. प्रत्येक—जा० ।

अथवा—सर्व एवार्यमार्गो धर्मचक्रम्; विनेयजनसन्ताने[1] क्रमणात्[1]। तत्तु परसन्ताने दर्शनमार्गोत्पादनाद् वर्तयितुमारब्धम्, अतः प्रवर्तितमित्युच्यते ॥ ५४ ॥

अथ कस्मिन् धातौ कति श्रामण्यफलानि प्राप्यन्ते ?

कामे त्रयाप्तिः,

कामधातावेव त्रयाणां श्रामण्यफलानां प्राप्तिः, नान्यत्र।

अन्त्यस्य त्रिषु,

अन्त्यं श्रामण्यफलमर्हत्त्वं तस्य त्रिषु धातुषु प्राप्तिः।

फलद्वयस्य तावदवीतरागप्राप्यत्वादूर्ध्वमप्राप्तिर्युक्ता, तृतीयस्य तु कस्मादप्राप्तिः ?

नोर्ध्वं हि दृक्पथः।

ऊर्ध्वं हि कामधातोर्दर्शनमार्गो नास्ति। न च तेन विनाऽस्ति वीतरागस्यानागामिफलप्राप्तिरित्येतत् कारणम्।

किं पुनः कारणं तत्र दर्शनमार्गो नास्ति ? आरूप्येषु तावत् श्रवणाभावाद्, अधोधात्वनालम्बनाच्च।

प्रवर्तनं परसन्ताने गमनं विनेयजनसन्ताने प्रेरणम्। कथं गमनम्? *अर्थज्ञापनात्।*

अथ वा सर्व एवार्यमार्गो दर्शनभावनाशैक्षमार्गो *धर्मचक्रम्। विनेयजनसन्ताने क्रमणात्।* क्रमणाच्चक्रमिति कृत्वा। यदि सर्व एवार्यमार्गो धर्मचक्रम्, कथमार्याज्ञातकौण्डिन्यस्य दर्शनमार्गमात्रोत्पादे तत् तत् प्रवर्तितमित्युक्तम्? अत उच्यते—*तत्तु परसन्ताने आर्यकौण्डिन्यसन्ताने।* दर्शनमार्गोत्पादनाद् वर्तयितुमादौ वर्तितमित्येतत् प्रवर्तितमित्युच्यते। आदिकर्मणि प्रशब्दो वर्तते, प्रभुक्त ओदन इति यथा ॥ ५४ ॥

तृतीयस्य तु कस्मादप्राप्तिरिति। रूपधातूपपन्नो यदि नियाममवक्रामेत्। षोडशे चित्तक्षणे कस्मादनागामिफलप्राप्तिर्न स्यादित्यभिप्रायः।

परिहार उच्यते—

"नोर्ध्वं हि दृक्पथः" इति। *श्रवणाभावादिति।* *आरूप्येषु* श्रावकबोधिरेव भवन्ती भवेत्; स्वयम्भुबोधेरसम्भवात्। श्रावकाभिसमयश्च परतो घोषमन्तरेण न भवति। किञ्च *अधोधात्वनालम्बनाच्च।*

१-१. विनेयसन्तानक्रमणात्—का०।

रूपधातौ तु—

असंवेगादिह विधा तत्र निष्ठेति चागमात् ॥ ५५ ॥

रूपावचरा हि पृथग्जनाः समापत्तिसुखसङ्गा दुःखवेदनाभावाच्च न संविजन्ते । न च विना संवेगेनार्यमार्गः शक्यो लब्धुम् । इयं तावद् युक्तिः ।

आगमोऽप्ययम्—"पञ्चानां पुद्गलानामिह विधा तत्र निष्ठा अन्तरापरिनिर्वायिणो यावदूर्ध्वस्रोतसः" इति ।

विधा हि मार्गारम्भः, निर्वाणोपायत्वात् ॥ ५५ ॥

इदमुक्तम्—"यद्यकोप्यः क्षयज्ञानादनुत्पादमतिः" (अभि० ६.५०) इति । तत्र किमर्हतामप्यस्ति भेदः ? अस्तीत्युच्यते ।

षडर्हन्तो मताः,

सूत्र उक्तम्—"षडर्हन्तः—परिहाणधर्मा, चेतनाधर्मा, अनुरक्षणाधर्मा, स्थिताकम्प्यः, प्रतिवेधनाभव्यः, अकोप्यधर्मा चेति ।

तेषां पञ्च श्रद्धाधिमुक्तजाः[1] ।

अकोप्यधर्माणं वर्जयित्वाऽन्ये पञ्च श्रद्धाधिमुक्तपूर्वकाः[2] ।

"न मौलाः कुशलारूप्याः सास्रवाधरगोचराः" (अभि० को० ८.२१) इति । त्रिधातुकालम्बनेन च दर्शनमार्गेण भवितव्यमित्यतः स तत्र न भवतीति । *विधानं* विधा, उपाय इत्यर्थः ॥ ५५ ॥

परिहाणं धर्मः स्वभावोऽस्येति *परिहाणधर्मा* । *चेतनाधर्मा* आत्ममारणधर्मा । *अनुरक्षणाधर्मा* यस्तां विमुक्तिमनुरक्षितुं शक्नोति । *स्थिताकम्प्यः* । यस्यां विमुक्तौ स्थितः, तस्यां अकम्प्यः । *प्रतिवेधनाभव्यः* । इन्द्रियसञ्चारभव्यः । *अकोप्यधर्मा* । कोप्योऽनिवार्यो धर्मोऽस्येत्यकोप्यधर्मा । स च द्विविधः—स्वभावतस्तीक्ष्णेन्द्रियः, इन्द्रियसञ्चारतस्तीक्ष्णेन्द्रियश्च ।

"*पञ्च श्रद्धाधिमुक्तजाः*" । एवेत्यवधारणम् । श्रद्धाधिमुक्ता भूत्वा एते जाता इत्यर्थः । *श्रद्धाधिमुक्तपूर्वका* इति यावदुक्तं भवति । षष्ठस्त्वन्यथापि भवतीति व्याख्यातम् ।

---

१. ०मुक्तिजाः—का० । २. ०मुक्तिपूर्वकाः—का० ।

विमुक्तिः सामयिक्येषाम्,

एषां च पञ्चानां सामयिकी कान्ता चेतोविमुक्तिर्वेदितव्या; नित्यानुरक्ष्यत्वात्। अत एवैते समयविमुक्ता उच्यन्ते। समयापेक्षाश्चैतेऽधिमुक्ताश्चेति समयविमुक्ताः मध्यपदलोपात्; घृतघटवत्।

एषां हि समयापेक्षासमाधिसम्मुखीभावः, उपकरणारोग्यदेशविशेषापेक्षत्वात्।

अकोप्याकोप्यधर्मणः ।। ५६ ।।

अकोप्यधर्मणस्त्वकोप्या विमुक्तिः; कोपयितुमशक्यत्वादपरिहाणितः ॥५६॥

अतोऽसमयमुक्तोऽसौ,

अत एवासमयविमुक्त उच्यते। स ह्यसमयापेक्षाविमुक्तश्च; इच्छातः समाधिसम्मुखीभावात्। कालान्तरात्यन्तविमुक्तितो वा; कोप्याकोप्यधर्मणोः समयासमये विमुक्तत्वं परिहाणिसम्भवासम्भवतः।

"*सामयिकी*" इति। समये उपकरणारोग्यदेशविशेषादिलक्षणे भवा सामयिकी। *कान्ता* च। कान्ता चेतोविमुक्तिः। कस्मात् कान्तेति? *नित्यानुरक्ष्यत्वात्*। कान्तं हि नित्यमनुरक्ष्यमिति लोके दृश्यते। सूत्रेऽप्युक्तम्—"तद्यथा नामैकाक्षस्य पुरुषस्य ज्ञातय एकमक्षि साधु च सुष्ठु चानुरक्षितव्यं मन्येरन्—मास्य शीतं मास्योष्णं मास्य रजोऽशवश्चक्षुषि निपतेयुर्मास्य यद्यप्येकं चक्षुरविनष्टं तदपि विनश्येदिति; एवमेव समयविमुक्तस्यार्हतोऽनुरक्ष्य एष धर्मोऽनुकम्प्योऽनुग्राह्यः। तत एवं समयविमुक्तोऽर्हन् साधु च सुष्ठु चानुरक्षितव्यं मन्यते—कच्चिदहमेतस्माद् धर्मान्न परिहीयेय" इति। स तस्मान्न परिहीयत इति।

घृतघटवदिति। यथा घृतस्य पूर्णो घटो घृतघट इति भवति, मध्यगतस्य पूर्णशब्दस्य लोपात्। यथा वा घृतापेक्षो घटो घृतघटः, यत्र घृतं प्रक्षेप्स्यते, अपेक्षशब्दलोपात् घृतघट इति भवति। एवमिहापि *मध्यगतस्यापेक्षशब्दस्य लोपात्* समयापेक्षाश्चैते विमुक्ताश्चेति *समयविमुक्ताः*। समयः पुनरुपकरणादिरित्युक्तम्।

कथं कोपयितुमशक्यत्वात्? इत्याह—*अपरिहाणित* इति ।। ५६ ।।

कालान्तरात्यन्तविमुक्तितो वेति। कालान्तरविमुक्तितः समयविमुक्तत्वम्, अत्यन्तविमुक्तितोऽसमयविमुक्तित्वमित्यर्थः। कथमेवम्? इत्याह—*परिहाणि*-

दृष्टिप्राप्तान्वयश्च सः ।

स चाकोप्यधर्मा दृष्टिप्राप्तपूर्वको वेदितव्यः ।

किं पुनरेते षडर्हन्त आदित एव तद्गोत्रा भवन्ति ? अथ पश्चात् ?

तद्गोत्रा आदितः केचित् केचिदुत्तापनागताः ।। ५७ ।।

कश्चित् प्रथमत एव चेतनाधर्मगोत्रको भवति । कश्चित् पुनः परिहाणधर्मा भूत्वेन्द्रियाणामुत्तापनया चेतनाधर्मतां गतः । एवं यावदकोप्यधर्मतां गतो वेदितव्यः ।

तत्र परिहाणधर्मा यः परिहातुं भव्यः, न च चेत[१]नादिधर्मा । चेतनाधर्मा यश्चेतयितुं भव्यः । अनुरक्षणाधर्मा योऽनुरक्षितुं भव्यः । स्थिताकम्प्यो यः

सम्भवासम्भवतः । परिहाणिसम्भवात् कालान्तरविमुक्त्या समयविमुक्त इत्युच्यते । परिहाण्यसम्भवादत्यन्तविमुक्त्यासमयविमुक्त इत्युच्यते ।

"दृष्टिप्राप्तान्वयश्च सः" इति । यदा शैक्षो भूत्वेन्द्रियाणि सञ्चरति, स दृष्टिप्राप्ततामापद्यते । अथ स्वभावतस्तीक्ष्णेन्द्रियः, स षोडशे चित्तक्षणे दृष्टिप्राप्त एव । तस्मादसावकोप्यधर्मा दृष्टिप्राप्तपूर्वक इत्युच्यते । यस्त्वर्हत्त्वावस्थायामिन्द्रियाणि सञ्चरति, नासावकोप्यधर्मा दृष्टिप्राप्तपूर्वक इत्यवगन्तव्यम् ।

कश्चित् प्रथमत एव चेतनाधर्मगोत्रक इति । परिहाणधर्मा नोच्यते; यस्मादुत्तापनागतो न भवतीति । *"तद्गोत्रा आदितः केचित्"* इत्यपदिष्टम्, तत् किमिदं परिहाणधर्मगोत्रं नाम यावदकोप्यधर्मगोत्रमिति, न तैः परिहाणधर्मादिगोत्रमपदिष्टम् ? तत्र केचिदेवं वर्णयन्ति—कुशलमूलानि गोत्रमिति। कस्यचिद्धि यादृशानि कुशलानि भवन्ति, यः परिहाणधर्मा यावदकोप्यधर्मा । *अन्ये* पुनराहुः—पृथग्जनावस्थामराख्येन्द्रियभेदो गोत्रमिति । *सौत्रान्तिकाः* पुनर्वर्णयन्ति—बीजं सामर्थ्यं चेतसो गोत्रमिति । पृथग्जनावस्थायां शैक्षावस्थायां तद्बीजवृत्तिलाभात् परिहाणधर्मेत्युच्यते । एवं यावदकोप्यधर्मेति ।

तत्र परिहाणधर्मेति विस्तरः । परिहाणधर्मा यः परिहातुं भव्य इति । यद्येतावद् ब्रूयात्, *न च चेतनादिधर्मेत्येतन्न* ब्रूयात्, सर्व एवैते चेतनाधर्मादयश्चत्वारः परिहातुं भव्या इत्येषामेवान्यतरः परिहाणधर्मा स्यात् । न तेभ्योऽन्यः पञ्चमः । अतस्तेभ्योऽन्य एवायं पञ्चम इति विशेषयन्न च चेतनादिधर्मेत्याह । चेतनाधर्मादीनां पुनश्चतुर्णां परिहाणधर्मकत्वेऽसति

---

१. का० पुस्तके नास्ति ।

परिहाणिप्रत्ययं बलवन्तमन्तरेणानुरक्षन्नपि स्थातुं भव्यः, न हातुं नापि वर्धयितुं विनाभियोगेन । प्रतिवेधनाभव्यो योऽकोप्यः प्रतिवेद्धुं भव्यः । अकोप्यधर्मा यो नैव परिहातुं भव्यः ।

प्रथमौ द्वौ पूर्वमेव शैक्षावस्थायां सातत्य-सत्कृत्यप्रयोगविकलौ । तृतीयः सातत्यप्रयोगी । चतुर्थः सत्कृत्यप्रयोगी । पञ्चम उभयथाप्रयोगी मृद्विन्द्रियस्तु । षष्ठ उभयथाप्रयोगी तीक्ष्णेन्द्रियश्च ।

नचावश्यं परिहाणधर्मा परिहीयते, नापि यावत् प्रतिवेधनाभव्यः प्रतिविध्यति । सम्भवं तु प्रत्येवमुच्यते । एवं च[1] कृत्वा धातुत्रयेऽपि षडर्हन्तो युज्यन्ते ।

एकैकस्य विशेषलक्षणापदेशादेव पुनरिदं वक्तव्यं जायते । चेतनाधर्मा चेतयितुं भव्यो न चानुरक्षणाधर्मा, यावत् प्रतिवेधनाभव्य इति । एवमनुरक्षणाधर्मा । *परिहाणिप्रत्ययं बलवन्तमन्तरेणेति* । यदि परिहाणिप्रत्ययो बलवान् स्यात्, परिहीयेत स इत्यभिप्रायः । अनेन बलवत्प्रत्ययवचनेन परिहाणधर्मणः पूर्वोक्ताद् विशिनष्टि । परिहाणधर्मा ह्यबलवतापि परिहाणिप्रत्ययेन परिहीयते । परिहाणिप्रत्ययाः पुनर्यथा सूत्रम्—"पञ्च हेतवः, पञ्च प्रत्ययाः समयविमुक्तस्यार्हतः परिहाणाय संवर्तन्ते । कतमे पञ्च ? कर्मान्तप्रसृतो भवति, भाष्यप्रसृतो भवति, अधिकरणप्रसृतो भवति; दीर्घचारिकायोगमनुयुक्तो भवति, दीर्घेण च रोगजातेन स्पृष्टो भवति" इति । *अननुरक्षन्नपीति* । अनेनानुरक्षणाधर्मणो विशिनष्टि । स ह्यनुरक्षन्नेव न परिहीयेत, अयं त्वननुरक्षन्नपीति । अननुरक्षन्नपि तत्फलं *स्थातुं भव्यः तत्फले । न हातुं* तत्फलात् । *नापि वर्धयितुं* प्रतिवेधनाभव्यताप्राप्त्या । *विनाभियोगेन* । विना वीर्येण । अनेनार्थादुक्तं भवति—यद्यभियोगं कुर्याद्भव्यः स्यादिति प्रतिवेदनाभव्याच्चायमेवं विशेषितो भवति, स हि विनाप्यभियोगेन प्रतिवेद्धुं भव्य इति ।

प्रथमौ द्वाविति विस्तरः । परिहाणधर्मा *सातत्यसत्कृत्यप्रयोगविकलौ* । चेतनाधर्मापि सातत्यप्रयोगेण विकलः । विशेषेण तु सत्कृत्यप्रयोगेण विकल इत्यनयोर्विशेषः । *मृद्विन्द्रियस्त्विति* । षष्ठाद् विशिनष्टि । *षष्ठो हि तीक्ष्णेन्द्रियः* । इन्द्रियकृतो ह्यनयोर्विशेषो न प्रयोगकृत इति ।

एवं च कृत्वेति विस्तरः । यस्मान्न नावश्यमेवं भवति, तस्माद् रूपारूप्यधात्वोरपि षडर्हन्तः, न केवलं कामधातावेव षडित्यभिप्रायः ।

---

१. का० पुस्तके नास्ति ।

येषां त्ववश्यं परिहीयते यावत् प्रतिविध्यति, तेषां कामधातौ षड् रूपारूप्यधात्वोः स्थिताकम्प्यः अकोप्यधर्मा च; तयोः परिहाणिचेतनेन्द्रियसञ्चाराभावात् ॥ ५७ ॥

कः पुनरेषां कुतः परिहीयते ? फलात् ? गोत्राद्वा ?

गोत्राच्चतुर्णां पञ्चानां फलाद्धानिः[३],

चेतनाधर्मादीनां चतुर्णां गोत्रात् परिहाणिः । न हि परिहाणधर्मा पुनः स्वगोत्रात् परिहीयते । परिहाणधर्मादीनां पञ्चानां फलात् परिहाणिः । तेषामपि तु

न पूर्वकात् ।

यस्य यत् प्रथमगोत्रं स तस्मान्न परिहीयते; शैक्षाशैक्षमार्गाभ्यां दृढीकृतत्वात् । शैक्षस्तु लौकिकलोकोत्तराभ्यां दृढीकृतत्वात् न परिहीयते स्वगोत्रात् ।

रूपारूप्यधात्वोर्द्वौ स्थिताकम्प्य एकः । *अकोप्यधर्मा* च द्वितीयः । स्थिताकम्प्यस्तावद् बद्धाभिरुचिः स्यात्, न प्रतिवेधनभव्यताक्रियादरवानिति । न कामधातौ स्थिताकम्प्यः प्रतिवेधनाभव्यतामपद्यते । रूपारूप्यधात्वोश्च परिहाणिप्रत्ययो बलवान् नास्तीति नासौ परिहीयते । न चेन्द्रियाणि सञ्चरन्तीति स्थिताकम्प्यगोत्रक एव संस्तत्र भवति । अकोप्यविमुक्तियोगाच्चाकोप्यधर्मापि भवति । *एवेति* द्वावेव तौ भवतः । नातोऽन्ये ।

तयो रूपारूप्यधात्वोः *परिहाणिचेतनेन्द्रियसञ्चाराभावात्* । परिहाणधर्मा तावत् तत्र नास्ति; परिहाण्यभावात् । अनुरक्षणाधर्मापि नास्ति; परिहाण्यभावेनानुरक्षितव्यायोगात् । अत एव चेन्द्रियसञ्चाराभावात् प्रतिवेधनाभव्योऽपि न भवति । तथा चोक्तम्—"स चोर्ध्वजश्च नैवाक्षसञ्चारपरिहाणिभाग्" (अभि० को० ६.४१) इति । तत्र च नात्मसञ्चेतना न परसञ्चेतनास्तीति चेतनाधर्मापि न भवतीति ॥ ५७ ॥

चेतनाधर्मादीनां चतुर्णामिति । चेतनानुरक्षणाधर्मस्थिताकम्प्यप्रतिवेधनाभव्यानाम् । *न हि परिहाणधर्मा पुनः स्वगोत्रात् परिहीयत* इति । तस्य गोत्रस्याकृत्रिमत्वात् । *परिहाणधर्मादीनां पञ्चानामिति* । यस्मात् परिहाणधर्मणोऽपि *फलात् परिहाणिः सम्भवति* । फलस्यागन्तुकत्वात् ।

"*न पूर्वकाद्*" इति । गोत्रात्, फलाच्च ।

स तस्मान् न परिहीयत इत्यर्थः । कस्मात् ? इत्याह—*शैक्षाशैक्षमार्गाभ्यां दृढीकृतत्वादिति* । यच्छैक्षावस्थायां गोत्रमस्ति । तच्छैक्षेण मार्गेण भावितम् ।

यत्तु पश्चात् प्रतिलब्धमुत्तापनया तस्मात् परिहीयते ।

अशैक्षावस्थायां च पुनर्भावितमिति । ताभ्यां दृढीकृतत्वान्न तस्मात् सोऽर्हन् परिहीयते । शैक्षस्तु कथम् ? इत्याह—*शैक्षस्तु लौकिकलोकोत्तराभ्यां दृढीकृतत्वात्* प्रथमात् गोत्रान्न परिहीयते । यत् तदात्मीयं गोत्रं यल्लौकिकेन मार्गेण पूर्वं भावितम्, शैक्षेण च मार्गेण पुनर्भावितमिति ततो न परिहीयते ।

अत्र कश्चिदाह—"यदुच्यते 'यस्य यत् प्रथमं गोत्रम्, स तस्मान् न परिहीयते शैक्षाशैक्षमार्गाभ्यां दृढीकृतत्वाद्' इति, तदेतदकारणम्; यस्माद् योऽपि चेतनाधर्मा उत्तपनागतस्तस्मात् गोत्रात् परिहीयते । तद् गोत्रं शैक्षाशैक्षाभ्यां मार्गाभ्यां दृढीकृतमिति परिहाणिर्न प्राप्नोति । तस्मात् गोत्रमेव तत् तादृशं यस्मादाद्यान्न परिहीयते । उत्तापनागोत्रात् तु परिहीयत इति । यदप्युक्तम् 'शैक्षस्तु लौकिकलोकोत्तराभ्यां दृढीकृतत्वान्न परिहीयते' इत्येतदप्यकारणम्; स्रोतआपन्नस्य परिहाणिप्रसङ्गात् । न हि स्रोतआपत्तिफलं लौकिकेन मार्गेण दृढीकृतम्" इति । कर्तव्योऽत्र यत्न इति ।

अत्र वयमाचार्यस्याभिप्रायं दर्शयामो येनैवमुक्तम् । कथमिति ? यत् तावदुक्तं 'चेतनाधर्मा उत्तपनागतस्तस्मात् गोत्रात् परिहीयते' इति तदयुक्तम् । यद्धि चेतनाधर्मगोत्रं शैक्षावस्थायां भावितं पुनश्चाशैक्षावस्थायामपि भावितमिति दृढीकृतम् । नैव स तस्मादर्हत्त्वात् परिहीयमाणः परिहीयते; शैक्षावस्थायां प्रथमीभूतत्वात् । उक्तं चाचार्यसङ्घभद्रेण—'यः शैक्षावस्थायां गोत्रान्तरमधिगम्यार्हत्त्वं प्राप्नोति, असावपि तं मार्गं परित्यजति । न चोत्तापनागत एव गोत्रे नावतिष्ठते' इति । यत्तु चेतनाधर्मगोत्रमशैक्षावस्थायामिदानीमेवाधिगतं न शैक्षावस्थायामधिगतम्, स तस्मात् परिहीयमाणः परिहीयते; तदवस्थाद्वयादृढीकृतत्वात् । इति न कारणमेवैतद्भवति । यदप्युक्तम् 'शैक्षस्तु लौकिकलोकोत्तराभ्यां मार्गाभ्यां दृढीकृतत्वान्न परिहीयते इत्येतदप्यकारणम्; स्रोतआपन्नस्य परिहाणिप्रसङ्गात् । न हि स्रोतआपत्तिफलं लौकिकेन लोकोत्तरेण दृढीकृतम्' इति । तदप्यनवबुद्ध्याभिहितम् । तद्गोत्रं प्रति कारणमुच्यते, न फलं प्रति । तत्र हि कारणान्तरं वक्ष्यते येन प्रथमात् फलान्न परिहीयते । न हि किञ्चिदप्यस्ति फलं यद् युगपदुभाभ्यां लौकिकलोकोत्तराभ्यां प्राप्यते । गोत्रं तु लौकिकलोकोत्तराभ्यां मार्गाभ्यां दृढीकृतं भवति; ऐहजन्मिकेनोष्मगतादिना पारजन्मिकेन वा प्रहाणमार्गेणान्येन वा लौकिकेन मार्गेण लोकोत्तरेण शैक्षावस्थायां भावितत्वात् । यत्तु *पश्चात् प्रतिलब्धमुत्तापनयेति* । यदागन्तुकं गोत्रं पश्चादेव न द्वयोरवस्थयोरधिगतं *तस्मात् परिहीयते* ।

यस्य च यत् प्रथमं फलं स तस्मान्न परिहीयते। शेषात् परिहीयते। अत एव स्रोतआपत्तिफलान्नास्ति परिहाणिः।

एवं च कृत्वा परिहाणधर्मणस्त्रयः प्रकारा भवन्ति–तदवस्थस्य परिनिर्वाणम्, इन्द्रियसञ्चारः, परिहाय वा शैक्षत्वम्। चेतनाधर्मणश्चत्वारः— एत एव त्रयः, परिहाणधर्मगोत्रप्रत्यागमनं च।

एवमन्येषां त्रयाणामेकैकप्रकारवृद्ध्या यथाक्रमं पञ्च, षट्, सप्त प्रकारा वेदितव्याः।

यस्य च यत् प्रथमं गोत्रं स परिहाय शैक्षीभूतस्तत्रैवावतिष्ठते, नान्यस्मिन्; अन्यथा हि गोत्रविशेषलाभाद्[१] वृद्धिरेवास्य स्यात्, न परिहाणिः।

गोत्रं निर्दिश्य फलं निर्दिश्यते—*यस्य च यत् प्रथमं फलमिति* विस्तरः। *अत एव च स्रोतआपत्तिफलान्नास्ति परिहाणिरिति*। यस्मात् स्रोतआपत्तिफलं यदि प्राप्यतेऽवश्यं प्रथमं भवति। सकृदागाम्यनागामिफले तु कदाचित् प्रथमे भवतः, यदि भूयोवीतरागकामवीतरागयोः। कदाचिदप्रथमे, यद्यानुपूर्विकस्य। तत्र यद्यत् फलं प्रथमं भवति स्रोतआपत्तिफलम्, सकृदागामिफलम्, अनागामिफलं वा, न तस्मात् परिहीयते। यत्तु पश्चात् सकृदागामिफलम्, अनागामिफलम्, अर्हत्त्वफलं वा *ततः परिहीयते*। *एवं च कृत्वेति*। यस्य च यत्प्रथमं गोत्रं फलं च स तस्मान्न परिहीयत इति कृत्वा। *यथाक्रमं पञ्च षट् सप्त प्रकारा* इति। अनुरक्षणाधर्मणः पञ्च प्रकारा भवन्ति–तदवस्थस्य परिनिर्वाणम्, इन्द्रियसञ्चारः, परिहाय वा शैक्षत्वम्, चेतनाधर्मगोत्रप्रत्यागमनम्, परिहाणधर्मगोत्रप्रत्यागमनं च। स्थिताकम्प्यस्य षट् प्रकारा भवन्ति—त एव पञ्च, अनुरक्षणाधर्मगोत्रप्रत्यागमनं षष्ठम्। प्रतिवेधनाभव्यस्य सप्त प्रकारा भवन्ति—एत एव च षट्, स्थिताकम्प्यगोत्रप्रत्यागमनं च सप्तममिति। *यस्य च यत्प्रथमं गोत्रं* शैक्षावस्थाया मासीत्, *स शैक्षीभूतः*। पुनरिति वाक्याध्याहारः। *तत्रैवावतिष्ठते नान्यस्मिन्*। *अन्यथा हि गोत्रविशेषलाभा*च्छैक्षावस्थाद् गोत्राद्विशिष्टं तद् गोत्रं भवतीति। अतो विशिष्टगोत्रलाभात् *वृद्धिरेवास्य* पुद्गलस्य *स्यात्, न परिहाणिरिति*। कथं कृत्वा? यथा तावत् परिहाणधर्मा अर्हत्त्वावस्थायामिन्द्रियोत्तापनया प्रतिवेधभव्यताप्राप्तः, सोऽर्हत्त्वात् परिहीयते। शैक्षीभूतस्तद्गोत्रादपि परिहीय-

---

१. तद्गोत्र०–का०।

किं पुनः कारणं प्रथमात्[1] फलात्[1] नास्ति परिहाणिः ? दर्शनहेयानामवस्तुकत्वात्। आत्माधिष्ठानप्रवृत्ता ह्येते; सत्कायदृष्टिमूलकत्वात्[2]। स चात्मा नास्तीति। असदालम्बनास्तर्हि प्राप्नुवन्ति, नासदालम्बनाः; सत्यालम्बनत्वात्। वितथालम्बनास्तु। कतमश्च क्लेशो नैवमस्ति विशेषः। आत्मदृष्टिर्हि रूपादिके वस्तुनि कारकवेदकवशवर्तित्वेनात्मत्वमभूतमध्यारोपयति। तदधिष्ठानानुप्रवृत्ताश्चान्तग्राहादय[3] इत्यवस्तुका उच्यन्ते। भावनाहेयास्तु रागप्रतिघमानाविद्या रूपादिके वस्तुनि केवलं सक्त्याघातोन्नत्यसम्प्रख्यानभावेन वर्तन्त इति सवस्तुका उच्यन्ते।

अस्ति च तच्छ्रु‌तादिमात्रं यत्र तेषां प्रवृत्तयः, न त्वात्मादिलेशोऽपि अस्ति[4]।

माणो न स्थिताकम्प्यगोत्रे तिष्ठति। प्रतिलोमतो यावन्न चेतनाधर्मगोत्रे। किं तर्हि ? परिहाणधर्मगोत्र एव तिष्ठतीति। *अन्यथा हीति*। यद्यन्यगोत्रेऽवतिष्ठेत। गोत्रविशेषलाभादिति परिहाणधर्मगोत्रविशिष्टगोत्रलाभात्। तस्मादवश्यमर्हत्त्वात् परिहीयमाण इन्द्रियोत्तापनादपि गोत्रान् परिहीयत इति।

किं पुनः कारणं प्रथमात् फलान्नास्ति परिहाणिरिति। यस्य यत् प्रथमं फलं स्रोतआपत्तिफलं वा सकृदागामिफलं वा अनागामिफलं वा। *दर्शनहेयानामवस्तुकत्वात्*, अनधिष्ठानत्वादित्यर्थः। *आत्माधिष्ठानप्रवृत्ता ह्येते* इति विस्तरः। आत्मनोऽधिष्ठानेन प्रवृत्ता एते दर्शनहेयाः। कस्माद् ? इत्याह—*सत्कायदृष्टिमूलत्वात्*। यस्मादात्मदर्शनवशेन दर्शनहेयानां समुदाचारः। उक्तं च—'यानि वा पुनः पृथग्लोके दृष्टिगतानि, तानि सत्कायदृष्टिसमुदयानि सत्कायदृष्टिजातीयानि सत्कायदृष्टिप्रभवानि' इति। *स चात्मा नास्तीत्य*वस्तुकत्वान्नास्ति परिहाणिरिति। *सत्यालम्बनत्वादिति*। सत्यानां नित्यादितो ग्रहणात्। *कतमश्च क्लेशो नैवम्*। भावनाप्रहातव्योऽपि हि रागादिर्वितथालम्बनः; शुचिसुखनित्यात्माकारैः सत्यादितत्त्वालम्बनात्। *आत्मत्वमभूतमध्यारोपयतीति*। यथोक्तम्—"ये केचिद् भिक्षव आत्मेति आत्मीय इति समनुपश्यन्तः समनुपश्यन्ति। इमानेव ते पञ्चोपादानस्कन्धानात्मत आत्मीयतश्च समनुपश्यन्ति" (　) इति। *तदधिष्ठानानुप्रवृत्ताश्चान्तग्राहादय इति*। आत्माधिष्ठानानुप्रवृत्ताः। शाश्वत आत्मा, उच्छेदीति वा; नास्त्यात्मा, अयमेवाग्रः; इयमेव शुद्धिः; किमसावस्ति नास्तीत्येवमाद्याकारप्रवृत्तास्तदन्यदर्शनहेया *अवस्तुका उच्यन्ते*।

१-१. प्रथमानां–का०।　　२. ०मूलत्वात्–का०।

३. ०नानुवृत्ताश्चान्तग्राहदृष्ट्यादयः–का०।　　४. का० पुस्तके नास्ति।

तथा हि भावनाहेयानामस्ति प्रतिनियतं वस्तु मनापामनापादिलक्षणम्[1], न तु दर्शनहेयानामात्मादिलक्षणम् । तस्मादवस्तुका[2] उच्यन्ते ।

अपि खल्वार्यस्यानुपनिध्यायतः स्मृतिसंप्रमोषात् क्लेश उत्पद्यते नोपनिध्यायतः, रज्ज्वामिव सर्पसंज्ञा । न चानुपनिध्यायत आत्मदृष्ट्यादीनामुत्पत्तिर्युज्यते[3] सन्तीरकत्वादिति नास्ति दर्शनहेयप्रहाणात्[4] परिहाणिः ।

अर्हत्त्वादपि नास्ति परिहाणिरिति सौत्रान्तिकाः । एष एव च न्यायः ।

कथमिदं गम्यते ? आगमाद्, युक्तितश्च । १. कथमागमात् ? "तद्धि भिक्षवः प्रहीणं यदार्यप्रज्ञया[5] प्रहीणम्" इत्युक्तम् । आद्यन्तयोश्च फलयोरार्ययैव

निरधिष्ठाना उच्यन्त इत्यर्थः । *न त्वात्मादिलेशोऽस्तीति* । आदिग्रहणेनात्मीयग्रहणम्, ईश्वरादिग्रहणं वा । प्रतिनियतं *मनापामनापादिलक्षणमिति* । रागस्य भावनाहेयस्य मनापं केशदन्तशुभादिलक्षणं वस्तु । प्रतिघस्यामनापं तदशुभतादिलक्षणम् । मानस्यापि मनापं अविद्याया अपि तदेव द्वयं सम्मोहनीयं किञ्चिदिति । *न तु दर्शनहेयानामात्मादिलक्षणमिति* । न तु दर्शनहेयानामात्मात्मीयलक्षणं प्रतिनियतं वस्तु किञ्चिदस्ति । *अन्यत्र तदालम्बनेभ्यो रागादिभ्यः* । *तस्मादवस्तुका उच्चयन्ते* । तस्मान्न प्रतिनियतवस्तुका उच्यन्त इत्यर्थः ।

अपि खल्विति विस्तरेणाचार्यः । *आर्यस्य* शैक्षस्यानु*पनिध्यायतोऽसन्तीरयतः स्मृतिसम्प्रमोषात्* क्लिष्टस्मृतियोगात् *क्लेश उत्पद्यते* । रागादिकः । *नोपनिध्यायतः* । *रज्ज्वामिव सर्पसंज्ञा* । कस्यचिदनुपनिध्यायतः स्मृतिसम्प्रमोषाज्जायते, नोपनिध्यायतः, तद्वत् । *आत्मदृष्ट्यादीनामिति* । अन्तग्राहदृष्ट्यादीनां ग्रहणम् । किं पुनः कारणम् ? *न चानुपनिध्यायत* आत्मदृष्ट्यादीनामुत्पत्तिर्युज्यते । *सन्तीरकत्वात्* । केषाम् ? आत्मदृष्ट्यादीनां क्लेशानाम् । *अतो*ऽनुपनिध्यानादार्यस्यात्मदृष्ट्यादीनामुत्पत्तिर्न युज्यत इति । परिहाणिकारणाभावान् *नास्ति दर्शनहेयप्रहाणात् परिहाणिरिति* ।

अर्हत्त्वादपि नास्तीति । न केवलं दर्शनहेयप्रहाणान्नास्ति परिहाणिः, अर्हत्त्वादपि नास्ति परिहाणिरित्यपिशब्देन दर्शयति । अप्रथमाभ्यां तु सकृदागाम्यनागामिफलाभ्यां परिहाणिः सम्भवति । लौकिकेन मार्गेण तत्प्राप्तिसम्भवादित्यभिप्रायः । *एष एव च न्याय* इत्याचार्यः समर्थयति । *तद्धि भिक्षवः प्रहीणमिति* ।

१. °मनापलक्षणं–का० । २. तस्मादप्यव०–का० । ३. °मुपपत्ति०–का० ।
४. °हेयक्लेश०–का० । ५. यदार्यया प्रज्ञया–का० ।

प्रज्ञया ऽधिगमः । "शैक्षस्य चाप्रमादकरणीये ऽप्रमादकरणीयं प्रवेदयामि" इत्युक्तम्, नार्हतः । "अर्हतो ऽप्यहमानन्द लाभसत्कारमन्तरायकरं वदामि" इत्यत्र सूत्रे दृष्टधर्मसुखविहारमात्रादेव परिहाणिरुक्ता । "या त्वनेनाकोप्यचेतोविमुक्तिः कायेन साक्षात्कृता, ततोऽहं न केनचित् पर्यायेण परिहाणं वदामि" इति चोक्तम् ।

सामयिक्या अस्तीति चेत् ? वयमप्येवं ब्रूमः । सा तु विचार्या–किमर्हत्त्वम्, आहोस्विद्ध्यानानीति । मौलो हि ध्यानसमाधिः समये सम्मुखीभावत् सामयिकी

तदेव प्रहीणम् *यदार्यप्रज्ञया प्रहीणम्* । तद्धि न पुनरुत्पद्यते । लौकिक्या तु यत्प्रहीणम्, तत् पुनरुत्पद्यत इत्यभिप्रायः । *शैक्षस्य चाप्रमाद* इति विस्तरेण द्वितीयं सूत्रपदं ज्ञापकम्—अर्हत्त्वान्नास्ति परिहाणिरिति । अयं चास्यार्थः—*शैक्षस्याप्रमादनिमित्तमप्रमादकर्म प्रवेदयाम्यप्रमादः* शैक्षेण कर्तव्य इति ।

ननु च शैक्षस्याप्यार्यया प्रज्ञया प्रहाणमस्ति, कथं तस्याप्रमादकरणीयं शास्तीति ? यस्मादनधिगतमनेन फलान्तरमभिगन्तव्यम्, लौकिकमार्गगतं च तस्य प्रहाणमस्तीति । अत्र *वैभाषिको* ब्रूयाद्—*अर्हतोऽप्यहमानन्द लाभसत्कारमन्तरायकरं वदामीति सूत्रे* वचनादस्त्यर्हतोऽपि परिहाणिरित्यत इदमुच्यते । अर्हतोऽपि विस्तरेण यावदत्र *सूत्रे दृष्टधर्मसुखविहारमात्रादेव परिहाणिरुक्तेति* । कथम् ? यत्र *भगवानायुष्मन्तमानन्दमामन्त्रयते* स्म—"अर्हतोऽप्यहमानन्द लाभसत्कारमन्तरायकरं वदामीति । आयुष्मान् आनन्द आह—'तत् कस्माद् ?' भगवानेवमाह—'अर्हतोऽप्यहमानन्द लाभसत्कारमन्तरायकरं वदामीति । भगवानाह—'न हैवानन्द अप्राप्तस्य प्राप्तये, अनधिगतस्याधिगमाय, असाक्षात्कृतस्य साक्षात्क्रियायै; अपि तु येऽनेन चत्वार आधिचैतसिका दृष्टधर्मसुखविहारा अधिगताः, ततोऽहमस्यान्यतमस्मात् परिहाणि वदामि । तच्चाकीर्णस्य विहरतः । या त्वनेनैकाकिनाव्यपकृष्टेनाप्रमत्तेनातापिना प्रहितात्मना विहरता *अकोप्या चेतोविमुक्तिः कायेन साक्षात्कृता, ततोऽस्याहं न केनचित् पर्यायेण परिहाणि वदामि* । तस्मात् तर्ह्यानन्दैवं ते शिक्षितव्यम् यल्लाभसत्कारमभिभविष्यमाणो न चात्यन्तैर्लाभसत्कारकैश्चित्तं पर्यादाय स्थास्यति । एवं ते आनन्द शिक्षितव्यम्'" इति ।

यदि *वैभाषिक* एवं ब्रूयात्—अकोप्या इति विशेषणात् सामयिक्या अस्ति परिहाणिरिति । तत आह—*सामयिक्या अस्तीति चेदिति* । *वयमप्येवं ब्रूमः*—सामयिक्या अस्ति परिहाणिरिति । *सा तु विचार्या* । सा तु सामयिकी विमुक्तिर्विचार्या । कथम् ? इत्याह—*किमर्हत्त्वं सामयिकी विमुक्तिरस्ति, आहोस्वि-*

विमुक्तिरित्युच्यते । दृष्टधर्मसुखविहारार्थं च पुनः पुनरेषणीयत्वात् कान्तेत्युच्यते । आस्वादनीयत्वादित्यपरे ।

अर्हत्त्वविमुक्तिस्तु नित्यानुगतत्वान्न युज्यते सामयिकी, अपुनःप्रार्थनीयत्वान्न कान्तेति । यदि चार्हत्त्वात् परिहाणिसम्भवोऽभविष्यत्, किमर्थं भगवानाधिचैतसिकेभ्य एव दृष्टधर्मसुखविहारेभ्यः परिहाणिमवक्ष्यत् । अतो गम्यते—सर्वस्यैवार्हतो विमुक्तिरकोप्या दृष्टधर्मसुखविहारेति अस्तु । कश्चित् लाभसत्कारव्याक्षेपदोषात् परिहीयते, वशित्वभ्रंशाद् यो मृद्विन्द्रियः । कश्चिन्न परिहीयते यस्तीक्ष्णेन्द्रियः । तत्र यः परिहीयते स परिहाणधर्मा, यो न परिहीयते सोऽपरिहाणधर्मा ।

एवं चेतनाधर्मादयोऽपि योज्याः ।

ध्यानान्येव लौकिकानि सामयिकी विमुक्तिरिति । कस्मादेवमाशंक्यते ? इत्याह—*मौलो हि ध्यानसमाधिरिति* । ध्यानमेव समाधिर्ध्यानसमाधिः । मौलध्यानग्रहणं सुखप्रतिपदामग्रत्वात् । *समये सम्मुखीभावात्* । कस्मिंश्चित् काले निःशब्दादिके सम्मुखीभावात् । समये भवा *सामयिकी विमुक्तिरित्युच्यते* । *पुनःपुनरेषणीयत्वात् कान्तेति* । परिहाणौ परिहाणौ कमनीयत्वात् प्रार्थनीयत्वादित्यर्थः ।

आस्वादनीयत्वादित्यपर इति । भदन्तरामः । सास्रवत्वादास्वादनासम्प्रयुक्तध्यानयोगात् कान्तेत्यभिप्रायः । *अर्हत्त्वविमुक्तिस्त्विति* विस्तरः । अर्हत्त्वमेव विमुक्तिरर्हत्त्वविमुक्तिः । *नित्यानुगतत्वात्* प्राप्तियोगेन । *न युज्यते सामयिकीति* । अनेन सामयिक्या विमुक्तेर्विपर्ययेणार्हत्त्वविमुक्तिं दर्शयति । *अपुनःप्रार्थनीयत्वान्न कान्तेति* । अनेन कान्तविपर्ययेऽर्हत्त्वविमुक्तिर्न कान्तेति । नित्यानुगतत्वेनास्तित्वादप्रार्थनीयत्वान्न कान्तेत्यर्थः ।

आधिचैतसिकेभ्य एवेति । अधिचेतसि भवा आधिचैतसिका *दृष्टधर्मसुखविहाराः, तेभ्य एव । किमर्थं परिहाणिमवक्ष्यदिति* । ये ते चैतसिका दृष्टधर्मसुखविहारा अधिगताः, ततोऽहमस्यान्यतमस्मात् परिहाणिं वदामीति वचनात् । यद्यर्हत्त्वात् सामयिकीविमुक्तिलक्षणात् परिहाणिसम्भवोऽभविष्यत्, किमर्थं तेभ्य एव परिहाणिमवक्ष्यत् । न तेभ्य एव परिहाणिमवक्ष्यदित्यर्थः । *वशित्वभ्रंशादिति* । समाधिसम्मुखीभाववशित्वभ्रंशादित्यर्थः । *सोऽपरिहाणधर्मेति* । अपरिहाणधर्मा अकोप्यधर्मणोऽन्यः सूत्रे पठितः । अष्टादशशैक्षान् विस्तरेणोक्त्वाह – "नवाशैक्षाः कतमे ? परिहाणधर्मा, अपरिहाणधर्मा, चेतनाधर्मा, अनुरक्षणाधर्मा, स्थिताकम्प्यः, प्रतिवेधनाभव्यः, अकोप्यधर्मा, प्रज्ञाविमुक्तः, उभयतोभागविमुक्तः —इम उच्यन्ते नवाशैक्षाः" इति । यः परिहीयते

अपरिहाणधर्मस्थिताकम्प्याकोप्यधर्मणां को विशेषः ? अपरिहाणधर्माऽनुत्तापनागतः, अकोप्यधर्मा तूत्तापनागतः । तौ हि यं यमेव समापत्तिविशेषमुत्पादयतः, तस्मान्न परिहीयेते । स्थिताकम्प्यस्तु यस्मिन्नेव गुणे स्थितस्तस्मात् केवलं न परिहीयते, न त्वन्यमुत्पादयति । उत्पादयति वा तस्मान्न[1] कम्प्यत[2] इत्येव विशेषो लक्ष्यते ।

आयुष्मान् गौतिकः[3] शैक्षीभूतः सामयिक्या विमुक्तेरस्यास्वादनान्मृद्विन्द्रियत्वाच्चाभीक्ष्णं परिहीयमाणो निर्विण्णः शस्त्रमाधारयन् कायजीवितनिरपेक्षत्वान्मरणकाल एवार्हत्त्वप्राप्तः परिनिर्वृतश्च[4] । तस्मात् सोऽपि नार्हत्त्वात् परिहीणः ।

दृष्टधर्मसुखविहारेभ्यः, स परिहाणधर्मा । यो न परिहीयते तत एव सोऽपरिहाणधर्मा । *एवं चेतनाधर्मादयोऽपि योज्याः* । कथम् ? य समाधिभ्रंशभयादात्मानं चेतयते, स चेतनाधर्मा । योऽनुरक्षति कथञ्चिद् गुणविशेषम्, सोऽनुरक्षणाधर्मा । यो यस्मिन्नेव गुणे स्थितः तस्मादननुरक्षन्नपि न कम्प्यते, स स्थिताकम्प्यः । यः परेण प्रतिविध्यति, गुणविशेषमुत्पादयतीत्यर्थः, स प्रतिवेधनाभव्यः । यो न कुप्यति उत्पन्नेभ्यो न परिहीयते, सोऽकोप्यधर्मा ।

को विशेष इति । अपरिहाणधर्मादीनां त्रयाणामपरिहाणियोगाद्विशेषमपश्यन् प्रश्नयति । *अनुत्तापनागत* इति । स्वभावतस्तीक्ष्णेन्द्रियः । नेन्द्रियोत्तापनां प्राप्त इत्यर्थः । *तस्मान्न कम्प्यत* इति । तस्मात् गुणविशेषादित्यर्थः । *एव विशेषो लक्ष्यत* इति । *आचार्यः* स्वमतं दर्शयति ।

ननु चायुष्मान् *गौतिको*ऽर्हत्त्वात्परिहीण इत्येवं यदि *वैभाषिको* ब्रूयादिति अस्य प्रतिविधानमारभ्यते—*आयुष्मान् गौतिक* इति विस्तरः । *शैक्षीभूत* इति । न तावदर्हन् । *शस्त्रमाधारयन्निति* शस्त्रं वाहयन् । *कायजीवितनिरपेक्षत्वात् कारणान् मरणकाल एवार्हत्त्वं प्राप्तः* । शस्त्राधारादुत्तरकाल इत्यर्थः । *परिनिर्वृतश्च*[4] तेनैव शस्त्रप्रहारेण ।

दशोत्तरे चेति । दशोत्तरनामसूत्रे । किमुक्तम् ? इत्याह—*एको धर्म उत्पादयितव्यः* । कतमः ? इत्याह—*सामयिकी कान्ता चेतोविमुक्तिरिति* । दृष्टधर्मसुखविहार इत्यभिप्रायः । *एको धर्मः साक्षात्कर्तव्यः* । कतम ? इत्याह—*अकोप्या चेतोविमुक्तिरिति* । अर्हत्त्वमित्यभिप्रायः । पृथग्वचनाद् ध्यकोप्यविमुक्तिलक्षणादर्हत्त्वस्वभावा, न कान्ता चेतोविमुक्तिरुक्तेत्यभिप्रायः ।

---

१. तस्मात्त–का० । २. कम्पत–का० ।
३. गौतिकः–का० । ४. परिनिर्वृत्तिश्च–जा० ।

दशोत्तरे चोक्तम्—"एको धर्म उत्पादयितव्यः—**सामयिकी** कान्ता चेतोविमुक्तिः। एको धर्मः साक्षात्कर्तव्यः—अकोप्या चेतोविमुक्तिः" इति। यदि चार्हत्त्वं सामयिकी कान्ता चेतोविमुक्तिरभविष्यत्, किमर्थं तत्रैव **दशकेऽर्हत्त्वस्य द्विग्रहणमकरिष्यत्**।

न च कचिदर्हत्त्वमुत्पादयितव्यमुक्तम्। किं तर्हि ? साक्षात् कर्तव्यम्। मृद्विन्द्रियसंगृहीतं चार्हत्त्वमुत्पादयितव्यमिति। किमनेन ज्ञापितं भवति ? यदि तावदुत्पादयितुं शक्यमित्यन्यदपि शक्यम्। अथोत्पादनमर्हतीति, अन्यत् सुतरामर्हति। तस्मान्न सामयिकी विमुक्तिरर्हत्त्वम्।

कथं तर्हि समयविमुक्तोऽर्हन्नुच्यते ? यस्य मृद्विन्द्रियत्वात् समयापेक्षः समाधिसम्मुखीभावः। विपर्ययादसमयविमुक्तः। **अभिधर्मेऽपि चोक्तम्**—"त्रिभिः

द्विप्रकारत्वादर्हत्त्वस्य पृथग्वचनमिति *वैभाषिकवचनावकाशं पश्यन्* पुनराह—*यदि चार्हत्त्वमिति* विस्तरः। *यद्यर्हत्त्वमेव सामयिकी कान्ता चेतोविमुक्तिरभविष्यत्, किमर्थं तत्रैव* दशके न सूत्रान्तरे अर्हत्त्वस्य *द्विग्रहणमकरिष्यत्*—एको धर्मः साक्षात्कर्तव्यः, अकोप्या चेतोविमुक्तिरिति। नैवाकरिष्यदित्यर्थः। एवं ह्यवक्ष्यत्—एको धर्मः साक्षात्कर्तव्यश्चेतोविमुक्तिरिति। ब्रूयास्त्वर्हत्त्वं द्विप्रकारम्। अतो वचनविभागेनोच्यते—एकमुत्पादयितव्यम्, द्वितीयं साक्षात्कर्तव्यमिति।

अत्र ब्रूमः—*न च क्वचिदर्हत्त्वमुत्पादयितव्यमुक्तम्। किं तर्हि ? साक्षात्कर्तव्यमिति*। तत्रतत्र सूत्रे। अभ्युपेत्यापि ब्रूमः। *मृद्विन्द्रियसंगृहीतं चोत्पादयितव्यमिति*। *किमनेन* ज्ञापनेन *ज्ञापितं* कथितं *भवति*। *यदि तावदुत्पादयितुं शक्यमित्येतज्ज्ञापितं भवति*। शकि लिङ् च (पा. सू. ३.३. ७२)इति कृत्यप्रत्ययलक्षणात्। *अन्यदपि शक्यं* यत्तीक्ष्णेन्द्रियसंगृहीतमर्हत्त्वम्। तथा च सत्येवं सूत्रे वक्तव्यं स्यात्—एको धर्म उत्पादयितव्यः, चेतोविमुक्तिरिति। *अथोत्पादनमर्हतीत्येतज्ज्ञापितं भवति*। "अर्हे कृत्यतृचश्च" (पा. सू. ३.३.१६९) इति लक्षणपरिग्रहात्। *अन्यत् सुतरामर्हति*। यत्तीक्ष्णेन्द्रियसंगृहीतमर्हत्त्वम्, तद्ध्यकोप्यत्वात् सुष्ठूत्पादयितुमर्हतीत्यभिप्रायः।

कथं तर्हीति विस्तरः। यदि सामयिकी विमुक्तिरर्हत्त्वं भवति, एवं तद्योगात् समयविमुक्तोऽर्हन्निति युज्यत इत्यभिप्रायः। *समयापेक्षः समाधिसम्मुखीभाव*

स्थानैः कामरागानुशयस्योत्पादो भवति। कामरागानुशयोऽप्रहीणो भवत्यपरिज्ञातः कामरागपर्यवस्थानीयाश्च धर्मा आभासगता भवन्ति, तत्र चायोनिशो मनस्कारः" इति। परिपूर्णोत्पत्तिरेवमिति चेत्? कस्य वा परिपूर्णकारणस्योत्पत्तिः।

एवं तावदागमात्।

२. कथं युक्तितः? यदि तावदर्हतस्तद्रूपः प्रतिपक्ष उत्पन्नो येन क्लेशा अत्यन्तमनुत्पत्तिधर्मतामापन्नाः, कथं पुनः परिहीयते! अथ नोत्पन्नः, कथं क्षीणास्रवो भवति! अत्यन्तमनपोद्धृतायां तद्बीजधर्मतायामक्षीणास्रवो वा पुनः कथमर्हन् भवतीत्येवं युक्तिः।

अङ्गारकर्षूपमं तर्हि परिहार्यम्, यत्रेदमुक्तम्—"यस्य खलु श्रुतवत आर्यश्रावकस्यैवं चरत एवं विहरतः कदाचित् कर्हिचित् स्मृतिसम्प्रमोषादुत्पद्यन्ते पापका अकुशला वितर्काः" इति? स हि तत्रार्हन्नेव ज्ञापितः; "दीर्घरात्र

इति। यस्मादस्य समाधिः सास्रवोऽनास्रवोऽपि वा समयमारोग्यदेशविशेषादिलक्षणमपेक्षते। *अभिधर्मेऽपि चोक्तमिति* विस्तरः। कामरागानुशयोऽप्रहीणो भवतीत्येतदुदाहरणम्। इदं चाप्युदाहरणम्—*तत्र चायोनिशोमनस्कार* इति। *परिपूर्णोत्पत्तिरेवमिति चेत्*। स्यान्मता परिपूर्णकारणस्य क्लेशस्यैवमुत्पत्तिः, अपरिपूर्णकारणस्य तु क्लेशस्य विषयबलादेवेति? तदयुक्तम्, कस्माद्? इत्याह—*कस्य वापरिपूर्णकारणस्योत्पत्तिरि*ति। कस्योत्पत्तिः? यतः अपरिपूर्णकारणस्योत्पत्तिरस्ति। यावती हि हेतुप्रत्ययसामग्री कार्यस्योत्पत्तये प्रसिद्धा, सा तदेकदेशविकला सती तस्योत्पत्तये न भवति। तद्यथा—चक्षूरूपालोकमनस्कारसामग्री चक्षुर्विज्ञानस्योत्पत्तये प्रसिद्धा। स तदन्येतरविकला सती तदुत्पत्तये न भवतीति तस्मान्न किञ्चिदेतत्।

तद्रूप इति तत्प्रकारः। तत्स्वभाव इति वा। *अथ नोत्पन्न* इति प्रतिपक्षः। *तद्बीजधर्मतायामिति*। क्लेशबीजस्वभाव इत्यर्थः। *तस्यामनपोद्धृतायाम*नुन्मूलितायां *कथं क्षीणास्रवो भवतीति*। ब्रूयास्त्वम्—न भवतीति। अत आह—*अक्षीणास्रवो वा कथमर्हन् भवतीति*।

एवं चरत इति। स्मृतिमतश्चरत इत्यर्थः। अनन्तरं स्मृतिवचनात्। 'शैक्षः सः' इत्यस्य वचनस्य परिहारार्थं स एव परिहाणिवाद्याह—*स हि तत्रार्हन्नेव ज्ञापित*

---

१. ०मनयो०–का०।

विवेकनिम्नचित्तमुच्यते[1] यावन्निर्वाणप्राग्भारम्" इति वचनात् ।

अर्हतो ह्येतद् बलमन्यत्रोक्तम्—"सर्वैरास्रवस्थानीयैर्धर्मैः शीतीभूतं वान्तीभूतम्" इति चाभिधानात् ? अस्त्येतदेवम् । यावत्तु चारो न सुप्रतिबद्धस्तावदेवं चरतोऽपि शैक्षस्यास्ति सम्भवः क्लेशोत्पत्ताविति शैक्षावस्थामधिकृत्यैवं वचनाददोषः ।

प्रतिज्ञायते हि लौकिकमार्गप्रतिलम्भात् फलद्वयात् परिहाणिः । अर्हत्त्वादपि तु परिहाणिं वर्णयन्ति **वैभाषिकाः** ।

किं पुनरिमेऽर्हन्त एव षड्गोत्रा भवन्ति ? अथान्येऽपि षड्गोत्रा भवन्ति ?

शैक्षानार्याश्च षड्गोत्राः,

शैक्षपृथग्जना अप्येवं षड्गोत्राः । तत्पूर्वकाण्येव ह्यर्हतां गोत्राणि । अपि तु—

इति । कथं कृत्वा ज्ञापितः ? इत्याह—*दीर्घरात्रमिति* विस्तरः । अपरिहाणिवादिनः स्यादेवं वचनात्रकाशः । शैक्षस्येदं *विवेकनिम्नचित्तमुच्यते यावन्निर्वाणप्राग्भारमिति* । अस्य परिहारार्थं परिहाणिवादी पुनराह—*अर्हतो* ह्येतद्बल*मन्यत्रोक्तमिति* सूत्रे । कथम् ? "कति भदन्तार्हतो भिक्षोः क्षीणास्रवस्य बलानि ? अष्टौ शारिपुत्रार्हतो भिक्षोर्दीर्घरात्रं विवेकनिम्नं चित्तं यावन्निर्वाणप्राग्भारम् । अङ्गारकर्षूपमाश्चानेन कामा दृष्ट्वा भवन्ति । यथास्य कामान् जानतः कामान् पश्यतो यः कामेषु कामच्छन्दः कामस्नेहः विस्तरेण यावत्कामाध्यवसानम्, तत्रास्य चित्तं न पर्यादाय तिष्ठति" इति विस्तरः । *किञ्च शीतीभूतं वान्तीभूतमिति चाभिधानात्* । तत्रैवाङ्गारकर्षूपमे सूत्रेऽर्हन्नेव ज्ञापित इति ।

अस्त्येतदेवमिति । अङ्गारकर्षूपमे यदुक्तमर्हन्नेव ज्ञापित इति । *यावत्तु चारो न सुप्रतिबद्ध* इति । पिण्डपातादिचारः । *शैक्षावस्थामधिकृत्यैवंवचनाददोष* इति । यदेतदुक्तम्—"कदाचित् स्मृतिसम्प्रमोषादुत्पद्यन्ते पापका अकुशला वितर्काः" इति, तच्छैक्षावस्थामधिकृत्योक्तम्, नार्हत्त्वावस्थाम् । यत्तूक्तम्—'दीर्घरात्रं विवेकनिम्नम्' इति, तच्छैक्षस्यापि सम्भवति । अर्हतस्तु प्रकर्षेण भवतीति विशेषः । यच्चाप्युक्तम्—'सास्रवस्थानीयैर्धर्मैः शीतीभूतं वान्तीभूतम्' इति; तदपि शैक्षावस्थामधिकृत्य सम्भवति, कामावचरास्रवस्थानीयधर्मशीती-

---

१. विवेकनिम्नं चित्तं भवति-का० ।

सञ्चारो नास्ति दर्शने ।। ५८ ।।

दर्शनमार्गादन्यत्रेन्द्रियसञ्चारो भवति । प्रयोगासम्भवान्न दर्शनमार्गे । कश्चित् पृथग्जनावस्थायामिन्द्रियाणि सञ्चरति, कश्चिच्छ्रद्धाधिमुक्तावस्थायाम् ।। ५८ ।।

यदिदं सूत्र उक्तम्—"ये त्वनेन चत्वार आधिचैतसिका दृष्टधर्मसुखविहारा अधिगतास्ततोऽहमस्यान्यतमान्यतमस्मात् परिहाणिं वदामि, या त्वनेनैकाकिना यावदकोप्या चेतोविमुक्तिः कायेन साक्षात्कृता, ततोऽहं न केनचित् पर्यायेण परिहाणिं वदामि" इति, कथमकोप्यधर्मणो दृष्टधर्मसुखविहारेभ्यः परिहाणिः ?

परिहाणिस्त्रिधा ज्ञेया प्राप्ताप्राप्तोपभोगतः ।

१. प्राप्तपरिहाणिः, यदि प्रतिलब्धात् गुणात् परिहीयते । २. अप्राप्तपरिहाणिः, यदि प्राप्यं गुणं न प्राप्नोति । ३. उपभोगपरिहाणिः, यदि प्राप्तगुणं न सम्मुखीकरोति ।

आसां पुनः परिहाणीनाम्—

अन्त्या शास्तुरकोप्यस्य मध्या चान्यस्य तु त्रिधा ।। ५९ ।।

बुद्धस्योपभोगपरिहाणिरेव, नान्या । अकोप्यधर्मणः सा च, अप्राप्त-

---

भावाभिधानात् । अर्हत्त्वावस्थां चाधिकृत्य तथाभिधानाददोष इति *आचार्यस्या*भिप्रायः ।

प्रयोगासम्भवान्न दर्शनमार्गे इति पञ्चदशक्षणो दर्शनमार्गः । तत्रेन्द्रियसञ्चारे प्रयोगावकाशो नास्ति । *कश्चित् पृथग्जनावस्थायामिन्द्रियाणि सञ्चरतीति* । किमनित्याद्याकारपतितेन मार्गेणेन्द्रियाणि सञ्चरति, किमौदारिकाद्याकारेण मार्गेणेन्द्रियाणि सञ्चरति, उताहो शान्ताद्याकारेणेति अविशेषितत्वादुभयथापि सम्भवतीति पश्यामः । तथा ह्येनमर्थमाचार्यः सूचयिष्यति; 'न हि सास्रवेण मार्गेणार्याणामिन्द्रियसञ्चारः' इत्यार्याणामिति विशेषणात् । 'अपि नाम ममेन्द्रियाणि तीक्ष्णानि स्युः' इति प्रयोगमभिसन्धाय । मार्गं लौकिकं लोकोत्तरं चान्यस्यानन्तर्यविमुक्तिमार्गक्रमेणेन्द्रियाणि सञ्चरन्तीति वेदितव्यम् । *कश्चिच्छ्रद्धाधिमुक्तावस्थायामित्यत्राशैक्षावचनम्* । शैक्षपृथग्जनाधिकारात् । अशैक्षोऽपि त्विन्द्रियाणि सञ्चरतीति बोद्धव्यम् ।।५८।।

कथमकोप्यधर्मणो दृष्टधर्मसुखविहारेभ्यः परिहाणिरिति । तीक्ष्णेन्द्रियत्वादस्य दृष्टधर्मसुखविहारेभ्यः परिहाणिर्न सम्भवेत्, किमुताकोप्याया विमुक्तेरित्य-

परिहाणिश्च; पुद्गलविशेषधर्माप्रापणात् । अन्यस्यार्हतः प्राप्तपरिहाणिरप्यस्ति । अत उपभोगपरिहाणिवचनादकोप्यधर्मणः सूत्रविरोधः । सर्वस्यानास्रवा विमुक्तिरकोप्या । अकोप्यधर्मव्यवस्थानं तु यथा तथोक्तम् । अत एतदचोद्यमित्यपरिहाणिवादी ॥ ५९ ॥

अथ योऽर्हत्फलात् परिहीयते किमसौ पुनर्जायते ? नास्त्येतत्; यस्मात्

म्रियते न फलभ्रष्टः,

सम्भावयन् पृच्छति । *बुद्धस्योपभोगपरिहाणिरेवेति* । *विनेयकार्यव्यापृतत्वाद्* दृष्टधर्मसुखविहारान्नोपभुंक्ते । न सम्मुखीकरोतीत्यर्थः । *सा चाप्राप्तपरिहाणि-श्चेति* । अकोप्यधर्मणः सा चोपभोगपरिहाणिः; कुतश्चिद्व्यासङ्गात । अप्राप्ति-परिहाणिश्च *पुद्गलविशेषधर्माप्रापणात्* । यस्मादकोप्यधर्मापि कश्चिन् महा-श्रावकाणामार्यशारिपुत्रमौद्गल्यायनादीनां प्रान्तकोटिकादीन् धर्मान् , स्वयम्भु-वांश्च कांश्चिद्धर्मान्न प्राप्नोति । महाश्रावका अपि स्वयम्भुवान् कांश्चिद्विशेषधर्मान्न प्राप्नुवन्तीत्यादि । *अन्यस्यार्हत* इति परिहाणधर्मादेर्मृद्विन्द्रियस्य *प्राप्तपरिहाणि-रप्यस्ति* । अपि-शब्दात् पूर्वोक्ते अपि परिहाणी स्त इति । *अकोप्यधर्मण उपभोगपरिहाणिवचनात् सूत्राविरोध* इति । यदेतदुक्तम्--"येऽनेन चत्वारः" इति विस्तरेण, यावत् ततोऽहमस्यान्यतमस्मात् परिहाणिं वदामि" इति, तस्य सूत्रस्याविरोधः ।

षण्णामप्यर्हतामकोप्या विमुक्तिरित्युक्ते *वैभाषिको* ब्रूयात्—यदि सर्वस्यैवा-र्हतोऽनास्रवा विमुक्तिरकोप्या, कस्मादसमयविमुक्त एवाकोप्यधर्मा व्यवस्थापितो नान्य इति ? अत इदमुच्यते *सर्वस्यानास्रवा विमुक्तिरकोप्येति* । सत्यमस्त्येतत् । *अकोप्यधर्मव्यवस्थानं तु यथा तथोक्तमिति* । दृष्टधर्मसुखविहारेभ्यस्तु कश्चिल्लाभ-सत्कारव्याक्षेपदोषात् परिहीयते वशित्वभ्रंशात्, यो मृद्विन्द्रियः । कश्चिन्न परिहीयते यस्तीक्ष्णेन्द्रियः । स एवाकोप्यधर्मा व्यवस्थापितः । यत एव च दृष्टधर्मसुखविहारेभ्यो लाभसत्कारव्याक्षेपदोषात् परिहीयते मृद्विन्द्रियः, न तीक्ष्णेन्द्रियः । *अत एतदचोद्यम्* । कथम् ? अकोप्यधर्मणो दृष्टधर्मसुख-विहारात् परिहाणिरित्यपरिहाणिवादी । अथ वा—अयमन्यः सम्बन्धः । पूर्वं कोप्यधर्मणो दृष्टधर्मसुखविहारेभ्यः परिहाणिर्नास्तीत्युक्तम्, सूत्रे च यस्या-कोप्या विमुक्तिस्तस्य दृष्टधर्मसुखविहारात् परिहाणिरुक्ता; अविशेष्याभिधानादत इदमुच्यते—सर्वस्यानास्रवा विमुक्तिरकोप्येति । न तयैकोऽकोप्यधर्मा व्यव-स्थाप्यत इत्यभिप्रायः । अत एवोच्यते—अकोप्यधर्मव्यवस्थानं तु यथा

नैव हि कश्चित् फलात् परिहीणः कालं करोति; "धन्धा भिक्षव आर्यश्रावकस्य स्मृतिसम्प्रमोषा, अथ च पुनः क्षिप्रमेवान्तं परिक्षयं सपदि संगच्छति" इति सूत्रे वचनात्। अन्यथा ह्यनाश्वासिकं ब्रह्मचर्यं स्यात्।

यतश्च फलात् परिहीयते तत्फलस्थेन यदकार्यं

तदकार्यं करोति न।

परिहीणोऽपि संस्तत्फलविरुद्धां क्रियां न करोति, शूरप्रस्खलनापतनवत्।

अथेन्द्रियाणि सञ्चरतां कत्यानन्तर्यविमुक्तिमार्गा भवन्ति ?

विमुक्त्यानन्तर्यपथा नवाकोप्ये,

अकोप्यगोत्रे प्रतिविध्यमाने प्रतिवेधभावनाभव्यस्य नवानन्तर्यमार्गा विमुक्तिमार्गाश्च भवन्ति, यथार्हत्त्वं प्राप्नुवतः। किं कारणम् ?

अतिसेवनात्॥ ६०॥

तस्य मृद्विन्द्रियगोत्रं भवतीति नाल्पेन व्यावर्त्तयितुं शक्यते; शैक्षाशैक्षमार्गाभ्यां दृढीकृतत्वात्॥ ६०॥

दृष्टयाप्ततायामेकैकः,

दृष्टिप्राप्तायां प्रतिविध्यमानायामेक एवानन्तर्यमार्गो भवति, एको विमुक्तिमार्गः। प्रयोगमार्गस्तु सर्वत्रैक एव।

ते पुनः सर्व एवानन्तर्यविमुक्तिमार्गाः

तथोक्तमिति। अत एतदचोद्यमिति। यदुक्तं सूत्रमाश्रित्य कथमकोप्यधर्मणो दृष्टधर्मसुखविहारेभ्यः परिहाणिरिति॥ ५९॥

धन्धा इति मन्दाः। *अन्यथा ह्यनाश्वसिकमि*ति। यद्यर्हत्त्वात् परिहीणः पुनर्जायेत—

"सुचीर्णब्रह्मचर्येऽस्मिन् मार्गे चापि सुभाविते।
तुष्ट आयुःक्षयाद्भवति रोगस्यापगमे यथा"॥

इत्याश्वासः, एवंविधो न स्यादिति। *तदकार्यम*ब्रह्मचर्यादिलक्षणम्। *शूरप्रस्खलनापतनवदि*ति। यथा शूरस्य प्रस्खलने अपतनं भवति, शक्तित आत्मधारणात्। तद्वदार्यः फलात् परिहीणोऽपि तत्फलमलब्ध्वा न *म्रियते*। शूरग्रहणमविक्लवत्वात्। बलवान् शूर इत्यपरे।

कथमभ्यस्तम् ? इत्याह—*शैक्षाशैक्षमार्गाभ्यां दृढीकृतत्वादि*ति॥ ६०॥

*प्रयोगमार्गस्तु सर्वत्रैक एवे*ति। अकोप्यप्रतिवेधे, दृष्टिप्राप्यतायां च।

अनास्रवाः,

न हि सास्रवेण मार्गेणार्याणामिन्द्रियसञ्चारः ।

क्व पुनरिन्द्रियाणि वर्धन्ते ?

नृषु वर्धनम् ।

मनुष्येष्वेवेन्द्रियसञ्चारो नान्यत्र; परिहाण्यसम्भवात् ।

क्व पुनः कतमां भूमिं निश्रित्येन्द्रियाणि सञ्चरति ?

अशैक्षो नव निश्रित्य भूमीः,

अनागम्यस्यानन्तरं चत्वारि ध्यानानि, त्रीणि चारूप्याणि ।

शैक्षस्तु षट्,

आरूप्यवर्ज्यः ।

किं कारणम् ?

यतः ।। ६१ ।।

सविशेषं फलं त्यक्त्वा फलमाप्नोति वर्धयन् ।

इन्द्रियाणि हि सञ्चरन् फलं फलविशिष्टं च मृद्विन्द्रियमार्गं त्यक्त्वा तीक्ष्णेन्द्रियगोत्रं फलमार्गमेव प्रतिलभते । न चानागामिफलमारूप्यसंगृहीतमस्तीत्येतत्[1] कारणम् ॥ ६१ ॥

न हि सास्रवेणेति । आर्येन्द्रियसञ्चारस्य विवक्षितत्वात् । अन्यथा हि कश्चित् पृथग्जनावस्थायामिन्द्रियाणि सञ्चरतीत्येतद्विरुध्यते ।

नान्यत्र परिहाण्यसम्भवादिति । परिहाणिभयाद्धीन्द्रियसञ्चार इष्यते । अन्यत्र षट्सु कामावचरेषु देवनिकायेषु रूपारूप्यधात्वोश्च परिहाणिर्नास्तीत्याह-ऊर्ध्वधातूपपन्न आर्यो नैवेन्द्रियाणि सञ्चरति । नापि कथंचित् परिहीयत इति । उक्तमत्र कारणम्—कालान्तरपरिवासेनेन्द्रियाणां परिपक्वतरत्वात् । आस्रवविशेषलाभाच्चेति । अथ कस्मात् कामावचरेषु देवेषु परिहाणिर्नास्ति ? ये पूर्वमभ्युदारेभ्योऽपि विषयेभ्यः संविजन्तो नियतं सत्यानि पश्यन्ति, ते कथं तानेवालम्ब्य परिहास्यन्ते ? अवश्यं हि ते तीक्ष्णेन्द्रिया भवन्तीत्यभिप्रायः ।

"अशैक्षो नव निश्रित्य" इति । तत्फलस्य नवभूमिसंगृहीतत्वसम्भवात् । फलं

---

१. ०मारूप्यभूमि०–का० ।

त एते षडेवार्हन्तो नव भवन्ति; इन्द्रियभेदात् ।

कथं कृत्वा ?

द्वौ बुद्धौ श्रावकाः सप्त नवैते नवधेन्द्रियाः ।। ६२ ।।

कतमे सप्त श्रावकाः ? परिहाणधर्मादयः पञ्च । अकोप्यधर्मा च द्विविधः—उत्तापनागतः, आदितश्च तद्गोत्रः अकोप्यभेद एव । द्वौ बुद्धौ—प्रत्येकबुद्धः, बुद्धश्च । इत्येते मृदुमृद्वादिनवप्रकारेन्द्रियभेदान्नव पुद्गला भवन्ति ।। ६२ ।।

सर्व एव त्वार्यपुद्गलाः सप्त भवन्ति—श्रद्धानुसारी, धर्मानुसारी, श्रद्धाधिमुक्तः, दृष्टिप्राप्तः, कायसाक्षी, प्रज्ञाविमुक्तः, उभयतोविमुक्तश्च ।

एते पुनः—

प्रयोगाक्षसमापत्तिविमुक्त्युभयतः कृताः ।

पुद्गलाः सप्त,

प्रयोगतः श्रद्धाधर्मानुसारिणौ; पूर्वमेव परप्रत्ययधर्मानुसाराभ्यामर्थेषु प्रयोगात् ।

फलविशिष्टं चेति । फलं सकृदागामिफलम् । फलविशिष्टं प्रथमध्यानादिप्रहाणाय प्रयोगानन्तर्यविमुक्तिविशेषमार्गलक्षणम् । *फलमार्गमेव प्रतिलभत* इति । कामधातुवैराग्यमात्रसंगृहीतम् । *न चानागामिफलमारूप्यसंगृहीतमिति* । 'पञ्चानामवरभागीयानां प्रहाणादनागामी' इति सूत्रे वचनात्, दर्शनमार्गस्य च तत्राभावात् । तदभावः कामधात्वनालम्बनादिति व्याख्यातमेतत् ।। ६१ ।।

अकोप्यधर्मा च द्विविध इति । सूत्रे पठितत्वादकोप्यभेद एव । द्वौ बुद्धाविति । अकोप्यधर्मा मृदुमध्याधिमात्रेन्द्रियभेदात् त्रिधा भिद्यते । श्रावको ह्यकोप्यधर्माधिमात्रमृद्विन्द्रियः । प्रत्येकबुद्धोऽधिमात्रमध्येन्द्रियः । सम्यक्सम्बुद्धोऽधिमात्राधिमात्रेन्द्रिय इति । *मृदुमृद्वादिनवप्रकारेन्द्रियभेदादिति* । परिहाणिधर्मा मृदुमृद्विन्द्रियो यावद्भगवानधिमात्राधिमात्रेन्द्रिय इति ।। ६२ ।।

सप्त भवन्तीति । प्रत्येकबुद्धसम्यक्सम्बुद्धावुभयतोभागविमुक्तसंगृहीतावेवेति कृत्वा ।

पूर्वमेवेति विस्तरः । पूर्वमेव पृथग्जनावस्थायां परप्रत्ययेन परतः श्रुत्वा स्मृत्युपस्थानादीन् धर्मान् पश्चादर्थेषु *प्रयोगात्* । चिन्ताभावनासेवनादित्यर्थः । तथा पूर्वमेव पृथग्जनावस्थायां प्रज्ञया द्वादशाङ्गप्रवचनधर्मानुसारेण स्वयमेवं बोधिपक्षादीन् धर्माननुसरन्नर्थेषु प्रयोगात् । चिन्ताभावनासेवनात् । इत्येवं *प्रयोगतः श्रद्धाधर्मानुसारिणौ भवतः* ।

इन्द्रियतः श्रद्धाधिमुक्तदृष्टिप्राप्तौ ।
मृदुतीक्ष्णेन्द्रियत्वात् श्रद्धाधिमोक्षप्रज्ञाधिक्यतः ।
समापत्तितः कायसाक्षी, निरोधसमापत्तिसाक्षात्करणात् ।
विमुक्तितः प्रज्ञाविमुक्तः ।
समापत्तिविमुक्तितः । उभयतोभागविमुक्तः ।
नामत एते सप्त पुद्गलाः ।

षट् त्वेते,

द्रव्यतस्त्वेते षट् भवन्ति ।

द्वौ द्वौ मार्गत्रये यतः ।। ६३ ।।

दर्शनमार्गे हि द्वौ पुद्गलौ, श्रद्धाधर्मानुसारिणौ । तावेव भावनामार्गे द्वौ भवतः, श्रद्धाधिमुक्तदृष्टिप्राप्तौ । तौ पुनरशैक्षमार्गे द्वौ भवतः, समयासमयविमुक्ताविति । तत्रेन्द्रियतस्त्रयः, श्रद्धानुसारिणः । गोत्रतः पञ्च । मार्गतः पञ्चदश । अष्ट क्षान्तिसप्तज्ञानस्थाः । वैराग्यतस्त्रिसप्ततिः । सकलबन्धनः । कामवैराग्या-

श्रद्धाधिमोक्षप्रज्ञाधिक्यत इति । श्रद्धाधिमोक्षाधिक्यतः, प्रज्ञाधिक्यतश्च । श्रद्धयाधिमोक्षः, श्रद्धाधिमोक्षः, तस्याधिक्यात् मृद्विन्द्रियत्वम् । प्रज्ञाधिक्यात् तीक्ष्णेन्द्रियत्वम् ।

विमुक्तित इति । क्लेशविमुक्तितः प्रज्ञया क्लेशाद्विमुक्तः *प्रज्ञाविमुक्त* इति कृत्वा । *समापत्तिविमुक्तित* इति । समापत्तितो विमुक्तितश्च ।

तत्रेन्द्रियत इति विस्तरः । यथैते श्रद्धानुसारिणो गण्यन्ते, तथा यथाग्रन्थं प्रदर्शयिष्यामः । *इन्द्रियतस्त्रयः* । मृदुमध्याधिमात्रेन्द्रियत्वात् । अत्र पुनरेवमवगन्तव्यम्—यद्यपि श्रद्धानुसारिणः सर्व एव मृद्विन्द्रियाः, तथापि तारतम्येनावस्थानादेषां पुनस्त्रिधा भेदः मृदुमध्याधिमात्रेन्द्रिया इति । *गोत्रतः* पञ्च । कथम् ? परिहाणधर्मगोत्रको यावत्प्रतिवेधनाभव्यगोत्रक इति पञ्च भवन्ति । पुनरेषां गोत्रेन्द्रियभेदात् पञ्चदेशानामेकैको *मार्गतः पञ्चदश भवन्ति* । कथमिति ? उच्यते—*अष्टक्षान्तिसप्तज्ञानस्था* इति । दर्शनमार्गो हि पञ्चदशक्षणः । अष्टौ क्षान्तयः— दुःखे धर्मज्ञानक्षान्तिर्यावन्मार्गे अन्वयज्ञानक्षान्तिः । सप्त ज्ञानानि— दुःखे धर्मज्ञानं यावन्मार्गे धर्मज्ञानम् । मार्गेऽन्वयज्ञानस्य भावनामार्गसंगृहीतत्वात् । अष्टौ च सप्त च पञ्चदश भवन्ति । त एवं तत्रस्थाः पञ्चदश

नव । एवं यावदाकिञ्चन्यायतनवैराग्यात् । आश्रयतो नव । त्रिद्वीपषड्देवनिकायजाः । इन्द्रियगोत्रमार्गवैराग्याश्रयतः पिण्डिताः[1] शतसहस्रं सम्पद्यन्ते सहस्राणि च सप्तचत्वारिंशच्छतानि चाष्टौ पञ्चविंशतिश्च ।

एवमन्येऽपि पुद्गलाः सम्भवतः संख्येयाः ॥ ६३ ॥

भवन्ति । एवमेषां मार्गतः पञ्चदशधाभिन्नानां पुनरेकैको *वैराग्यतस्त्रिसप्ततिः* । कथम् ? *सकलबन्धनस्तावत्* कामधातावेकः, *कामवैराग्याच्च* । एकप्रकारवीतरागो यावन्नवप्रकारवीतरागः । एवं *यावदाकिञ्चन्यायतनवैराग्याच्चेति* । भवाग्रवैराग्यान्नवेति न सम्भवति; लौकिकस्य मार्गस्य भवाग्रप्रतिपक्षस्याभावात् । त एतेऽष्टौ नवका द्विसप्ततिः । सकलबन्धनेन पूर्वोक्तेन सह त्रिसप्ततिर्भवन्ति । पुनरेते वैराग्यतः प्रत्येकं त्रिसप्ततिभिन्नाः । प्रत्येक*माश्रयतो नव* । कथम् ? इत्याह *त्रिद्वीपषड्देवनिकायजा* इति । त्रयो द्वीपा उत्तरकुरुवर्ज्याः, उत्तरकुरौ मार्गाभावात् षड् देवनिकायाः कामावचराः, तत ऊर्ध्वं दर्शनमार्गाभावात् । तेषु जाता इति । प्रत्येकमेते नवगुणा भवन्ति । *इन्द्रियगोत्रमार्गवैराग्याश्रयतः पिण्डिता* इति । नैगमन उच्यते । इयन्त इति वृत्तौ लिखिता ।

एवमन्येऽपि पुद्गलाः सम्भवतः संख्येया इति । धर्मानुसारिप्रभृतयः । यथेन्द्रियगोत्रमार्गवैराग्याश्रयतः श्रद्धानुसारिणः संख्याता, तथैव संख्येयाः सम्भवत इति । धर्मानुसारिदृष्टिप्राप्तसमयविमुक्तानां गोत्रभेदो नास्ति, श्रद्धाधिमुक्त-समयविमुक्तयोस्तु गोत्रभेदोऽप्यस्तीति सम्भवत इत्युच्यते । तत्रेन्द्रियतस्त्रयो धर्मानुसारिणः, गोत्रत एक एवेति भेदो नास्ति । मार्गतः पञ्चदश अष्टक्षान्तिसप्तज्ञानस्थाः । वैराग्यतस्त्रिसप्ततिः । सकलबन्धनः । कामवैराग्यान्नव । एवं यावदाकिञ्चन्यायतनवैराग्यात् आश्रयतो नव । त्रिद्वीपषड्देवनिकायजा इति । एवमिन्द्रियमार्गवैराग्याश्रयतः पिण्डिताः सहस्राण्येकान्नत्रिंशत् सम्पद्यन्ते । शतानि च पञ्च पञ्चषष्टिश्च । एवमिन्द्रियतस्त्रयः श्रद्धाधिमुक्ताः । गोत्रतः पञ्च प्रत्येकम् । वैराग्यतस्त्रिसप्ततिः प्रत्येकमेव पूर्ववत् । आश्रयतो नव । त्रिद्वीपषड्देवनिकायजा इति । एवमिन्द्रियगोत्रवैराग्याश्रयतः पिण्डिताः नव सहस्राणि सम्पद्यन्ते । शतानि चाष्टौ पञ्च पञ्चाशच्च । केवलफलस्थो षोडशचित्तप्राप्तोऽधिकृतः ।

"श्रद्धाधिमुक्तदृष्ट्याप्तौ मृदुतीक्ष्णेन्द्रियौ तदा" (अभि० को० ६.३१) इत्यनयोरिह विवक्षितत्वात् ।

---

१. पण्डिताः—का० ।

*भगवद्विशेष*स्त्वाह—"मार्गतो नव भवन्ति। भावनामार्गस्थत्वात्" इति। तत्र बुद्ध्यामहे—केनाभिप्रायेणैवमुक्तमिति। यद्ययमभिप्रायो भवेत्—मार्गतो भूमौभूमौ नव भवन्तीति, वैराग्यतस्त्रिसप्ततिरिति, स एवार्थो दर्शितो भवेत् तद्व्यतिरेकादपि युक्तं स्यात्, तदेव हि परिमाणं स्यात् अथ नवभूमिकानास्रवभावनामार्गस्थत्वान्नवत्वमेषां व्यवस्थाप्येत? तथा सति तत्परिमाणं पुनर्नवगुणीक्रियेत। एतावन्तश्च भवेयुरष्टाशीतिसहस्राणि, शतानि च षट्, पञ्चनवतिश्चेत्येवमुत्तरत्रापि वक्तव्यम्। यदि तु श्रद्धाधिमुक्त आ वज्रोपमात् समाधेर्गृह्येत, ततोऽन्यथा गणयितव्यम्—इन्द्रियतस्त्रयः श्रद्धाधिमुक्ताः, गोत्रतः पञ्च प्रत्येकम्, वैराग्यत एकाशीतिः, त्रिसप्ततौ भवाग्राष्टप्रकारवीतरागानष्टावधिकान् प्रक्षिप्य, आश्रयत एकान्नत्रिंशत्। कथम्? कामधातौ नवोपपत्तिस्थानानि, रूपधातौ षोडश स्थानानि, चत्वारश्चारूप्या इति। एवमिन्द्रियगोत्रवैराग्याश्रयतः पिण्डिता सहस्राणि पञ्चत्रिंशत्, शते च द्वे पञ्चत्रिंशच्चेति। दृष्टिप्राप्तस्य गोत्रभेदो नास्ति। इन्द्रियवैराग्याश्रयतः पिण्डिताः सहस्रं सम्पद्यन्ते शतानि च नव, एका सप्ततिश्च। यदि त्वा वज्रोपमात् समाधेर्दृष्टिप्राप्तो गृह्यते, तत एवं संख्यातव्याः—इन्द्रियवैराग्याश्रयतः पिण्डिताः सप्तचत्वारिंशदधिकानि सप्त सहस्राणि सम्पद्यन्ते। काय साक्षी श्रद्धाधिमुक्त-दृष्टिप्राप्तयोरन्तर्भूत इति न गण्यते। यदि पुनर्गण्यते, इन्द्रियतस्त्रयः। यदि श्रद्धाधिमुक्तः स कायसाक्षी, गोत्रतः पञ्च। यदि दृष्टिप्राप्तः, नास्ति गोत्रभेदः। मार्गतः उभयोःपि नास्ति भेदः। आकिञ्चन्यायतनवीतरागत्वात् वैराग्यतोऽपि नास्ति भेदः। यद्यपि भवाग्रे सकलबन्धन[1] एकप्रकारवीतरागो यावदष्टप्रकारवीतराग इति। मार्गतो वैराग्यतो वास्ति भेदः। न तु मार्गवैराग्यकृतं कायसाक्षित्वमिति नास्य तत्कृतस्तद्भेदो व्यवस्थाप्यते।

आश्रयतो वा बहुधा भेदः। कामावचराश्रयत्वात् यावद्भवाग्राश्रयत्वादिति *भगवद्विशेषः*।

कथमाकाशानन्त्यायतनाद्याश्रयः कायसाक्षी भवति? एवं तु युक्तं पश्यामः आश्रयतः पञ्चविंशति, कामधातौ नवोपपत्तिस्थानानि, रूप धातौ च षोडश स्थानानीति। तत्र ह्यार्यो निरोधसमापत्तिमुत्पादयेत्। यदि तु कामरूपाश्रयोत्पादितनिरोधसमापत्तियोगात् कायसाक्षीभूतस्यानागामिनः? तत्समन्वागममात्रप्रयोगात् पश्चादपि भवाभाश्रयं कायसाक्षित्वमिष्येत। भवाग्रं षड्विंशतितम आश्रयः स्यादित्यवगन्तव्यम्।

---

१. °बन्दनः—जा०।

कोऽयमुभयतोभागविमुक्त इत्युच्यते ? कश्च प्रज्ञाविमुक्तः ?

निरोधलाभ्युभयतोविमुक्तः प्रज्ञयेतरः ।

यो निरोधसमापत्तिलाभी स उभयतोभागविमुक्तः; प्रज्ञासमाधिबलाभ्यां क्लेशविमोक्षावरणविमुक्तत्वात् । इतरः प्रज्ञाविमुक्तः; प्रज्ञाबलेन केवलं क्लेशावरणविमुक्तत्वात् ।

यदुक्तं भगवता—

"क्लेशान् प्रहायेह हि यस्तु पञ्च अहार्यधर्मा परिपूर्णशैक्षः" इति ।

कियता परिपूर्णः शैक्षो भवति ?

समापत्तीन्द्रियफलैः पूर्णः शैक्षोऽभिधीयते ।। ६४ ।।

त्रिविधा शैक्षस्य परिपूरिः—फलतः, इन्द्रियतः, समापत्तितश्च । फलत एव—श्रद्धाधिमुक्तस्याकायसाक्षिणोऽनागामिनः । इन्द्रियत एव—दृष्टिप्राप्तस्यावीतरागस्य । फलेन्द्रियतः—दृष्टिप्राप्तस्य कायसाक्षिणोऽनागामिनः । फलसमापत्तितः—

एवमिन्द्रियगोत्राश्रयतः परिगण्य गणयितव्यः । प्रज्ञाविमुक्तस्यापि भेदः इन्द्रियतस्त्रयः प्रज्ञाविमुक्तः । गोत्रतः पञ्च । यदि समयविमुक्ताः, अथासमयविमुक्ता नास्ति भेदः ।

एवमुभयतोभागविमुक्तोऽपि योजयितव्यः ।। ६३ ।।

प्रज्ञासमाधिबलाभ्यां क्लेशविमोक्षावरणविमुक्तत्वादिति । प्रज्ञाबलेन क्लेशावरणविमुक्तत्वात्, समाधिबलेन च विमोक्षावरणविमुक्तत्वात् । विमोक्षाः पुनरष्टौ वक्ष्यन्ते । रूपी रूपाणि पश्यतीति विस्तरः । तत्र *क्लेशावरणमिति* । क्लेशा एवावरणम् । *विमोक्षावरणमिति* विमोक्षाणामावरणम् । तत्पुनः कायचित्तयोरकर्मण्यता, यया विमोक्षानुत्पादयितुं न शक्नोतीति ।

क्लेशान् प्रहायेह हि यस्तु पञ्चेति । पञ्चावरभागीयानि संयोजनानि सत्कायदृष्ट्यादीन्युक्तानि । *अहार्यधर्मेत्यपरिहाणिधर्मेत्यर्थः* ।

फलत एवेति विस्तरः । श्रद्धाधिमुक्तत्वान्नेन्द्रियतः परिपूर्णत्वम् । *अकायसाक्षित्वान्न* समापत्तितः । *अनागामित्वात् तु* फलतः परिपूर्णत्वमस्ति । *इन्द्रियत एवेति* । *दृष्टिप्राप्तत्वादि*न्द्रियतः परिपूर्णत्वम् । *अवीतरागत्वात्* तु न फलतो नापि समापत्तितः; *अनागामि*फलसमापत्त्योरभावात् । एवमन्येषामपि सम्भवतो

श्रद्धाधिमुक्तस्य कायसाक्षिणः । फलेन्द्रियसमापत्तितः—दृष्टिप्राप्तस्य कायसाक्षिणः । समापत्तित एव समापत्तीन्द्रियतश्च परिपूर्णत्वं नास्ति विना फलेन ॥ ६४ ॥

अशैक्षपरिपूर्णत्वं द्वाभ्याम्,

इन्द्रियतः, समापत्तिश्च । फलेन त्वपरिपूर्णस्याशैक्षत्वमेव नास्तीति नास्य पुनः फलेन परिपूर्णापरिपूर्णत्वं व्यवस्थाप्यते । इन्द्रियत एव—असमयविमुक्तस्य प्रज्ञाविमुक्तस्य । समापत्तित एव—समयविमुक्तस्योभयभागविमुक्तस्य । इन्द्रिय-समापत्तिभ्याम्—असमयविमुक्तस्योभयतोभागविमुक्तस्य ।.

बहव इमे मार्गभेदा उक्ताः—लौकिक-लोकोत्तर-दर्शन-भावनाऽशैक्षमार्गाः प्रयोगानन्तर्यविमुक्तिविशेषमार्गा इति । कतिविध एष समासतो मार्ग इति ?

मार्गः समासतः ।

विशेषमुक्त्यानन्तर्यप्रयोगाख्यश्चतुर्विधः ।। ६५ ।।

१. प्रयोगमार्गः, यस्मादनन्तरमानन्तर्यमार्गोत्पत्तिः । २. आनन्तर्यमार्गः, येनावरणं प्रजहाति । ३. विमुक्तिमार्गः, यस्तत्प्रहेयावरणविनिर्मुक्तः प्रथमत[1] उत्पद्यते । ४. विशेषमार्गः, य एभ्योऽन्यो मार्गः ।

योज्यम् । *समापत्तित एवेति* । समापत्तित एव परिपूर्णत्वं नेन्द्रियफलाभ्यामिति नास्त्येतत् । कस्मात् ? न ह्यसत्यामनागामिफलप्राप्तौ निरोधसमापत्तिरस्ति । *समापत्तीन्द्रियतश्च विना फलेनेति* । समापत्तीन्द्रियत एव च परिपूर्णत्वं न फलत इत्येतदपि नास्ति । यस्मादनागामिफलमप्राप्तस्य निरोधसमापत्तिर्नास्तीति ॥ ६४ ॥

इन्द्रियतः समापत्तिश्चेति । तीक्ष्णेन्द्रियतया निरोधसमापत्तिलाभतया चेत्यर्थः । *इन्द्रियत एवेति* विस्तरः । *असमयविमुक्तस्येति* वचनात् । अस्येन्द्रियतः परिपूर्णत्वम्; *प्रज्ञाविमुक्तस्येति* वचनात् । न समापत्तितोऽस्य परिपूर्णत्वम् । अनिरोधसमापत्तिलाभी हि प्रज्ञाविमुक्त इत्युक्तम् । *समापत्तित एवेति; समय-विमुक्तस्येति* वचनात् । नेन्द्रियतः परिपूर्णत्वमस्य भवति; *उभयतोभागविमुक्त-स्येति* वचनात् । समापत्तितोऽस्य परिपूर्णत्वम् । निरोधसमापत्तिलाभीत्युभयतोभागविमुक्त इत्युक्तम् । इन्द्रियसमापत्तिभ्याम् । किम् ? परिपूर्णत्वम् । *असमयविमुक्तत्वादिन्द्रियतः* उभयतोभागविमुक्तत्वात् समापत्तित इति दर्शयति ।

---

१. तत्प्रथमत.—का० ।

कस्मात् मार्ग इत्युच्यते ? एष हि निर्वाणस्य पन्थाः; तेन[1] तद्गमनात् । निर्वाणं मार्गयन्त्यनेनेति वा ।

विमुक्तिविशेषमार्गयोः कथं मार्गत्वम् ? तज्जातीयाधिमात्रतरत्वाद्[2], उत्तरोत्तरप्रापणात्, निरुपधिशेषप्रवेशाद् वा ॥ ६५ ॥

आनन्तर्यमार्गो येनावरणं प्रजहातीति । अप्रहाणमार्गसम्भवात् । अस्ति स आनन्तर्यमार्गो येनावरणं न प्रजहाति । इन्द्रियसञ्चारादिषु । *यस्तत्प्रहेयावरण-निर्मुक्तः प्रथमत* इति । य आनन्तर्यमार्गप्रहेयेणावरणेन निर्मुक्तः । *प्रथमत* इति विशेषणम् । यस्मात् तृतीयादिषु क्षणेषु तज्जातीयो मार्गो विशेषमार्ग इतीष्यते । तेन एव चाह—*विशेषमार्गो य एभ्योऽन्यो मार्ग* इति । प्रयोगमार्गादिभ्योऽन्य इत्यर्थः । किञ्च यदि प्रथमत इति न ब्रूयात्, विमुक्तिमार्गो यस्तत्प्रहेयावरण-निर्मुक्त इत्येतावद् ब्रूयात् । एवं सति दुःखधर्मज्ञानात् परेण सर्वे आनन्तर्य-मार्गादयस्तत्प्रहेयावरणनिर्मुक्ता उत्पद्यन्त इति सर्वे विमुक्तिमार्गाः स्युः । अनिष्टं चैतत्; आनन्तर्यमार्गादिष्वपि विमुक्तिमार्गप्रसङ्गात् । तस्मादानन्तर्यमार्गस्य दुःखधर्मज्ञानक्षान्त्यादेर्यत् प्रहेयमावरणम्, दुःखदर्शनप्रहातव्यो निकायो यावद्भावनाप्रहातव्यः, तेन प्रहेयावरणेन निर्मुक्तो यः प्रथमत उत्पद्यते स विमुक्तिमार्ग । नान्यस्तत्प्रहेयावरणनिर्मुक्तत्वेऽपीति । य एभ्यः प्रयोगमार्गा-दिभ्यस्त्रिभ्योऽन्यः स विशेषमार्गः । षोडशान्मार्गान्वयज्ञानक्षणात् परेण सप्तदशादयस्तज्जातीया येऽनास्रवाः क्षणाः, ते विशेषमार्गस्वभावा इत्यव-गन्तव्यम् । एवमन्यदपि विमुक्तिज्ञानं यत्प्राकर्षिकं क्षयज्ञानादि, तदपि वक्तव्यम् । यश्च दृष्टधर्मसुखविहाराय वैशेषिकगुणाभिनिर्हाराय वा मार्गः, सोऽपि विशेषमार्ग एव प्रयोगमार्गः; यस्मादानन्तर्यमार्गोत्पत्तिरित्युक्तम् । अतो लौकिका अग्रधर्माः प्रयोगमार्ग इति गम्यते । यस्तु प्रतिलोमतः क्षान्त्यादिमार्गः, स कस्मिन्नन्तर्भवतीति वक्तव्यम् ? आह—प्रयोगमार्ग एवान्तर्भवति । विप्रकृष्ट-त्वसौ प्रयोगमार्ग इत्ययं तस्याग्रधर्मेभ्यो विशेषः । उदाहरणार्थत्वाच्चाचार्येण सन्निकृष्ट एव प्रयोगमार्ग उक्त इति ।

एष हि निर्वाणस्य पन्थाः । *तेन तद्गमनादिति* । लोके येन गम्यते स मार्ग इति प्रतीतः । *अनेन च निर्वाणं गम्यते* प्राप्यते, तस्मान्मार्ग इति दर्शयति । *मार्गयन्त्यनेन* वेति । "मार्गोऽन्वेषणे" इति धातुः पठ्यते । तस्येदं घञि रूपं मार्ग इति । येन निर्वाणमन्विष्यते स मार्ग इति ।

---

१. एतेन–का० । २. तज्जातीयादधि०–का० ।

अभि० को० ३ : १७

मार्ग एव पुनः प्रतिपदित्युक्तः; निर्वाणप्रतिपादनात् । चतस्रः प्रतिपदः—अस्ति प्रतिपद् दुःखा धन्धाभिज्ञा, अस्ति दुःखा क्षिप्राभिज्ञा । एवं सुखापि द्विविधा । तत्र—

ध्यानेषु मार्गः प्रतिपत्सुखा,

चतुर्ध्यानेषु मार्गः सुखा प्रतिपद् ; अङ्गपरिग्रहणशमथविपश्यनासमताभ्यामयत्नवाहित्वात् ।

दुःखाऽन्यभूमिषु ।

अन्यास्वनागम्यध्यानान्तरारूप्यभूमिषु मार्गो दुःखा प्रतिपद्; अङ्गापरिग्रहात्, शमथविपश्यनान्यूनत्वाच्च यत्नवाहित्वात् । शमथन्यूने ह्यनागम्यध्यानान्तरे विपश्यनान्यूना आरूप्या इति ।

विमुक्तिविशेषमार्गयोः कथं मार्गत्वमिति । न हि ताभ्यां निर्वाणं प्राप्यते । प्रयोगानन्तर्यमार्गयोरेव तत्प्राप्तौ सामर्थ्यमिति तयोरिति अभिप्रायः । *तज्जातीयाधिमात्रतरत्वादिति* । प्रहाणमार्गजातीयौ चालम्बनाकारानास्रवत्वसादृश्यात् । अधिमात्रतरौ च हेतूपचयतः । यथा ह्यानन्तर्यमार्गश्चतुःसत्यालम्बनषोडशाकारोऽनास्रवश्च, एवं विमुक्तिविशेषमार्गावपि । अधिमात्रतरत्वेनैव तु तस्माद्विशेष इति । *उत्तरोत्तरप्रापणात्* । *निरुपधिशेषप्रवेशाद्वेति* । यस्माद्विमुक्तिमार्गेण विशेषमार्गेण च उत्तरोत्तरो मार्गः प्राप्यते, तस्मादनयोर्मार्गत्वमित्यर्थः । यस्माद्वा ताभ्यां निरुपधिशेषं निर्वाणं प्रविशति यदुत्पत्तौ निरुपधिशेषनिर्वाणप्रवेश इति ।

अपरे पुनरेवं व्याचक्षते—उत्तरोत्तरप्रापणान्निरुपधिशेषप्रवेशः, तस्मादनयोर्मार्गत्वमिति ॥ ६५ ॥

निर्वाणप्रतिपादनादिति । यस्मादनेन निर्वाणं प्रतिपद्यत इत्यर्थः । *एवं सुखापि द्विविधेति* । अस्ति प्रतिपत्सुखा धन्धाभिज्ञा, अस्ति सुखा क्षिप्राभिज्ञेति । *अङ्गपरिग्रहणशमथविपश्यनासमताभ्यामयत्नवाहित्वादिति* । अङ्गैः परिग्रहः । शमथविपश्यनयोः समत्वम् । अङ्गपरिग्रहश्च शमथविपश्यनासमत्वं च, ताभ्यामयत्नवाहित्वम् । *तस्मात्सुखा प्रतिपत्* । यस्मादङ्गपरिगृहीतानि ध्यानानि शमथविपश्यनाभ्यां समानि च, तस्मादयत्नवाहीनि । अतश्च सुखासौ प्रतिपदिति ।

---

१. ०परिग्रहशमथ०–का० ।

सा पुनर्द्विविधापि प्रतिपत्—

धन्धाभिज्ञा मृदुमतेः क्षिप्राभिज्ञेतरस्य तु ॥ ६६ ॥

मृद्विन्द्रियस्य सुखा दुःखा वा प्रतिपद्धन्धाभिज्ञा, तीक्ष्णेन्द्रियस्य क्षिप्राभिज्ञा । धन्धाभिज्ञा अस्यां प्रतिपदि सेयं धन्धाभिज्ञा । एवं क्षिप्राभिज्ञा । धन्धस्य वा पुद्गलस्येयमिति धन्धाभिज्ञा ।

पुनरप्येष मार्गो बोधिपक्ष्याख्यां लभते । सप्तत्रिंशद् बोधिपक्षा धर्माः—चत्वारि स्मृत्युपस्थानानि, चत्वारि सम्यक्प्रहाणानि, चत्वार ऋद्धिपादाः पञ्चेन्द्रियाणि, पञ्च बलानि, सप्त बोध्यङ्गानि, आर्याष्टाङ्गो मार्ग इति ॥ ६६ ॥

अङ्गापरिग्रहादिति विस्तरः । *अङ्गापरिग्रहादनागम्यध्यानान्तरारूप्या यत्नवाहिनः । शमथविपश्यनान्यूनत्वाच्च* सम्भवतरो यत्नवाहिनः । *शमथन्यूनत्वादनागम्यं ध्यानान्तरे यत्नवाहीनि । विपश्यनान्यूनत्वाच्चारूप्या यत्नवाहिनः ।* तद्भावान् । तेऽनागम्यादयो दुःखा प्रतिपदिति ।

धन्धाभिज्ञेति । धन्धाभिज्ञास्यामिति । धन्धाभिज्ञा मन्दप्रज्ञेत्यर्थः । *क्षिप्राभिज्ञेति* तीक्ष्णप्रज्ञा । *धन्धस्य मन्दस्य पुद्गलस्येयमभिज्ञा धन्धाभिज्ञेति* । षष्ठीतत्पुरुषेणाप्येतत्सिध्यतीति दर्शयति । एवं क्षिप्रस्य तीक्ष्णस्य पुद्गलस्याभिज्ञा क्षिप्राभिज्ञेति योज्यम् ।

चत्वारि स्मृत्युपस्थानानि । कायवेदनाचित्तधर्माः स्मृत्युपस्थानानि यथोक्तानि । चत्वारि *सम्यक्प्रहाणानि* । उत्पन्नानां पापकानामकुशलानां धर्माणां प्रहाणाय छन्दं जनयति, व्यायच्छते, वीर्यमारभते, चित्तं प्रगृह्णाति, प्रदधाति । अनुत्पन्नानां पापकानामकुशलानां धर्माणामनुत्पादाय छन्दं जनयतीति पूर्ववत् । अनुत्पन्नानां कुशलानां धर्माणामुत्पादाय छन्दं जनयतीति पूर्ववत् । उत्पन्नानां कुशलानां धर्माणां स्थितये असम्मोषाय भावनापरिपूर्ये भूयोभावाय वृद्धिविपुलताज्ञानसाक्षात्क्रियायै छन्दं जनयतीति पूर्ववत् । *चत्वार ऋद्धिपादाः* । छन्दसमाधिप्रहाणसंस्कारसमन्वागत ऋद्धिपादः । एवं वीर्य-चित्त-मीमांसासमाधिप्रहाणसंस्कारसमन्वागत ऋद्धिपादः । ऋद्धिपादा ऋद्धिहेतव इत्यर्थः । *पञ्चेन्द्रियाणि* । श्रद्धावीर्यस्मृतिसमाधिप्रज्ञेन्द्रियाणि । *पञ्च बलानि* । श्रद्धावीर्यस्मृतिप्रज्ञाबलानि । *सप्त बोध्यङ्गानि* । स्मृति-धर्मप्रविचय-वीर्य-प्रीतिप्रश्रब्धिसमाध्युपेक्षाबोध्यङ्गानि । स्मृतिरेव सम्बोध्यङ्गं स्मृतिसम्बोध्यङ्गम् । एवं यावदुपेक्षैव सम्बोध्यङ्गमुपेक्षासम्बोध्यङ्गमिति । *आर्याष्टाङ्गो मार्गः* । सम्यग्दृष्टिः, सम्यक्सङ्कल्पः, सम्यग्वाक्, सम्यक्कर्मान्तः, सम्यगाजीवः, सम्यग्व्यायामः, सम्यक्स्मृतिः, सम्यक्समाधिरिति ॥ ६६ ॥

तत्र—

अनुत्पादक्षयज्ञाने बोधिः,

क्षयज्ञानमनुत्पादज्ञानं च । पुद्गलभेदेन तिस्रो बोधय उत्पद्यन्ते—श्रावकबोधिः, प्रत्येकबोधिः, अनुत्तरा सम्यक्सम्बोधिरिति; अशेषाविद्याप्रहाणात् । ताभ्यां स्वार्थस्य यथाभूतं[1] कृताऽपुनःकर्तव्यतावबोधाच्च ।

तादनुलोम्यतः ।

सप्तत्रिंशत् तु तत्पक्षाः[2],

बोधेरनुलोमत्वाद् बोधिपक्ष्याः सप्तत्रिंशदुत्पद्यन्ते ।

नामतो द्रव्यतो दश ।। ६७ ।।

दश द्रव्याणि सर्वे बोधिपक्ष्याः ॥ ६७ ॥

अशेषाविद्याप्रहाणादिति । यस्मादशेषत्रैधातुकयविद्याप्रहाणम्, तस्मादुभ' बोधिः । अनेन शैक्षपृथग्जनानां प्रज्ञा न बोधिर्व्यवस्थाप्यत इति दर्शयति । किं च यथाक्रमम् ? *ताभ्यां स्वार्थस्य यथाभूतं कृतापुनःकर्तव्यतावबोधाच्च* । क्षयज्ञानेन यथाभूतं कृतावबोधात् तत्क्षयज्ञानं बोधिः । 'दुःखं मे परिज्ञातम्' इति यथाभूतं प्रजानाति, 'समुदयो मे प्रहीणः' इति, निरोधो मे साक्षात्कृतः', 'मार्गो मे भावितः' इति यथाभूतं प्रजानातीति । अनुत्पादज्ञानेन यथाभूतमपुनःकर्तव्यमिति । 'मार्गो मे भावितो न पुनर्भावयितव्यः' तदनुत्पादज्ञानमपि बोधिः । 'दुःखं मे परिज्ञातं न पुनः परिज्ञातव्यम्' इति यथाभूतं प्रजानाति, 'समुदयो मे प्रहीणो न पुनः प्रहातव्यः' इति, 'निरोधो मे साक्षात्कृतो न पुनः साक्षात् कर्तव्यः' इति, 'मार्गो मे भावितो न पुनर्भावयितव्यः' इति यथाभूतं प्रजानातीति । 'दुःखं मे परिज्ञातम्' इत्यनेन क्षयज्ञानम्, 'न पुनः परिज्ञातव्यम्' इत्यनेनानुत्पादज्ञानम्—इत्युभयमपि तीक्ष्णेन्द्रियस्य पुद्गलस्य दर्शयतीति सव नेयम् ।

तदेवं क्षयज्ञानमनुत्पादज्ञानं च बोधिरित्यवयवार्थं प्रसाध्य समुदयार्थं प्रसाधयन्नाह—"*तादनुलोम्यतः सप्तत्रिंशत्तु तत्पक्षाः*" इति । तस्या बोधेरनुलोमस्तदनुलोमः, तद्भावस्तादनुलोम्यम्, तस्मात् तादनुलोम्यतो बोधिपक्षाः । बोधिपक्षे साधवोऽनुलोमा इति बोधिपक्षाः स्मृत्युपस्थानादयः सप्तत्रिंशदुच्यन्ते प्रवचने ।

---

१. यथाभूत०–का० । २. तत्पक्ष्या०–का० ।

कतमानि दश ?

श्रद्धा वीर्यं स्मृतिः प्रज्ञा समाधिः प्रोत्युपेक्षणे ।

प्रश्रब्धिशीलसङ्कल्पाः,

इत्येतानि दश द्रव्याणि ।

कथं कृत्वा ?

प्रज्ञा हि स्मृत्युपस्थितिः ।। ६८ ।।

वीर्यं सम्यक्प्रहाणाख्यमृद्धिपादाः समाधयः ।

प्रज्ञावीर्यसमाधिस्वभावा हि स्मृत्युपस्थानसम्यक्प्रहाणर्द्धिपादाः । अत इन्द्रियाणि तावद् बलानि च नामग्राहिकया श्रद्धावीर्यस्मृतिसमाधिप्रज्ञाद्रव्याणि पञ्च । स्मृत्युपस्थानानि धर्मप्रविचयसम्बोध्यङ्गं सम्यग्दृष्टिश्च प्रज्ञैव । सम्यक्प्रहाणानि

---

*दश द्रव्याणी*ति । केषाञ्चिन्मतेन । हि "वैभाषिकाणामेकादश कायवाक्कर्मणोरसम्भिन्नत्वात्" इति ।। ६७ ।।

"*प्रज्ञा हि स्मृत्युपस्थितिः*" इति प्रज्ञा स्मृत्युपस्थानमित्यर्थः । स्मृतिरुपतिष्ठतेऽनयेति कृत्वा । तथा हि सूत्र उक्तम्—"काये कायानुपश्यी" इति विस्तरः ।

"*वीर्यं सम्यक्प्रहाणाख्यम्*" इति । यस्मादुक्तम्—"उत्पन्नानां पापकानामकुशलानां धर्माणां प्रहाणाय छन्दं जनयति, व्यायच्छते, वीर्यमारभते" इति सर्वम् ।

"*ऋद्धिपादाः समाधयः*" इति । यस्मादुक्तम्—"छन्दसमाधिप्रहाणसंस्कारसमन्वागतमृद्धिपादं भावयति" इति सर्वम् । प्रहाणसंस्काराः पुनरत्राष्टौ सूत्रे पठ्यन्ते । कथम् ? तथाभूतस्य यश्छन्दः यो व्यायामः या श्रद्धा या प्रश्रब्धिः या स्मृतिः यत्सम्प्रजन्यम् या चेतना योपेक्षा—इम उच्यन्ते प्रहाणसंस्कारा इति । *इन्द्रियाणि तावदि*ति विस्तरः । स्वनामग्रहणेन यानीन्द्रियबलस्वभावानि *श्रद्धावीर्यस्मृतिसमाधिप्रज्ञा द्रव्याणि पञ्च* । *तेषां प्रज्ञैव सा यानि* चत्वारि *स्मृत्युपस्थानानि* । यच्च बोध्यङ्गेषु *धर्मप्रविचयसम्बोध्यङ्गम्* । *या च* मार्गाङ्गेषु *सम्यग्दृष्टिः* । न द्रव्यान्तरम् । *वीर्यमेव तद्यानि* चत्वारि *सम्यक्प्रहाणानि* । यच्च बोध्यङ्गेषु *वीर्यसम्बोध्यङ्गम्* । यश्च मार्गाङ्गेषु *सम्यग्व्यायामः* । *समाधिरेव च सः* । ये चत्वार

वीर्यसम्बोध्यङ्गं सम्यग्व्यायामश्च वीर्यमेव। ऋद्धिपादाः **समाधिसम्बोध्यङ्गं सम्यक्समाधिश्च** समाधिरेव। स्मृतिसम्बोध्यङ्गं सम्यक्स्मृतिश्च स्मृतिरेव।

किमवशिष्यते? प्रीतिप्रश्रब्ध्युपेक्षासम्बोध्यङ्गानि, सम्यक्सङ्कल्पः[१], शीलाङ्गानि च। तान्येतानि पञ्च द्रव्याणि। एवमेते बोधिपक्ष्या दश द्रव्याणि भवन्ति।

वैभाषिकाणामेकादश। कायवाक्कर्मणोरसम्भिन्नत्वात् शीलाङ्गानि द्वे द्रव्ये इति।

यत्त्वेतदुक्तम्—"प्रज्ञावीर्यसमाधिस्वभावाः स्मृत्युपस्थानादयः" इति। अत्र वेदितव्यम्—

प्रधानग्रहणं सर्वे गुणाः प्रायोगिकास्तु ते ॥ ६९ ॥

प्रधानग्रहणेनैवमुक्तम्। सर्वे तु प्रायोगिका गुणाः स्मृत्युपस्थानसम्यक्-प्रहाण**र्द्धिपादाः**।

ऋद्धिपादाः। यच्च बोध्यङ्गेषु *समाधिसम्बोध्यङ्गम्*, यच्च मार्गाङ्गेषु *सम्यक्समाधिः*।

किमवशिष्यते। यन्न प्रज्ञेन्द्रियादिस्वभावम्। बोध्यङ्गेषु *प्रीतिप्रश्रब्ध्युपेक्षा-सम्बोध्यङ्गान्यवशिष्यन्ते*; मार्गाङ्गेषु *सम्यक्संकल्पः*, *शीलाङ्गानि* च त्रीणि—सम्यग्वाक्, सम्यक्कर्मान्त, सम्यगाजीव इति।

दश द्रव्याणीति। श्रद्धादीनि पञ्च, प्रीतिसम्बोध्यङ्गादीनि च पञ्चेति शीलाङ्गानि त्रीण्यविज्ञप्तिस्वभावानीति कृत्वैकं द्रव्यं व्यवस्थाप्यते।

वैभाषिकाणामेकादश द्रव्याणि। *कायवाक्कर्मणोरसम्भिन्नत्वाद् द्वे द्रव्यमिति* कृत्वा। अभिप्रायवशात् पक्षद्वयेऽप्यदोषः। यदि तु मुख्यवृत्त्या तस्मिन् कलापे यावन्ति द्रव्याणि सान्त, तावन्ति गण्येरन्; नैव तानि दश द्रव्याणि, समाहित-विज्ञप्तिरूपाणां सप्तद्रव्यत्वात्। षोडश द्रव्याणीति वक्तव्यं स्यात्।

प्रधानग्रहणेनैवमुक्तम्। प्रज्ञादिस्वभावाः स्मृत्युपस्थानादय इति। *सर्वे तु प्रायोगिकगुणाः* सास्रवानास्रवाः श्रुतचिन्ताभावनामया यथायोगं *स्मृत्युपस्थान-सम्यक्प्रहाणर्द्धिपादाः*। प्राधान्यं पुनस्तद्बलेनान्येषां वृत्तेः। न पुनस्ते न सन्ति।

१. ०सङ्कल्पाः—जा०।

कस्माद्वीर्यं सम्यक्प्रधानमुक्तम् ? तेन सम्यक्कायवाङ्मनांसि प्रधीयन्ते ।

समाधिः कस्माद् ऋद्धिपाद उक्तः ? तत्प्रतिष्ठितत्वात्[1] सर्वगुणसम्पत्तेः ।

ये त्वाहुः—"समाधिरेवर्द्धिः पादाश्छन्दादयः" इति । तेषां द्रव्यतस्त्रयोदश बोधिपक्षाः[2] प्राप्नुवन्ति; छन्दचित्तयोराधिक्यात् । सूत्रं च विरुध्यते—"ऋद्धिं च वो भिक्षवो दर्शयिष्यामि ऋद्धिपादांश्च यावद् । ऋद्धिः कतमा ? इह भिक्षुरनेकविधमृद्धिविषयं प्रत्यनुभवति । एको भूत्वा बहुधा भवति" इति विस्तरः ।

प्रज्ञाप्रधानानि हि स्मृत्युपस्थानानीत्यतः प्रज्ञाग्रहणम् । न तु प्रज्ञैव स्मृत्युपस्थानम् । किं तर्हि ? प्रज्ञावीर्यस्मृतिसमाधिप्रीतिप्रश्रब्ध्युपेक्षासम्यक्सङ्कल्पादयोऽपीति । प्रयोगिकग्रहणमुपपत्तिलभ्यश्रद्धादिनिरासार्थम् । एवं वीर्यप्रधानानि सम्यक्प्रधानानि, समाधिप्रधाना ऋद्धिपादा इति विस्तरेण वक्तव्यम् ।

ऋद्धिपादाः समाधय इति कुत एतत्? सूत्रात् । उक्तं हि—"छन्दं चापि भिक्षवो भिक्षुरधिपतिं कृत्वा लभते समाधिम्, सोऽस्य भवति छन्दसमाधिः । चित्तम्, वीर्यम्, मीमांसां चापि भिक्षवो भिक्षुरधिपतिं कृत्वा लभते समाधिम्, सोऽस्य भवति मीमांसासमाधिः" इति ।

तेन हि सम्यक्कायवाङ्मनांसि प्रधीयन्त इति । प्रधीयन्ते = धार्यन्ते, नियम्यन्ते, प्रवर्त्यन्ते वा कदाचिदनेनेति प्रधानम् । *तत्प्रतिष्ठितत्वादिति ।* यस्मात् सर्वगुणसमापत्तिलक्षणा ऋद्धिस्तस्मिन् समाधौ प्रतिष्ठिता । ऋद्धेः पादः प्रतिष्ठेति ऋद्धिपाद इति ।

ये त्वाहुः समाधिरेव ऋद्धिः, पादाश्छन्दादयः, छन्दचित्तवीर्यमीमांसा इति । *तेषामेवंवादिनां वैभाषिकाणां त्रयोदश बोधिपक्षाः प्राप्नुवन्ति । छन्दचित्तयोराधिक्यादे*कादशसु प्रक्षेपे । वीर्यप्रज्ञे त्वत्र नाधिके; सम्यक्प्रधानस्मृत्युपस्थानेष्वन्तर्भावात् । *बहुधा भवतीति विस्तर* इति । बहुधा भूत्वैको भवति आविर्भावम् तिरोभावं ज्ञानदर्शनेन प्रत्यनुभवति । तिरः कुड्यं तिरः प्राकारमसज्जमानः कायेन गच्छति, तद्यथा आकाशे । पृथिव्यामुन्मज्जननिमज्जनं करोति, तद्यथोदके । उदकेऽभिद्यमानेन स्रोतसा गच्छति, तद्यथा पृथिव्याम् । आकाशे पर्यङ्केण क्रामति, तद्यथा शकुनिः पक्षी । इमौ वा पुनः भूयो चन्द्रमसावेवं महधिकावेवंमहानुभावौ पाणिना आमाष्टि, परिमाष्टि यावद् ब्रह्मलोकं कायेन वशे वर्तयत इति इयमुच्यते ऋद्धिः । ऋद्धिपादाः कतमे ? छन्दसमाधिः,

---

१. तत्प्रतिष्ठत्वात्–का० । २. बोधिपक्ष्याः–का०

कस्मादिन्द्रियाण्येव बलान्युक्तानि ? मृद्वधिमात्रभेदादवमर्दनीयानवमर्दनीयत्वात् ।

इन्द्रियाणां किंकृतोऽनुक्रमः ? श्रद्दधानो हि फलार्थं वीर्यमारभते, आरब्धवीर्यस्य स्मृतिरुपतिष्ठते, उपस्थितस्मृतेरविक्षेपाच्चित्तं समाधीयते, समाहितचित्तो यथाभूतं प्रजानातीति ॥ ६८-६९ ॥

कस्यामवस्थायां कतमे ते बोधिपक्ष्याः प्रभाव्यन्ते ?

आदिकर्मिकनिर्वेधभागीयेषु प्रभाविताः ।
भावने दर्शने चैव सप्त वर्गा यथाक्रमम् ॥ ७० ॥

आदिकर्मिकावस्थायां कायाद्युपलक्षणार्थं स्मृत्युपस्थानानि । विशेषाधिगमेन

वीर्यसमाधिः, मीमांसासमाधिः—इम उच्यन्ते ऋद्धिपादा इति । एवंलक्षणः समाधिः । तस्मान्न समाधिरेव ऋद्धिरिति[1] ।

अत्राचार्यसङ्घभद्र आह—न भवत्येष तेषां दोषः, समाधि हि ते ऋद्धिपादमिच्छन्ति, ऋद्धिरपीति । छन्दादयस्तूच्यन्ते समावेशचतुष्ट्वज्ञापनार्थम्[2] । कश्चिद्धि समाधिः कुशलमूलप्रयोगावस्थायां प्रधानीभवति, कश्चिन् कुशलमूलनिष्पन्नावस्थायाम् । पूर्वोऽर्द्धिपाद, उत्तरऋद्धिरिति सूत्रविरोधोऽपि चैषां न भवति । ऋद्धिपादफलमृद्धिशब्देनोक्तम्, परिज्ञाफलस्य तच्छब्दाभिधानवदित्यादि ।

मृद्वधिमात्रभेदादिति । मृदूनीन्द्रियाणि । अधिमात्राणि बलानि । कथमेषां मृद्वधिमात्रभेदः ? इति हेतुमाह—*अवमर्दनीयानवमर्दनीयत्वादिति* । *तद्विपक्षभूतैराश्रद्धयकौसीद्यमुषितस्मृतिताविक्षेपासम्प्रजन्यैरन्तरासमुदाचारादिन्द्रियाण्यवमृद्यन्ते, न त्वेवं बलानीति* । पुनस्तान्युक्तानि ॥ ६८–६९ ॥

"*आदिकर्मिकनिर्वेधभागीयेषु*" इति । पञ्चावस्था इमे उक्ताः ।

"*भावने दर्शने च*" द्वे अवस्थे इति । सप्तस्ववस्थासु—

"*सप्त वर्गा यथाक्रमम्*" प्रभाव्यन्ते, व्यवस्थाप्यन्ते, प्रधानीक्रियन्ते वा । आदिकर्मिकावस्थायां स्मृत्युपस्थानानि । ऊष्मगतावस्थायां सम्यक्प्रधानानि । मूर्धावस्थायामृद्धिपादाः । क्षान्त्यवस्थायामिन्द्रियाणि । लौकिकाग्रधर्मावस्थायां बलानि । भावनामार्गावस्थायां बोध्यङ्गानि । दर्शनमार्गावस्थायामार्याष्टाङ्गो मार्ग इति । *विशेषाधिगमहेतुवीर्यसंवर्धनम्* । *तस्मादूष्मगतेषु सम्यक्प्रधानानि* ।

---

१. ऋधिरिति—जा० । २. °चतुस्त्व०—जा० ।

वीर्यसंवर्धनादूष्मगतेषु सम्यक्प्रधानानि । अपरिहाणीयकुशलमूलप्रवेशत्वात् मूर्धस्वृद्धिपादाः । अपुनःपरिहाणित आधिपत्यप्राप्तत्वात् क्षान्तिष्विन्द्रियाणि । क्लेशानवमर्दनीयत्वाद्, अग्रधर्मेषु बलानि लौकिकान्यधर्मानवमर्दनीयत्वाद्वा । बोध्यासन्नत्वात् भावनामार्गे बोध्यङ्गानि । गमनप्रभावित्वाद् दर्शनमार्गे मार्गाङ्गानि; तस्याशुगामित्वात् ।

संख्यानुपूर्वीविधानार्थं तु पूर्वं सप्तोक्तानि, पश्चादष्टौ ।

तत्र धर्मप्रविचयसम्बोध्यङ्गं बोधिर्बोध्यङ्गं च सम्यग्दृष्टिर्मार्गो मार्गाङ्गं चेति वैभाषिकाः ।

अपरे पुनरभित्त्वैव क्रमं बोधिपक्षाणामानुपूर्वी[1] वर्णयन्ति; "आदित एव तावद् बहुविधविषयव्यासेकविसारिणीनां बुद्धीनां निग्रहार्थं स्मृत्युपस्थानानि चेतस

अपरिहाणीयकुशलमूलप्रवेशत्वात् । मूर्धस्विति । अपरिहाण्यनुकूलानां कुशलमूलानां प्रवेशो मूर्धतः । "मूर्धलाभी न मूलच्छिद्" (अभि० को० ६.२३) इति वचनात् । प्रविशत्येभिरिति कृत्वा प्रवेशः । अपरिहाणिर्हि क्षान्तिषु भवति । तदवस्थाः समाधयः समृद्धेराश्रयीभवन्तीति । *मूर्धस्वृद्धिपादा* व्यवस्थाप्यन्ते । *अपुनःपरिहाणित* इति विस्तरः । यस्मात् क्षान्तिषु पुनः परिहाणिर्नास्ति, आद्ययोरेव हि परिहाणिसम्भवतः । *तस्मादाधिपत्यप्राप्तानि* श्रद्धादीनि भवन्ति । तद्भावात् *क्षान्तिष्विन्द्रियाणि* व्यवस्थाप्यन्ते । *क्लेशानवमर्दनीयत्वादिति ।* यस्मात् क्लेशैर्नावमृद्यन्ते; तस्यामवस्थायां क्लेशासमुदाचारात् । *लौकिकान्यधर्मानवमर्दनीयत्वाद्वा ।* अथ वा - लोकिकैरन्यैर्धर्मैरनवमर्दनीयत्वादग्रधर्मावस्थायां श्रद्धादीनि *बलानीति प्रभाव्यन्ते । बोध्यासन्नत्वादिति ।* क्षयानुत्पादज्ञानसन्नत्वादित्यर्थः । भावनामार्गो हि क्षयानुत्पादज्ञानासन्नः । दर्शनमार्गस्तु दूरः, तदन्तरालभावनामार्गव्यवहितत्वात् । *गमनप्रभावितत्वादिति ।* मार्गो हि लोके गमनप्रभावितः । गच्छन्त्यनेनेति मार्गः । गच्छतीति वा मार्गः, "पाटलिपुत्रमयं पन्था गच्छति' इति लोके वचनात् । दर्शनमार्गश्चातिशयेन गमनप्रभावितो न भावनामार्गः । कथम् ? इत्याह—*तस्याशुगामित्वादिति ।* तद्वानपि तेनाशु गच्छति । भावनामार्गेण तु भूमिभेदेन प्राकर्षकत्वात् बहुना कालेन गच्छति ।

अपरे पुनराहुरिति । आचार्यः । अस्मदादय इत्यभिप्रायात् । यथा *वैभाषिकैर्भिन्नः क्रमः,* तथा तमभित्त्वा बोधिपक्षाणामानुपूर्वी वर्णयन्ति । दर्शनमार्गे

१. ०पक्ष्याणा०—का० ।

उपनिबद्धानि भवन्ति, यावदेव गर्धाश्रितानां स्मरसंकल्पानां प्रतिविनोदनाय" इति सूत्रे वचनात्। तद्बलेन वीर्यसंवर्धनाच्चतुर्विधकार्यसम्पादनाय सम्यक्चित्तं प्रदधातीति सम्यक्प्रधानानि। ततः समाधिविशोधनाद् ऋद्धिपादाः। समाधिसन्निश्रयेण लोकोत्तरधर्माधिपतिभूतानि श्रद्धादीनीन्द्रियाणि। तान्येव च निर्जितविपक्षसमुदाचाराणि बलानि। दर्शनमार्गे बोध्यङ्गानि। प्रथमतो धर्मतत्त्वावलोकात् उभयोर्मार्गाङ्गानि।

तथा ह्युक्तम्—"आर्याष्टाङ्गे खलु मार्गे भावनापरिपूरिं गच्छति चत्वारि स्मृत्युपस्थानानि भावनापरिपूरिं गच्छन्ति, यावत् सप्त बोध्यङ्गानि" इति।

पुनश्चोक्तम्—"यथाभूतवचनारोचनमिति भिक्षवश्चतुर्णामार्यसत्यानामेतदधि-

---

बोध्यङ्गानीति कृत्वा। *बहुविधेति* विस्तरः। बहुप्रकारो विषयो रूपादिभेदात् नीलादिभेदाच्च। तस्मिन् *व्यासेको* विक्षेपः। बहुविषयव्यासेकेन विसतुं शीलमासामिति। *बहुविधविषयव्यासेकविसारिण्यो बुद्धयः*। *तासां निग्रहार्थं स्मृत्युपस्थानानि*। *गर्धाश्रितानां* तृष्णाश्रितानामित्यर्थः। *स्मरसङ्कल्पानामिति* अनुभूतविषयस्मृतिसङ्कल्पानामित्यर्थः। कामसङ्कल्पानामिति वा। *तद्बलेनेति*। चतुःस्मृत्युपस्थानबलेनेत्यर्थः। चतुर्विधकार्यसम्पादनायेति। चतुर्विधं कार्यम्—उत्पन्नानां धर्माणां प्रहाणम्, अनुत्पन्नानामनुत्पादः, तथानुत्पन्नानां कुशलानामुत्पादः, उत्पन्नानां स्थित्यादीनि। *ततः समाधिविशोधनादिति*। ततः सम्यक्प्रधानेभ्योऽनन्तरं समाधेर्विशोधनाद् *ऋद्धिपादाः प्रभाव्यन्ते*। *लोकोत्तरधर्माधिपतिभूतानीति*। तदावाहकत्वादधिपतिभूतानि वेदितव्यानि। तान्येवेन्द्रि*याणि*। यदा *निर्जितविपक्षसमुदाचाराणि*। निर्जिताश्रद्ध्यादिसमुदाचाराणि भवन्ति, तदा *बलानि*। इन्द्रियावस्थायां हि क्लेशसमुदाचारः सम्भवति, क्षान्त्यवस्थायाः प्राकर्षकत्वात्। *दर्शनमार्गे* बोध्यङ्गानीति। अनास्रवा प्रज्ञा बोधिरिति कृत्वा। *उभयोर्मार्गाङ्गानीति*। दर्शनभावनामार्गयोः।

कथम्? इत्याह—*तथा ह्युक्तमिति* विस्तरः। भावनया परिपूरिर्भावनापरिपूरिः, तां गच्छत्यार्याष्टाङ्गो मार्गः। *तस्मिन् गच्छति चत्वारि स्मृत्युपस्थानानि भावनापरिपूरिं गच्छन्ति*। *यावत्सप्त बोध्यङ्गानीति*। भावनापरिपूरिं गच्छन्तीति वचनात् भावनामार्गेऽपि आर्याष्टाङ्गो मार्गो भवतीति गम्यते। न हि दर्शनमार्गे भावना परिपूरिं गच्छति। किं तर्हि? भावनामार्गे इति।

वचनं यथागतेन मार्गेण प्रक्रमणमिति भिक्षो आर्याष्टाङ्गस्य मार्गस्यैतदधिवचनम्" इति। तस्मादुभयोरार्याष्टाङ्गो मार्ग एष्टव्यः ॥ ७० ॥

सिद्धोऽनुक्रमः ॥

इदं तु वक्तव्यम्—कति बोधिपक्षा धर्माः सास्रवा इति ? कत्यनास्रवा इति ?

अनास्रवाणि बोध्यङ्गमार्गाङ्गाणि[1],

भावनादर्शनमार्गयोस्तद्व्यवस्थापनात्। लौकिका अपि हि सम्यग्दृष्ट्यादयः सन्ति। ते तु नार्यमार्गशब्दं लभन्ते।

द्विधेतरे।

अन्ये बोधिपक्षाः सास्रवानास्रवाः।

कस्यां भूमौ कति बोधिपक्षाः ?

सकलाः प्रथमे ध्याने,

सर्वे सप्तत्रिंशत् प्रथमे ध्याने।

अनागम्ये प्रीतिवर्जिताः ॥ ७१ ॥

कस्मादनागम्ये प्रीत्यभावः ? सामन्तकानां बलवाहनीयत्वाद्, अधरभूमिसाशङ्कत्वाच्च ॥ ७१ ॥

पुनश्चोक्तम्। उभयोर्मार्गाङ्गानि व्यवस्थाप्यन्त इति। *चतुर्णामार्यसत्यानामेतदधिवचनमिति*। दर्शनमार्गं दर्शयति। *यथागतेन मार्गेण प्रक्रमणमिति* विस्तरेण यावन्*मार्गस्यैतदधिवचनमिति*। भावनामार्गं दर्शयति। यथागतेन यथाप्राप्तेन मार्गेण प्रक्रमणं यावद् बोधिरिति। तदेवं दर्शनमार्गे भावनामार्गे च मार्गाङ्गानि व्यवस्थाप्यन्त इति। *अत उभयोरार्याष्टाङ्गो मार्ग एष्टव्य इति* ॥ ७० ॥

सिद्धोऽनुक्रम। पूर्वं बोध्यङ्गानि, पश्चादार्याष्टाङ्गो मार्ग इति।

"*अनास्रवाणि बोध्यङ्गमार्गाङ्गाणि*" इति। अनास्रवाण्येवेत्यवधारणम्।

"*द्विधेतरे*" इति। स्मृत्युपस्थानादयो बलपर्यन्ताः।

---

1. ०मार्गाङ्गानि—का०।

द्वितीयेऽन्यत्र सङ्कल्पात्,

द्वितीये ध्याने सम्यक्संकल्पवर्ज्याः षट्त्रिंशदेव; तत्र वितर्काभावात् ।

द्वयोस्तद्द्वयवर्जिताः ।

तृतीयचतुर्थयोर्ध्यानयोः प्रीतिसङ्कल्पाभ्यां वर्जिताः पञ्चत्रिंशत् ।

ध्यानान्तरे च,

ताभ्यामेव द्वाभ्यां वर्जिताः पञ्चत्रिंशदेव ।

शीलाङ्गैस्ताभ्यां च त्रिष्वरूपिषु ।। ७२ ।।

'वर्जिताः' इति वर्तते । आरूप्येषु सम्यग्वाक्कर्मान्ताजीवैः प्रीतिसङ्कल्पाभ्यां च वर्जिता द्वात्रिंशत् ।। ७२ ।।

कामधातौ भवाग्रे च बोधिमार्गाङ्गवर्जिताः ।

द्वाविंशतिर्बोधिपक्ष्यास्तयोरनास्रवमार्गाभावात् ।

बोधिपक्षेषु वर्तमानस्य कस्यामवस्थायामवेत्यप्रसादलाभो वेदितव्यः ?

त्रिसत्यदर्शने शीलधर्मावेत्यप्रसादयोः ।। ७३ ।।

बलवाहनीयत्वादिति । बलेन वीर्येण सम्मुखीकरणीयत्वात् । अनागम्ये *प्रीत्यभावः* । सुखाधिगम्यं चित्तं प्रीणाति, नेतरदिति । किञ्च *अधरभूमिसाशङ्कत्वाच्च* । परिहाणिं प्रति साशङ्क इत्यतश्च तत्र प्रीत्यभावः । साशङ्कतायां हि चित्तं न प्रीयते ।। ७१ ।।

सङ्कल्पवर्ज्या इति । सङ्कल्पः = वितर्कः ।। ७२ ।।

"*कामधातौ भवाग्रे च बोधिमार्गाङ्गवर्जिताः*" इति । कथं भवाग्रे कायस्मृत्युपस्थानं भवति । न हि तत्र कायो विद्यते, कायालम्बना हि प्रज्ञा कायस्मृत्युपस्थानम्, न च भवाग्रं कामधातुं रूपधातुं चालम्बते; "न मौलाः कुशलारूप्याः सास्रवाधरगोचराः" (अभि० को० ८.२१) इति सिद्धान्तात् ?

नैतत् केनचिद् *व्याख्याकारेण* लिखितम्, तदिदमत्र व्यवस्थापयामः— कायस्य कः स्वभाव ? भौतिकत्वमित्युक्तम् । भूतं भौतिकं च काय इत्यर्थः । तत्र यदि केवलभूतालम्बना, केवलभौतिकालम्बना, तदुभयालम्बना वा प्रज्ञा भवेत्, कायस्मृत्युपस्थानमेव तद्भवेत् । भवाग्रे च कुशलसास्रवा प्रज्ञा मार्गत इति न्यायत इति वानास्रवसंवरमार्गालम्बनत इति । सास्रवाधरालम्बना हि मौलाः कुशलारूप्या नेष्यन्ते । न त्वनास्रवाधरालम्बना इति । अतस्तदत्र कायस्मृत्युपस्थानं वेदितव्यम् ।

लाभो मार्गाभिसमये बुद्धतत्सङ्घयोरपि ।

दुःखसमुदयनिरोधसत्यान्यभिसमयन् धर्मे चावेत्यप्रसादमार्यकान्तानि च शीलानि प्रतिलभते ॥ ७३ ॥

मार्गसत्यमभिसमयन् बुद्धे तस्य च श्रावकसङ्घेऽवेत्यप्रसादं प्रतिलभते । यो हि तयोः प्रसादः सोऽशैक्ष्येषु बुद्धकरकेषु धर्मेषु शैक्षाशैक्षेषु च सङ्घकरकेषु प्रसादः । अपिशब्दाच्छीलधर्मावेत्यप्रसादौ च प्रतिलभते ।

कोऽयमिह धर्मोऽभिप्रेतः ?

धर्मः सत्यत्रयं बोधिसत्त्वप्रत्येकबुद्धयोः ॥ ७४ ॥

मार्गश्च,

अतश्चत्वार्यपि सत्यान्यभिसमयतो धर्मेऽवेत्यप्रसादलाभः[1] । सैव श्रद्धा अधिष्ठानभेदान्नामतश्चत्वारोऽवेत्यप्रसादा उच्यते[2] ॥ ७४ ॥

चत्वारोऽवेत्यप्रसादाः—बुद्धेऽवेत्यप्रसादः, धर्मे, सङ्घे च, आर्यकान्तानि च शीलानीति । तत्र दुःखसत्यादीनां धर्मत्वाद्, अबुद्धसङ्घस्वभावत्वाच्च । यथाक्रमं *सत्यत्रयमभिसमयन्* पश्यन् *धर्मे चावेत्यप्रसादमार्यकान्तानि च शीलानि* अनास्रवाणि *प्रतिलभते* । न बुद्धे न सङ्घे वा अवेत्यप्रसादम् ॥ ७३ ॥

मार्गसत्यमभिसमयतो बुद्धे तस्य च श्रावकसङ्घेऽवेत्यप्रसादं प्रतिलभते । मार्गसत्यस्य बुद्धसङ्घस्वभावत्वात् ।

कोऽयमिह धर्मोऽभिप्रेत इति । बहवो धर्माः कुशला धर्मा इत्येवमादयः, तत् कोऽयमिह धर्मोऽभिप्रेतः, यदुक्तं धर्मे चावेत्यप्रसादं प्रतिलभत इति अथ वा बुद्धरत्नं, सङ्घरत्नं चेदमुच्यते, तस्मादिदमपि धर्मरत्नमिहाभिप्रेतं भवेत्, रत्नत्रयस्य ह्ययं स्वभाव उक्तः,

"बुद्धसङ्घकरान् धर्मानशैक्षानुभयाँश्च सः ।
निर्वाणं चेति शरणं यो याति शरणत्रयम् ॥" (अभि० को० ४.३३)

इति, तत् किमयं निर्वाणधर्मोऽभिप्रेतः ? पृच्छति—*कोऽयमिह धर्मोऽभिप्रेत* इति ।

"*धर्मः सत्यत्रयम्*" इति विस्तरः । दुःखसमुदयनिरोधसत्यानि । बोधिसत्त्वस्य च शैक्षावस्थायामनास्रवो मार्गः । प्रत्येकबुद्धस्य च शैक्षाशैक्षलक्षणो

---

१. धर्मावेत्य—का० । २. उच्यन्ते—का० ।

द्रव्यतस्तु द्वे श्रद्धा शीलं च,

बुद्धधर्मसङ्घावेत्यप्रसादाः श्रद्धास्वभावाः, आर्यकान्तानि च शीलानि शीलमिति द्वे द्रव्ये भवतः ।

किं पुनरेते सास्रवानास्रवा एकान्तेनावेत्यप्रसादाः ?

निर्मलाः ।

अवेत्यप्रसादा इति कोऽर्थः ? यथाभूतसत्यान्यवबुध्य सम्प्रत्ययोऽवेत्यप्रसादः । यथा तु[1] व्युत्थितः सम्मुखीकरोति तथैषामानुपूर्वम्[2] ।

कथं व्युत्थितः सम्मुखीकरोति ? सम्यक्सम्बुद्धो बत भगवान्, स्वाख्यातोऽस्य धर्मविनयः, सुप्रतिपन्नोऽस्य श्रावक सङ्घ इति; वैद्यभैषज्योपस्थायकभूतत्वात् । चित्तप्रसादकृतः[3] शीलप्रसाद इत्युच्यते चतुर्थ उक्तः । एवं प्रसन्नस्यैषा प्रतिपत्तिरिति; आरोग्यभूतत्वाद्वा, दैशिकमार्गसार्थिकयानवद्वा[4] ।

मार्गो धर्म इहाभिप्रेत इति । *अतश्चत्वार्यपीति* विस्तरः । मार्गसत्यमप्यभिसमयन् धर्ममपि बोधिसत्त्वप्रत्येकबुद्धमार्गलक्षणमभिसमयति । तस्माच्चत्वार्यपि सत्यान्यभिसमयतो धर्मेऽवेत्यप्रसादलाभ इत्युक्तमिति । बुद्धसङ्घयोर्मार्गो धर्म इति नोच्यते । यस्मात् तदभिसमयतो बुद्धे सङ्घे चावेत्यप्रसादलाभ इति । कथं पुनर्मार्गसत्याभिसमयतः श्रद्धालक्षणानां त्रयाणां बुद्ध-धर्म-सङ्घावेत्यप्रसादानां युगपत् सम्मुखीभाव ? *सैव श्रद्धा अधिष्ठानभेदापेक्षया* नामत्रयं लभत इत्यदोषः । अथ वा धर्मेऽवेत्यप्रसादो वर्तमानः । अनागतास्तु त्रयो भाव्यन्ते । तेनोच्यते—

"लाभो मार्गाभिसमये बुद्धतत्सङ्घयोरपि" इति (अभि० को० ६.७४) ॥७४॥

यद्यधिष्ठानापेक्षयावेत्यप्रसादव्यवस्थानम्, धर्मावेत्यप्रसाद पूर्वं पठितव्यः स्यादित्यत आह—*यथा तु व्युत्थितः सम्मुखीकरोति* । *तथैषामानुपूर्वमिति* । *वैद्यभैषज्योपस्थायकभूतत्वादिति* । वैद्यभूतो भगवाननुत्तरो भिषक्[5] शल्यहर्तेति सूत्रात् । धर्मभैषज्यदैशिकत्वाच्च । भैषज्यभूतो धर्मः क्लेशव्याधिभैषज्यत्वात् निर्वाणारोग्यसम्प्रापकत्वाच्च । उपस्थायकभूतः सङ्घो निर्वाणारोग्यप्राप्तये परस्परोपस्थानात् । *चित्तप्रसादकृतः शीलप्रसाद* इति । त्रिविधश्चित्तप्रसादः—

---

१. च—का० । २. ०मानुपूर्वीम्—का० । ३. ०कृतश्च—का० ।
४. देशिक०—का० । ५. विषक्—जा० ।

सूत्र उक्तम्—"अष्टाभिरङ्गैः समन्वागतः शैक्षः, दशभिरङ्गैः समन्वागतोऽशैक्षः" इति। कस्माच्छैक्षस्य सम्यग्विमुक्तिः सम्यग्ज्ञानं च नोक्तम् ?

नोक्ता विमुक्तिः शैक्षाङ्गं बद्धत्वात्,

बद्धो हि शैक्षः क्लेशबन्धनैरद्यापीति।

कथं बद्धस्यैव सतो विमुक्तिर्व्यवस्थाप्येत ? न हि बन्धनैकदेशान्मुक्तो मुक्त इत्युच्यते। विना च विमुक्त्या कथं विमुक्तिज्ञानं व्यवस्थाप्यते ! अशैक्षस्तु सर्वक्लेशबन्धनात्यन्तनिर्मोक्षाद् विमुक्तितत्प्रत्यात्मज्ञानाभ्यां प्रभावित इति तस्यैव तद्वचनं न्याय्यम्।

केयं विमुक्तिर्नाम ?

सा पुनर्द्विधा ॥ ७५ ॥

संस्कृता चासंस्कृता च ॥ ७५ ॥

सम्यक्सम्बुद्धो बत भगवान्, स्वाख्यातोऽस्य धर्मविनयः, सुप्रतिपन्नोऽस्य श्रावकसङ्घ इति। तेन कृतः शीलप्रसादः। शीलमेव प्रसादः, शीलस्य वा प्रसादोऽनास्रवत्वं शीलप्रसादः। अन्ते त्रयाणां प्रसादानां चतुर्थ उक्तः शीलप्रसादः। कस्मात् ? इत्याह - एवं प्रसन्नस्य सम्यक्सम्बुद्धो बत भगवानिति विस्तरेणैषा प्रतिपत्तिः। आर्यकान्तशीलप्रतिपत्तिरित्यर्थः। *आरोग्यभूतत्वाद्वा*। किमन्ते शीलप्रसाद उक्तः ? वैद्यभैषज्योपस्थायकारोग्यानुक्रमतः। *दैशिकमार्गसार्थिकयानवद्वा*। किम् ? अन्ते चतुर्थ उक्त इत्यधिकृतम्। दैशिकभूतो भगवान्, मार्गभूतो धर्मः, सार्थिकभूतः सङ्घः, यानभूतान्यार्यकान्तानि शीलानीति। आर्याणां कान्तानि प्रियाणीत्यार्यकान्तानीति[1]।

अष्टाभिरिति। अष्टाभिरङ्गैः समन्वागतः शैक्षः। कतमैरष्टभिः ? शैक्ष्या सम्यग्दृष्ट्या यावच्छैक्षेण सम्यक्समाधिनेति। *दशभिरङ्गैः समन्वागतोऽशैक्षः*। कतमैर्दशभिः ? अशैक्ष्या सम्यग्दृष्ट्या, यावदशैक्षेण सम्यक्समाधिना, अशैक्ष्या सम्यग्विमुक्त्या अशैक्षेण च सम्यग्ज्ञानेनेति। *विमुक्तितत्प्रत्यात्मज्ञानाभ्यां प्रभावित* इति। तस्यां विमुक्तौ प्रत्यात्मज्ञानं तत्प्रत्यात्मज्ञानम्। विमुक्तिश्च तत्प्रत्यात्मज्ञानं च विमुक्तितत्प्रत्यात्मज्ञानम्, ताभ्यां प्रभावितः। क्लेशविमुक्त्या, क्लेशविमुक्तिप्रत्यात्मज्ञानेन च क्लेशेभ्यो विमुक्तोऽस्मीति प्रभावितः।

---

१. प्रत्याणी०—जा०।

तत्र—

असंस्कृता क्लेशहानमधिमुक्तिस्तु संस्कृता ।

क्लेशप्रहाणमसंस्कृता विमुक्तिः । अधिमोक्षः[1] संस्कृता विमुक्तिः ।

साङ्गः,

सैवासंस्कृता विमुक्तिरशैक्षाङ्गयुक्ता; अङ्गानां संस्कृतत्वात् ।

सैव विमुक्ती द्वे,

सैव संस्कृता विमुक्तिर्द्वे विमुक्ती सूत्र उक्ते—चेतोविमुक्तिः, प्रज्ञाविमुक्तिश्च । विमुक्तिस्कन्धोऽपि स एव द्रष्टव्यः ।

यत्तर्हि सूत्र उक्तम्—"कतमच्च व्याघ्रबोध्यायना विमुक्तिपरिशुद्धिप्रधानम् ? इह भिक्षवो रागाच्चित्तं विरक्तं भवति विमुक्तम्, द्वेषात्, मोहाच्चित्तं विरक्तं भवति

प्रकर्षित इत्यर्थः । *तस्यैवाशैक्षस्य तद्वचनं* विमुक्तिवचनं विमुक्तिज्ञानवचनं च । *न्याय्यम्* । न शैक्षस्येति ॥ ७५ ॥

अधिमोक्षः संस्कृता विमुक्तिरिति । धात्वर्थैकत्वात् ।

अङ्गानां संस्कृतत्वादिति । यथा सम्यग्दृष्ट्यादीनि संस्कृतानि, तथा विमुक्तिरपि संस्कृतैव गृह्यते, नासंस्कृता; विसभागत्वाद्विसदृशत्वात् ।

द्वे विमुक्ती सूत्र उक्ते इति । रागविरागाच्चेतोविमुक्तिः, अविद्याविरागात् *प्रज्ञाविमुक्तिरिति* । चेतोविमुक्तिः, प्रज्ञाविमुक्तिश्चेत्यर्थः । *विमुक्तिस्कन्धोऽपि स एवेति* । शीलस्कन्धः, समाधिस्कन्धः, प्रज्ञास्कन्धः, विमुक्तिस्कन्धः । विमुक्तिज्ञानदर्शनस्कन्धश्चेत्यत्र द्रष्टव्यः ।

यत्तर्हि सूत्र उक्तमिति । "चत्वारीमानि व्याघ्रबोध्यायाना परिशुद्धिप्रधानानि । कतमानि चत्वारि ? शीलपरिशुद्धिप्रधानम्, समाधिपरिशुद्धिप्रधानम्, दृष्टिपरिशुद्धिप्रधानम्, विमुक्तिपरिशुद्धिप्रधानं च"( ) इति विस्तरेणोक्त्वाह—*कतमच्च व्याघ्रबोध्यायना विमुक्तिपरिशुद्धिप्रधानम्* । यावद् यश्छन्दो वीर्यमिति विस्तरः । व्याघ्रबोध्यायना इति बहुवचनम्; तेषां बहुत्वात् । विमुक्तिपरिशुद्धिप्रधानमिति । विमुक्तेः परिशुद्धिः विमुक्तिपरिशुद्धिः, तस्यै प्रधानं विमुक्तिपरिशुद्धिप्रधानम् । तदेवमत्र विमुक्तिपरिशुद्धिप्रधान इति प्रश्नत्रयम् । तत्र

१. अशैक्षाधिमोक्षः—का० ।

विमुक्तमित्यपरिपूर्णस्य वा विमुक्तिस्कन्धस्य परिपूरये परिपूर्णस्य वानुग्रहाय[1] यश्छन्दो[2] वीर्यम्" इति विस्तरः । तस्मान्नाधिमोक्ष एव विमुक्तिः । किं तर्हि ? तत्त्वज्ञानापनीतेषु रागादिषु चेतसो वैमल्यं विमुक्तिरित्यपरे ।

उक्ता विमुक्तिः ॥

सम्यग्ज्ञानं तु सम्यग्दृष्टिः । व्यतिरिक्तं कतमत् ?

ज्ञानं बोधिर्यथोदिता ।। ७६ ।।

यैव हि पूर्वं बोधिरुक्ता सैवेह सम्यग्ज्ञानं वेदितव्यम् । यदुत क्षयज्ञानम्, अनुत्पादज्ञानं च ॥ ७६ ॥

कतमत् पुनश्चित्तं विमुच्यते—किमतीतम्, अनागतम्, प्रत्युत्पन्नम् ?

विमुच्यते जायमानमशैक्षं[3] चित्तमावृतेः ।

"अनागतं चित्तमुत्पद्यमानं विमुच्यते अशैक्षमावरणेभ्यः"इति **शास्त्रपाठः** । किं पुनस्तस्यावरणम् ? क्लेशप्राप्तिः, तदुत्पत्तिविबन्धत्वात् । वज्रोपमे हि समाधौ सा च प्रहीयते । तच्चोत्पद्यमानमशैक्षं चित्तं विमुच्यते । सा च प्रहीणा भवति । तच्चाशैक्षं चित्तमुत्पन्नं विमुक्तं च । यत्तर्हि नोत्पद्यमानं लौकिकं वा[4], तदपि विमुच्यते । यत्तु नियतमुत्पत्तौ तदेवोक्तम् ।

इह *भिक्षो रागाच्चित्तं विरक्तं भवति विमुक्तम्* । *द्वेषात् मोहाद्विरक्तं भवति विमुक्तम्* । विमुक्तिरुक्ता । *इत्यपरिपूर्णस्य वा विमुक्तिस्कन्धस्य परिपूरये । परिपूर्णस्य वानुग्रहायेति*[5] । विमुक्तिपरिशुद्धिः परिपूर्यनुग्रहलक्षणोक्ता । *यश्छन्दो वीर्यमिति* विस्तरेण प्रधानमुक्तम् । यत एवं रागादिभ्यो विमुक्तिः प्रहाणमित्येवंलक्षणा विमुक्तिरुक्ता । सूत्रे नाधिमुक्तिः; *तस्मान्नाधिमोक्ष एव विमुक्तिः । किं तर्हि ? तत्त्वज्ञानापनीतेषु रागादिषु चेतसो वैमल्यमनास्रवत्वमनर्थान्तरभूतं घृतमण्डस्वच्छतावदिति* । *अपरे* इति । आचार्यः ।। ७६ ।।

तदुत्पत्तिविबन्धत्वादिति । तस्याशैक्षस्य चित्तस्योत्पत्तौ विबन्धत्वात् । क्लेशप्राप्तिर्हि विबन्धः । *यत्तर्हि नोत्पद्यमानमिति* । यदनागतं वज्रोपमात् समाधेरनन्तरं भवत्यशैक्षमेव । *लौकिकं* वेत्यशैक्षसन्तान एव यल्लौकिकम् ।

---

१. वानु०—का० । २. च्छन्दो—का० । ३. °मानमशैक्षं—का० ।
४. च—का० । ५. °नुग्रहायायेति—जा० ।

लौकिकं कुतो विमुच्यते ? तत **एवोत्पत्त्यावरणात्** ।

ननु चामुक्तस्यापि शैक्षस्य लौकिकमुत्पद्यते ? न तत्तादृशम् । कीदृशं तत् ? क्लेशप्राप्तिसहितम् ।

किमवस्थो मार्गस्तदुत्पत्त्यावरणं प्रजहाति ?

निरुध्यमानो मार्गस्तु प्रजहाति[1] तदावृतिम् ॥ ७७ ॥

वर्तमान इत्यर्थः ॥ ७७ ॥

या चासंस्कृता विमुक्तिरुक्ता, ये च त्रयो धातव उच्यन्ते—प्रहाणधातुः, विरागधातुः, निरोधधातुरिति, क एषां विशेषः ?

असंस्कृतैव धात्वाख्या,

सैवासंस्कृता विमुक्तिस्त्रयो धातवः । तत्र पुनः—

विरागो रागसंक्षयः ।

रागस्य प्रहाणं विरागधातुः ।

यत्तु नियतमुत्पत्तौ तदेवोक्तमिति । यदुत्पादाभिमुक्तमनागतम् तदेवोक्तं शास्त्रे विमुच्यत इति । तद्विमुच्यमानतया सूपलक्ष्यत्वादित्यभिप्रायः ।

तत एवोत्पत्त्यावरणादिति । तत एव क्लेशप्राप्तिः । तदुत्पत्तिविबन्धादिति तदेवात्र कारणं वक्तव्यम् । यद्यशैक्षसन्तानलौकिकमपि विमुच्यत इत्यभ्युपगम्यते, शैक्षस्यापि लौकिकमुत्पद्यते । कस्मान्न विमुच्यत इत्यभ्युपगम्यते ? अत आह—*न तत्तादृशमित्यादि* । क्लेशप्राप्तिसहितं तच्छैक्षस्य लौकिकम्, न त्वशैक्षस्य लौकिकमेवं भवतीत्यसाम्यम् ।

"*निरुध्यमानः*" इति । निरोधाभिमुक्तः ।

"*तदावृतिम्*" इति । अशैक्षचित्तावरणम् ॥ ७७ ॥

या चासंस्कृता विमुक्तिरुक्ता शास्त्रे, इहैव वा "असंस्कृता क्लेशहानम्" (अभि० को० ६.७६) इति । *ये च त्रयो धातव उच्यन्ते* । क्वोच्यन्ते ? सूत्रे, शास्त्रेऽपि वा ।

"*विरागो रागसंक्षयः*" इति । भेदविवक्षायामेवमुच्यते । अभेदविवक्षायां तु यो विरागः तत्प्रहाणमप्युच्यते, निरोधोऽपीत्यादि ।

---

१. प्रहजहाति—का० ।

प्रहाणधातुरन्येषां,

'संक्षयः' इति वर्तते । रागादन्येषां क्लेशानां प्रहाणं प्रहाणधातुः ।

निरोधाख्यस्तु वस्तुनः ॥ ७८ ॥

'संक्षयः' इत्येवानुवर्तते । क्लेशनिर्मुक्तस्य वस्तुनः प्रहाणं निरोधधातुः । येन वस्तु निर्विद्यते, विरज्यतेऽपि तेन वस्तुना । चतुष्कोटिकः[२] ॥ ७८ ॥

कथं कृत्वा ?

निर्विद्यते दुःखहेतुक्षान्तिज्ञानैः,

दुःखे समुदयक्षान्तिज्ञानैरेव निर्विद्यते, नान्यैः ।

विरज्यते ।

सर्वैर्जहाति यैः,

सर्वैरपि दुःखसमुदयनिरोधमार्गक्षान्तिज्ञानैर्विरज्यते, यैः क्लेशान् प्रजहाति ।

एवं चतुष्कोटिकसम्भवः ॥ ७९ ॥

एवं चतुष्कोटिकं सिध्यति—१. निर्विद्यत एव, दुःखसमुदयक्षान्तिज्ञानैः क्लेशान् प्रजहत्; निर्वेदवस्त्वालम्बनत्वात् । २. विरज्यत एव, निरोधमार्गक्षान्ति-

---

"*वस्तुनः*" इति । सास्रवस्य रूपादेः । *चतुष्कोटिक* इति । स्यान्निर्विद्यते न वर्ज्यते, स्याद्विरज्यते न निर्विद्यते, स्यादुभयम्, स्यान्नोभयमिति ॥ ७८ ॥

"*निर्विद्यते दुःखहेतुक्षान्तिज्ञानैः*" इति । अनेन वस्तुहेतुकं निर्वेदं दर्शयति ।

"*विरज्यते, सर्वैर्जहाति यैः*" इति । प्रहाणक्रियाहेतुकं विरागं दर्शयति । *एवं चतुष्कोटिकं सिध्यतीति* । एवं निर्वेदविरागकारणं परिच्छिद्य योज्यम् । अनेन चतुष्कोटिकं सिध्यतीत्यभिप्रायः । कथम् ? इत्याह—*निर्विद्यत एवेति* विस्तरः । *निर्विद्यत एव, दुःखसमुदयक्षान्तिभिर्दुःखसमुदयज्ञानैश्च निर्वेदवस्त्वालम्बनत्वात्* । दुःखसमुदयौ हि निर्वेदस्य वस्तुनी आलम्बनमिति । न विरज्यते; *क्लेशानप्रजहदिति* वचनेन प्रहाणक्रियाया असम्भवात् । विरज्यत एव *निरोधमार्गक्षान्तिभिर्दर्शनमार्गे* । *निरोधमार्गज्ञानैर्भावनामार्गे* । *क्लेशान्प्रजहदिति* ।

---

२. चतुष्कोटिकम्—का० ।

ज्ञानैः क्लेशान् प्रजहत्; प्रामोद्यवस्त्वालम्बनत्वात् । ३. उभयम्, पूर्वैः क्लेशान् प्रजहत् । ४. नोभयम्, उत्तरैः क्लेशानप्रजहदिति ।

तत्र वीतरागः सत्यानि पश्यन् धर्मज्ञानक्षान्तिभिः क्लेशान्न प्रजहाति । ज्ञानैस्तु प्रयोगविमुक्तिविशेषमार्गैर्न[1] प्रजहातीति ॥ ७९ ॥

अभिधर्मकोशभाष्ये मार्गपुद्गलनिर्देशो नाम

षष्ठं कोशस्थानं समाप्तमिति[2]

प्रहाणक्रियासम्भवात् । न निर्विद्यते; *प्रामोद्यवस्त्वालम्बनत्वात्।* निर्वाणमार्गौ हि प्रामोद्यवस्तुनी आलम्बनमिति । उभयपूर्वैः क्लेशान्प्रजहदिति *निर्विद्यते* च *विरज्यते* च पूर्वैर्दुःखसमुदयक्षान्तिज्ञानैः । कथम् ? निर्विद्यते, निर्वेदवस्त्वालम्बनत्वात् । विरज्यते, क्लेशान्प्रजहदिति वचनेन प्रहाणक्रियासम्भवात् । *नोभयमुत्तरैः* क्लेशानप्रजहदिति । न च निर्विद्यते । उत्तरैर्निरोधमार्गक्षान्तिज्ञानैः प्रामोद्यवस्त्वालम्बनत्वात् न निर्विद्यते । क्लेशानप्रजहदिति वचनेन प्रहाणक्रियाया अभावात् न विरज्यते ।

आह—अपदिष्टं प्रथमायां कोट्यां चतुर्थ्यां च क्लेशानप्रजहदिति । कः कान् क्लेशान्न प्रजहाति ? *तत्र वीतराग* इति विस्तरः । तत्रार्थोपक्षेपार्थम् । वीतरागः कामधातोर्यावदाकिञ्चन्यायतनादपि । *सत्यानि पश्यन्*नभिसमयन् । *धर्मज्ञानक्षान्तिभि*र्धर्मज्ञानैर्धर्मज्ञानक्षान्तिभिश्च *क्लेशान्न प्रजहाति* । लौकिकेन भावनामार्गेण पूर्वं प्रहीणत्वात् । अनास्रवा तु केवलं विसंयोगप्राप्तिरुत्पद्यते । अन्वयज्ञानक्षान्तिभिस्त्ववश्यं क्लेशान्प्रजहाति । न हि लौकिकेन मार्गेण भवाग्रवैराग्यमस्ति । ज्ञानैस्तु भावनामार्गे । *प्रयोगविमुक्तिविशेषमार्गैरा*नन्तर्यमार्गैरपि च कैश्चिदिन्द्रियसञ्चाराद्यवस्थासु न *क्लेशान् प्रजहाति* । केऽवशिष्यन्ते ? तदन्ये आनन्तर्यमार्गास्तैः क्लेशान् प्रजहातीति सिद्धम् ॥७९॥

आचार्ययशोमित्रकृतायां स्फुटार्थायाम्

अभिधर्मकोशव्याख्यायां षष्ठं

कोशस्थानं समाप्तम्

---

१. °मार्गसंगृहीतैः—का० । २. ०श्रीलामावाकस्य यदत्र पुण्यम्—का० ।

परिशिष्टम्

अभिधर्मकोशस्य मूलपाठः

पञ्चमं कोशस्थानम्

(अनुशयनिर्देशः)

मूलं भवस्यानुशयाः षड्, रागः प्रतिघस्तथा।
मनोऽविद्या च दृष्टिश्च विचिकित्सा च ते पुनः ।। १ ।।
षड् रागभेदाः सप्तोक्ताः, भवरागो द्विधातुजः।
अन्तर्मुखत्वात् तन्मोक्षसंज्ञाव्यावृत्तये कृतः ।। २ ।।
दृष्टयः पञ्च सत्कायमिथ्यान्तग्राहदृष्टयः।
दृष्टिशीलव्रतपरामर्शाविति पुनर्दश ।। ३ ।।
दशैते सप्त सप्ताष्टौ त्रिद्विदृष्टिविवर्जिताः।
यथाक्रमं प्रहीयन्ते कामे दुःखादिदर्शनैः ।। ४ ।।
चत्वारो भावनाहेयाः, त एवाप्रतिघाः पुनः।
रूपधातौ, तथारूप्ये इत्यष्टानवतिर्मता ।। ५ ।।
भवाग्रजाः क्षान्तिवध्या दृग्घेया एव शेषजाः।
दृग्भावनाभ्यामक्षान्तिवध्या भावनयैव तु ।। ६ ।।
आत्मात्मीयध्रुवोच्छेदनास्तिहीनाग्रदृष्टयः।
अहेत्वमार्गे तद्दृष्टिरेतास्ताः पञ्च दृष्टयः ।। ७ ।।
ईश्वरादिषु नित्यात्मविपर्यासात् प्रवर्तते।
कारणाभिनिवेशोऽतो दुःखदृग्घेय एव सः ।। ८ ।।
दृष्टित्रयाद् विपर्यासचतुष्कं विपरीततः।
नितीरणात् समारोपात्, संज्ञाचित्ते तु तद्वशात् ।। ९ ।।
सप्त माना नवविधास्त्रिभ्यो दृग्भावनाक्षयाः।
वधादिपर्यवस्थानं हेयं भावनया तथा ।। १० ।।
विभवेच्छा न चार्यस्य सम्भवन्ति विधादयः।
नास्मिता दृष्टिपुष्टत्वात् कौकृत्यं नापि चाशुभम् ।। ११ ।।
सर्वत्रगा दुःखहेतुदृग्घेया दृष्टयस्तथा।
विमतिः सह ताभिश्च याऽविद्याऽऽवेणिकी च या ।। १२ ।।
नवोर्ध्वालम्बना एषां दृष्टिद्वयविवर्जिताः।
प्राप्तिवर्ज्याः सहभुवो येऽप्येभिस्तेऽपि सर्वगाः ।। १३ ।।
मिथ्या दृग्विमती ताभ्यां युक्ताऽविद्याथ केवला।

निरोधमार्गदृग्घेयाः षडनास्रवगोचराः ॥ १४ ॥
स्वभूम्युपरमो मार्गः षड्भूमिनवभूमिकः ।
तद्गोचराणां विषयो मार्गो ह्यन्योन्यहेतुकः ॥ १५ ॥
न रागस्तस्य वर्ज्यत्वात्, न द्वेषोऽनपकारतः ।
न मानो न परामर्शौ शान्तशुद्ध्यग्रभावतः ॥ १६ ॥
सर्वत्रगा अनुशयाः सकलामनुशेरते ।
स्वभूमिमालम्बनतः स्वनिकायमसर्वगाः ॥ १७ ॥
नानास्रवोर्ध्वविषयाः, अस्वीकाराद् विपक्षतः ।
येन यः सम्प्रयुक्तस्तु स तस्मिन् सम्प्रयोगतः ॥ १८ ॥
ऊर्ध्वमव्याकृताः सर्वे कामे सत्कायदर्शनम् ।
अन्तग्राहः सहाभ्यां च मोहः, शेषास्त्विहाशुभाः ॥ १९ ॥
कामेऽकुशलमूलानि रागप्रतिघमूढयः ।
त्रीण्यकुशलमूलानि तृष्णाऽविद्या मतिश्च सा ॥ २० ॥
द्वेधोर्ध्ववृत्तेर्नातोऽन्यौ, चत्वार्येव च बाह्यकाः ।
तृष्णादृङ्मानमोहास्ते, ध्यायित्रित्वादविद्यया ॥ २१ ॥
एकांशतो व्याकरणं विभज्य परिपृच्छ्य च ।
स्थाप्यं च मरणोत्पत्तिविशिष्टात्मान्यतादिवत् ॥ २२ ॥
रागप्रतिघमानैः स्यादतीतप्रत्युपस्थितैः ।
यत्रोत्पन्नाप्रहीणास्ते तस्मिन् वस्तुनि संयुताः ॥ २३ ॥
सर्वत्रानागतैरेभिर्मानसैः स्वाध्विकैः परैः ।
अजैः सर्वत्र, शेषैस्तु सर्वैः सर्वत्र संयुतः ॥ २४ ॥
सर्वकालास्तितोक्तत्वात्, द्वयात्, सद्विषयात्, फलात् ।
तदस्तिवादात् सर्वास्तिवादाः इष्टाश्चतुर्विधाः ॥ २५ ॥
ते भावलक्षणावस्थाऽन्यथाऽन्यथिकसंज्ञिताः ।
तृतीयः शोभनोऽध्वानः कारित्रेण व्यवस्थिताः ॥ २६ ॥
किं विघ्नं तत् कथं नान्यत्, अध्वायोगस्तथा सतः ।
अजातनष्टता केन, गम्भीरा खलु धर्मता ॥ २७ ॥
प्रहीणे दुःखदृग्घेये संयुक्तः सर्वशेषगैः ।
प्राक् प्रहीणे प्रकारे च शेषैस्तद्विषयैर्मलैः ॥ २८ ॥
दुःखहेतुदृगभ्यासप्रहेयाः कामधातुजाः ।
स्वकत्रयैकरूपाप्तमलविज्ञानगोचराः ॥ २९ ॥
स्वकाधरत्रयोर्ध्वैकामलाना रूपधातुजाः ।
आरूप्यजास्त्रिधात्वाप्तत्रयानास्रवगोचराः ॥ ३० ॥

निरोधमार्गदृग्घेयाः सर्वस्वाधिकगोचराः ।
अनास्रवास्त्रिधात्वन्त्यत्रयानास्रवगोचराः ॥ ३१ ॥
द्विधा सानुशयं क्लिष्टमक्लिष्टमनुशायकैः ।
मोहाकाङ्क्षा, ततो मिथ्यादृष्टिः सत्कायदृक् ततः ॥ ३२ ॥
ततोऽन्तग्रहणं तस्माच्छीलामर्शस्ततो दृशः ।
रागः स्वदृष्टौ मानश्च, द्वेषोऽन्यत्रेत्यनुक्रमः ॥ ३३ ॥
अप्रहीणादनुशयाद् विषयात् प्रत्युपस्थितात् ।
अयोनिशोमनस्कारात् क्लेशः सम्पूर्णकारणः ॥ ३४ ॥
कामे सपर्यावस्थानाः क्लेशाः कामास्रवो विना ।
मोहेनानुशया एव रूपारूप्ये भवास्रवः ॥ ३५ ॥
अव्याकृतान्तर्मुखा हि ते समाहितभूमिकाः ।
अत एकीकृता मूलमविद्येत्यास्रवः पृथक् ॥ ३६ ॥
तथौघयोगा दृष्टीनां पृथग्भावस्तु पाटवात् ।
नास्रवेष्वमहायानां न किलास्यानुकूलता ॥ ३७ ॥
यथोक्ता एव साऽविद्या द्विधा दृष्टेर्विवेचनात् ।
उपादानान्यविद्या तु ग्राहिका नेति मिश्रिता ॥ ३८ ॥
अणवोऽनुगताश्चैते द्विधा चाप्यनुशेरते ।
अनुबध्नन्ति यस्माच्च तस्मादनुशयाः स्मृताः ॥ ३९ ॥
आसयन्त्यास्रवन्त्येते हरन्ति श्लेषयन्त्यथ ।
उपगृह्णन्ति चेत्येषामास्रवादिनिरुक्तयः ॥ ४० ॥
संयोजनादिभेदेन पुनस्ते पञ्चधोदिताः ।
द्रव्यामर्शनसामान्याद् दृष्टि संयोजनान्तरम् ॥ ४१ ॥
एकान्ताकुशलं यस्मात् स्वतन्त्रं चोभयं यतः ।
ईर्ष्यामात्सर्यमेषूक्तं पृथक् संयोजनद्वयम् ॥ ४२ ॥
पञ्चधावरभागीयं द्वाभ्यां कामानतिक्रमः ।
त्रिभिस्तु पुनरावृत्तिर्मुखमूलग्रहात् त्रयम् ॥ ४३ ॥
अगन्तुकामता मार्गविभ्रमो मार्गसंशयः ।
इत्यन्तराया मोक्षस्य गमनेऽतस्त्रिदेशना ॥ ४४ ॥
पञ्चधैवोर्ध्वभागीयं द्वौ रागौ रूप्यरागिजौ ।
औद्धत्य-मान-मोहाश्च विद्वशाद् बन्धनत्रयम् ॥ ४५ ॥
येऽप्यन्ये चैतसाः क्लिष्टाः संस्कारस्कन्धसंज्ञिताः ।
क्लेशेभ्यस्तेऽप्युपक्लेशास्ते तु न क्लेशसंज्ञिताः ॥ ४६ ॥

आह्रीक्यमनपत्राप्यमीर्ष्या मात्सर्यमुद्धवः ।
कौकृत्यं स्त्यानमिद्धं च पर्यवस्थानमष्टधा ॥ ४७ ॥
क्रोधम्रक्षौ च रागोत्था आह्रीक्यौद्धत्य-मत्सराः ।
म्रक्षे विवादोऽविद्यातः स्त्यानमिद्धानपत्रपाः ॥ ४८ ॥
कौकृत्यं विचिकित्साजं क्रोधेर्ष्ये प्रतिघान्वये ।
अन्ये च षट् क्लेशमला माया शाठ्यं मदस्तथा ॥ ४९ ॥
प्रदाश उपनाहश्च विहिंसा चेति रागजौ ।
माया-मदौ प्रतिघजे उपनाह-विहिंसने ॥ ५० ॥
दृष्ट्यामर्शात् प्रदाशस्तु शाठ्यं दृष्टिसमुत्थितम् ।
तत्राह्रीक्यानपत्राप्यस्त्यानमिद्धोद्धवा द्विधा ॥ ५१ ॥
तदन्ये भावनाहेयाः स्वतन्त्राश्च तथा मलाः ।
कामेऽशुभास्त्रयो द्वेधा, परेणाव्याकृतास्ततः ॥५२ ॥
माया शाठ्यं च कामाद्यध्यानगोर्ब्रह्मवञ्चनात् ।
स्त्यानौद्धत्यमदा धातुत्रयेऽन्ये कामधातुजाः ॥ ५३ ॥
समानमिद्धा दृग्घेया मनोविज्ञानभूमिकाः ।
उपक्लेशाः स्वतन्त्राश्च षड्विज्ञानश्रयाः परे ॥ ५४ ॥
सुखाभ्यां सम्प्रयुक्तो हि रागो द्वेषो विपर्ययात् ।
मोहः सर्वैस्सदृदृष्टिर्मनोदुःखसुखेन तु ॥ ५५ ॥
दौर्मनस्येन काङ्क्षान्ये सौमनस्येन कामजाः ।
सर्वेऽप्युपेक्षया स्वैः स्वैर्यथाभूम्यूर्ध्वभूमिकाः ॥ ५६ ॥
दौर्मनस्येन कौकृत्यमीर्ष्या क्रोधो विहिंसनम् ।
उपनाहः प्रदाशश्च, मात्सर्यं तु विपर्ययात् ॥ ५७ ॥
माया शाठ्यमथो म्रक्षो मिद्धं चोभयथा, मदः ।
सुखाभ्यां सर्वगोपेक्षा चत्वार्यन्यानि पञ्चभिः ॥ ५८ ॥
कामे निवरणान्येकविपक्षाहारकृत्यतः ।
द्व्येकता, पञ्चता स्कन्धविघातविचिकित्सनात् ॥ ५९ ॥
आलम्बनपरिज्ञानात्, तदालम्बनसंक्षयात् ।
आलम्बनप्रहाणाच्च, प्रतिपक्षोदयात् क्षयः ॥ ६० ॥
प्रहाणाधारदूरत्वदूषणाख्यश्चतुर्विधः ।
प्रतिपक्षः, प्रहातव्यः क्लेश आलम्बनान्मतः ॥ ६१ ॥
वैलक्षण्याद् विपक्षत्वाद् देशविच्छेदकालता ।
भूतशीलप्रदेशाध्वद्वयानामिव दूरता ॥ ६२ ॥

सकृत् क्षयो विसंयोगलाभस्तेषां पुनः पुनः ।
प्रतिपक्षोदयफलप्राप्तीन्द्रियविवृद्धिषु ॥ ६३ ॥
परिज्ञा नव, कामाद्यप्रकारद्वयसंक्षयः ।
एका, द्वयोः क्षये द्वे ते, तथोर्ध्वं तिस्र एव ताः ॥ ६४ ॥
अन्या अवरभागीयरूपसर्वास्रवक्षयाः ।
तिस्रः परिज्ञाः, षट्क्षान्तिफलं ज्ञानस्य शेषिताः ॥ ६५ ॥
अनागम्यफलं सर्वा ध्यानानां पञ्च वाऽथ वा ।
अष्टौ, सामन्तकस्यैका, मौलारूप्यत्रयस्य च ॥ ६६ ॥
आर्यमार्गस्य सर्वा द्वे लौकिकस्यान्वयस्य च ।
धर्मज्ञानस्य तिस्रस्तु, षट् तत्पक्षस्य पञ्च वा ॥ ६७ ॥
अनास्रववियोगाप्तेर्भवाग्रावंकलीकृतेः ।
हेतुद्वयसमुद्घातात् परिज्ञा धात्वतिक्रमात् ॥ ६८ ॥
नैकया पञ्चभिर्यावद् दर्शनस्थः समन्वितः ।
भावनास्थः पुनः षड्भिरेकया वा द्वयेन वा ॥ ६९ ॥
तासां संकलनं धातुवैराग्यफललाभतः ।
एकां द्वे पञ्च षट् कश्चिज्जहात्याप्नोति पञ्च न ॥ ७० ॥

षष्ठं कोशस्थानम्

(मार्ग-पुद्गलनिर्देशः)

क्लेशप्रहाणमाख्यातं सत्यदर्शनभावनात् ।
द्विविधो भावनामार्गो दर्शनाख्यस्त्वनास्रवः ॥ १ ॥
सत्यान्युक्तानि चत्वारि दुःखं समुदयस्तथा ।
निरोधमार्ग इत्येषां यथाभिसमयं क्रमः ॥ २ ॥
दुःखास्त्रिदुःखतायोगाद् यथायोगमशेषतः ।
मनापा अमनापाश्च तदन्ये चैव सास्रवाः ॥ ३ ॥
यत्र भिन्नेन तद्बुद्धिरन्यापोहे धिया च तत् ।
घटाम्बुवत् संवृतिसत्, परमार्थसदन्यथा ॥ ४ ॥
वृत्तस्थः श्रुतचिन्तावान् भावनायां प्रयुज्यते ।
नामोभयार्थविषया श्रुतमय्यादिका धियः ॥ ५ ॥
व्यपकर्षद्वयवतो नासन्तुष्टमहेच्छयोः ।
लब्धे भूयः स्पृहाऽतुष्टिरलब्धेच्छा महेच्छता ॥ ६ ॥
विपर्यासात् तद्विपक्षौ त्रिधात्वाप्तामलौ च तौ ।
अलोभ आर्यवंशाश्च, तेषां तुष्ट्यात्मकास्त्रयः ॥ ७ ॥

कर्मान्तेन त्रिभिर्वृत्तिस्तृष्णोत्पादविपक्षतः ।
ममाहङ्कारवस्त्विच्छातत्कालात्यन्तशान्तये ॥ ८ ॥
तत्रावतारोऽशुभया चानापानस्मृतेन च ।
अधिरागवितर्काणां शङ्कला सर्वरागिणाम् ॥ ९ ॥
आसमुद्रास्थिविस्तारसंक्षेपादादिकर्मिकः ।
पादास्थ्न आकपालार्धत्यागात् कृतजयः स्मृतः ॥ १० ॥
अतिक्रान्तमनस्कारो भ्रूमध्ये चित्तधारणात् ।
अलोभो दशभूः कामादृश्यालम्बा नृजाऽशुभा ॥ ११ ॥
आनापानस्मृतिः प्रज्ञा पञ्चभूर्वाय्वगोचरा ।
कामाश्रया, न वाह्यानां षड्विधा गणनादिभिः ॥ १२ ॥
आनापानौ यतः कायः सत्त्वाख्यावनुपात्तकौ ।
नैःष्यन्दिकौ नाधरेण लक्ष्येते मनसा च तौ ॥ १३ ॥
निष्पन्नशमथः कुर्यात् स्मृत्युपस्थानभावनाम् ।
कायविच्चित्तधर्माणां द्विलक्षणपरीक्षणात् ॥ १४ ॥
प्रज्ञा श्रुतादिमय्यन्ये संसर्गालम्बनात् क्रमः ।
यथोत्पत्ति चतुष्कं तु विपर्यासविपक्षतः ॥ १५ ॥
स धर्मस्मृत्युपस्थाने समस्तालम्बने स्थित. ।
अनित्यदुःखतः शून्यानात्मतस्तान् विपश्यति ॥ १६ ॥
तत ऊष्मगतोत्पत्तिस्तच्चतुःसत्यगोचरम् ।
षोडशाकारमूष्मभ्यो मूर्धानस्तेऽपि तादृशा. ॥ १७ ॥
उभयाकरणं धर्मेणान्यैरपि तु वर्धनम् ।
तेभ्यः क्षान्तिर्द्विधा तद्वत् क्षान्त्या धर्मेण वर्धनम् ॥ १८ ॥
कामाप्तदुःखविषया त्वधिमात्रा, क्षणं च सा ।
तथाग्रधर्माः सर्वे तु पञ्चस्कन्धा विनाप्तिभि. ॥ १९ ॥
इति निर्वेधभागीयं चतुर्धा भावनामयम् ।
अनागम्यान्तरध्यानभूमिकं द्वे त्वधोऽपि वा ॥ २० ॥
कामाश्रयाण्यग्रधर्मान् द्वयाश्रयान् लभतेऽङ्गना ।
भूमित्यागात् त्यजत्यार्यस्तान्यनार्यस्तु मृत्युना ॥ २१ ॥
आद्ये द्वे परिहाण्या च मौलेस्तत्रैव सत्यदृक् ।
अपूर्वाप्तिर्विहीनेषु हानी द्वे असमन्वितिः ॥ २२ ॥
मूर्धलाभी न मूलच्छित्, क्षान्तिलाभ्यनपायगः ।
शिष्यगोत्रान्निवर्त्य द्वे बुद्धः स्यात् त्रीण्यपीतरः ॥ २३ ॥

आबोधेः सर्वमेकत्र ध्यानान्त्ये शास्तृखड्गयोः ।
प्राक् तेभ्यो मोक्षभागीयं क्षिप्रं मोक्षस्त्रिभिर्भवैः ।। २४ ।।
श्रुतचिन्तामयं त्रीणि कर्माण्याक्षिप्यते नृषु ।
लौकिकेभ्योऽग्रधर्मेभ्यो धर्मक्षान्तिरनास्रवा ।। २५ ।।
कामदुःखे ततोऽत्रैव धर्मज्ञानं तथा पुनः ।
शेषे दुःखेऽन्वयक्षान्तिज्ञाने सत्यत्रये तथा ।। २६ ।।
इति षोडशचित्तोऽयं सत्याभिसमयस्त्रिधा ।
दर्शनालम्बकार्याख्यः सोऽग्रधर्मैकभूमिकः ।। २७ ।।
क्षान्तिज्ञानान्यनान्तर्यमुक्तिमार्गाः यथाक्रमम् ।
अदृष्टदृष्टेर्दृङ्मार्गस्तत्र पञ्चदश क्षणाः ।। २८ ।।
मृदुतीक्ष्णेन्द्रियौ तेषु श्रद्धाधर्मानुसारिणौ ।
अहीनभावनाहेयौ फलाद्यप्रतिपन्नकौ ।। २९ ।।
यावत् पञ्चप्रकारघ्नौ द्वितीयेऽर्वाङ् नवक्षयात् ।
कामाद् विरक्तावूर्ध्वं वा तृतीयप्रतिपन्नकौ ।। ३० ।।
षोडशे तु फलस्थौ तौ यत्र यः प्रतिपन्नकः ।
श्रद्धाधिमुक्तदृष्ट्याप्तौ मृदुतीक्ष्णेन्द्रियौ तदा ।। ३१ ।।
फले फलविशिष्टस्य लाभो मार्गस्य नास्त्यतः ।
नाप्रयुक्तो विशेषाय फलस्थः प्रतिपन्नकः ।। ३२ ।।
नवप्रकारा दोषा हि भूमौ भूमौ तथा गुणाः ।
मृदुमध्याधिमात्राणां पुनर्मृद्वादिभेदतः ।। ३३ ।।
अक्षीणभावनाहेयः फलस्थः सप्तकृत् परः ।
त्रिचतुर्विधमुक्तस्तु द्वित्रिजन्मा कुलंकुलः ।। ३४ ।।
आपञ्चमप्रकारघ्नो द्वितीयप्रतिपन्नकः ।
क्षीणषष्ठप्रकारस्तु सकृदागाम्यसौ पुनः ।। ३५ ।।
क्षीणसप्ताष्टदोषांश एकजन्मैकवीचिकः ।
तृतीयप्रतिपन्नश्च, सोऽनागामी नवक्षयात् ।। ३६ ।।
सोऽन्तरोत्पन्नसंस्कारासंस्कारपरिनिर्वृतिः ।
ऊर्ध्वस्रोताश्च स ध्याने व्यवकीर्णोऽकनिष्ठगः ।। ३७ ।।
स प्लुतोऽर्धप्लुतः सर्वच्युतश्चान्यो भवाग्रगः ।
आरूप्यगश्चतुर्धान्य इह निर्वायकोऽपरः ।। ३८ ।।
पुनस्त्रींस्त्रिविधान् कृत्वा नव रूपोपगाः स्मृताः ।
तद्विशेषः पुनः कर्मक्लेशेन्द्रियविशेषतः ।। ३९ ।।

ऊर्ध्वस्रोतुरभेदेन सप्त सद्गतयो मताः ।
सदसद्वृत्त्यवृत्तिभ्यां गताप्रत्यागतैश्च ताः ॥ ४० ॥
न परावृत्तजन्मार्यः कामे धात्वन्तरोपगः ।
स चोर्ध्वजश्च नैवाक्षसञ्चारपरिहाणिभाक् ॥ ४१ ॥
आकीर्यते चतुर्थं प्राक् निष्पत्तिक्षणमिश्रणात् ।
उपपत्तिविहारार्थं क्लेशभीरुतयापि च ॥ ४२ ॥
तत्पाञ्चविध्यात् पञ्चैव शुद्धावासोपपत्तयः ।
निरोधलाभ्यनागामी कायसाक्षी पुनर्मतः ॥ ४३ ॥
आभवाग्राष्टभागक्षिदर्हत्त्वे प्रतिपन्नकः ।
नवमस्याप्यानन्तर्यपथे वज्रोपमश्च सः ॥ ४४ ॥
तत्क्षयाप्त्या क्षयज्ञानमशैक्षोऽर्हन्नसौ तदा ।
लोकोत्तरेण वैराग्यं भवाग्रादन्यतो द्विधा ॥ ४५ ॥
लौकिकेनार्यवैराग्ये विसंयोगाप्तयो द्विधा ।
लोकोत्तरेण चेत्येके त्यक्ते क्लेशासमन्वयात् ॥ ४६ ॥
भवाग्रार्धविमुक्तोर्ध्वजातवत् त्वसमन्वयः ।
अनास्रवेण वैराग्यमनागम्येन सर्वतः ॥ ४७ ॥
ध्यानात् सामन्तकाद् वान्त्यो मुक्तिमार्गस्त्रिभूजये ।
नोर्ध्वं सामन्तकादार्यैरष्टाभिः स्वोर्ध्वभूजय. ॥ ४८ ॥
विमुक्त्यानन्तर्यपथा लौकिकास्तु यथाक्रमम् ।
शान्ताद्युदाराद्याकारा उत्तराधरगोचराः ॥४९ ॥
यद्यकोप्य. क्षयज्ञानादनुत्पादमतिर्न चेत् ।
क्षयज्ञानमशैक्षी वा दृष्टिः सर्वस्य सार्हतः ॥ ५० ॥
श्रामण्यममलो मार्गः संस्कृतासंस्कृतं फलम् ।
एकान्ननवतिस्तानि मुक्तिमार्गाः सह क्षयैः ॥ ५१ ॥
चतुष्फलव्यवस्था तु पञ्चकारणसम्भवात् ।
पूर्वत्यागोऽन्यमार्गाप्तिः क्षयसंकलनं फले ॥ ५२ ॥
ज्ञानाष्टकस्य लाभोऽथ षोडशाकारभावना ।
लौकिकाष्टं तु मिश्रत्वानास्रवाप्तिधृते फलम् ॥ ५३ ॥
ब्राह्मण्यं ब्रह्मचक्रं च तदेव ब्रह्मवर्तनात् ।
धर्मचक्रं तु दृङ्मार्गः, आशुगत्वाद्यरादिभिः ॥ ५४ ॥
कामे त्र्याप्तिरन्त्यस्य त्रिषु नोर्ध्वं हि दृक्पथः ।
असंवेगादिह विधा तत्र निष्ठेति चागमात् ॥ ५५ ॥

षडर्हन्तो मतास्तेषां पञ्च श्रद्धाधिमुक्तजाः ।
विमुक्तिः सामयिक्येषामकोप्याकोप्यधर्मणः ।। ५६ ।।
अतोऽसमयमुक्तोऽसौ दृष्टिप्राप्तान्वयश्च सः ।
तद्गोत्रा आदितः केचिन् केचिदुत्तापनागताः ।। ५७ ।।
गोत्राच्चतुर्णां पञ्चानां फलाद्धानिर्न पूर्वकात् ।
शैक्षानार्याश्च षड्गोत्रा सञ्चारो नास्ति दर्शने ।। ५८ ।।
परिहाणिस्त्रिधा ज्ञेया प्राप्ताप्राप्तोपभोगतः ।
अन्त्या शास्तुरकोप्यस्य मध्या चान्यस्य तु त्रिधा ।। ५९ ।।
म्रियते न फलभ्रष्टस्तदकार्यं करोति न ।
विमुक्त्यानन्तर्यपथा नवाकोप्येऽतिसेवनात् ।। ६० ।।
दृष्ट्याप्ततायामेकैकोऽनास्रवा नृषु वर्धनम् ।
अशैक्षो नव निश्रित्य भूमीः शैक्षस्तु षड् यतः ।। ६१ ।।
सविशेषं फलं त्यक्त्वा फलमाप्नोति वर्धयन् ।
द्वौ बुद्धश्रावकाः सप्त नवैते नवधेन्द्रियाः ।। ६२ ।।
प्रयोगाक्षसमापत्तिविमुक्त्युभयतः कृता. ।
पुद्गलाः सप्त, षट् त्वेते द्वौ द्वौ मार्गत्रये यतः ।। ६३ ।।
निरोधलाभ्युभयतोविमुक्तः प्रज्ञयेतरः ।
समापत्तीन्द्रियफलैः पूर्णः शैक्षोऽभिधीयते ।। ६४ ।।
अशैक्षपरिपूर्णत्वं द्वाभ्यां मार्गः समासतः ।
विशेषमुक्त्यानन्तर्यप्रयोगाख्यश्चतुर्विधः ।। ६५ ।।
ध्यानेषु मार्गः प्रतिपत्सुखा दुःखान्यभूमिषु ।
धन्धाभिज्ञा मृदुमतेः क्षिप्राभिज्ञेतरस्य तु ।। ६६ ।।
अनुत्पादक्षयज्ञाने बोधिस्तादनुलोम्यतः ।
सप्तत्रिंशत् तु तत्पक्ष्या नामतो द्रव्यतो दश ।। ६७ ।।
श्रद्धा वीर्यं स्मृतिः प्रज्ञा समाधिः प्रीत्युपेक्षणे ।
प्रस्रब्धि-शील-सङ्कल्पाः, प्रज्ञा हि स्मृत्युपस्थितिः ।। ६८ ।।
वीर्यं सम्यक्प्रहाणाख्यम्, ऋद्धिपादाः समाधयः ।
प्रधानग्रहणं सर्वे गुणाः प्रायोगिकास्तु ते ।। ६९ ।।
आदिकर्मिकनिर्वेधभागीयेषु प्रभाविताः ।
भावने दर्शने चैव सप्त वर्गा यथाक्रमम् ।। ७० ।।
अनास्रवाणि बोध्यङ्गमार्गाङ्गाणि द्विधेतरे ।
सकलाः प्रथमे ध्यानेऽनागम्ये प्रीतिवर्जिताः ।। ७१ ।।

द्वितीयेऽन्यत्र सङ्कल्पात् द्वयोस्तद्द्वयवर्जिताः ।
ध्यानान्तरे च शीलाङ्गैस्ताभ्यां च त्रिष्वरूपिषु ।। ७२ ।।
कामधातौ भवाग्रे च बोधिमार्गाङ्गवर्जिताः ।
त्रिसत्यदर्शने शीलधर्मावित्यप्रसादयोः ।। ७३ ।।
लाभो मार्गाभिसमये बुद्धतत्सङ्घयोरपि ।
धर्मः सत्यत्रयं बोधिसत्त्वप्रत्येकबुद्धयोः ।। ७४ ।।
मार्गश्च द्रव्यतस्तु द्वे श्रद्धा शीलं च निर्मलाः ।
नोक्ता विमुक्तिः शैक्षाङ्गं बद्धत्वात् सा पुनर्द्विधा ।। ७५।।
असंस्कृता क्लेशहानमधिमुक्तिस्तु संस्कृता ।
साङ्गः सैव विमुक्ती द्वे ज्ञानं बोधिर्यथोदिता ।। ७६ ।।
विमुच्यते जायमानमशैक्षं चित्तमावृते. ।
निरुध्यमानो मार्गस्तु प्रजहाति तदावृतिम् ।। ७७ ।।
असंस्कृतैव धात्वाख्या विरागो रागसंक्षयः ।
प्रहाणधातुरन्येषा निरोधाख्यस्य वस्तुन ।। ७८ ।।
निर्विद्यते दुःखहेतुक्षान्तिज्ञानैर्विरज्यते ।
सर्वैर्जहाति यैरेवं चतुष्कोटिकसम्भवः ।। ७९ ।।

—०—